सर्वामणिमयीभूमिः शुभ्रकांचनवालुका सर्वर्तुसुखसंस्पर्शा निष्पंकाचैनाधिप ६ देवलोकच्युताः सर्वेजायंतेतत्रमानवाः
शुक्लाभिजनसंपन्नाः सर्वेसुप्रियदर्शनाः ७ मिथुनानिचजायंतेस्त्रियश्चाप्सरसोपमाः तेषांतेक्षीरिणांक्षीरंपिबंत्यमृतसंनिभं
८ मिथुनंजायतेकालेसमंतच्चप्रवर्धते तुल्यरूपगुणोपेतंसमवेषंतथैवच ९ एवमेवानुरूपंचचक्रवाकसमंविभो निराम
याश्चतेलोकानित्यंमुदितमानसाः १० दशवर्षसहस्राणिदशवर्षशतानिच जीवंतितेमहाराजनचान्योन्यंजहत्युत ११
भारुंडानामशकुनास्तीक्ष्णातुंडामहाबलाः तान्निर्हरंतीहमृतान्दरीषुप्रक्षिपंतिहि १२ उत्तराःकुरवोराजंस्तन्माख्याता
स्तेसमासतः मेरोःपार्श्वमहंपूर्वंवक्ष्याम्यथयथातथं १३ तस्यमूर्धाभिषेकस्तुभद्राश्वस्यविशांपते भद्रशालवनंयत्रका
लाम्रश्चमहाद्रुमः १४ कालाम्रस्तुमहाराजनित्यपुष्पफलःशुभः द्रुमश्चयोजनोत्सेधःसिद्धचारणसेवितः तत्रतेपुरुषाः
श्वेतास्तेजोयुक्तामहाबलाः स्त्रियःकुमुदवर्णाश्चसुंदर्यःप्रियदर्शनाः १५ चंद्रप्रभाश्चंद्रवर्णाःपूर्णचंद्रनिभाननाः चंद्र
शीतलगात्र्यश्चनृत्यगीतविशारदाः १७

कंमुख्यमितिपावत १४ १५ १६ १७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

१८ २० योजनानामिति स्वराभ्येकादशशतानि विशेषः पंचपंचाशत् २१ एवं तानि सार्धसहस्रहयमात्मनां तत्परिणाहः फलपरिणाहः ७

दशवर्षसहस्राणि तत्रायुर्भरतर्षभ कालाम्रसवर्णाभास्ते नित्यसंस्थितयौवनाः १८ दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु सुदर्शनो नाम महान्जंबूवृक्षः सनातनः १९ सर्वकामफलः पुण्यः सिद्धचारणसेवितः तस्य नाम्ना समाख्यातो जंबूद्वीपः सनातनः २० योजनानां सहस्रं च शतं च भरतर्षभ उत्सेधो जंबुवृक्षस्य दिवस्पृगनुजेश्वर २१ अरत्नीनां सहस्रं च शतानि दशपंचच परिणाहस्तु वृक्षस्य फलानां रसभेदिनां २२ पतमानानि तान्युर्व्यां कुर्वन्ति विपुलं स्वनं मुंचन्ति च रसं राजंस्तस्मिन्रजतसंनिभं २३ तस्याजं[?] फलरसो नदी भूत्वा जनाधिप तस्मिन्फलरसं पीत्वा न जरा बाधते च तान् २४ तत्र जांबूनदं नाम कनकं देवभूषणं इंद्रगोपकसंकाशं जायते भास्वरं तु तत् २५ तरुणादित्यवर्णाश्च जायन्ते तत्र मानवाः तथा माल्यवतः शृंगे दृश्यते हव्यवाट् सदा २६ नाम्ना संवर्तको नाम कालाग्निर्भरतर्षभ तथा माल्यवतः शृंगे पूर्वपूर्वानुगंडिका २७ योजनानां सहस्राणि पंचषण्माल्यवान्स्थः महारजतसंकाशा जायन्ते तत्र मानवाः ब्रह्मलोकच्युताः सर्वे सर्वेषु साधवः २८

ग्ला॰४

रसेतरसभेदिनां कर्करीफलवलक्षतादशपांभेदशीलानां २२ २६ गंडिका क्षुद्रपर्वतः २७ पंच षट् पंचाधिकाः षट् एकादशेत्यर्थः महारजतं कांचनं तत्संकाशाः २८

म

ब्रह्मलोकेतिपरतः कर्षणात् ब्रह्मलोकं गताः स्वेन तस्युः संतोमात्म्यवतिपर्वते जनन्नध्यामतानां रश्मणार्थं तयत्नस्वा दिवाकरं प्रविशंति तिन सामीप्यं प्राप्नुवंति ३० ३१ तत्रापि ब्रह्मलोके नक्षत्रं विराट् पुरुषं बहुकालमुपास्य चंद्रमनसोधिष्ठितात् प्रविशंति सत्रालमभावं प्राप्नुवंतीत्यर्थः अध्यायः वर्षाणां १ दक्षिणेन त्विति यद्यपि श्वेतस्य दक्षिणे नीलः

तपस्तप्यंति ते तीव्रं भवंति स्म हि ते नरः। रश्मणार्थं तु भूतानां प्रविशंति दिवाकरं ३० षष्टिं चैव सहस्राणि षष्टिकोटिशतानि च अरुणस्याग्रतो यांति परिवार्य दिवाकरं ३१ षष्टिं वर्षसहस्राणि षष्टिमेव शतानि च आदित्यतापतप्तास्ते विशंति शशिमंडलं ३२ ॥ इति श्री भीष्मपर्वणि सप्तमोऽध्यायः ७ धृतराष्ट्र उवाच वर्षाणां चैव नामानि पर्वतानां च संजय आचक्ष्व मे यथातत्त्वं ये च पर्वतवासिनः संजय उवाच दक्षिणेन तु श्वेतस्य निषधस्योत्तरेण तु वर्षं रमणकं नाम जायंते तत्र मानवाः २ शुक्लाभिजनसंपन्नाः सर्वे सुप्रियदर्शनाः निःसपत्नाश्च ते सर्वे जायंते तत्र मानवाः ३ दशवर्षसहस्राणि शतानि दश पंच च जीवंति ते महाराज नित्यं मुदितमानसाः ४ दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु वर्षं हिरण्मयं नाम यत्र हैरण्वती नदी ५ ॥ ॥ ॥ ॥

तस्य दक्षिणे निषधस्तथापि निषधो नातिलमस्येव स्थितो वः रमणकं यस्यं नीलाद्दूरात् अतः श्वेताद्दक्षिणे निषधात्तु वर्षमिलत्तं तत्स्येव रमणकमिति संज्ञां दक्षिणेन तु नीलस्य तत्तो नीलनिषधमार्गयोः मध्य इत्यर्थः निषधस्योत्तरेण तथैव तत्पार्श्वसंधिहयेरित्यर्थः २ ५

६ ७ शृंगाणि शृंगवंतः षट्सु वर्षपर्वतस्यात्रीणि ८ ९ शृंगस्य शृंगवतः पश्चात्तस्मात्सर्वेषामाद्विविक्त्वशृंगवान्नामपर्वतोरत्नरुक्ममहिमापर्वतेनपाच्छिन्नं दूरे

यत्र चायं महाराज पक्षिराट् पततां वरः पक्षानुगा महाराज धनिनः प्रियदर्शनाः ६ महाबलास्तत्र जना राजन्मुदितमानसाः एकादश सहस्राणि वर्षाणां ते जनाधिप ७ आयुःप्रमाणं जीवंति शतानि दश पंच च शृंगाणि च विचित्राणि त्रीण्येव मनुजाधिप ८ एकं मणिमयं तत्र तथैकं रौक्ममद्भुतं सर्वरत्नमयं चैकं भवनैरुपशोभितं ९ तत्र स्वयंप्रभा देवी नित्यं वसति शांडिली उत्तरेण तु शृंगस्य समुद्रांते जनाधिप १० वर्षमैरावतं तस्मात्तस्माच्छृंगमतः परं न तत्र सूर्यस्तपति न जीर्यंते च मानवाः ११ चंद्रमाश्च सनक्षत्रो ज्योतिर्भूत इवावृतः पद्मप्रभाः पद्मवर्णाः पद्मपत्रनिभेक्षणाः १२ पद्मपत्रसुगंधाश्च जायंते तत्र मानवाः अनिष्पंदाः सुगंधाश्च निराहारा जितेंद्रियाः देवलोकच्युताः सर्वे तथा विरजसो नृप १३ त्रयोदश सहस्राणि वर्षाणां ते जनाधिप आयुःप्रमाणं जीवंति नरा भरतसत्तम १४ ॥ ॥

श्रो३ ९८२

तावतास्यं वर्षं तस्मात्स्वतः पूर्वोक्ताद्वर्षगणात्परं श्रेष्ठमिदं वर्षमित्यर्थः १० एतद्देवाद्वनतत्रेत्यादिना ११ १२ अनिष्पंदाः स्वस्थदेहाः देवलोकागतत्वात्सर्वे ॥ ॥

स्यादिसतापत्ल स्यांते विंशति शशिमंडलमिति विशाखा वेस स्का सत्रा त्ममा वंगच्छती। सुक्तं स्थूलतस्मस्तं कार्यहूयं रहनैपिप्पलं तवरिख्यसी सुक्तः संजयो वसंप्राप्यपिप्पलात्मे
कारणमध्याहृष्योरिस्येति तत्राधिदेवं लवणो स्कृतानर्थिरधि भीरशुद्धोदकानां नसम समुद्राणामुपांसः भोरैः स्वध्यात्मेत्रत्रमयः कोशः आत्माप्राणमयस्तदेशिमयप्राणमयमे
देनोद्धिविवर्हितेहोयतस्तोमनोमयः पंचमो विज्ञानमयः षष्ठ आनंदमयः सर्वकारणभूतः सप्तमः शुद्धब्रह्मेति तत्रक्षीरोदस्यातो महाविस्मोत्ते गजुन्मादिहेतोः स्थानमस्तिपरिशुद्धत्वा

न:१

क्षीरोदस्य समुद्रस्य तथैवोत्तर*प्रभुः हरिर्वसति वैकुंठशकटे कनकामये २५

सुधायकैः प्राप्यतेपत्रा स्थानपस्माणीयोपत्रास्त्रणपस्माणीयो पत्रत्रमनुविमि तं हि प्राणमयं वेशमयत्राम्नस्य सोममहवनरस्मादिविन्दमुक्तं श्रुतिमसिद्धं सप्रभुरंतर्यामी हरिः सर्व
संहर्ता वैकुंठो कुंठितसामर्थ्यः शकटे शकटे रथेचतने कनकामये कनकं ज्ञानलाङ्गेनानिर्मपेन्मेष्यापदृश्यतरिनिर्गाधैः चिन्मये शरीरे वसति २५ ॥ ॥

व१

अस्मभवत्सन्ध्यापयविचिन्मयत्वं तथापि हि लोकप्रसिद्धं अष्टचक्रे अष्टाभिर्मार्गावतनुभिः उक्तत इति अष्टचक्रं यानं इह लोकपरलोकगतिसाधनं अष्टौ चक्राणि तु कर्मेन्द्रियपंचकं ज्ञा
नेन्द्रियपंचकं मनश्चारि चत्वष्ठं प्राणपंचकं तत्त्वभूतपंचकं अविद्याकामः कर्मचेति पुर्यष्टकात्मकं लिंगशरीरं चेतनमनन्तमविभक्त पुरुषं मतेन निःसाहिमं नवद्वाराणि श्रवणप्रविष्टं मन
मनोन्नवंशीघ्रगं भवति प्राणानां हि क्रियाः करोतीत्यर्थः अत एव अष्टपते को व्यवानात्मकः प्राणापानादयः पञ्चाकाशमानं होनम्याहितं अग्निवर्णो अग्निवं [illegible] नाम सम्प्रसं तेन तं तादृशः

हुताशवर्णं

अष्टचक्रं हि तद्यानं भूतयुक्तं मनोजवं । अग्निवर्णं महातेजो जांबूनदविभूषितं ॥ १६
स प्रभुः सर्वभूतानां विभुस्त्वं भरतर्षभ । संक्षेपो विस्तरश्चैव कर्ता कारयिता तथा ॥ १७
पृथिव्यापस्तथाकाशं वायुस्तेजश्च पार्थिव । स यज्ञः सर्वभूतानामाज्यं तस्य हुताशनः ॥ १८

अग्निवर्णः महातेजाः अनेकविधत्वात् इन्द्रियप्रधानत्वात् जाम्बूनदं हिरण्यवर्णं चेतो हार्यो मनोज्ञात्वं तेन विभूषितं तन्मयमित्यर्थः अधिदैवतमध्यात्मार्थः १६ स प्रभुरिति यो स्मि
न भरतर्षभ त्वमसि तिष्ठति एव सर्वं प्रज्ञानां प्रभुर्नियन्ता विभुर्व्यापकः संक्षेपः संहर्ता विस्तारः सम्यक् विसृष्टा कर्ता जीवरूपेण कारयिता ईश्वररूपेण १७ एवमध्यात्माधिदैवत्वमुक्त्वा
विभूतिमधियज्ञरूपत्वमपि तस्य आह पृथिवीति सर्वेषां भूतानां संबन्धी पञ्चात्मिकां निर्वर्त्यो यज्ञः तस्य आज्यं तस्य हुताशनः विशेषतः तस्मिन् यज्ञे नेव प्रयतीति भावः ॥

एवंमेतत्येनउक्तउपरिष्टोधृतराष्ट्रोमहामनाः सहृतपिप्पलादाप्यास्यविम्बरूपदर्शनयोग्यंमेने यस्मात्एवंभक्तोध्यानेनविवेकस्तमसमाविश्यन्वगमत्तस्यजपमाकाश्रवणमनुप्रा
यवान १९ नच्चयधार्ष्ट्येनविम्बरूपदर्शनकालेमाश्लिष्टवरुश्चयोहृष्टस्तद्रूपोःपिनरनारायणाद्यंक्तिरूपमात्मसर्वेश्वरेश्वरंदृष्ट्वास्वपुत्रानप्रतिविचिन्त्यपुनरेवाब्रवीत्तदेव
वचनमाहअसंशयमिति २० इहलोकेस्वपुत्रेजंबूखंडेशाश्वतंशाश्वद्वेमेर्वादिकमपिनास्तिकिंतुसर्वदृष्टनएवभावंमेकल्प्यमात्रेस्थितिकिंतर्हिशाश्वतमास्तिनरोनारायण

म १

वैशंपायनउवाच एवमुक्तःसंजयेनधृतराष्ट्रोमहामनाः ध्यानमन्वगमद्राजापुत्रान्प्रतिजनाधिप १९ सविचिंत्यमहा
तेजाःपुनरेवाब्रवीद्वचः असंशयंसूतपुत्रकालःसंक्षिपतेजगत् २० सृजतेचपुनःसर्वंनेहविद्यतिशाश्वतं नरोनाराय
णश्चैवसर्वज्ञःसर्वभूतहृत् २१ देवावैकुंठमित्याहुर्नराविष्णुमितिप्रभुं ॥ इतिभीष्मपर्वणिजंबूखंडनिर्माणेऽष्टमोध्यायः ८
धृतराष्ट्रउवाच यदिदंभारतंवर्षंयत्रेदंमूर्छितंबलं यत्रातिमात्रंलुब्धोयंपुत्रोदुर्योधनोमम १ यत्रगृध्राःपांडुपुत्रायत्रमे
सज्जतेमनः एतन्मेतत्वमाचक्ष्वत्वंहिमेबुद्धिमान्मतः २

कुं १

सर्वतिर्जीवस्थानेवशाश्वतोनेत्याहउभयंमिलित्वाएकएवसर्वज्ञःसर्वभूतहृत्तमेवत्वावैकुंठमाहुःऋषयः देवसप्तर्षयः उपतिष्ठन्तद्रूपसर्वःनाराजीवास्तुतमेवविष्णुं
श्रेष्ठात्मस्वंतःप्रविष्टजनानांशास्तारंसृष्टचक्रस्यशकटस्येवचालकंआहुःतथापिसंयुक्तस्यापिलेपशून्यत्वंसूचनहर्षात्मस्वविकीर्षतःप्रकृतिश्चरूपोमास्मदृष्टजनेषुइतिभावः २१
इतिश्रीमन्महाभारतेभीष्मपर्वणिजंबूखंडनिर्माणेष्टमोध्यायः यदिदं १ गृध्राःलोभयुक्ताःएतत्रएतत्स्मिमसंततस्वंयाथार्थ्यं २ कं २

३ ४ प्रियमितिकर्मभूमित्वादिंद्रादीनामिदंप्रियं ५ ६ ७ ८ ९ १० ११ १२ अग्रेसपार्वतीयैः १३ १४ ॥ ॥ छ

पं६२

संजयउवाच नतत्रपांडवाग्दस्वाः स्वर्गुणानन्वचोमम गंधेर्वरैर्योधनस्तत्रशकुनिस्वापिसौवलः ३ अपरेस्तत्रियास्त्वैवनाना जनैश्वराः येरत्वाभारतेवर्षेनमध्यंतिपार्थिवाः ४ अत्रतेकीर्तयिष्यामिवर्षंभारतभारतं प्रियमिंद्रस्यदेवस्यमनोर्वैवस्वतस्यच ५ पृथोस्तुराजन्वैण्यस्यतथेक्ष्वाकोर्महात्मनः ययातेरंबरीषस्यमांधातुर्नहुषस्यच तथैवमुचुकुंदस्यशिबेरौशीनरस्यच ऋषभस्यतथैलस्यनृगस्यनृपतेस्तथा ६ कुशिकस्यचदुर्धर्षगाधेश्चैवमहात्मनः सोमकस्यचदुर्धर्षदिलीपस्यतथैवच अन्येषांमहाराजक्षत्रियाणांबलीयसां ७ सर्वेषामेवराजेंद्रप्रियंभारतभारतं तत्तेवर्षंप्रवक्ष्यामियथायथमरिंदम शृणुमेगदतोराजन्यन्मांत्वंपरिपृच्छसि ८ महेंद्रोमलयःसह्यःशुक्तिमानृक्षवानपि विंध्यश्चपारियात्रश्चसप्तैतेकुलपर्वताः ९ तेषांसहस्रशोराजन्पर्वतास्तेसमीपतः अविज्ञाताःसारवंतोविपुलाश्चित्रसानवः १० अन्येततोऽपरिज्ञाताह्रस्वाह्रस्वोपजीविनः आर्याम्लेच्छाश्चकौरव्यैस्तैर्मिश्राःपुरुषाविभो ११ नदीःपिबंतिविपुलांगंगांसिंधुंसरस्वतीं गोदावरींनर्मदांचबाहुदांचमहानदीं १२ शतद्रुंचंद्रभागांचयमुनांचमहानदीं दृषद्वतींविपाशांचविपापांस्थूलवालुकां १३ नदींवेत्रवतींचैवकृष्णवेणांचनिम्नगां इरावतीं वितस्तांचपयोष्णींदेविकामपि १४ ऽपरि ३

१४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६

चित्रवहां १ वेत्रवतीं २

वेस्मृतांवेदसिनींत्रिदिवामिक्षुलांकृमिं करीषिणींचित्रसेनांचनिम्नगां १४ गोमतींधूतपापांचचंदनांचमहानदीं कौशि
कींत्रिदिवांकृत्यांनिचितांलोहितारणीं १५ रहस्यांशतकुंभांचशरयूंचतथैवच चर्मण्वतींहस्तिसोमांदिशंतथा १६ शरवतीं
पयोष्णींचवेणांभीमरथीमपि कावेरींचुलुकांचापिवापींशतबलामपि १७ नीवारांमहितांचापिसुप्रयोगांजनाधिप पवित्रांकु
ण्डलींसिंधुंराजनींपुरमालिनीं पूर्वाभिरामांवीरांचभीमामोघवतींतथा पाशाशिनींपापहरांमहेंद्रांपाटलावतीं १९ करीषिणीं
मसिक्नींचकुशचीरांमहानदीं मकरींप्रवरांमेनांहेमांधृतवतींतथा २० पुरावतीमनुष्णांशैब्यांकापींचभारत सदानीरामधृष्यां च
चकुशधारांमहानदीं सदाकांतांशिवांचैवतथावीरवतीमपि वस्त्रांसुवस्त्रांगौरींचकंपनांसहिरण्वतीं वरांवीरकरांचापिपंचमीं
चमहानदीं २१ रथचित्रांज्योतिरथांविश्वामित्रांकपिंजलां उपेंद्रांबहुलांचैवकुचरामंबुवाहिनीं २२ विनदींपिंजलांवेणांतुंग
वेणांमहानदीं विदिशांकृष्णवेणांचताम्रांचकपिलामपि २३ खलुंसुवामांवेदाश्वांहरिस्रावांमहापगां शीघ्रांचपिच्छलांचै
वभारद्वाजींचनिम्नगां कौशिकींनिम्नगांशोणांबाहुदामथचंद्रमां दुर्गांमंत्रशिलांचैवब्रह्मवेध्यांबृहद्वतीं २४ ॥ ॥

मी० ७
२७

२७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ॥

पयस्वामथोरोहीं चत्वण्यां जांबुनदीमपि सुनसां तमसां दासीं वसामन्यां वराणसीं २७ नीलां धृतिमतीं चैव पर्णाशां च महानदीं
मानवीं वृषभां चैव ब्रह्ममेध्यां बृहद्ध्वनीं २८ एताश्चान्याश्च बहुधा महानद्यो जनाधिप सदानिरामयां कृष्णां मंदगां मंदवाहिनीं २९
ब्रह्माणीं च महागौरीं दुर्गामपि च भारत चित्रोपलां चित्ररथां मंजुलां वाहिनीं तथा ३० मंदाकिनीं वैतरणीं कोशां चापि महानदीं शुक्ति
मतीमनंगां च तथैव वृषभाह्वयां ३१ लोहित्यां करतोयां च तथैव वृषकाह्वयां कुमारीमृषिकुल्यां च मारिषां च सरस्वतीं मंदाकिनीं सुपुण्यां च सर्वां गं
गां च भारत विश्वस्य मातरः सर्वाः सर्वाश्चैव महाफलाः ३३ तथा नद्यस्त्वप्रकाशाः शतशोथ सहस्रशः इत्येताः सरितो राजन् समा
ख्याता यथास्मृतिः ३४ अत ऊर्ध्वं जनपदान्निबोध गदतो मम तत्रेमे कुरुपांचालाः शाल्वा माद्रेयजांगलाः ३५ शूरसेनाः पुलिंदा
श्च बोधा मालास्तथैव च मत्स्याः कुशल्याः सौशल्याः कुंतयः कांतिकोशलाः ३६ चेदिमत्स्यकरूषाश्च भोजाः सिंधुपुलिंदकाः उत्तमा
श्च दशार्णाश्च मेकलाश्चोत्कलैः सह ३७ पांचालाः कोशलाश्चैव नैकपृष्ठा धुरंधराः बोधा मद्रकलिंगाश्च काशयोऽपरकाशयः
३८ जठराः कुकुराश्चैव सदशार्णाश्च भारत कुंतयोऽवंतयश्चैव तथैवापरकुंतयः ३९

एम
२५

४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२

गोमंतामंदकाःखंडाविदर्भारूपवाहिकाः अश्मकाःसोत्तराष्ट्रैवगोपराष्ट्राःकरीतयः ४० अधिराज्यकुशाद्याश्चमल्लराष्ट्रंचकेवलं
वारवास्यायवाहाश्चचक्राश्चक्रातयःशकाः ४१ विदेहामगधाःस्वक्षामलजाविजयास्तथा अंगावंगाकलिंगाश्चयकृल्लोमा
नएवच ४२ मल्लाःसुदेष्णाःप्रह्लादामाहिकाःशशिकास्तथा बाल्हीकावाटधानाश्चआभीराःकालतोयकाः ४३ अपरांताः
परांताश्चपंचालाश्चर्ममंडलाः अटवीशिखराश्चैवमेरुभूताश्चमारिष ४४ उपावृत्तानुपावृत्ताःस्वराष्ट्राःकेकयास्तथा कु
न्दापरांतामाहेयाकक्षाःसामुद्रनिष्कुटाः ४५ अन्ध्राश्चबहवोराजन्नंतर्गिर्यास्तथैवच बहिर्गिर्यांगमलजामगधामानवर्ज
काः ४६ समंतराः प्रावृषेयाभार्गवाश्चजनाधिप पुंड्राभार्गाःकिराताश्चसुदेष्णायामुनास्तथा ४७ शकानिषादानि
षधास्तथैवानर्तनैर्ऋताः दुगूलाःप्रतिमत्स्याश्चकुंतलाःकोशलास्तथा ४८ तीरग्रहाःशूरसेनाईजिकाःकन्यकागुणाः
तिलभारामशीराश्चमधुमंताःसुकंदकाः ४९ काश्मीराःसिंधुसौवीरागांधारादर्शकास्तथा अभीसाराउलूकाश्चशैवला
बाल्हिकास्तथा ५० दर्वीचवानवादर्वावातजामरथोरगाः बहुवाद्याश्चकौरव्यसुदामानःसुमल्लिकाः ५१ वध्राः
करीषकाश्चापिकुलिंदोपत्यकास्तथा वानायवोदशापार्श्वारोमाणःकुशबिंदवः ५२

५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५

कच्छा गोपालकक्षाश्च जांगलाः कुरुवर्णकाः किराता बर्बराः सिद्धा वैदेहास्ताम्रलिप्तकाः ५३ ओड्राः म्लेच्छाः सैसिरिध्राः पार्वती
याश्च मारिष अथापरे जनपदा दक्षिणा भरतर्षभ ५४ द्रविडाः केरलाः प्राच्या मूषिका वनवासिकाः कर्णाटका माहिषिका विकल्पा
मूषकास्तथा ५५ झिल्लिकाः कुन्तलाश्चैव सौहृदा नभकाननाः कौकुट्टकास्तथा चोलाः कोंकणा मालवानराः ५६ समंगाः का
रकाश्चैव कुकुरांगारमारिषाः ध्वजिन्युत्सवसंकेतास्त्रिगर्ताः शाल्वसेनयः ५७ व्यूकाः कोकवलाः प्रोष्ठाः समवेगवशास्तथा तथैव
विंध्यचुलिकाः पुलिन्दाः वल्कलैः सह ५८ मालवा मल्लवाश्चैव तथैवापरवल्लवाः कुलिन्दाः कालवाश्चैव कुण्डलाः करटास्तथा ५९
मूषकास्तनवालाश्च नाशीयाघारसंजयाः अलिन्दाः पाशिवाटाश्च तनयाः सुनयास्तथा ६० ऋषिका विदर्भाः काकास्तंगणाः परतंग
णाः उत्तराश्चापरे म्लेच्छाः क्रूरा भरतसत्तम पावनाश्चीनकांबोजा दारुणा म्लेच्छजातयः सकृद्ग्रहाः कुलत्थाश्च हूणाः पारसिकैः सह
६२ तथैव रमणाश्चीनास्तथैव दशमालिकाः क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च ६३ शूद्राभीराश्च दरदाः काश्मीराः पशुभिः सह
खाशीराश्चांतचाराश्च पह्लवा गिरिगह्वराः ६४ आत्रेयाः सभरद्वाजास्तथैव स्तनयोषिकाः प्रोषकाश्च कलिंगाश्च किरातानां च जातयः ६५

६६ यथागुणबलमिति यथागुणं सत्त्वादिगुणानतिक्रमतः हत्वा यथाबलं शौर्यबलानतिक्रम्य त्रिवर्गस्य धर्मार्थकामात्मकस्य महाफलं उत्कृष्टफलं हैरण्यगर्भपदप्राप्त्यन्तं सम्य
गनुष्ठिता सम्यक्कृषादिना भूमिर्दुह्येत प्रपूरयेत् धेनुरिव कामान् अस्यां गृध्यन्तीति कामधुक् ६७ गृध्यन्ति अभिकांक्षां कुर्वन्ति वसुगृद्धाः लुब्धाः ६८ देवकायानां यज्ञेन मानुषका

तो महीं गम्यमानाः तथैव कामं गताः एते चान्ये जनपदाः प्राच्योदीच्यास्तथैव च ६६ उद्देशमात्रेण मया देशाः संकीर्तिता विभो
यथागुणबलं चापि त्रिवर्गस्य महाफलं ६७ दुह्येद्धेनुः कामधुक् भूमिः सम्यगनुष्ठिता तस्यां गृध्यन्ति राजानः शूरा धर्मार्थको
विदाः ६८ ते त्यजन्त्याहवे प्राणान् वसुगृद्धास्तरस्विनः देवमानुषकायानां कामं भूमिः परायणं ६९ अन्योन्यस्यावलुंप
न्ति सारमेया यथामिषं राजानो भरतश्रेष्ठ भोक्तुकामा वसुंधरां ७० न चापि तृप्तिः कामानां विद्यते चापि कस्यचित् तस्मा
त्परिग्रहे भूमेर्यतन्ते कुरुपाण्डवाः साम्ना भेदेन दानेन दण्डेनैव च भारत ७१ पिता भ्राता च पुत्राश्च खं द्यौश्च नरपुंगव भू
मिर्भवति भूतानां सम्यगच्छिद्रदर्शिना ७२ ॥ इति भीष्मपर्वणि अध्यायः ९

भि १
यानां मनुष्यत्वेन भूमिः परायणं शरणं ६९ ७० तस्मात् अतृप्तत्वात् ७१ एवमधिके भूमिजयकाल मुक्तं अध्यायाध्यायेन भूमिजयफलमाह पितेति अच्छिद्रं सम्यग्दर्शी
तेयस्याः सा भूमिः योगमार्गेण साकारे मनः दृष्टा सती पित्रादिवद्धितमोपनिके भ्यः पाति वज्रकायात्वं प्रयच्छती त्यर्थः खं खस्थं स्वर्गादिलोकप्रदं चैव भवति तत्त्वज्ञानप्रापयती त्यर्थः ७२
द्यौः स्वर्गपदं १

भारतस्येति १ २ तिष्यं कलियुगं ३ ८ प्रजायन्ते प्रजास्तु तनयं ति ८ ९ वपुष्मन्तः प्रशस्तदेहाः १० ११ सर्ववर्णाः परस्परजयैषिणो जायन्त इति संबंधः १२ १३

धृतराष्ट्र उवाच भारतस्यास्य वर्षस्य तथा हैमवतस्य च प्रमाणमायुषः सूत बलं चापि शुभाशुभं १ अनागतमतिक्रान्तं वर्तमानं च संजय आचक्ष्व मे विस्तरेण हरिवर्षं तथैव च २ संजय उवाच चत्वारि भारते वर्षे युगानि भरतर्षभ कृतं त्रेता द्वापरं च तिष्यं च कुरुवर्धन ३ पूर्वं कृतयुगं नाम ततस्त्रेतायुगं प्रभो संक्षेपाद्द्वापरस्याथ ततस्तिष्यं प्रवर्तते ४ चत्वारि च सहस्राणि वर्षाणि कुरुसत्तम आयुःसंख्या कृतयुगे संख्याता राजसत्तम ५ तथा त्रीणि सहस्राणि त्रेतायां मनुजाधिप द्विसहस्रं द्वापरे तु भुवि तिष्ठन्ति सांप्रतं ६ न प्रमाणस्थितिर्ह्यस्ति तिष्येऽस्मिन् भरतर्षभ गर्भस्थाश्च म्रियन्ते च तथा जाता म्रियन्ति च ७ महाबला महासत्त्वाः प्रजागुणसमन्विताः प्रजायन्ते च जाताश्च शतशोऽथ सहस्रशः ८ जाताः कृतयुगे राजन् धनिनः प्रियदर्शनाः प्रजायन्ते च जाताश्च मुनयो वै तपोधनाः ९ महोत्साहा महात्मानो धार्मिकाः सत्यवादिनः प्रियदर्शना वपुष्मन्तो महावीर्या धनुर्धराः १० वरार्हा युधि जायन्ते क्षत्रियाः शूरसत्तमाः त्रेतायां क्षत्रिया राजन् सर्वे वै चक्रवर्तिनः ११ सर्ववर्णाश्च जायन्ते सदा चैव च द्वापरे महोत्साहा वीर्यवन्तः परस्परजयैषिणः १२ तेजसाल्पेन संयुक्ताः क्रोधनाः पुरुषा नृप लुब्धाश्चानृतकाश्चैव तिष्ये जायन्ति भारत १३

ईर्ष्या परोत्कर्षासहिष्णुत्वं मानः स्वस्मिन्पूज्यताबुद्धिः क्रोधोऽभिज्वलनं माया कपटं असूया परगुणेषु दोषाविष्करणं रागो विषयेषु प्रीतिः लोभस्तल्लिप्सा १४ संक्षेपो गुणा

ईर्ष्या मानस्तथा क्रोधो मायासूये तथैव च । निष्कामवन्ति भूतानां रागो लोभस्तथा भवेत् १४ संक्षेपो वर्त्तितो राजन्द्वीपोऽस्मिन्नराधिप गुणो
त्तरं हैमवतं हरिवर्षं ततः परं १५ ॥ इति श्रीभीष्मपर्वणि जंबूखंडनिर्माणेऽध्यायः १० धृतराष्ट्र उवाच जंबूखंडस्त्वया प्रो
क्तो यथावदिह संजय विष्कंभमस्य प्रब्रूहि परिमाणं तु तत्त्वतः १ समुद्रस्य प्रमाणं च सम्यगच्छिद्रदर्शन शाकद्वीपं च मे ब्रूहि कुशद्वी
पं च संजय २ शाल्मलिं चैव तत्त्वेन क्रौंचद्वीपं तथैव च ब्रूहि गावल्गणे सर्वं राहोः सोमार्कयोस्तथा ३ संजय उवाच रा
जन्सुबहवो द्वीपा यैरिदं संततं जगत् सप्तद्वीपान्प्रवक्ष्यामि चंद्रादित्यौ ग्रहांस्तथा ४ अष्टादश सहस्राणि योजनानि विशां
पते षट्शतानि च पूर्णानि विष्कंभो जंबुपर्वतः ५

नामिति शेषः १५ ॥ अध्यायः जंबू १ २ ३ अष्टादश सहस्राणि षट्शतानि च योजनानि विष्कंभः चतुर्दलकमलाकारस्य जंबूद्वीपस्य पत्रांतपरिधिः तावद्वि
स्तार एवं चापि प्रमाणमंतर्भौमपर्वताकृतिस्थानं जंबूपर्वत इत्युच्यते ५

लवणाख्येति श्लोकः लवणतः पंचशतसहस्राणामत्वा जंबूद्वीपस्य तद्वदुभयतः पंचपंचभिः सहस्रसहस्रैः समुद्रस्य विष्कंभो विस्तारः द्विगुणित इति तेन समुद्रस्य द्वीपस्य पंचदश सहस्रयोजना
आयामः द्विगुणः दशसहस्रयोजनः परिमंडलः उभयतः समुद्रवेष्टनेन सहस्रचत्वारिंशत्सहस्रः चतुर्थः षष्टिसहस्राधिकं लक्षपंचमो लक्षत्रयं विंशतिसहस्राणि षष्ठः लक्षद्वयं

लवणस्य समुद्रस्य विष्कंभो द्विगुणः स्मृतः नानाजनपदाकीर्णो मणिविद्रुमचित्रितः ६ नैकधातुविचित्रैश्च पर्वतैरुपशोभितः
सिद्धचारणसंकीर्णः सागरः परिमंडलः ७ शाकद्वीपं च वक्ष्यामि यथावदिह पार्थिव शृणु मे त्वं यथान्यायं ब्रुवतः कुरुनंदन ८
जंबूद्वीपप्रमाणेन द्विगुणः स नराधिप विष्कंभेण महाराज सागरोपि विभागशः ९ क्षीरोदो भरतश्रेष्ठ येन संपरिवारितः तत्र
पुण्या जनपदास्तत्र न म्रियते जनः १० कुत एव हि दुर्भिक्षं क्षमातेजोयुता हि ते शाकद्वीपस्य संक्षेपो यथावद्भरतर्षभ उक्त
एष महाराज किमन्यत्कथँमिते धृतराष्ट्र उवाच शाकद्वीपस्य संक्षेपो यथावदिह संजय ११ उक्तस्त्वया महाप्राज्ञ विस्तरं ब्रूहि तत्त्वतः
संजय उवाच तथैव पर्वता राजन्सप्तात्र मणिपर्वताः रत्नाकरास्तथा नद्यस्तेषां नामानि मे शृणु ॥ १३

पा २

चत्वारिंशत्सहस्राणि सप्तमो द्वादश लक्षाण्यशीतिसहस्राणि एतेषां संकलने पंचविंशतिलक्षाणि पंचत्रिंशत्सहस्राणि योजनानि सप्तानां द्वीपानां समुद्राणां विस्तारः ६

७ ८ ९ १० ११ १२ १३

५९

१४ १७ एवंज्योतिर्मण्डलस्योत्तरान्तादिवर्ततएवंविधिर्मर्यादापितामहेन [illegible] १७ १९ यतःशवर्णाआचेष्टतयोगिनिमित्तावर्णाः [illegible]

प ४

अतीवगुणवत्सर्वंतत्रत्वंकुरुजनाधिप देवर्षिगंधर्वयुतःप्रथमोमेरुरुच्यते १४ प्रागायतोमहाशैलोमलयोनामपर्वतः ततोमेघाःप्रवर्तन्तेप्रभवन्तिचसर्वशः १५ ततःपरेणकौरव्यजलधारोमहागिरिः ततोनित्यमुपादत्तेवासवःपरमंजलं १६ ततोवर्षंप्रभवतिवर्षकालेजनेश्वर उच्चैर्गिरीरैवतकोयत्रनित्यंप्रतिष्ठितः १७ एवमेषविधिस्तत्रपितामहकृतोविधिः उत्तरेणतुराजेन्द्रश्यामोनाममहागिरिः १८ नवमेघप्रभःप्रांशुःश्रीमानुज्ज्वलविग्रहः यतःश्यामत्वमापन्नाःप्रजाजनेश्वर १९ धृतराष्ट्रउवाच सुमहान्संशयोमेद्यप्रोक्तोयंसंजयत्वया प्रजाःकथंसूतपुत्रसंप्राप्ताःश्यामतामिह २० संजयउवाच सर्वेष्वेवमहाप्राज्ञद्वीपेषुकुरुनंदन गौरःकृष्णश्चपतगस्तयोर्वर्णान्तरेनृप २१ श्यामोयस्मात्प्रवृत्तोवैतस्माच्छ्यामोगिरिःस्मृतः ततःपरंकौरवेन्द्रदुर्गशैलोमहोदयः २२ केशरीकेशरयुतोयतोवातःप्रवर्तते तेषांयोजनविष्कंभोद्विगुणःप्रविभागशः २३ वर्षाणितेषुकौरव्यसप्तोक्तानिमनीषिभिः महामेरुर्महाकाशोजलदःकुमुदोत्तरः २४

यतोगरस्यार्थः २० कारणगुणाःकार्यगुणानारभन्तइतिन्यायेनश्यामपर्वतप्रभवःश्यामवर्णाःशाकद्वीपनिवासिनोमनुष्याअपिश्यामलेनगतास्तदर्थःयस्मात्श्यामोगिरिस्तस्मात्तत्स्थानेश्यामोवर्णःप्रवर्ततइत्यर्थः २२ २३

नी॰ पु॰
२९

२४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५

जलधेरो महाराज सुकरहितिस्थितः रैवतस्य तु कौमारः श्यामस्य मणिकाञ्चनः २४ केशरस्याथ मोदाकी पोरस्तात्त महानपुमान् प-
रिवार्यते कौमुदे ह्येष दूरस्थलमेव च २५ जंबूद्वीपेन संख्यातस्तस्य तीरे महाद्रुमः शाकोनाम महाराज प्रजातस्य महानगः २६ तत्र
पुण्या जनपदाः पूज्यन्ते तत्र शंकराः तत्र गच्छन्ति सिद्धाश्च चारणा दैवतानि च धार्मिकाश्च प्रजा राजन् चत्वारो तीव भारत वर्णाः स्वकर्म
निरता न च स्तेनोऽत्र दृश्यते दीर्घायुषो महाराज जरामृत्युविवर्जिताः २८ प्रजास्तत्र विवर्धन्ते वर्षास्वीव समुद्रगाः नद्यः पुण्यज-
लास्तत्र गंगा च बहुधा गता २९ सुकुमारी कुमारी च शीता शीवेत्रिका तथा महानदी च कौमुत तथा मणिजला नदी चक्षुर्वर्ध-
निका चैव नदी भरतसत्तम ३० तत्र प्रवृत्ताः पुण्योदा नद्यः कुरुकुलोद्वह सहस्राणां शतान्येव यतो वर्षति वासवः ३१ न तासां ना-
मधेयानि परिमाणं तथैव च शक्यन्ते परिसंख्यातुं पुण्यास्ता हि सरिद्वराः ३२ तत्र पुण्या जनपदाश्चत्वारो लोकसंमताः मगाश्च मश-
काश्चैव मानसा मंदगास्तथा ३३ मंगा ब्राह्मणभूयिष्ठाः स्वकर्मनिरता नृप मशकेषु तु राजन्य धार्मिकाः सर्वकामदाः ३४ मानसा-
श्च महाराज वैश्य धर्मोपजीविनः सर्वकामसमायुक्ताः शूद्रा धर्मार्थिनिश्चिताः ३५

एम॰
२९

२६ २७ अध्यायः उत्तरेषु १ २ मानःशिलो मनःशिलामयः ४ ५ ६ ७ ८ ९ १० ११ " " "

ततत्र राजा राजेन्द्र नन्दनो नववर्द्धिकाः सर्वे मेरोव वर्षमर्यादा तीरस्थिता तिथास्मयं २६ एतावदेव शाकस्तत्र द्वीपे प्रभावितं एतदेवच
श्रोतव्यं शाकद्वीपे महोजसि २८ इति श्री भीष्मपर्वणि अध्यायः ११ सञ्जय उवाच उत्तरेषु च कौरव्य द्वीपेषु श्रूयते कथा एवं तत्र महाराज तत्र
ब्रुवतश्च निबोध मे १ घृततोयः समुद्रोत्र दधिमण्डोदकोपरः सुरोदः सागरश्चैव तथान्यो धर्मसागरः २ परस्परेण द्विगुणाः सर्वे द्वीपा
नराधिप पर्वताश्च महाराज समुद्रैः परिवारिताः ३ गौरस्तु मध्यमे द्वीपे गिरिर्मानःशिलो महान् पर्वतः पश्चिमे कृष्णो नारायणसखो
नृप ४ तत्र रत्नानि दिव्यानि स्वयं रक्षति केशवः प्रसन्नश्च भवत्तत्र प्रजानां व्यदधत्सुखं ५ कुशस्तम्भः कुशद्वीपे मध्ये जनप
देः सह सम्पूज्यते शाल्मलिर्द्वीपे शाल्मलिके नृप ६ क्रौञ्चद्वीपे महाक्रौञ्चो गिरिरत्नचयाकरः सम्पूज्यते महाराज चातुर्वर्ण्येन
नित्यदा ७ गोमन्तः पर्वतो राजन्सुमहान्सर्वधातुकः यत्र नित्यं निवसति श्रीमान्कमललोचनः ८ मोक्षिभिः संगतो
नित्यं प्रभुर्नारायणो हरिः कुशद्वीपे तु राजेन्द्र पर्वतो विद्रुमैश्चितः ९ सुनामनामा दुर्धर्षो द्वितीयो हेमपर्वतः द्युतिमान्नाम
कौरव्य तृतीयः कुमुदो गिरिः १० चतुर्थः पुष्पवान्नाम पञ्चमस्तु कुशेशयः षष्ठो हरिगिरिर्नाम षडेते पर्वतोत्तमाः ११

तेषामंतरविष्कंभो द्विगुणः पूर्वभागशः क्रौंचद्वीपं प्रथमं वर्षं द्वितीयं रामणमंडलं १२ तृतीयं मरुद्याकारं चतुर्थं कंवलं स्मृतं धृतिम
त्सवमं वर्षं षष्ठं वर्षप्रभाकरं १३ सप्तमं कापिलं वर्षमेते नैव वर्षलंभकाः एतेषु देवगंधर्वाः प्रजाश्च जगतीश्वर १४ विहरंते रमंते च
न तेषु म्रियते जनः न तेषु दस्यवः संति म्लेच्छजात्योपि वा नृप गौरप्रायो जनः सर्वः सुकुमारश्च पार्थिव १५ अवशिष्टेषु सर्वे
षु वक्ष्यामि मनुजेश्वर यथाश्रुतं महाराज तदव्यग्रमनाः शृणु १६ क्रौंचद्वीपे महाराज क्रौंचो नाम महागिरिः क्रौंचात्परो वा
मनादंधकारकः १७ अंधकारात्परो राजन्मैनाकः पर्वतोत्तमः मैनाकात्परतो राजन् गोविंदो गिरिरुत्तमः १८ गोविंदात्पर
तो राजन्निविडो नाम पर्वतः परास्तु द्विगुणास्तेषां विष्कंभो वंशवर्धन १९ देशांस्तत्र प्रवक्ष्यामि तन्मे निगदतः शृणु क्रौं
चस्य कुशलो देशो वामनस्य मनोनुगः २० मनोनुगात्परश्चोष्णो देशः कुरुकुलोद्वह उष्णात्परः प्रावरकः प्रावाराद्धकारकः
२१ अंधकारकदेशात्तु मुनिदेशः परः स्मृतः मुनिदेशात्परश्चैव प्रोच्यते दुंदुभिः स्वनः २२ सिद्धचारणसंकीर्णो गौरप्रायो जना
धिप एते देशा महाराज देवगंधर्वसेविताः २३ पुष्करे पुष्करो नाम पर्वतो मणिरत्नवान् तत्र नित्यं प्रभवति स्वयं देवः प्रजापतिः २४

२५ २१ चतुरस्रं चतुर्दलकमलाकारं जंबुमंडलमिति निश्चयः तस्य सर्वेश्वराणां परिधिहृत्कः स्वच्छा दृश्या महत्त्वाणि शाश्वतानि च माले निरहृ यत्र मध्यममंडलपरिधिचत्रयस्त्रिंश
द्भुतयोजनरस्मृत्यंततत्सूर्यमहत्त्वीनो यायान्यत्राग्रभागो बहिर्हृत्युत्वा वेदत्रपरिक्षिणोग्रेयं च महत्त्वीनो गर्भेभागान्नजननहृतिसेयं २२ तत्रयत्रसंधिष्ण्यानेषु चतुर्षु तस्मान

तेपर्युपासते नित्यं देवाः सर्वे महर्षयः वाल्मिर्मनोवृकतोभिः प्रसमर्पंतो जनाधिप २५ जंबूद्वीपात्प्रवर्तंते रत्नानि विविधान्युत द्वीपे
ष्वेतेषु सर्वेषु प्रजानां कुरुसत्तम २६ ब्रह्मचर्येण सत्येन प्रजानां हि दमेन च आरोग्यायुःप्रमाणाभ्यां द्विगुणं द्विगुणं ततः २७ एकोजन
परोराजन्द्वीपेष्वेतेषु भारत उक्तो जनपदो येषु धर्मश्चैकः प्रदृश्यते २८ ईश्वरो दंडमुद्यम्य स्वयमेव प्रजापतिः द्वीपानेतान्महाराज र
क्षंस्तिष्ठति नित्यदा २९ स राजा स शिवो राजन्स पिता स पितामहः गोपायति नरश्रेष्ठ प्रजाः सजडपंडिताः ३० भोजनं चात्र कौरव्य
प्रजाः स्वयमुपस्थितं सिद्धमेव महाबाहो तद्धि भुंजति नित्यदा ३१ ततः परं समा नाम दृश्यते लोकसंस्थितिः चतुरस्रं महाराज त्र
यस्त्रिंशत्तु मंडलं ३२ तत्र तिष्ठंति कौरव्य चत्वारो लोकसंमताः दिग्गजा भरतश्रेष्ठ वामनैरावतादयः ३३ सुप्रतीकस्तथा
राजन्प्रभिन्नकरटामुखः तस्याहं परिमाणं तु न संख्यातुमिहोत्सहे ३४ असंख्यातः स नित्यं हि तिर्यगूर्ध्वमधस्तथा ॥ ॥

चतुर्ष्वपरश्चिमास्वयंभूतस्य तत्कण्वोपरिवर्तते पुष्करिणु वर्चं ते नरस्थाणामैव दिग्गजाः श्रियं नरनिभावः सजन्नकः ३३ ॥ ॥ ॥ ॥

वाताद्युभिर्गजाद्युहस्तेन... ता... ३४ पुष्करैः पद्मसंकाशैः ३५ ३६ ...प्रमाणं ३७ ३९ परिणाहेन

तत्रैवचामेरोयांतिदिश्यःसर्वाभ्यएवहि ऐरावतंमहाराजतत्राश्रिगद्रुंतिनेगजाः ३४ पुष्करैःपद्मसंकाशैर्विकसद्भिर्महाप्रभैः शत
धाराःनेवयान्नितान्म्बुचंनिनिसृताः ३५ व्रमद्भिःसमनामानाद्दिग्गजेरिहमाहृताः आगच्छंतिमहाराजततस्तिष्ठंतिवैप्रजाः ३६
धृतराष्ट्रउवाच योवैविनिर्देशस्सर्वस्त्वयासंजयकीर्तितः दृष्टिंतद्वीपसंस्थानमस्त्वंब्रूहिसंजय संजयउ० उक्ताद्वीपामहाराजग्र
हान्मेशृणुतत्त्वतः स्वर्भानोःकौरवश्रेष्ठयावदेषप्रमाणतः ३७ परिमंडलोमहाराजस्वर्भानुःश्रूयतेग्रहः योजनानांसहस्राणि
विष्कंभोद्वादशास्यवै ३८ परिणाहेनषट्त्रिंशद्विपुलत्वेनचानघ षष्टिमाहुःशतान्यस्यबुधाःपौराणिकास्तथा ४० चंद्रमा
स्तुसहस्राणिराजन्नेकादशस्मृतः विष्कंभेनकुरुश्रेष्ठत्रयस्त्रिंशत्तुमंडलं ४१ एकोनषष्टिर्विष्कंभेशीतरश्मेर्महात्मनः सूर्य
स्त्वष्टौसहस्राणिद्वेचान्येकुरुनंदन ४२ विष्कंभेनततोराजन्मंडलंत्रिंशतासमं अष्टपंचशतंराजन्विपुलत्वेनचानघ ४३
श्रूयतेपरमोदारःपतगोसौविभावसुः एतत्प्रमाणमर्कस्यनिर्दिष्टमिहभारत ४४

...विष्कंभेनततो...योजनानि...सूर्यः ४० ४३ पतगः शीघ्रगः विभावसुः सूर्यः ४४

४५ ५० ॥ इति नीलकंठीये भारतभावदीपे जंबूखंडनिर्माणप्रकाशः समाप्तः अथगावल्गणिः १ २ ककुदं [illegible] ककुत्स्थो ककुदो [illegible] ॥

स राहुश्छादयत्येतौ यथाकालं महाग्रहः चंद्रादित्यौ महाराज संक्षेपोयमुदाहृतः ४५ इत्येतत्ते महाराज पृष्टवानसि यत्तथा सर्वमुक्तं यथातत्त्वं तस्माच्छममवाप्नुहि ४६ यथोद्दिष्टं मया प्रोक्तं सनिर्माणमिदं जगत् तस्मादाश्वासमेकौरव्य पुत्रं दुर्योधनं प्रति ४७ श्रुत्वेदं भरतश्रेष्ठ भूमिपर्व मनोनुगः श्रीमान् भवति राजन्यः सिद्धार्थः साधुसंमतः ४८ आयुर्बलं च कीर्तिश्च तस्य तेजश्च वर्द्धते यः शृणोति महीपालः पर्वणीदं यतव्रतः ४९ प्रीयंते पितरस्तस्य तथैव च पितामहाः इदं तु भारतं वर्षं यत्र वर्त्तामहे वयं पूर्वैः प्रवर्तितं पुण्यं तत्सर्वं श्रुतवानसि ५० इति श्रीभीष्मपर्वणि जंबूखंडनिर्माणं समाप्तो १२ वैशंपायन उ० अथ गावल्गणिर्विद्वान् संयुगादेत्य भारत प्रत्यक्षदर्शी सर्वस्य भूतभव्यभविष्यवित् १ ध्यायते धृतराष्ट्राय सहसोपेत्य दुःखितः आचष्ट निहतं भीष्मं भरतानां पितामहं २ संजय उवाच संजयोहं महाराज नमस्ते भरतर्षभ हतो भीष्मः शांतनवो भरतानां पितामहः ३ ककुदं सर्वयोधानां धाम सर्वधनुष्मतां शरतल्पगतः सोद्य शेते कुरुपितामहः ४ यस्य वीर्यं समाश्रित्य द्यूतं पुत्रस्तवाकरोत् स शेते निहतो राजन् संख्ये भीष्मः शिखंडिना ५

वीरस्त्रिं चहितोयं मेतनः ४ ५ ॥ ॥ ॥

६ अपसंभ्रमो निर्भयः ७ ११ अर्बुदैः कोटिदशकं लक्षं वा पद्ममयुतमप्रसहं प्रतिज्ञानात् ११ १३ अध्यायः ॥ ॥

यः सर्वान्पृथिवीपालान्समवेतान्महामृधे जिगायैकरथेनैव काशिपुर्यां महारथः ६ जामदग्न्यं रणे रामं योधयदसंभ्रमः
नहतो जामदग्न्येन सहतोऽद्य शिखंडिना ७ महेंद्रसदृशः शौर्ये स्थैर्ये च हिमवानिव समुद्र इव गांभीर्ये सहिष्णुत्वे धरासमः ८ शरदं
ष्ट्रो धनुर्वक्त्रः खड्गजिह्वो दुरासदः नरसिंहः पिता तेऽद्य पांचाल्येन निपातितः ९ पांडवानां महत्सैन्यं यं दृष्ट्वोद्यतमाहवे प्रावेपत भयोद्वि
ग्नं सिंहं दृष्ट्वेव गोगणाः १० परिरक्ष्य स सेनां ते दशरात्रमनीकहा जगामास्तमिवादित्यः कृत्वा कर्म सुदुष्करं ११ यः स शक्र इवाक्षो
भ्यो वर्षन्बाणान्सहस्रशः जघान युधि योधानामर्बुदं दशभिर्दिनैः १२ स शेते निहतो भूमौ वातभग्न इव द्रुमः तव दुर्मंत्रिते राजन्
यथा नार्हः स भारत १३ ॥ इति भीष्मपर्वणि त्रयोध्यायः १३ धृतराष्ट्र उवाच कथं कुरूणामृषभो हतो भीष्मः शिखंडिना
कथं रथात्स न्यपतत्पिता मे वासवोपमः १ कथमाचक्ष्व मे योधा हीना भीष्मेण संजय बलिना देवकल्पेन गुर्वर्थे ब्रह्मचारिणा
२ तस्मिन्हते महाप्राज्ञे महेष्वासे महाबले महासत्त्वे नरव्याघ्रे किमु आसीन्मनस्तदा ३ आर्तिः परा माविशति यतः शंससि मे ह
तं कुरूणामृषभं वीरमकंप्यं पुरुषर्षभं ४ के तं यांतमनुप्राप्ताः के वास्यासन्पुरोगमाः केऽतिष्ठन्के न्यवर्तंत केऽन्ववर्तंत संजय ५

६७ अमलवंतिकेचिद्धित्वा सर्वेरथनानमीतिशेषः ८ १० प्रचिन्वतमुच्चयहारयतां ११ समचेष्टतप्रिप्रमालपराक्रमहतस्तापार्द्विविशेषंकृतवत १२ १६ १८

केऽग्रतस्थाद्दलमनुद्गुतस्त्रिपर्षभं तथानीकमाहमानं सहसाप्रतोऽन्वयुः यत्तमोऽर्करश्माविहन्यासेन्यममित्रहा ६ सहस्ररश्मिप्रतिमः परेषां भयमादधत् अकरोदुष्करं कर्मरणे पांडुसुतेषु यः ७ ग्रसमानमनीकानि य एनं प्रत्यवारयत् कृतिनं तं दुराधर्षं संजयास्य लमंतिके ८ कथं शांतनवं युद्धे पांडवाः प्रत्यवारयन् निकृंतंतमनीकानि विशाखंस्थं मनस्विनं ९ चापव्यात्ताननं घोरमसिजिह्वं दुरासदं अनर्हं पुरुषव्याघ्रं ह्रीमंतमपराजितं १० पातयामास कौंतेयः कथं तमजितं युधि ११ उग्रधन्वानमुग्रेषु वर्तमानं रथोत्तमं परेषामुत्तमांगानि प्रचिन्वंतमिषूत्तमैः ११ पांडवानां महत्सैन्यं यं दृष्ट्वोद्यंतमाहवे कालाग्निमिव दुर्धर्षं समचेष्टत नित्यशः १२ परिकृष्य सेनां दशरात्रमनीकहा जगामास्तमिवादित्यः कृत्वा कर्म सुदुष्करं १३ यः शक्र इवाक्षय्यं वर्षं शरमयं सृजन् जघान युधि योधानामर्बुदं दशभिर्दिनैः १४ स शेते निहतो भूमौ वातभग्न इव द्रुमः मम दुर्मंत्रितेनाजौ यथा नार्हति भारत १५ कथं शांतनवं दृष्ट्वा पांडवानामनीकिनी प्रहर्तुमशकत्तत्र भीष्मं भीमपराक्रमं १६ कथं भीष्मेण संग्रामं प्राकुर्वन्पांडुनाः कथं च नाजयद्भीष्मो द्रोणे जीवति संजय १७

तं४

नं८३

१८ २२ आजहुःसत्कृतंतः २३ २५ मौर्वीघोषस्तनयित्नुर्गर्जन्मेघइवप्रवर्षकःपृषत्कोबाणविंदुः धनुर्घोषवद्ध्वाद्रूपोमहाशब्दः निघ्नन्निहतवान् २६ २७ कार्मुकोर्मिणंचापो

कृपेसंनिहितेतत्रभारद्वाजात्मजेतथा भीष्मःप्रहर्तांश्रेष्ठःकथंसनिधनंगतः १८ कथंचातिरथस्तेनपांचाल्येनशिखंडिना भीष्मो
विनिहतोयुद्धेदेवैरपिदुरासदः १९ यःस्पर्धतेरणेनित्यंजामदग्न्यंमहाबलं अजितंजामदग्न्येनशक्रतुल्यपराक्रमं २० तंहतंसमरेभीष्मं
महारथकुलोदितं संजयाचक्ष्वमेवीरंयेनशर्मनविद्महे २१ मामकाःकेमहेष्वासानाजहुःसंजयाच्युतं दुर्योधनसमादिष्टाःकेवीराः
पर्यवारयन् २२ यच्छिखंडिमुखाःसर्वेपांडवाभीष्ममभ्ययुः कच्चित्तेकुरवःसर्वेनाजहुःसंजयाच्युतं २३ अश्मसारमयंनूनंहृदयं
सुदृढंमम यच्छ्रुत्वापुरुषव्याघ्रंहतंभीष्मंनदीर्यते २४ तस्मिन्सत्यंचमेधाचनीतिश्चभरतर्षभ अप्रमेयानिदुर्धर्षकथंसनिह
तोरणे २५ मौर्वीघोषस्तनयित्नुःपृषत्कपृषतोमहान् धनुर्ह्रादमहाशब्दोमहामेघइवोन्नतः २६ योभ्यवर्षतकौंतेयान्सपांचा
लान्ससंजयान् निघ्नन्पररथान्वीरोदानवानिववज्रभृत् २७ इष्वस्त्रसागरंघोरंबाणग्राहंदुरासदं कार्मुकोर्मिणमक्षय्य
मद्वीपंसमरेप्लवं २८ गदासिमकरावर्तंहयावर्तंगजाकुलं पदातिमत्स्यकलिलंशंखदुंदुभिनिःस्वनं २९ ॥ ॥

मिनंसंतंअद्वीपंनिराश्रयंपक्षेप्लवंतरणोपायहीनं २८ २९ ॥ ॥ ॥ ॥

२० २२ अपासेधन्नमवारयन् ३३ ३२ यः प्रजापतेरीश्वरः परमेष्ठी परमेपरे निषण्णो तिनप्याहिरण्यगर्भ इव नमस्येन्निशिताग्रः २८ ४१ पुत्रलक्ष्मतिपुत्रो नमेलभस्वविक्रमधाने

हयानगजपदातींश्चरथांश्चतरसावहून् निघ्नन्तंसमरेपरवीरणपहारिणं ३० निहत्यमानंकोपेनतेजसावपंतपं वेलेवमक
रवांस्केवीराः पर्यवारयन् ३१ भीष्मोयदकरोत्कर्मसमरेसंजयाहितं दुर्योधनहितार्थायकेतस्यास्यपुरोभवन् ३२ केरक्षन्
दक्षिणंचक्रंभीष्मस्यामिततेजसः पृष्ठतःकेपराञ्वीराननपासेधन्यतव्रताः ३३ केपुरस्तादवर्तन्तरक्षन्तोभीष्ममन्तिके केरक्षन्
उत्तरंचक्रंवीरावीरस्ययुध्यतः ३४ वामेचक्रेवर्तमानाःकेघ्नन्संजयसंजयान् अग्रतोऽग्रमनीकेषुकेभ्यारक्षन्दुरासदं ३५ पा
र्श्वतःकेऽभ्यरक्षन्तगच्छन्तोदुर्गमांगतिं समूहेकेपराञ्वीरान्प्रत्ययुध्यन्तसंजय ३६ रक्ष्यमाणःकथंवीरैर्गोप्यमानश्चतेनते दु
र्जयानामनीकानिनाजयत्तरसायुधि ३७ सर्वलोकेश्वरस्येवपरमेष्ठिप्रजापतेः कथंप्रहर्तुमपितेशेकुःसंजयपाण्डवाः ३८
यस्मिन्द्वीपेसमाश्वस्ययुध्यन्तेकुरवःपरैः तंनिमग्नंनरव्याघ्रंभीष्मंशंससिसंजय ३९ यस्यवीर्यंसमाश्रित्यममपुत्रोबृहद्बलः न
पाण्डवानगणयत्कथंसनिहतःपरैः ४० यःपुराविबुधैःसर्वैःसहाय्येयुद्धदुर्मदः काङ्क्षितोदानवान्घ्नद्भिःपितामममहाव्रतः
४१ यस्मिन्जातेमहावीर्येशंतनुर्लोकविश्रुतः शोकंदैन्यंचदुःखंचप्राजहत्पुत्रलक्ष्मणे ४३ म१

चेतिविम्बः ४२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प्रोक्तं लोके ख्याते ४२ सर्वास्त्रविनयोपेतं सर्वास्त्रशिक्षायुक्तं विनयं बलाद्यांश्च शिक्षा यां प्रणतो प्रमानितितिमेरितो ४४ ५२ यत्र सते परलोकप्रिये ५२ ५६ ५५

प्रोक्तं यथा यथा मां प्राहुस्त्वं धर्मनिरतं शुचिं वेदवेदांगतत्त्वज्ञं कथं शंससि मे हतं ४३ सर्वास्त्रविनयोपेतं शान्तं दान्तं मनस्विनं हतं
शान्तनवं श्रुत्वा मन्ये शेषं हतं बलं ४४ धर्माद्धर्मो बलवान्संप्राप्त इति मे मतिः यत्र वृद्धं गुरुं हत्वा राज्यमिच्छन्ति पाण्डवाः ४५
जामदग्न्यः पुरा रामः सर्वास्त्रविदनुत्तमः अंबार्थमुद्यतः संख्ये भीष्मेण युधि निर्जितः तमिन्द्रसमकर्माणं ककुदं सर्वधन्विनां ह
हतं शंससि मे भीष्मं किं नु दुःखमितः परं ४७ असकृत्क्षत्रियव्राताः संख्ये येन विनिर्जिताः जामदग्न्येन वीरेण परवीरनिघा
तिना ४८ न हतो मे महाबुद्धिः स हतो यः शिखण्डिना तस्मान्नूनं महावीर्याच्छक्राद्वा युद्धदुर्मदात् ४९ तेजोवीर्यबलैर्भूयाच्छि
खंडी द्रुपदात्मजः यः शूरं कृतिनं युद्धे सर्वशास्त्रविशारदं ५० परमास्त्रविदं वीरं जघान भरतर्षभं के वीरास्तमभित्रघ्नमन्वयुः
शस्त्रपाणिः शंस मे तथा चासीद्युद्धं भीष्मस्य पाण्डवैः ५१ योषेव हतवीरा मे सेना पुत्रस्य संजय अगोपमिव चोद्भ्रान्तं गोकुलं तद्ब
लं मम ५२ पौरुषं सर्वलोकस्य परं यस्मिन्महाहवे परासक्ते च वस्तस्मिन्कथमासीन्मनस्तदा ५३ जीवितेऽप्यद्य सामर्थ्यं किमि
वास्माकं संजय घातयित्वा महावीर्यं पितरं लोकधार्मिकं ५४ अगाधे सलिले मग्नां दृष्ट्वेव पारगाः भीष्मे हते भृशं दुःखान्मन्ये शो

पा 3 नावं । चन्ति पुत्रकाः ५५

६५ ५७ ५८ ५९ ६० ६२ ६३ ६५ ६७ ६८

अश्मसारमयंनूनंहृदयंममसंजय यछ्रुत्वापुरुषव्याघ्रंहतंश्रुत्वानदीर्यते ५६ यस्मिन्सत्यंचमेधाचनीतिश्चपुरुषर्षभे
अप्रमेयाणिदुर्धर्षेकथंसनिहतोयुधि ५७ नचास्त्रेणनशौर्येणतपसामेधयानच नधृत्यानपुनस्त्यागान्मृत्योःकश्चिद्वि
मुच्यते ५८ कालोनूनंमहावीर्यःसर्वलोकदुरत्ययः यत्रशांतनवंभीष्मंहतंशंससिसंजय ५९ पुत्रशोकाभिसंतप्तो
महद्दुःखमचिंतयन् आशंसेहंपुरात्राणंभीष्माच्छांतनुनंदनात् ६० यदादित्यमिवापश्यत्पतितंभुविसंजयं दुर्योधनः
शांतनवंकिंतदाप्रत्यपद्यत ६१ नाहंस्वेषांपरेषांवाबुध्यासंजयचिंतयन् शेषंकिंचित्प्रपश्यामिप्रत्यनीकेमहीक्षितां ६२
दारुणःक्षत्रधर्मोयमृषिभिःसंप्रदर्शितः यत्रशांतनवंहत्वाराज्यमिच्छंतिपांडवाः ६३ वयंवाराज्यमिच्छामोघातयित्वामहाव्र
तं क्षत्रधर्मेस्थिताःपार्थानापराध्यंतिपुत्रकाः ६४ एतदार्येणकर्तव्यंकृच्छ्रास्वापत्सुसंजय पराक्रमःपरंशक्त्यातच्चतस्मिन्प्रति
ष्ठितं ६५ अनीकानिविनिघ्नंतंह्रीमंतमपराजितं कथंशांतनवंतातपांडुपुत्रान्यवारयन् ६६ यथायुक्तान्यनीकानिकथंयुद्धं
महात्मभिः कथंवानिहतोभीष्मःपितासंजयमेपरैः ६७ दुर्योधनश्चकर्णश्चशकुनिश्चापिसौबलः दुःशासनश्चकितवोहतेभी
ष्मेकिमब्रुवन् ६८ ॥

६६ ७० अध्यायः लघुकरतिस्मापरकं स्मासंजयितं १ खुनसापायेन २

यच्छूराहिपरासीनानिवारणवाजिनं शरशक्तिमहाखड्गतोमराशंमहाभयं ६९ प्राविशंकितवामंदाः सभांयुद्धदुरासदां प्राण
द्यूतप्रतिभये केत्रीवंततनरर्षभाः ७० केजीयंतेजितास्तत्रकेतत्रनिपातिताः अन्येभीष्माच्छांतनवात्तन्ममाचक्ष्वसंजय ७१
नहिमेशांतिरस्तीहश्रुत्वादेवव्रतंहतं पितरंभीमकर्माणंभीष्ममाहवशोभिनं ७२ आर्तिर्मेहृदयेरूढामहतीपुत्रहानिजा त्वंहिमेसर्पि
षेवाग्निमुद्दीपयसिसंजय ७३ महांतंभारमुद्यम्यविश्रुतंसार्वलौकिकं दृष्ट्वाविनिहतंभीष्मंमन्येशोचंतिपुत्रकाः ७४ श्रोष्यामि
तानिदुःखानिदुर्योधनकृतान्यहं तस्मान्मेसर्वमाचक्ष्वयद्वृत्तंतत्रसंजय ७५ यद्वृत्तंतत्रसंग्रामेमंदस्याबुद्धिसंभवं अपनीतंसुनी
तंयत्तन्ममाचक्ष्वसंजय ७६ यत्कृतंतत्रसंग्रामेभीष्मेणजयमिच्छता तेजोयुक्तंकृतास्त्रेणशंसतच्चाप्यशेषतः ७७ यथातदभव
द्युद्धंकुरुपांडवसेनयोः क्रमेणयेनयस्मिंश्चकालेयच्चयथाभवत् ७८॥ इतिभीष्मपर्वणि अध्यायः १४ संजयउ० उपपन्नो
यमनुप्रश्नोमहाराजयथार्हसि नतुदुर्योधनेदोष मिममासक्तुमर्हसि १ यआत्मनोदुश्चरितादशुभंप्राप्नुयान्नरः एनसातेन
नान्यंसउपाशंकितुमर्हति २

महाराजमनुष्येषु निर्दयः सर्वमाचरेत् सवधः सर्वलोकस्य निर्दिष्टानि समाचरन् ३ निकारो निकृतिश्चैते पांडवैस्त्वमतीभया
स्वनुभूतः महामोहैः शांतस्य सुखशिंवने ४ हयानां च गजानां च रथानां चामितौजसां प्रसभं यन्मया दिष्टं हृष्टो योगवलेन च ५
स्मरणं तस्य पृथिवीपालमा च शोके मनः कृथाः दिष्टमेतत्पुरानूनमिदं मेवनराधिप ६ नमस्कृत्वा पितुस्त्वहं पाराशर्याय धीम
ते पस्य प्रसादाहि दिव्यं तत्प्राप्तं ज्ञानमनुत्तमं ७ दृष्टिश्चातीन्द्रियाराजन्दूराच्छ्रवणमेव च परचित्तस्य विज्ञानमतीतानागतस्य
च ८ सुस्थितोत्सति विज्ञानं स्वाकाशे च गतिः शुभा सक्तैः सङ्गो युद्धेषु वाहनानां महात्मनः ९ शृणु मे विस्तरेणेदं विचित्रं
परमाद्भुतं भरतानाममभूद्युद्धं यथा तल्लोमहर्षणं १० तेष्वनीकेषु यत्तेषु व्यूढेषु च विधानतः दुर्योधनो महाराज दुःशासनम
थाब्रवीत् ११ दुःशासन रथास्त्वूर्णं युक्तंतां भीष्मरक्षिणः अनीकानि च सर्वाणि शीघ्रं त्वमनुचोदय १२ अयं स मामभिप्रा
प्तो वर्षपूगाभिचिंतितः पांडवानां ससैन्यानां कुरूणां च समागमः नातः कार्यतमं मन्ये रणे भीष्मस्य रक्षणात् हन्याद्गुप्तोह्यसौ
पार्थान्सोमकांश्च ससृंजयान् १४ अब्रवीच्च विशुद्धात्मा नाहं हन्यां शिखंडिनं श्रूयते स्त्री ह्ययं पूर्वं तस्माद्वर्ज्यो रणे मम १५

तस्माद्भीष्मोऽभिरक्षितव्यो विशेषेणेति मे मतिः शिखण्डिनो वधेयत्ताः सर्वे तिष्ठन्तु मामकाः १६ तथा प्राच्याः प्रतीच्याश्च दाक्षिणात्योत्त
रापथाः सर्वशस्त्रेषु कुशलास्ते रक्षन्तु पितामहं १७ अरक्ष्यमाणं हि वृको हन्यात्सिंहं बलान्वितं मा सिंहं जम्बुकेनेव घातयामः शि
खण्डिना वामं चक्रं युधामन्युरुत्तमौजाश्च दक्षिणं गोप्तारौ फाल्गुनस्यैतौ फाल्गुनोऽपि शिखण्डिनः १९ संरक्ष्यमाणः पार्थेन भी
ष्मेण च विवर्जितः यथा न हन्याद्गाङ्गेयं दुःशासन तथा कुरु २० ॥इति श्रीभीष्मपर्वणि[illegible]ध्यायः २५ संजय उवाच ततो रजन्यां व्यु
ष्टायां शब्दः समभून्महान् क्रोशतां भूमिपालानां युज्यतां युज्यतामिति १ शङ्खदुन्दुभिघोषैश्च सिंहनादैश्च भारत हयहेषि
तनादैश्च रथनेमिस्वनैस्तथा २ गजानां बृंहतां चैव योधानां चापि गर्जतां क्ष्वेडितास्फोटितोत्क्रुष्टैस्तुमुलः सर्वतोऽभवत् ३
उदतिष्ठन्महाराज सर्वं युक्तमशेषतः सूर्योदये महत्सैन्यं कुरुपाण्डवसेनयोः ४ राजेन्द्र तव पुत्राणां पाण्डवानां तथैव च दुःप्रध
र्षाणि चास्त्राणि शस्त्राणि कवचानि च ५ ततः प्रकाशे सैन्यानि समदृश्यन्त भारत त्वदीयानां परेषां च शस्त्रवन्ति महान्ति च
६ तत्र नागा रथाश्चैव जाम्बूनदपरिष्कृताः विभ्राजमाना दृश्यन्ते मेघा इव सविद्युतः ७ ॥

६ वाणुएकाएःपेषांवंवनार्थमिसर्थः १० १३ तलवङ्गाः स्तलंसाद्वानत्राणांवद्धेयेत्लेकलापिनः तूणावंतः १५ ॥ १६

रथानीकाम्महृश्यंतनगराणीवभूरिशः स्वनीवस्थशुभेनतत्रपितानेपू चंद्रवत ९ धनुर्भि षिभिः खड्गैर्गदाभिः शक्तितोमरैः
योधाः प्रहरणोःशुभ्रैस्तिष्ठनीके व्यवस्थिताः ८ गजाः पदाताः रथिनस्तुरगाश्चविशांपते अनिषक्त्वाग्रएकाएः शतशोथसहस्र
शः १० ध्वजावहुविधाकाएअदृश्यंतसमुच्छ्रिताः तेषांचैववपोषांचघुतिमंतः सहस्रशः ११ कांचनामणिचित्रांगाज्वलंत
कांशिणाः १२ उपेतैरपृथैश्चित्रास्तलत्रवद्धाः कपालिनः ऋषभाक्षामनुष्येंद्रश्चमूमुखगतावभुः १४ शकुनिः सौवलः
शल्यस्त्रावंसोथजयद्रथः विंदानुविंदावैकेकयाः कांबोजश्चसुदक्षिणः १५ श्रुतायुधश्चकालिंगोजयसेनश्चपार्थिवः वृह
द्वलश्चकौशल्यः कृतवर्माचसात्वतः १६ दृशेतेपुरुषव्याघ्राः शूराः परिघवाहवः अक्षौहिणीनांपतयोयज्वानो भूरिदक्षिणाः
१७ एतेचान्येचवहवोदुर्योधनवशानुगाः राजानोराजपुत्राश्चनीतिमंतोमहाबलाः १८ सन्नद्धाः समदृश्यंतस्वेष्वनीकेष्व
वस्थिताः वद्धकृष्णाजिनाः सर्वेवलिनोयुद्धशालिनः १९

२० २८ तथाविधः संप्रदृश्यतिशेषः २१ अध्यायः पद्याम १

६३

हृष्टा दुर्योधनस्यार्थे ब्रह्मलोकायदीक्षिताः समर्था दशवाहिन्यः परिगृह्यव्यवस्थिताः २० एकादशी धार्तराष्ट्री कौरवाणां महाचमूः
अग्रतः सर्वसैन्यानां यत्र शांतनवोग्रणीः २१ श्वेतोष्णीषं श्वेतहयं श्वेतवर्माणमच्युतं अपश्याम महाराज भीष्मं चंद्रमिवोदितं २२
हेमतालध्वजं भीष्मं राजते स्यंदने स्थितं श्वेताभ्र इव तीक्ष्णांशुं ददृशुः कुरुपांडवाः २३ संजयाश्च महेष्वासा धृष्टद्युम्नपुरोगमाः जृं
भमाणं महासिंहं क्षुद्राः क्षुद्रमृगा यथा २४ धृष्टद्युम्नमुखाः सर्वे समुद्विविजिरे मुहुः एकादशैताः श्रीजुष्टा वाहिन्यस्तव पार्थिव
२५ पांडवानां तथा सप्त महापुरुषपालिताः उन्मत्तमकरावर्तौ महाग्राहसमाकुलौ २६ युगांते समवेतौ तौ दृश्येते सागराविव
नैव नस्तादृशो राजन् दृष्टपूर्वो न च श्रुतः २७ अनीकानां समेतानां कौरवाणां तथाविधः ॥ इति श्रीमन्महाभारते भीष्मपर्व
णि अध्यायः १९ ॥ संजय उवाच यथा स भगवान्व्यासः कृष्णद्वैपायनोब्रवीत तथैव सहिताः सर्वे समाजग्मुर्महीक्षिताः १

हि ४

गाह ३

पं३ शा२

मघाविषयगः सोमस्तद्दिने प्रसवप्रयेतेति मघापित्र्यं नक्षत्रं नमस्त्रिविषयो देशः पितृलोकः तद्गतः सोमः कृष्णपक्षे वृद्धात्यं तद्दिनमुक्तं भागतः सप्तविंशांशे हि मंत्रेप्रथमेमासि शक्रपक्ष
त्रयोदशी। मघेति भारतं पुण्डं नक्षत्रेत्रयमेदेवते प्रथमेमार्गशीर्षे स्यत्रयोदश्यां देनतघृतक्षोच तद्दृश्ये वग्राल्याश्च नूने नक्षत्रोभिक्षोमाघमासे सिताष्टमी तित्रयोदश्यां तमध्यात्रि
भागह्येनिपतितनरति तेचे गपुष्यस्मरणमेचैतदेशवा न्हितनयोभीक्ष्मतुल्या योरष्टमीत्रयोदशी मेयोगदर्शनात्स्त्रत्रपुण्यविमाघशक्षेमकृपनाभिप्रायेणा नरानी तत्र भवान्
श्रुपिताष्टमी निष्ठेरः श्च्यत्यासप्तमी ह्यरष्योरवतयोर्हनने प्रधो निपतत्श्रमावाष्यायां वृत्योपथनहन नंतं त्रेयोकं तत्रापमाघामाशद्धः इष्टिदिने प्रतिपदयेवभ्रपुक्तो वेदिनकः
पम हवेतरति भागी नस्रासाकिं तपुमेदैवते मगशी षमेवाश्यासंतस्याहि पूर्वद्रलंपश्चकेस्यत्याद्याह्यं उत्तरंहैहमवे देवत्तलोदेवतेन न तत्रा मृतात्मसुपामोदेयाना मधुर्दृष्टप्रिमि प४

मघाविषयगः सोमस्तद्दिने प्रसवघृत शीप्रमानाश्च तं पेतवै विभस्तमहाग्रहाः २

अतिकिं च वल्लाविंशदृह्यामघदेवयेभिः सततम्यैवपुष्णात्संघयानो मित्रश्रवेणापुनरागतरतिपुच्छां भाद्रपदारेशेन्हि तीर्थे पात्रानश्चागतसवल्लेदेवमवचनात् श्रद्धोपुष्टसमा
क्षिदैवतेततः पञ्चीमेषादृशार्शेमगशी यत्रपुष्टोभः संभवतिनं लकविशेषाएवं श्रुष्टदशहिमध्येन त्र त्रपस्मकल्पपितेश्च पुत्रत्वात कार्तिकादृतिकायोगानुपातेन व
तदैषांमगासेव संभावनाञ्चएतेन पुष्टांभेप्रकृस्यमघाविषयगः सोमस्तद्दिने प्रसवयतेतिमीक्षपर्वणितसंजयोवाक्यादिहतुलातशृाद्धेह मघापदेनतत्सहचरापितरोलक्ष्यं
तेनपुत्रेनपत्नानांउत्तमेस्पष्टं दानार्थेचेद्रलत्पितृलोकेसंनिहितोभवति तिथौ गंगांतदिव्यदेहलाभश्रद्धाधीनइतिशास्त्रसिद्धः तथाहृद्ययात्रियुक्ते चंद्रोदयकालेत्रिभाग
ते
जिपा१

वाक्यान्मघायां प्रद्युम्नं भद्रमविनिरतं पजेदेव २

ठोवंसमनुक्रामस्थि नागमा १

मात्रशेषायां चैत्रे पुष्यमघनेनेसुक्ते तत्र त्रिभागेन सप्तत्रिंशन्मुहूर्ते शेषायामित्यर्थः तथा अष्टपंचाशते रात्रः शयानस्य घेमे गतारतिभीष्मवचनं तमौत्रेः पक्षोपेर
तिवाकृष्णशेषायामित्यर्थः तथा अष्टपंचाशते शतहीनेपथ्यायामानत्वात् अष्टपंच अष्टपंचाशतन्त्रयो अतीतारइति आलोचयं विलोमशोधनात् अष्टपंचाशत्तेन शत
तत्रपोष्णचत्वारिंशतन्त्रयो अतीतारइत्यर्थः तथाचपौषकृष्णाष्टमीतो माघशुक्लपंचम्यां तावतीदिनसंख्या पूर्यते पक्षस्य चतस्रो पोभागोगतो भवतितत्राघेकादशतिथिक्ष
यात पंचम्याः द्विचत्वारिंशत्तमत्वेन पंचशेषाभविष्यमर्हति सत्रकार्पशेषाद्विहसागाद्विचशेषानम्नपक्षशेषइति आलोचनेपातत्राप निष्कर्षः कार्त्तिकशुक्लेद्वादशतो रेवमा
कृष्णप्रयाणान्तेनामार्गशीर्षकृष्णपंचम्यां पुष्यनक्षत्रे निर्याणंततः पंचम्या उपरि षष्ठी मार्गाप्यमसाद्दिनानिगणयित्वा तदुपर्यक्षमेद्वे अमावास्या भविष्यतीत्येनेनत्र
योदशदिनात्मको पंचकृष्णपक्षो महोत्सातजनकइति मचितं भीष्मपर्वणि व्यासः पक्षोनोपुनर्दशाहो संख्यापूर्णाभवतीति मार्गशीर्षकृष्णपंचमीमारभ्यपौषशुक्ल
प्रतिपदं द्विचत्वारिंशत्तिथिः भवतीति वक्ष्यमाणवाक्योक्तदिनसंख्या नक्षत्रसंख्या चानुगृहीता भवति पक्षसमाद्यो द्विवमामावास्या भविष्यतीति संग्रामे योजयेप न
चतोप्याहुः शक्ते रेवती प्रयाणं वैकुरुक्षेत्रे पुष्येणेति पुनः पुनः निरुक्तिर्यो घनवाक्यं तत्र संग्राममित्यनेन संग्रामेजयसाधनं धाणवध्या स्विं तस्मापौजयेदिति शक्रेरे
वतामित्यनेन तस्यां ज्येष्ठानक्षत्रयोगउक्तेतस्य चतिथिद्वयपक्षयात्त्रासंभवेनपित्रतिथिद्वैवत नक्षत्रपाहुर्निष्पिनक्षत्रयोगएवंतयोगाद्वो त्रेपरतिसर्वसमंजसम

ग्रहाः राहुकेतोरपग्रहत्वात्सिव १

६२

३ ववाशिरे शङ्कुनवन्तः ४ १० अयोनिधनं स्वपसा सह स्वामात्यां ११ १२ १३ १४ १५

मांसशोणित

स३

विधाय मन्त्रवादिस्तु देवे प्रसह्य रूपतः ज्वलन्सा शिवया भूयो भेनुमानुदितो रविः २ ववाशिरे च दीप्तायां दिशि गोमायु
वायसाः लिप्समानाः शरीराणि नभोजनाः ४ अहन्यहनि पार्थानां वृद्धः कुरुपितामहः भारद्वाजात्मजश्चैव प्रातरुत्थाय
संयतौ ५ जयोऽस्तु पाण्डुपुत्राणामित्यूचतुररिन्दमौ युयुधाते तवार्थाय यथा स समयः कृतः ६ सर्वधर्मविशेषज्ञः पिता देव
व्रतस्तव समानीय महीपालानिदं वचनमब्रवीत् ७ इदं वः क्षत्रिया द्वारं स्वर्गायापावृतं महत् गच्छध्वं तेन शक्रस्य ब्रह्म
णः सहलोकताम् ८ एष वः शाश्वतः पन्थाः पूर्वैः पूर्वतरैः कृतः संभावयध्वमात्मानमव्यग्रमनसो युधि ९ नाभागोऽथ
ययातिश्च मान्धाता नहुषो नृपः संसिद्धाः परमं स्थानं गताः कर्मभिरीदृशैः १० अधर्मः क्षत्रियस्यैष यद्व्याधिमरणं गृहे
यदाजौ निधनं याति सोऽस्य धर्मः सनातनः ११ एवमुक्ता महीपाला भीष्मेण भरतर्षभ निर्ययुः स्वान्यनीकानि शोभ
यन्तो रथोत्तमैः १२ स तु वैकर्तनः कर्णः सामात्यः सह बन्धुभिः न्यासितः समरे शस्त्रं भीष्मेण भरतर्षभ १३ अपेतकर्णाः पु
त्रास्ते राजानश्चैव तावकाः निर्ययुः सिंहनादेन नादयन्तो दिशो दश १४ श्वेतैश्छत्रैः पताकाभिर्ध्वजवारणवाजिभिः तान्य
नीकान्यशोभन्त रथैरथ पदातिभिः १५

भी॰ प
३८९

२६ १७ तालेनमुजमूतेन १८ १९ गोवासनःशैब्यःपः २० २१ २२ २३ २४ २५ २६

भीष्मणावशैश्चवदुर्भीनांचनिःस्वनैः रथनेमिनिनादैश्चबभूवाकुलितामही १६ कांचनांगदकेयूरैःकार्मुकैश्चमहारथाः
भ्राजमानाव्यदृश्यन्तजंगमाःपर्वताइव १७ तालेनमहताभीष्मःपंचतारेणकेतुना विमलादित्यसंकाशस्तस्थौकुरुचमूपतिः १८
येत्वदीयामहेष्वासाराजानोभरतर्षभ आवर्तंतयथादेशंराजन्शांतनवस्यते १९ सतुगोवासनःशैब्यःसहितःसर्वराजभिः ययौमा
तंगराजेनराजार्हेणपताकिना २० पद्मवर्णस्त्वनीकानांसर्वेषामग्रतःस्थितः अश्वत्थामाययौयत्तःसिंहलांगूलकेतुना २१
श्रुतायुश्चित्रसेनःपुरुमित्रोविविंशतिः शल्योभूरिश्रवाश्चैवविकर्णश्चमहारथः एतेसप्तमहेष्वासाद्रोणपुत्रपुरोगमाः
स्यंदनैर्वरवर्माणोभीष्मस्यासन्पुरोगमाः २३ तेषामपिमहोत्सेधाःशोभयंतोरथोत्तमान् भ्राजमानाव्यरोचंतजांबून
दमयाध्वजाः २४ जांबूनदमयीवेदीकमंडलुविभूषिता केतुराचार्यमुख्यस्यद्रोणस्यधनुषासह २५ अनेकशतसा
हस्रमनीकमनुकर्षतः महान्दुर्योधनस्यासीन्नागोमणिमयोध्वजः तस्यपौरवकालिंगकांबोजाःससुदक्षिणाः २५ क्षेम
धन्वाचशल्यश्चतस्थुःप्रमुखतोरथाः स्यंदनेनमहार्हेणकेतुनावृषभेणच प्रकर्षन्निवसेनाग्रंमागधस्तुनृपोययौ २६

सी व२

एम
३८

अंगपतिना कर्णपुत्रेण वृषकेतुना २७ वाह्लीकेन केतुमुख्येन नीतिसंबंधः २८ ३२ निष्केणाकंराभरणेन १८ अध्यायः

तदंगपतिना गुप्तं रुक्मेणाच मनस्विना शास्त्राभ्रघनप्रख्यं प्राग्ज्यानां महद्बलं २७ अनीकप्रमुखे तिष्ठन्वाह्लीकानां महाय
शाः शुशुभे केतुमुख्येन राजतेन जयद्रथः २८ शतेरथसहस्राणां तस्यासन्वशवर्तिनः अष्टौ नागसहस्राणि साधिनाना
मयुतानि षट् २९ तस्मिंधुपतिना राजन्पालितं ध्वजिनीमुखं अनंतरथनागाश्वमशोभत महद्बलं ३० षष्ट्यारथ
सहस्रैस्तु नागानामयुतेन च पतिः सर्वकलिंगानां ययौ केतुमता सह ३१ तस्य पर्वतसंकाशा व्यरोचंत महागजाः
यंत्रतोमरतूणीरैः पताकैश्च सुशोभितैः ३२ शुशुभे केतुमुख्येन पावकेन कलिंगकः श्वेतछत्रेण निष्केण चामरव्य
जनेन च ३३ केतुमानपि मातंगं विचित्रपरमांकुशं आस्थितः समरे राजन्मेघस्थ इव भानुमान् ३४ तेजसा दीप्यमा
नस्तु वारणोत्तममास्थितः भगदत्तो ययौ राजा यथा वज्रधरस्तथा गजस्कंधगतावास्तां भगदत्तेन संमितौ विंदानुविंदावा
वंत्यौ केतुमंतमनुव्रतौ ३६ स रथानीकवान्व्यूहो हस्त्यंगोत्तमशीर्षवान् वाजिपक्षः पतत्युग्रः प्राहसत्सर्वतोमुखः ३७
द्रोणेन विहितो राजन्राज्ञा शांतनवेन च तथैवाचार्यपुत्रेण वाह्लीकेन कृपेण च ३८ इति भीष्मपर्वणि अध्यायः १८

ततोमुहूर्तं १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३

संजयउवाच ततोमुहूर्तात्तुमुलः शब्दोहृदयकंपनः अश्रूयतमहाराजयोधानांप्रयुयुत्सतां १ शंखदुंदुभिनिर्घोषैर्वार
णानांचबृंहितैः नेमिघोषैरथानांचदीर्यतीववसुंधरा २ हयानांहेषमाणानांयोधानांचैवगर्जतां क्षणेनैवनभोभूमिः शब्दे
नापूरितंतदा ३ पुत्राणांतवदुर्धर्षपांडवानांतथैवच समकंपंतसैन्यानिपरस्परसमागमे ४ तत्रनागारथाश्चैवजां
बूनदविभूषिताः भ्राजमानाव्यदृश्यंतमेघाइवसविद्युतः ५ ध्वजाबहुविधाकारास्तावकानांनराधिप कांचनांगदिनोर
ज्वलिताइवपावकाः ६ तेषांचैवपरेषांचसमदृश्यंतभारत महेंद्रकेतवःशुभ्रामहेंद्रसदनेष्विव ७ कांचनैःकवचै
र्वीराज्वलनार्कसमप्रभाः कुरुयोधवराराजन्विचित्रायुधकार्मुकाः ८ उद्यतायुधैश्चित्रैस्तालवद्धाःपिनाकिनः ऋष
भाक्षामहेष्वासाश्चमूमुखगताविभुः ९ पृष्ठगोपास्तुभीष्मस्यपुत्रास्तवनराधिप दुःशासनोदुर्विषहोदुर्मुखोदुःसहस्तथा
१० विविंशतिश्चित्रसेनोविकर्णश्चमहारथः सत्यव्रतःपुरुमित्रोजयोभूरिश्रवाःशलः ११ रथाविंशतिसाहस्रास्तथैषाम
नुयायिनः अभीषाहाःशूरसेनाःशिवयो वसातयः १२ शाल्वामत्स्यास्तथांवष्ठास्त्रिगर्ताःकेकयास्तथा सौवीराःकैतवाः

१४ १५ शतानामयुतानिषट्१६ शतानामयुतान्यासन्निषण्णालक्षाणीतिपाठांत २१ १८ अपाहरः अक्षो १९ २ ३ संहतानितरल्पैः संहसेयद्यपि बहुभि

शूरशैलेजनपदाः सर्वे शूरास्तनुत्यजः महता रथवंशेन नतेराष्ट्रःपितामहं १४ अनीकं दशसाहस्रं कुंजराणां तरस्विनां मा
गधो येन नृपतिस्तद्रथानीकमन्वयात १५ रथानां चक्ररक्षाश्च पादरक्षाश्च दंतिनां अभवन्वाहिनीमध्ये शतानामयुतानिष
ट् १६ पदाताश्चाग्रतो गच्छन्धनुश्चर्मासिपाणयः अनेकशतसाहस्रा नखरप्रासयोधिनः १७ अक्षौहिण्यो दशैका च तव
पुत्रस्य भारत अदृश्यंत महाराज गंगेव यमुनांतरा १८ इति भीष्मपर्वणि अध्यायः १९ धृतराष्ट्र उवाच अक्षौहिण्यो दशैका
च व्यूढां दृष्ट्वा युधिष्ठिरः कथमल्पेन सैन्येन प्रत्यव्यूहत पांडवः १ यो वेद मानुषं व्यूहं दैवं गांधर्वमासुरं कथं भीष्मं स कौंते
यः प्रत्यव्यूहत संजय २ संजय धार्तराष्ट्राण्यनीकानि दृष्ट्वा व्यूढानि पांडवः अभ्यभाषत धर्मात्मा धर्मराजो धनंजयं ३
महर्षेर्वचनात्तात वेदयंति बृहस्पतेः संहतान्योधयेदल्पान्कामं विस्तारयेद्बहून ४ सूचीमुखमनीकं स्यादल्पानां बहुभिः
सह अस्माकं च तथा सैन्यमल्पीयः सुतरां परैः ५ एतद्वचनमाज्ञाय महर्षेर्व्यूह पांडव: एतच्छ्रुत्वा धर्मराजं प्रत्यभाष
त पांडवः ६ एष व्यूहामि ते राजन्व्यूहं परमदुर्जयं अचलं नाम वज्राख्यं विहितं वज्रपाणिना ७

[illegible]विशकल्पैते रपियोद्धुं शक्यमिसर्पः ४ ५ अहमहं कुरु ६ ७ " " " "

८ १३ संस्थानांकिंचिद्बलंतौ १४ १५ १६ १७ १८ १९ २० ॥ ॥ २० ॥

यः सवातरंहोद्भूतः समरे दुःसहः परैः एनः पुरोयोत्स्यतिवै भीमः प्रहरतांवरः ८ नेतास्मिन्प्रयुद्धेसेनानांमुद्धुरुषसत्तमः स्त्र
ग्रग्रणीर्योत्स्यतिनो युद्धोपायविचक्षणः ९ यंदृष्ट्वाकुरवः सर्वेदुर्योधनपुरोगमाः निवर्तिष्यंतिसंत्रस्ताः सिंहंक्षुद्रमृगा
यथा १० तंसर्वेसंश्रयिष्यामः प्राकारमकुतोभयाः भीमंप्रहरतांश्रेष्ठंदेवराजमिवामराः ११ नहिसोस्तिपुमांल्लोके
यः संक्रुद्धंवृकोदरं द्रष्टुमत्युग्रकर्माणंविषहेतनरर्षभ १२ एवमुक्त्वामहाबाहुस्तथाचक्रेधनंजयः व्यूह्यतानिबला
न्याशुप्रययौफाल्गुनस्तथा १३ संप्रयातान्कुरून्दृष्ट्वापांडवानांमहाचमूः गंगेवपूर्णास्तिमितास्पंदमानाव्यदृश्यत १४
भीमसेनोग्रणीस्तेषांधृष्टद्युम्नश्चवीर्यवान् नकुलः सहदेवश्चधृष्टकेतुश्चपार्थिवाः १५ विराटश्चततः पश्चाद्राजाथा
क्षौहिणीवृतः भ्रातृभिः सहपुत्रैश्चसोभ्यरक्षतपृष्ठतः १६ चक्ररक्षौतुभीमस्यमाद्रीपुत्रौमहाद्युती द्रौपदेयाः ससौभद्राः
पृष्ठगोपास्तरस्विनः १७ धृष्टद्युम्नश्चपांचाल्यस्तेषांगोप्तामहारथः सहितः पृतनाशूरैर्रथमुख्यैः प्रभद्रकैः १८ शि
खंडीतुततः पश्चादर्जुनेनाभिरक्षितः यत्तोभीष्मविनाशायप्रययौभरतर्षभ १९ पृष्ठतोप्यर्जुनस्यासीद्युयुधानोमहा
बलः चक्ररक्षौतुपांचाल्यौयुधामन्यूत्तमौजसौ २०

२१ धृतराष्ट्र महाराजाद्य सेनेन तवैवैतैर्भागशिति समरपेत २२ २९ वारणाराजानमन्वपूरिति संबंधः अचलाः निश्चलाः ३० जीमूताः पर्वताः जीमूतो ऽद्रिर्विनिमेरिति ३२

केकेयो धृष्टकेतुश्च चेकितानश्च वीर्यवान् भीमसेनो गदां बिभ्रत्कृत्स्नायसमयीं दृढां चरन्वेगेन महता समुद्रमपि शोषयेत् २१
एते तिष्ठन्ति सामात्याः प्रेक्षन्तस्ते जनाधिप धृतराष्ट्र महाराजाद्य इति बिभत्सुरब्रवीत् भीमसेनं तदा राजन् दर्शयन्स महाबलं
ब्रुवाणं तं तथा पार्थं सर्वसैन्यानि भारत २३ अपूजयंस्तदा वाग्भिरनुकूलाभिराहवे राजा तु मध्यमानीके कुन्तीपुत्रो युधि
ष्ठिरः २४ बृहद्भिः कुञ्जरैर्मत्तैश्चलद्भिरचलैरिव अक्षौहिण्याथ पाञ्चाल्यो यज्ञसेनो महामनाः २५ विराटमन्वयात्
स्थासां रवार्थपराक्रमी तेषामादित्यचन्द्राभाः कनकोत्तमभूषणाः २६ नानाचिह्नधरा राजन् रथेष्वासन्महाध्वजाः
समुत्सार्य ततः पश्चाद्धृष्टद्युम्नो महारथः २७ भ्रातृभिः सह पुत्रैश्च सोऽभ्यरक्षद्युधिष्ठिरं त्वदीयानां परेषां च रथेषु विपुलान्
ध्वजान् २८ अभिभूयार्जुनस्यैको रथे तस्थौ महाकपिः पादातास्त्वग्रतो गच्छन्नसिशक्त्यृष्टिपाणयः अनेकश
तसाहस्रा भीमसेनस्य रक्षिणः वारणा दशसाहस्राः प्रभिन्नकरटामुखाः शूरा हेममयैर्जालैर्दीप्यमाना इवाचलाः
३० क्षरन्त इव जीमूता महार्हाः पद्मगन्धिनः राजानमन्वयुः पश्चाज्जीमूता इव वार्षिकाः ३१ भीमसेनो गदां भीमां प्रक
र्षन्परिघोपमां प्रचकर्ष महासैन्यं दुराधर्षो महामनाः ३२

३५ ३६ प्रावात्प्रववौसपृषतःसबिंदुः ३७ वाताःहृ[illegible] ३८ आहत्यआस्फाल्य ४३ मज्जानइतिनोस्माकंयोधानांमज्जाःधातुविशेषान्स्यंसंतइवेतियोज्यंभीम

तमर्कमिवदुःप्रेक्ष्यंतपंतमिववाहिनीं नशेकुःसर्वयोधास्तेप्रतिवीक्षितुमंतिके ३३ वज्रोनामैषसव्यूहोनिर्भयःसर्वतोमु
खः चापविद्युध्वजोघोरोगुप्तोगांडीवधन्वना ३४ यंप्रतिव्यूह्यतिष्ठंतिपांडवास्तववाहिनीं अजेयोमानुषेलोकेपांडवैरभि
रक्षितः ३५ संध्यांतिष्ठत्सुसैन्येषुसूर्यस्योदयनंप्रति प्रावात्सपृषतोवायुर्निरभ्रेस्तनयित्नुमान् ३६ विष्वग्वातास्त्ववि
वर्वुर्नीचैःशर्करकर्षिणः रजश्चोद्धूयमानंतुतमसाच्छादयज्जगत् ३७ पपातमहतीचोल्काप्राङ्मुखीभरतर्षभ उद्यंतंसूर्य
माहत्यशीर्यमाणामहास्वना ३८ अथसज्जीयमानेषुसैन्येषुभरतर्षभ निःप्रभोभ्युदयौसूर्यःसघोषंभूश्चचाल च ३९
व्यशीर्यतसनादाचतदाभरतर्षभ निर्घाताबहवोराजन्दिक्षुसर्वासुचाभवन् ४० प्रादुरासीद्रजस्तीव्रंनप्राज्ञायतकिं
चन ध्वजानांधूयमानानांसहसामातरिश्वना ४१ किंकिणीजालबद्धानांकांचनस्रग्व[illegible]ंबरैः महतांसपताकाना
मादित्यसमतेजसां ४२ सर्वं[illegible]णा[illegible]णीभूतमासीत्तालवनेष्विव एवंतेपुरुषव्याघ्राःपांडवायुद्धनंदिनः ४३ व्यवस्थि
ताःप्रतिव्यूह्यतवपुत्रस्यवाहिनीं स्रंसंतइवमज्जानोयोधानांभरतर्षभ ४४ दृष्ट्वाग्रतोभीमसेनंगदापाणिमवस्थितं ४४

इतिभीष्मपर्वणिऽध्यायः

सेनंदृष्ट्वाअवस्थिताइतिसंबंधः ४४ अध्यायः १९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भीष्मो नेता निश्चितो ऽयं पक्षांते भीष्मनेत्राः १ मे तत्पुच्छतः तं यथा स्यात्तथा ब्रूहि मे समतिमिव तेषु स्थ्यर्थं सप्तविंशं गोन्यालि हृष्टा रात्र्यां कस्य यं नितरां मे तद्ब्रूहि मे तत्त्वं यथावदिति २

धृतराष्ट्र उवाच सूर्योदये संजय के नु पूर्वं युयुत्सवो हृष्यमाणा इवासन् मामका वा भीष्मनेत्राः समीपे पाण्डवा वा भीमनेत्रास्तदा-
नीं १ केषां जघन्यौ सोमसूर्यौ सवायू केषां सेनां श्वापदा व्याभषन्त केषां यूनां मुखवर्णाः प्रसन्नाः सर्वं ह्येतत्त्वं ब्रूहि मे तत्त्वं यथाव-
त् २ संजय उ० उभे सेने तुल्यमिवोपयाते उभे व्यूहे हृष्टरूपे नरेन्द्र उभे चित्रे वनराजिप्रकाशे तथैवोभे नागरथाश्वपूर्णे
३ उभे सेने बृहती भीमरूपे तथैवोभे भारत दुर्विषह्ये तथैवोभे स्वर्गजयाय सृष्टे तथैवोभे सत्पुरुषोपजुष्टे ४ पश्चा-
न्मुखाः कुरवो धार्तराष्ट्राः पश्चात्पार्थाः प्राङ्मुखा योत्स्यमानाः दैत्येन्द्रसेनेव च कौरवाणां देवेन्द्रसेनेव च पाण्डवानां ५
चक्रे वायुः पृष्ठतः पाण्डवानां धार्तराष्ट्रान् श्वापदा व्याहरन्त गजेन्द्राणां मदगन्धांश्च तीव्रान्न सेहिरे तव पुत्रस्य नागाः ६
दुर्योधनो हस्तिनं पद्मवर्णं सुवर्णकक्ष्यं जातबलं प्रभिन्नं समास्थितो मध्यगतः कुरूणां संस्तूयमानो वन्दिभिर्मागधैश्च
७ चन्द्रप्रभं श्वेतमस्यातपत्रं सौवर्णी स्रग्भ्राजते चोत्तमाङ्गे तं सर्वतः शकुनिः पार्वतीयैः सार्धं गान्धारैर्याति गान्धारराजः
८ भीष्मोऽग्रतः सर्वसैन्यस्य वृद्धः श्वेतच्छत्रः श्वेतधनुः सशङ्खः श्वेतोष्णीषः पाण्डुरेणाश्वजेन श्वेतैरश्वैः श्वेतशैलप्रकाशः ९

सूर्योदये इति शेषः ३ ४ ५ ६ ७ ८ ९ ॥ ॥ ॥ ॥

मूर्द्धा रुद्रस्य पर्वतस्येव अप्रकंप्यः सर्पः ११ १२ येन यत्र तेन तत्र १४ १५ अनंतरूपा ध्वजिनी त्वदीया न तु पांडवानां सेना वृद्धा तथापि तां बृहतीमेव मन्ये इति संबंधः १९ अध्यायः

तस्यैव सेना धार्त्तराष्ट्रस्य मध्ये बाल्हीकानामेकदेशः शल्यश्च ये चाप्यवंत्याः क्षत्रियाश्चैव सिंधोस्तथा सौवीराः पंचनदाश्च शूराः १० शोणैर्हयै रुक्मरथो महात्मा द्रोणो धनुःपाणिरदीनसत्वः आस्ते गुरुः प्रायशः सर्वराज्ञां पश्चाच्चमूमिंद्र इवाभियाति ११ वार्द्धक्षत्रिः सर्वसैन्यस्य मध्ये भूरिश्रवाः पुरुमित्रो जयश्च १२ शाल्वा मत्स्याः केकयाश्चैव सर्वे गजानीकैर्भ्रातरो योत्स्यमानाः शारद्वतश्चोत्तरधूर्महात्मा महेष्वासो गौतमश्चित्रयोधी शकैः किरातैर्यवनैः पल्हवैश्च सार्धं चमूमुत्तरतोभियाति १४ संसप्तकानामयुतं रथानां मृत्युर्जयो वार्जुनस्येति सृष्टाः येनार्जुनस्तेन राजन्कृतास्त्राः प्रयातारस्ते त्रिगर्ताश्च शूराः १५ साग्रं शतसहस्रं तु नागानां तव भारत नागे नागे रथशतं शतमश्वा रथे रथे अश्वेश्वे दश धानुष्का धानुष्के शत चर्मिणः एवं व्यूढान्यनीकानि भीष्मेण तव भारत १६ संव्यूह्य मानुषं व्यूहं दैवं गांधर्वमासुरं दिवसे दिवसे प्राप्ते भीष्मः शांतनवोग्रणीः १७ महारथौघविपुलः समुद्र इव घोषवान् भीष्मेण धार्त्तराष्ट्राणां व्यूहः प्रत्यङ्मुखो युधि १८ अनंतरूपा ध्वजिनी नरेंद्र भीमा त्वदीया न तु पांडवानां तां चैव मन्ये बृहतीं दुःप्रधर्षां यस्या नेता केशवश्चार्जुनश्च १९

इति भीष्मपर्वणि अध्यायः ॥

बृहती १२ उत्थानजयः ५ ११ गुणाभतोश्रमपतः १३

संजयउवाच बृहतींधार्तराष्ट्रस्यसेनांदृष्ट्वासमुद्यतां विषादमगमद्राजाकुंतीपुत्रोयुधिष्ठिरः १ व्यूहंभीष्मेणचाभेद्यंकल्पि
तंप्रेक्ष्यपांडवः अभेद्यमिवसंप्रेक्ष्यविषण्णोर्जुनमब्रवीत २ धनंजयकथंशक्यमस्माभिर्योद्धुमाहवे धार्तराष्ट्रैर्महाबाहोयेषां
योद्धापितामहः ३ अक्षोभ्योयमभेद्यश्चभीष्मेणामित्रकर्षिणा कल्पितःशास्त्रदृष्टेनविधिनाभूरिवर्चसा ४ तेवयंसंशयंप्रा
प्ताःससैन्याःशत्रुकर्षिणाः कथमस्मान्महाव्यूहादुत्थानंनोभविष्यति ५ अथार्जुनोब्रवीत्पार्थंयुधिष्ठिरममित्रहा
विषण्णमिवसंप्रेक्ष्यतवराजन्ननीकिनीं प्रज्ञयाभ्यधिकांछूरान्गुणयुक्तान्बहूनपि जयंत्यल्पतरायेनतन्निबोधविशांपते
७ तत्तेकारणंराजन्प्रवक्ष्याम्यनसूयवे नारदस्तमृषिर्वेदभीष्मद्रोणौचपांडव ८ एनमेवार्थमाश्रित्ययुद्धेदेवासुरेब्रवी
त पितामहःकिलपुरामहेंद्रादीन्दिवौकसः ९ नतथाबलवीर्याभ्यांजयंतिविजिगीषवः यथासत्यानृशंस्याभ्यांधर्मेणै
वोद्यमेनच १० त्यक्त्वाधर्मंचलोभंचमोहंचोद्यममाश्रिताः युध्यध्वमनहंकारायतोधर्मस्ततोजयः ११ एवंराजन्
विजानीहिध्रुवोस्माकंरणेजयः यथामेनारदःप्राहयतःकृष्णस्ततोजयः १२

ति १

४४ अकुण्ठसायकः अवस्फूर्जिताप्यथः १५ १७ अध्यायः ततो १ ४ प्राग्मध्ये स्थितं हटकानामान्तोत्तममिति भावः तत्रचित्रितं वा ५ ६ ७ ८ ॥

अनंततेजा गोविंदः शत्रुपूगेषु निर्व्यथः पुरुषः सनातनतमो यतः कृष्णस्ततो जयः १४ पुरा ह्येष हरिर्भूत्वा विकुंठोकुंठसायकः सुरासुरानवस्फूर्ज्य अब्रवीत्के जयंत्विति १५ कथं कृष्ण जयामेति यैरुक्तं तत्र तैर्जितं तत्प्रसादाद्धि त्रैलोक्यं प्राप्तं शक्रादिभिः सुरैः १६ तस्य ते न व्यथां कांचिदिह पश्यामि भारत यस्य ते जयमाशास्ते विश्वभुक्त्रिदिवेश्वरः १७ इति भीष्मपर्वणि अध्यायः २१ संजय उ० ततो युधिष्ठिरो राजा स्वां सेनां समनोदयत् प्रतिव्यूहन्ननीकानि भीष्मस्य भरतर्षभ १ यथोद्दिष्टान्यनीकानि प्रत्यव्यूहंत पांडवाः स्वर्गं परममिच्छंतः सुयुद्धं कुरुसत्तमाः २ मध्ये शिखंडिनोऽनीकं रक्षितं सव्यसाचिना धृष्टद्युम्नश्चरन्नग्रे भीमसेनेन पालितः ३ अनीकं दक्षिणं राजन्युयुधानेन पालितं श्रीमता सात्वताग्र्येण शक्रेणेव धनुष्मता ४ महेंद्रयानप्रतिमं रथं तु सोपस्करं हाटकरत्नचित्रं युधिष्ठिरः कांचनभांडयोक्त्रं समास्थितो नागपुरस्य मध्ये ५ समुच्छ्रितं दंतशलाकमस्य सुपांडुरं छत्रमतीव भाति प्रदक्षिणं चैवमुपाचरंते महर्षयः संस्तुतिभिर्महेंद्रं ६ पुरोहिताः शत्रुवधं वदंतो ब्रह्मर्षिसिद्धाः श्रुतवंत एनं जप्यैश्च मंत्रैश्च महौषधीभिः समंततः स्वस्त्ययनं ब्रुवंतः ७ ततः स वस्त्राणि तथैव गाश्च फलानि पुष्पाणि तथैव निष्कान् कुरूत्तमो ब्राह्मणसान्महात्मा कुर्वन्ययौ शक्र इवामरेभ्यः ८

सहसैवार्पयन्नस्मात् दर्शयंश्चकार गाण्डिवं विस्मितस्तु हृष्टस्त्वरः सर्वः ९ पाञ्चजन्येन वा ततः सेनयोर्भयमभ्यागात् अस्मिंस्ततः सेनयोश्चोभयोश्चैव महाराज प्रोक्तवान् १९ गृहीत्वा गाण्डिवं पार्थ इति भारत

सहस्रसर्वैः शतकिङ्किणीकः पार्थाहृतं जाम्बूनदहेमचित्रः रथोऽर्जुनस्याग्निरिवांशुमाली विभ्राजते श्वेतहयः सुचक्रः ९ तमास्थितः केशवसंगृहीतं कपिध्वजो गाण्डिवबाणपाणिः धनुर्धरो यस्य समः पृथिव्यां न विद्यते नो भविता कदाचित् १० उद्धर्तयिष्यन्तव पुत्रसेनामतीव रौद्रं सविमर्दितं हि यं अनागपृष्ठे यः सुभुजो भुजाभ्यां नराग्र्यनागाग्रवधिमस्य कुर्वत सभीमसेनः सहितो यमाभ्यां वृकोदरो वीररथस्य गोप्ता १२ तं तत्र सिंहर्षभमत्तखेलं लोके महेन्द्रप्रतिमानकल्पं समीक्ष्य सेनाग्रगतं दुरासदं संविव्यथुः पङ्कगता यथा द्विपाः १३ वृकोदरं वारणराजदर्पं योधास्त्वदीया भयविग्नसत्त्वाः अनीकमध्ये तिष्ठन्तं राजपुत्रं दुरासदं अब्रवीद् गुडाकेशं जनार्दनः १५ वासुदेव उवाच य एष गोपायति तपन्निव सैन्यानि सेनां सिंह इवाराजन् स एष भीष्मः कुरुवंशकेतुर्येनाहृतास्त्रिंशतं वाजिमेधाः १६ एतान्यनीकानि महानुभावं गूहन्ति मेघा इव घर्मकाले एतानि हत्वा पुरुषप्रवीर काङ्क्षस्व युद्धं भरतर्षभेण १७ संजय उ० धार्तराष्ट्रबलं दृष्ट्वा युद्धाय समुपस्थितं अर्जुनस्य हितार्थाय हृषीकेशोऽवचनमब्रवीत् १८

येन भीष्मेण २० एतानेतान्स्थितान्सर्वान्संशयानस्त्रलीतिर्दर्शयन्संजय उवाच धार्तराष्ट्रसमितिं हितार्थाय ततस्त्वाम् अवधीश्चेति द्विजोत्तमोऽर्जुनः पलवर्षं १८ ॥ ॥

श्री२

दुर्गायाः अष्टाभिर्हितं त्वेन सिद्धायाः स्तोत्रं उदीरय सर्वेषां शत्रूणां पराजयाय २ संख्ये संग्रामे ३ हे सिद्धसेनानि सिद्धानां योगिनां सेनानां समूहः यस्तस्य नेत्रि प्रापयित्रि प्रापिके योगसि
द्धिकारिके सर्वैः आर्येषु श्रेष्ठे अस्मात् हे आर्ये तस्माद्धे मन्दरे सर्वैः मन्दरे मन्दराचले वसती तिष्ठन्ती या कुमारी ब्रह्मचारिणी ब्रह्मचर्येण हे शिवे कालकाल शब्दे कापालिक पालस्य पतिः
कापालो हे कपिले कपिलः कृष्णपिंगलः वर्णविशेषो यस्य तत्संबुद्धौ ४ भद्रं कल्याणं कालयति भक्तानामसि तस्मात्पतिः सा भद्रकाली महती चासौ काली च कालपित्री संहर्त्री किलरूपा

प१

श्रीभगवानुवाच शुचिर्भूत्वा महाबाहो संग्रामाभिमुखे स्थितः पराजयाय शत्रूणां दुर्गास्तोत्रमुदीरय १ संजय० एवमुक्तोर्जुनः संख्ये वासुदेवेन धीमता अवतीर्य रथात्पार्थः स्तोत्रमाह कृतांजलिः २ अर्जुनउवाच ॐनमस्ते सिद्धसेनानि आर्ये मंदरवासिनि कुमारि कालि कापालि कपिले कृष्णपिंगले ३ भद्रकालि नमस्तुभ्यं महाकालि नमोस्तु ते चंडि चंडे नमस्तुभ्यं तारिणि वरवर्णिनि ४ कात्यायनि महाभागे करालि विजये जये शिखिपिच्छध्वजधरे नानाभरणभूषिते ५ अट्टशूलप्रहरणे खड्गखेटकधारिणि गोपेंद्रस्यानुजे ज्येष्ठे नंदगोपकुलोद्भवे ६

महाकाली चंडि चंडरूपकालो तत्कस्य ... चंडे ... तारिणि संकटात् जनानां ... वरवर्णिनि ... भाग्यलक्षणोपेता ५ कात्यायनि ... गोत्रोद्भवे महाभागे श्रेष्ठे
... करालि विजये विशिष्टो जयो यस्याः ... ६ ... महाश्मशानवासिन्याः ... ॥ ७ ॥ ॥

कौशिके कुशिककुलोत्पन्ने अट्टहासे प्रशस्तस्मिते कोकं चक्रवदस्त्रं नवारणीजवधे रणहननशीले त्वं वा मुखं यस्याः सा कोकमुखा ८ श्वेते महेश्वराह्वे हिरण्याक्षि पीते नेत्रे विहस्ता
क्षि विविधरूपयुक्ते नेत्रमनुष्याः सुधूम्राक्षि मार्तण्डरूपेण मार्गः स्वरूपयुक्ते भवति ९ ब्रह्मण्ये पवित्रकर्मणि विप्रादिषु साध्वी ब्रह्मण्या जातवेदसि अग्नौ तेजोरूपात्वं तिष्ठसि जंबूकटके

महिषासृक्प्रिये नित्यं कौशिकी पीतवासिनि अट्टहासे कोकमुखे नमस्तेऽस्तु रणप्रिये ८ उमे शाकंभरी श्वेते कृष्णे कैटभना
शिनी हिरण्याक्षि विरूपाक्षि सुधूम्राक्षि नमोऽस्तु ते ९ वेदश्रुति महापुण्ये ब्रह्मण्ये जातवेदसे जंबूकटकचैत्येषु नित्यं सं
निहितालये १० त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनां स्कंदमातर्भगवति दुर्गे कांतारवासिनि ११ स्वाहाका
र स्वधा चैव कला काष्ठा सरस्वती सावित्री वेदमाता च तथा वेदांत उच्यते १२ स्तुतासि त्वं महादेवि विशुद्धेनांतरात्मना
जयो भवतु मे नित्यं त्वत्प्रसादाद्रणाजिरे १३ कांताराभयदुर्गेषु भक्तानां पालनेषु च नित्यं वससि पाताले युद्धे जयसि
दानवान् १४

जंबूद्वीपराजधानीषु चैत्येषु देवतालयेषु नित्यं संनिहिता आलयः स्थानं यस्याः सा तथा १० महानिद्रा ब्रह्मविद्याफलभूता मुक्तिः स्कंदमाता नित्यं सर्वदेवताः रूपत्वोपलक्षणं
११ स्वाहेति हविर्दानकर्मरूपत्वं कलेति सर्वेषु कालरूपत्वं सावित्री नित्यं सर्ववाङ्मयरूपत्वं च उक्तं ते १२ रणाजिरे युद्धाङ्गणे १३ १४
उ१

जृम्भिणीत्वं मोहिनी निद्रा माया अद्भुतप्रदर्शनं ह्रीर्लज्जा श्रीः शोभा चेतोवृत्तिः एतच्चक्रकामारिभूतौ नाम पुष्पलक्षणाः श्रीः लक्ष्मीर्विद्या नमो धनादिसमृद्धिरूपा संध्या संयोगावस्था वैनेचो
मयी संध्या प्रथिप्सुलयकर्त्री सर्वार्थः प्रभावती चन्द्रसूर्यप्रभापुञ्जा द्योतरूपा सावित्री सविता सर्वप्रसवं धिनीप्रभाप्रकाशनशक्तिस्तद्रूपा जननी मातृवत्सा लयित्री १५ तुष्टिः
संतोषः पुष्टिः रूपं चयः धृतिर्धैर्यं दीप्तिर्भाति पथा कांसा चन्द्रादिर्दीप्तौ वर्धते अस्य संतत्कांतिमतो भवतः वस्पति चपरादिसगतं तेजो नगद्रूपमप्ते विदन्ते पचंद्रमसिपद्माग्रोत
तेजो विद्धि मामकं मित्तिपेन सूर्यप्रतपतितेन सेद्भूतिस्थितिस्थपरां चेन्मात्रं ब्रह्मैव सर्वार्थः । भूतिरैश्वर्यं भूतिमतां संदेहस्वाद्दीनां एषामपामासंपरिनिष्ठुतेः ब्रह्महरेषवसांख्य
ममक्वात्मनं प्रकाशनं यत्रतस्मिन स्वात्मानात्मविवेकरूपे समायोगसिद्धे । नाव नमस्के सुगोणेः आत्मानं विद्वत्स्वदी स्पसेन समात्मत्वेन ततेरेव माकारविशेषापहितं ब्रह्माभि

त्वं जृम्भिणी मोहनी च माया ह्रीः श्रीस्तथैव च । संध्या प्रभावती चैव सावित्री जननी तथा ॥ १५ ॥
तुष्टिः पुष्टिर्धृतिर्दीप्तिस्त्वं चन्द्रार्काग्निविवर्धिनी । भूतिर्भूतिमतां संख्ये वीक्ष्यसे [illegible] ढुवारणैः ॥ १६ ॥

सि१

ध्यानं समस्तथामिभ्य आदर्शवीचीनाः राज्यविजयादिसिद्धिः सपक्षनीतिप्रदर्शितं तदेव वक्ष्यति भगवानपि स्वरेवताभकायजं तेभ्यद्रूपान्विताः तेषामिमां मे वेको तेषपजं सविधिपू
र्वकं देहनिजं देहं ते च ततः कामान्समेपेयं विहितान्हित्ता नरतितया महतां विमोभात्माभिसिद्धिविमर्शकारमनुपहितव्रह्म सज्ञानादेव भवतीति प्रदर्शितो योगी ताशारूपाधिस्समोन
नतत्वविश्रामोस्य सर्वार्थः प्रसपक्ष वंदेवा स्तोत्रं कुर्विति निविष्टेको ३ सुनो देवी प्रसन्नस्तनोर्दृष्ट्वा जातप्रसन्नपोषितास्य विघ्नहं वश्रीपादिस्माशयवनाभागवतापतदुक्तं मिति प्र
घटकार्थः एवमेव देवैः किर्ता यथा दीनां संघो दृष्ट्वादि फलानां कर्माणि विधानेभ्यः पार्थेषु कर्मसु अहो सास्त्वनार्थमेव नितिर्नितान्तं पूर्णार्थायैः ॥ ९७ १६

ततःपार्थस्येतिस्वंतारिक्षगतैःसम्यक्प्रदर्शनार्थंविशेषतः ॥ २७ ॥ २४ नाहत्वमितिनिश्चर्त्तिनायपूर्वंनारायणात्मकरूपंस्मापयतितेनचतस्यसेवयैवभयनिवृत्तिर्भवतीतितद्वि
रणोद्वचपरनयमिसपिदर्शितंस्वमयंगीताशास्त्रस्वस्यमाणस्योपोद्घातोदर्शितः ॥ २५ ॥ २६ कथमनुसंधत्तेतत्त्वेसाहिता ॥ ३० एतत्स्तोत्रपाठफलमाहयद्दृश्मिति

संजयउवाच ततःपार्थस्यविज्ञायभक्तिमानववत्सला अंतरिक्षगतोवाचगोविंदस्याग्रतःस्थिता ३४ देव्युवाच
स्वल्पेनैवतुकालेनशत्रूनजेष्यसिपांडव नारत्वमसिदुर्धर्षनारायणसहायवान ३५ अजेयस्त्वंरणेरीणामपिवज्र
भृतःस्वयं इत्येवमुक्त्वावरदाक्षणेनांतरधीयत ३६ लब्ध्वावरंतुकौंतेयोमेनेविजयमात्मनः आरुरोहततःपार्थो
रथंपरमसंमतं ३७ कृष्णार्जुनावेकरथौदिव्यौशंखौप्रदध्मतुः यइदंपठतेस्तोत्रंकल्यउत्थायमानवः यक्षरक्षःपि
शाचेभ्योनभयंविद्यतेसदा ३८ नचापिरिपवस्तेभ्यःसर्पाद्यायेचदंष्ट्रिणः नभयंविद्यतेतस्यसदाराजकुलादपि ३९
विवादेजयमाप्नोतिबद्धोमुच्येतबंधनात दुर्गंतरतिचावश्यंतथाचौरैर्विमुच्यते ४० संग्रामेविजयीनित्यंलक्ष्मींप्राप्नो
तिकेवलां आरोग्यबलसंपन्नोजीवेद्वर्षशतंतथा ४१ एतद्दृष्टंप्रसादात्तुमयाव्यासस्यधीमतः मोहादेतौनजानंति
नरनारायणावृषी ४२ तवपुत्रादुरात्मानःसर्वेमन्युवशानुगाः प्राप्तकालमिदंवाक्यंकालपाशेनगुंठिताः ४३

कथंभूतेभ्योनभयमितिपूर्वेणसंबंधः ३९ ४० ४१ ४२ ४३ ॥ ॥

४४ यत्रेति धर्मफलं द्युतिप्रभृतयः तर्हि मम सत्येऽपि धर्मोऽस्त्येवेति मन्वानं प्रत्याह यत्र धर्मस्तत्र कृष्णः त्वसत्सेकृत्स्ना मायाहं मोपिता[illegible]लिनस्कलमूर्ताद्युसाहृदयोऽपि नमंतोस्यधः
फलितमाह यतः कृष्णस्ततो जय इति ४५ अध्यायः केषामित्यध्यायः स्पष्टार्थः १ ॥ इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोः ।

द्वैपायनो नारदश्च कण्वो रामस्तथानघः अवारयंस्तव सुतं न चासौ तद्गृहीतवान् ४४ यत्र धर्मो द्युतिः कान्तिर्यत्र ह्रीः श्रीस्तथा
मतिः यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः ४५ ॥ इति श्रीभीष्मपर्वणि अध्यायः २१ धृतराष्ट्र उवाच केषां प्रहृष्टास्तत्रा-
ग्रे योधा युध्यन्ति संजय उदग्रमनसः के वा के वा दीना विचेतसः १ के पूर्वं प्राहरंस्तत्र युद्धे हृदयकम्पने मामकाः पांडवेया वा तन्म-
माचक्ष्व संजय २ कस्य सेनासमुदये गंधमाल्यसमुद्भवः वाचः प्रदक्षिणाश्चैव योधानामभिगर्जतां ३ संजय उ० उभयोः
सेनयोस्तत्र योधा जहृषिरे तदा स्रजः समाः स्म गंधानामुभयत्र समुद्भवः ४ संहतानामनीकानां व्यूढानां भरतर्षभ संसर्गा-
त्समुदीर्णानां विमर्दः सुमहानभूत ५ वादित्रशब्दस्तुमुलः शंखभेरीविमिश्रितः शराणां रणशराणां गर्जतां म्विनोतां ६
उभयोः सेनयो राजन्महान्व्यतिकरोऽभवत अन्योन्यं वीक्षमाणानां योधानां भरतर्षभ कुंजराणां च नदतां सैन्यानां च प्रहृष्य-
तां ७ इति भीष्मपर्वणि जंबूखंडं समाप्तं ॥ २२

श्रीनीलकंठस्य कृतौ भारतभावदीपे भीष्मपर्वणि जंबूखंडनिर्माणपर्वणि नीलकंठीये ग्रंथार्थप्रकाशोऽध्यायः २२ ॥ ॥ ॥

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते

श्री २ पा २

त्रिदण्डि
वेदे ॥

ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः प्रणम्य भगवत्साक्षात् श्रीधरादीन् स्वमद्गुरून् संप्रदायानुसारेण गीताव्याख्यां समारभे १ भारते
सर्ववेदार्थो भारतार्थश्च कृत्स्नशः गीतायामस्ति तेनेयं सर्वशास्त्रमयी मता २ कर्मोपास्तिज्ञानभेदैः शास्त्रं कांडत्रयात्मकं कर्मोपास्ती तु कांडे ततस्तीयोनात्र नियुज्येते ३
तेष्वेवं ब्रह्मविद्धि त्वं वेदे यन्नेदमुपासते इति श्रुत्यैव वेदार्थस्तु पाठ्यमानस्मृतौ गीता ४ इत्यष्टादशाध्यायी क्रमात् षट्कत्रिकोदिता कर्मोपास्तिज्ञानकांडत्रितयात्मा निगद्यते ५
तत्र युद्धाय संनद्धो स्वकार्यं निमित्तमां तं पृष्टवान् धृतराष्ट्र उवाच धर्मक्षेत्र इति तत्र वेदेऽपि तेषां कुरुक्षेत्रे देवयजनमासीत् इति कर्मकांडप्रसिद्धं कुरुक्षेत्रमस्मत्पक्ष विमतं च कुरुक्षेत्रे देवा

॥धृतराष्ट्र उवाच धर्म्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः मामकाः पांडवाश्चैव किमकुर्वत
संजय १ संजय उवाच दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा आचार्यमुपसंगम्य राजा वचन
मब्रवीत् २ पश्यैतां पांडुपुत्राणामाचार्य महतीं चमूं व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ३

मा १

नां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् अविमुक्तं विमुक्तात्मनां ब्रह्मप्राप्तिस्थानमतः कुरुक्षेत्रमत्र ब्रह्मसदनत्वं चास्य अत्र हि जंतोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे
नासावमृतो भवतीत्यत्र तारकं ब्रह्म श्रुत्यादिप्रसिद्धं धर्मक्षेत्रमिति विशेषणं कुरुक्षेत्रेऽस्मिन् धर्मक्षेत्रमेव न तु तत्र अस्मदीया पांडवाश्च धर्मक्षेत्रत्व
मात्र श्रवणात् तत्र समवेताः मिलिताः युयुत्सवो योद्धुमिच्छवः पांडवानां पृथग्ग्रहणं तेषु ममत्वाभावसूचनार्थं १ दृष्ट्वा तु पांडवानीकं व्यूढमाचार्यं द्रोणं राजा दुर्योधनः
राजा ब्रवीदिति वक्ष्यमाणं वचनं परं नमं शिष्यत्वं हर्षान्वितगुणावलंबनाकल्पमसूचितेन २ द्रुपदपुत्रेणेति पूर्ववैरस्मारकत्वेन कोपोद्दीपनार्थं विशेषणं ३

महेष्वासाः महान्त इष्वासाः धनूंषि येषां ते युयुधानः सात्यकिः द्रुपदश्च महारथः एकः ४ धृष्टकेत्वादयः षट् ५ युधामन्यूत्तमौजसौ सौभद्रोऽभिमन्युः पंचद्रौपदेयाः प्रतिविंध्या
दयश्चेति सप्तैव कलानां पांडवा घटोत्कचादयश्चेति प्रसिद्धाः सर्वेऽपि महारथा एवं ते सप्तदश एको दशसहस्राणि योधयेद्धन्विनां शस्त्रशास्त्रप्रवीणश्च स वै प्रोक्तो
महारथः अमितान्योधयेद्यस्तु स प्रोक्तोऽतिरथस्तु सः रथस्त्वेकेन यो युद्ध्यात्तन्न्यूनोऽर्धरथः स्मृतः इति ६ विशिष्टाः श्रेष्ठाः निबोध बुध्यस्व मे मम द्विजोत्तम इति संबोधनं द्विजो ७

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि युयुधानो विराटश्च द्रुपदश्च महारथः ४ धृष्टकेतुश्चेकितानः का
शिराजश्च वीर्यवान् पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुंगवः ५ युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवा
न् सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ६ अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम नायका मम
सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ७ भवान्भीष्मश्च कर्णश्च [illegible] समितिंजयः अश्वत्थामा विकर्णश्च सौम
दत्तिस्तथैव च ८ अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ९

कृपश्च र

विशिष्टेषु संज्ञार्थं अस्मत्पक्षे विशिष्टाः के इति जिज्ञासायां संज्ञार्थं परिचयार्थं तान्ब्रवीमि ते तवोत्साहार्थं गोत्रनामभिः इत्यर्थः ७ विकर्णः स्वभ्राता सौमदत्तिर्भूरिश्रवाः जयद्रथपदस्थाने त
थैवेति क्वचित्पाठः ८ अन्ये शल्यकृतवर्मप्रभृतयः शस्त्राणि विदारकाणि खड्गादीनि प्रहरणानि केवलं प्रहारार्थानि मुद्गरादीनि नाना बहुविधानि येषां ते नानाशस्त्रप्रह
रणाः ९
त्वे

नं॰ पुं अस्य द्वादशीयाद

पर्याप्तं परितुस्त्रापारि तेषां पांडवसैन्यं हि समाक्षोभ्यो हि तत् पितेनास्मत्सैन्येन वेष्टयितुं शक्यं न तु तच्छौर्येनास्मच्छौर्यमित्यर्थः एवं च पर्याप्तमित्यस्य पराजेयमित्यर्थः १० अय
नेषु अहां व्यवस्थितेषु तेषु सेनाप्रवेशमार्गेषु सेनास्थाने स्थिता यूयं मध्यस्थं भीष्ममेवाभिरक्षंतु अस्य सेनापतेः चांचल्ये सर्वोऽपि सेनाव्याकुलीभवेत् तल्लेऽपि स्थिरा एव भवेत् अतः सर्व

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितं पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितं १० अयनेषु च सर्वेषु यथा
भागमवस्थिताः भीष्ममेवाभिरक्षंतु भवंतः सर्व एव हि ११ तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः सिंह
नादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् १२ ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः सहसैवाभ्यहन्यं
त स शब्दस्तुमुलोऽभवत् १३ ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः
१४ पांचजन्यं हृषीकेशो देवदत्तं धनंजयः पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः १५ अनंतविजयं
राजा कुंतीपुत्रो युधिष्ठिरः नकुलः सहदेवश्च सुघोषमणिपुष्पकौ १६ ॥ ॥ ॥ ॥

वर्द्धयन्नित्यर्थः ११ तस्य एवं वदतो दुर्योधनस्य संजयवाक्यमिदं सिंहनादमिति णमुलं तं तेन विनद्येत्यस्यानुप्रयोगः कषाश्चिद्यात् समूलकाषं कषतीतिवत्
कुरुवृद्धो भीष्मः प्राग्विरुद्धवाग्रेऽपि हर्षप्रभावाभ्यां दुर्वाक्यस्य राज्ञो भयं मा भूदिति शंखं दध्मौ हर्षपुष्टो हर्षं जनयन्नित्युक्तत्वे शत्रुप्रलयः हर्षजननार्थमित्यर्थः १२ अभ्य
हन्यंत अभिहताः कर्मकर्तरि प्रयोगः १३ १६

भी० प

४९

१७-१९ व्यवस्थितानभयोस्थितानयोऽवेषसम्पातावस्थितान्कपिध्वजः पाण्डवः धनुरुद्यम्य भीष्म ध्वजत्वं शौर्यं च प्रदर्शयति २० हृषीकेशं सर्वेषामिन्द्रियाणां प्रवर्तकत्वेन प्रेरितत्वं वाक्यमेवाह नान्यं कंचिदर्थमितिद्योतनार्थं शक्यपदं वाक्यमेवाह सेनयोरिति २१ रथस्थापनप्रयोजनमाह यावदिति कैः सह मया योद्धव्यं मया सह वा कैर्योद्धव्यमिति उभ

काश्यश्च परमेष्वासः शिखण्डी च महारथः धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः १७ द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक्पृथक् १८ स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् १९ अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः २० हृषीकेशं तदा वाक्यमिदमाह महीपते सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत २१ यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे २२ योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः २३ संजय उवाच एवमुक्तो हृषीकेशो गुडाकेशेन भारत सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् २४ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति २५ ॥ ॥

यत्र सह शस्त्रसंबंधः केषां मां जेतुं यतंते मया वा के जेतव्या इत्यालोचनार्थमित्यर्थः २२ योत्स्यमानानन्तशांतिकामानपनोदुर्बुद्धेः प्रियं चिकीर्षंतीति तेनैतेषामपि तत्तुल्यत्वं सूचितं २३ रथोत्तमं स्थापयित्वा उवाचेति द्वयोः संबंधः २४ महीक्षितां पृथिवीस्थानां २५

एम०

४९

पितॄन्पितृव्यादीन्भूरिश्रवःप्रभृतीन्पितामहान्भीष्मादीन्मातुलान्शल्यादीन्भ्रातॄन्दुर्योधनादीन्पुत्रान्लक्ष्मणादीन्पौत्रान्लक्ष्मणादिपुत्रान्सखीनश्वत्थामादीन् २६ सुहृदः कृतवर्मादीन् २७ कृपया स्नेहेन स्वजनमिति विशेषणेन प्रदर्श्यते २८ सीदन्ति निश्चेष्टानि भवन्ति रोमहर्षो रोमाञ्चः २९ ३० निमित्तानि लोकभयकारणि

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा २६ श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् २७ कृपया परयाविष्टो विषीदन्निदमब्रवीत् अर्जुन उवाच दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितं २८ सीदन्ति मम गात्राणि मुखं च परिशुष्यति वेपथुश्च शरीरे मे रोमहर्षश्च जायते २९ गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ३० निमित्तानि च पश्यामि विपरीतानि केशव न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ३१ न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ३३ आचार्याः पितरः पुत्रास्तथैव च पितामहाः

मातुलाः श्वशुराः पौत्राः श्यालाः संबन्धिनस्तथा

भूमिकम्पादीनि ३२ ३३ श्यालाः इति श्यालशब्दो दन्त्यादिः विज्ञामातृभ्रातृवाचकः श्यालाः इति मन्त्रवर्णात्स्याद्भार्याज्ञातावपि तौ निशाप्रंसंयस्यैनेति निपातकः ३४

भी॰ म
५९

हन्तुं नेच्छामि मम न भवति किंमुत हन्तुं त्वमित्यर्थः महीकृते पृथ्व्यर्थे ३५ आततायिनः अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारापहारी च षडेते आततायिनः आततायिनमा यान्तं हन्यादेवाविचारयन् नाततायिवधे दोषो हन्तुर्भवति कश्चनेति यद्यप्येवं तथापि एतान् हत्वा अस्मान् पापमेवाश्रयेत् आततायिवधो हि अर्थशास्त्रविहितः न हिंस्यात्सर्वभूतानीति धर्मशास्त्रं तच्च पूर्वस्मात् बलवत् [illegible] अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिरिति अस्मान् हत्वा एतान् आततायिनः पापमेवाश्रयेत् [illegible] ३६ ३७ ननु आहूतो न निवर्तेत द्यूतादपि रणादपीति विजितं क्षत्रियस्येति

एतान्न हन्तुमिच्छामि घ्नतोपि मधुसूदन अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ३५ निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ३६ तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान् स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ३७ यद्यप्येते न पश्यन्ति लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे च पातकं ॥ ३८ कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुं कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ३९

युद्धादनिवृत्तिः हिंसया वृत्तिः क्षत्रियस्य [illegible] युद्धं निवृत्तिमिच्छतो माशङ्क्याह कथमिति [illegible] लोभमूलिका प्रवृत्तिः कुलक्षयदोषविधिना [illegible] [illegible] विधिना [illegible] [illegible] लोभमूलत्वात् [illegible] विधिमात्रात् किंचित्कर्तव्यं नास्ति नाम धर्म [illegible] तस्मात् [illegible] [illegible] केवलं [illegible] कर्म इति कथ्यते इति [illegible] पानुबन्धित्वात् युद्धं माऽस्त्वेवेत्यर्थः ३९

तिष्ठ

ग्ग
५०

प्रणश्यंति अनुष्ठातृणां वृद्धानामभावात् अवशिष्टं बालादिकं कृत्स्नं कुलमधर्मो अभिभवति ४० हे कृष्ण अधर्माभिभवात् प्रदुष्यन्ति कुलस्त्रियः स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ४१ कथं तर्हि जाम कृष्ण नामेत्याभिप्रेत्य
एवमाशंक्य एवं अस्माकं हि प्रसिद्धं यत पतिष्य हिंसक प्रत्यवाय अभिभवति शंका वा कथं तेनेति हि शत्रोरेव निर्णयं इति ... श्र
अप्रजात मतीति स्मृतिः अमात्या ... ज्ञानतो योपसंनाम्नो तितर्थः अन्यो वर्णा मनसा ... पितरमंतको मम ... पुत्र इति पाठाः ... आत्मन्यजन्मा ... इति ४२

कुलक्षये प्रणश्यंति कुलधर्माः सनातनाः धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ४० अधर्माभिभवात्कृष्ण प्रदुष्यंति कुलस्त्रियः स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ४१ संकरो नरकायैव कुलघ्नानां कुलस्य च पतंति पितरो ह्येषां लुप्तपिंडोदकक्रियाः ४२ दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः ४३

कान्तस्य ... मातस्य पित्रादेः संशयग्रस्तत्वात् ... पितृत्वेनेति निश्चयः ... मंत्रव्यपोहमसि ... अन्नं ब्राह्मणोऽर्थवान् ... ब्राह्मणेभ्यो ... ब्राह्मणा एवेति तस्मा
द्धे ... पितरः पिंडादि ... न ... पतंति लुप्तपिंडोदकक्रियत्वात् ... पातो भवति ... इह लोके वंश ... मात्र ... पतंति ... पतेः ... काश्चिदाग
च्छिकः उपकारोऽस्ति ... स्मृति ... ... स्वयं कृतं ... वश्यमस्मान्बाधिष्यत एवेति भावः ४२ एतत्संबंधिदृशेणोर्हाम्यां द्रौति ४३

तिर ... खेर

४४ ४६ संख्ये संग्रामे ४७ इति श्रीनीलकण्ठीये भारतभावदीपे भीष्मपर्वप्रकाशे भगवद्गीतासु प्रथमोऽध्यायः॥ अर्जुनेन युद्धादुपरतेन महत्स्वज्ञानिकं रक्तराज्यं प्राप्स्यन्तीत्याशावन्तं तज्ज्ञानं प्रति
सञ्जय उवाच तं तथेति तमर्जुनं तथा स्वजनं हि कथं हत्वा सुखिनः स्याम ममतावेशरूपप्रकारेण कृपया आविष्टं व्याप्तमश्रुपूर्णाकुलेक्षणं दुःखप्रहाराकुलरूपयातत्स्याः परिदेवस्य निमग्नं ... विस्मः

शास्त्र २

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन नरके नियतं वासो भवतीत्यनुशुश्रुम: ४४ अहो बत महत्पापं कर्तुं व्यवसिता वयं यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यता: ४५ यदि मामप्रतीकारमशस्त्रं शस्त्रपाणय: धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत ४६ संजय उवाच एवमुक्त्वार्जुन: संख्ये रथोपस्थ उपाविशत विसृज्य सशरं चापं शोकसंविग्नमानस: ४७ ॥ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादो नाम प्रथमोऽध्याय: संजय उवाच तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं विषीदन्तमिदं वाक्यमुवाच मधुसूदन: १

अर्जुनेन यदि वा नो जयेयुरिति स्वपराजयमाशंकमानेन दुर्भरणत्वादनयोर्न च हत्वा न जिजीविषाम इति स्नेहातिशयस्य च कृपाकार्यशोकविषादस्य चाविष्कृतत्वात्संविषीदन्तं सीदन्तमिति ममता... उक्तरूपं विषादं प्राप्तवन्तं इदं वक्ष्यमाणं वाक्यं वचनीयं उवाच मधुसूदनः निरुपपदं ... तेन हेयार्जुनं निमित्तीकृत्य सर्वलोकानपि ... निश्रेयसे ... कार्यमिति भावः १ ॥

ग्रा ह २

उक्तं संशयपवानेव पृछति कार्पण्येति कार्पण्यदोषेन त्वं स्वभावः शौर्यतेजो धृतिर्हीष्यमिस्वाहिनाव ष्यमाणत्वभाणः शेषं स्पष्टं ७ ननु पृष्टं ईदृशयोर्वस्त्वं संकल्पितेष्व रंतेयतिपुत्रमेव श्रेयस्कं किंपुनः पृछसीत्यत्र नहीति बंधुनाशनिमित्तः शोकोत्रयत्लोके नवाननिवर्तिष्यत इति पुत्रः स्नेकं चिंतनिवृत्तिः स्वर्गसंमोपायं न्नहीत्यत्र

कृ २

कार्पण्यदोषोपहत स्वभावः पृछामि त्वां धर्मसंमूढचेताः यछ्रेयस्यां निश्चितं ब्रूहि तन्मे शिष्यस्तेहं शाधि मां त्वां प्रपन्नं ७ नहि प्रपश्यामि ममापनुद्याद्यछोकमु च्छोषणमिंद्रियाणां अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यं ८ संजय उवाच एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप नयोत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह ९ तमुवाच हृषीकेशः प्रहसन्निव भारत सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः १० ॥

मै १

पः स्वत्रार्जुनविषादव्याजेन ब्रह्मविद्याधिकारिविशेषतां स्वचर्यार्हामुत्रार्थफलभोगविविधश्चरतीति नः ८ ९ तमिति मूर्छेणप्यममूर्छवहूरती निप्रहसन्निवं वक्ष्य माणं १०

भी॰प
५२

नत्वपूर्वोद्घट्टितानां गुरुहननमपि दुःखः श्रेयानित्याशंक्याह गुरूनिति यद्यपि त्वदुक्तं भ्रष्टानामेव तत्तथापि महानुभावान् गुरूनहत्वा भैक्ष्यमेव भोक्तुं श्रेयः प्रशस्ततरं एवं तर्हि गुरू १
का दुर्योधनादीनेव गुरून् न जह्यामित्याशंक्याह अर्थकामानिति धनार्थिनो गुरवो वयं दुर्योधनमहाध्यक्षास्ते तेन तद्वधोऽपि प्रसक्त एव स्वार्थः तु शब्दः पक्षान्तरोपन्यासार्थः इहैव
न तु परलोके भुंजीयेति संबन्धः लिङ् गुरूनहत्वा भैक्ष्यं श्रेयः उत हत्वा भोगा इत्यादि न श्रेय इति संबन्धः भोगान् धनोपभोगान् रुधिरप्रदिग्धानिति ५ एवं तर्हि भैक्ष्यमेव तु श्रेय
इत्याशंक्याह न चैतदिति विषयपक्षस्त्रियपक्षे भैक्ष्यमेवेत्यं तथापि तः अस्माकं क्षत्रियाणां भैक्ष्यभोगयोर्मध्ये कतरत् गरीय इति वयं न विद्मः तन्नूनं युद्धमेव गरीय इति ज्ञात्वा ह्यहत्य ति
द्दे १

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके हत्वार्थकामांस्तु गुरूनिहैव भुंजीय भोगान् रुधिरप्रदिग्धान ५
न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः यानेव हत्वा न जिजीविषामस्तेवस्थिताः प्रमुखे धार्तराष्ट्राः ६

यद्वा वयं जयेम शत्रून् यदि वा नोऽस्मान् शत्रव एव जयेयुः इत्यपि न विद्मः अन्यपक्षे पुनर्मरणमप्रार्थितं भैक्ष्यमेव वा पद्यत इति भावः ननु यदि महायेमति न वजयएव
निश्चितं अवहत्यानेवेति इत्यनाशाह्न योऽपि पणां तथह्नपदेवसार्थः १ यत्र निश्चितेऽपि भैक्ष्यं श्रेयस्त्वे पुनर्युद्धभैक्ष्ययोः कतरत् श्रेय इति संशयो नोचितः अतोऽन अस्माकं पक्षे क
तानेव मन्यं गरीय इति औपमिति तिन रम तथर्मं संमूढचेता इति वाक्यद्वयोयादुक्त संशयस्येवोचितत्वात् भैक्ष्यं गरीय हत्यं संशये नैक ज्य पक्षे शमन्यभ्यासिद्ध मत्तासेकत्यवेप ख्याति
अतर रखे १
विशेषाप्याहारहोवाद्ध ६

ग्म॰
५२

प्रा ९२

उक्तं संशयपदानेव पृच्छति कार्पण्येति कार्पण्यदोषेणोपहतः स्वभावः शौर्यतेजोधृतिरीदृश्यमिसाहिनावश्यमाणलक्षणाः शेषं स्पष्टं ७ ननु त्वद्दृढ्यदृढ्यचोरर्वत्स्यं सत्कोत्रिषप
रंतपत्तिपुद्धमेव श्रेयस्करं किं पुनः पृच्छसीत्यत नहीति बंधुनाशनिमित्तः शोकोऽत्यल्लोकेन वा न निवर्तिष्यत इति पुनरुक्तं चित्तनिवृत्तिहंसशमोपायं ब्रूहीत्यत्र

भ्रु ९२

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेहं शाधि मां त्वां
प्रपन्नं ७ नहि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणां अवाप्य भूमावसपत्नमृद्धं राज्यं सुरा
णामपि चाधिपत्यं ८ संजय उवाच एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप नयोत्स्य इति गोविंदमुक्त्वा तू
ष्णीं बभूव ह ९ तमुवाच हृषीकेशः प्रहसन्निव भारत सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः १०॥

मै १

पः अत्रार्जुन विषादरूपोऽनेन ब्रह्मविद्याधिकारित्वे शोचनं चर्यार्थहामुत्रार्थफलभोगविरक्तिरुक्तेति ८ ९ तमिति मूर्छामपनयन्निव हरति निग्रहस्तन्निर्दिष्ट
माणं १०

नि१

अर्जुनस्य देहनाशे आत्मनाशधीः स्वधर्मे [illegible] युद्धे चाधर्मधीरिति मोहद्वयं तन्निवारणं चाघ्न(?) विद्या सन्नभूते विशल्याश्लोके ग्रंथे नीष(?) श्रीभगवानुवाच अशोच्यानन्वशोचस्त्वमिति जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते इति श्रुतेः देहाद्युपाधिनाशो व्यकालावच्छेदाद्(?) हि त्वेन अशोचनीयान् भीष्मादीन् अन्वशोचः कथमेते गुरवो मया हन्तव्याः कथं वा तैर्विनाहं जीविष्यामीति शोकं कृतवानसि त्वं भूयोपि त्वं प्रज्ञावादान् शक्नान् नारके नियतं वासः पतन्ति पितरो ह्येषामित्यादीन् भाषसे परं न तु प्रज्ञावानसि यतः हेतुः गता सूनिति गतासून् गतप्राणान् देहान् अगतासून् अनुशोचंति पण्डिताः हि सत्तेन प्राण एव बहुधा नटद्देहः तथा च श्रुतिः प्राणो ह पिता प्राणो माता प्राण आचार्य इत्यादिः अतएव

श्रीभगवानुवाच अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ॥
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ११ ॥

व प्रमाणानेतानश्रवणायंते वा पित्रादिहंतास्यसि हि [illegible] कामिति वदंति उत्क्रांतप्राणान् अवहंतमपि नैवं वदंतीति लोकवेदप्रसिद्धिः तस्मात् आत्मा देहादन्यः चेतन त्वात् अग्निकोणाद्यवत् देहो न चेतनः दृश्यत्वात् घटवत् परिच्छिन्नत्वात् अचेतनः स्यात् न देहेपि तत्र चैतन्यमुपलभ्यते तस्माद् देहनाशे नात्मनाशं मन्वानो मूर्ख एवासीत्यर्थः प्रज्ञावतां चेष्टितानां [illegible] अयं न वक्तुमयोग्यान् भाषसे इति नाकिं [illegible] तं तत्र अर्होर्थ्य घनो दुर्लभत्वात् विशेष्याध्याहारः सोक्षत्वाचोपेक्ष्यं १२

पै१

ननु देहारम्भो ऽपि देहनाशे ऽपि न नश्यतां कोशकारस्य कोशनाशे इति नत्वाह न त्वेवाहमिति त्वमहमिमे च सर्वे ऽस्मिन् नात्र योः संनतासु ममस्तर्थः जातु कदाचित् अहं नस्म आसं इति न अपि तु
आसमेव तथा त्वमपि नासीः इति न अपि तु आसीरेव इमे जनाधिपाः एतानि रत्नपलभाणां सर्वस्य जन्तु जातस्य नाशमिति न अपि त्वासन्नेवेति यो जनाः स्वना हित्वा इत्तं नाशं साहन्नेवेति न भ
विष्याम इति नैव किं तु सर्वे भविष्याम एव न नु देहस्य नाशस्त्वकथं तत्सिद्धपायं यो ध्यानरहितचेतसां कार्येमिमानमात्रशिनि भूमः परां हि परमः पारशीविशतिनतरानतयोः इया देहप
तिर्न वीयते तस्य नरा नीरे हि भिमानाभावात् तप श्रत्वा अत्मनेः भिमानमत्वा हि तिलो के प्रसिद्धं किं च प्राचीनकर्म अतिकेनीव नैनोपपद्यते न कृतहानाकृताभ्यागमप्रसंगात्
इस्याहि षष्ठि प्राकृ कर्मात्तीसमुत्पं पस्त्रीवा जीविका प्राष्मपूर्विकाजीविकान्यान्तपाकादि क्रियापूर्वका समर्थादि जीविकास्तत्र अपि च क्रियाये चिन्त्यात्मा पवैचित्र्यं हृदयं प्यामो

नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः नचैव नभविष्यामः सर्वे वयमतः परं १२

इंद्र्चनादिषु तन्दृष्टिहापि सत्वरुः त्वाशिर्वैचित्र्यं प्राक्कर्म वैचित्र्याद्रूपमेयं तथा सयोजात स्यगोवत्सस्य स्तनपानादौ प्रवृत्तिः जन्तुमात्रस्य स्मरणात्रासस्त्रप्राप्यादीयानुभवजनि
तसंस्कारजन्यो भोजनादिप्रवृत्तिः साहिकर्देरसतो ऽस्मीप्राचीनकर्म अपि च लोकिकशास्त्रप्रसिद्धमतं तपश्चादृष्टवदतः सशरीरकं त्वेदेवेन सिध्यते एवं शत्रुकृतापदेवदन्त प्रतिमा
पांके रवे के नविहाय देवदत्तोमध्यते तत्र अपि हतनीनरंध्यात्वैवेषम्पनाप्रिवाह्यकं त्वकेवधाद्विकिंतु केवलं प्राक्कर्म मात्रं एवं च बीजांकुरन्यायेन कर्मतन्तुमसंस्कारप्रवाहानादिः
संसार इति देहनाश नात्मनाशो ऽस्तीति न भीष्मादयः शोचनीयाः स्व पूर्वे ऽस्मिन् श्लोके त्वात्मनो देहस्य त्वमुक्तं गतासून् देहानीति विशेषणेन स्वतत्र स्पशरीराद्विशिष्टस्यात्म
नो ऽथवहारदृष्ट्यानित्यत्वं साधितमिति भेदः १२

सु२

यद्यप्येवं तथाप्यात्मीयदेहवियोगजः शोको भवत्येवेत्याशंक्याह देहिन इति देहोस्यास्तीति देहो स्थूलः सूक्ष्मो विशेषेनेत्यप्यसंदेही । देहाभिमानस्य यथास्मिन्स्थूलशरीरे कौमाराद्यवस्थाः सदेहभेदेऽपि एक
एवाहं बाल्यत्वामनुभूतवानहं वृद्धोस्मीत्यभेदप्रत्यभिज्ञानाद्देहं बाल्यादिशरीरेष्वात्मैकत्वं चाहं तेनाप्यनुक्तं भिन्नेषु मध्यः स एवाहमेवेति व्याप्यमान एवं देहान्तरप्राप्तिः पितृस्थूलनाच्छरीरान्तरेभ्यो
यां लिंगशरीराणां स्थूलानां स्थूलशरीरनाशात्तानां प्राप्तिः अयमर्थः यथा एकस्मिन्स्थूलशरीरे कौमाराद्यवस्थाभेदेऽपि देहैकं एवं नित्यमपि लिंगशरीरं प्राणिकर्मभेदात्तस्मादन
तिर्यगाद्यवस्थाभेदाद्देहैकं भवति न तस्मात्तनं स्थापनं स्थूलनाशिवत्स्वरूपशरीरात्माविविक्तः एवमेवं च शोकादिधर्मिणो लिंगादृष्टिविभिन्नस्य न वहनविप्रयोगजः शोकोपि न

देहिनोस्मिन्यथा देहे कौमारं यौवनं जरा तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति १३

युक्तः अत एव तत्रास्मिन्विषये धीरो न मुह्यति स्थानिस्थाभिमानिकोशोकमोहौ देहद्वयाभिमानस्यागात् धीरं नबोधेनत्र तत्त्वमपि धीरो भवेदिति भावः पूर्वश्लोके योगिनामुक्ति
रिति यदमितित्वबहुवचनेनोपाधिभेदादभिप्रायेणात्र तु देहिन इत्येकवचनेनोपाधेरपि विलयमेकाभिप्रायमितिनिर्णयेन तथा च श्रुतिरेकस्यात्मनश्चोपाधिकभेदमाह यथा ह्य
यं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मेति क्षेत्रेषु वस्तुमात्रेषु स्थूलेन सूक्ष्मेण देहद्वयात्मके
पुरुषकोशेष्वेवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मेति च एकत्वाद्विभुत्वमप्यस्यास्ति तेन देहादीनामनित्यानामविभूनां च परिभिन्नमात्मनो नित्यप्रत्याख्यानं वेदितव्यम् १३

म१

ननुआत्मनोऽविनाशित्वेऽप्यहंदुःखी सुख्यहमित्यनुभवात् दुःखादिधर्माश्रयत्वं दुर्वारं तत्रस्य धीशाम्यादिवैधुर्यं नाशे सति दुःखसंबन्धो भवत्येवेत्याशंक्याह मात्रास्पर्शा इति मीयन्ते
विषया आभिरिति मात्रा इन्द्रियवृत्तयः पञ्चदश प्रज्ञामात्राः वागादयः दश भूतमात्राः नामादयः कौषीतकिश्रुतिप्रसिद्धा इन्द्रियविषयरूपाः आसां तासां स्पर्शा पाश्यं विषयविशेषभावेन
संबन्ध इति आलोच्य पञ्चमात्रा प्रमात्रा सह स्पर्शाः विषयेन्द्रियसंबन्धाः स्पर्शशब्दस्य च न हि नित्यं स्पर्शात्मकत्वाद्बहिर्वा [illegible] निसम्बद्धं न च स्पर्शपदे न हि केः विषयेन्द्रियपोपिला
भः तेन प्रमातुः प्रमाणस्य प्रमेयस्य च सम्बन्धाः सर्वे शीतोष्णादिवद् आगमापायिनः उत्पत्तिविनाशशीला अत एव अनित्या अस्थिरा तद्द्वैतं च सहस्व दुःखहानं च अतः तान्तितिक्षस्व सहस्व
कौन्तेय भारतेति सम्बोधनद्वयेन धीरत्वमस्य सूचयति प्रमातृत्वादिरन्यो हि स्थितसमाधिर्विशदविषयभावानुभवानुसारी भावाश्च कराचित्कः न यास्वात्मनि प्रतीयमानो पि दुःखादि

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत १४

वन्मिथ्याभूतः सन्नात्मधर्मत्वं भजते नेन्द्रियत्राभेदेन कदाचिदपीति कल्पितस्य तत्त्वाभावात् न्नापि च सर्पः प्रमात्रादिस्तु प्रतीचि प्रसक्ताभेदेन कदाचिदपीति अतो मिथ्यैति निश्चितं तते
नप्रतीचि प्रमातृसंबन्ध एव नास्ति सर्वस्य मिथ्यात्वात् नो वास्तवसंबन्धापोपात् प्रमातृधर्माणां दुःखादीनां प्रतीचि संबन्धो रूपेण न एव कथं तत्त्यात्मनि दुःखित्वप्रसङ्गः न नु रूपावि
तादात्म्याध्यासादिति भ्रमः अत एव जाग्रत्तिदुःखं दुःखं स्वप्ने नानुवर्तते प्रैतत्त्विदं जाग्रत्तिनदृश्यन्ते तथा च श्रुतिः स्वप्नान्तं च पश्यति पुण्यं च पापं चाम त्वा तत्र भवस संगोऽयं पुरु
ष इति कामः संकल्पो विचिकित्सा श्रद्धाश्रुतिरित्येतत्सर्वं मन एवेति श्रुत्यभेदनिर्देशात्कामादि सर्वविकारोपादानत्वं मनस एवाह तस्मात्तद्धर्म दृष्ट्या मनि दुःखित्व प्रतीति भ्रान्ति
रेवेति दुःखवियोगजनितां तां तितिक्षस्वेति भावः १४

तितिक्षापकं त्वमसस्वमेवेत्याह यं हीति एते मात्रास्पर्शाः प्राकृत्यात्मानं शीतोष्णादिरूपा त्रिविधा अपि पंजा प्रतिलब्धे सं प्रज्ञानघन समाधौ वा न व्यथयन्ति स्वस्वरूपान्न प्रच्यावयन्ति पुरुषर्षभं पु-
रुषश्रेष्ठ समतीति पुरुषत्वं पुरुषस्य कर्मेन्द्रियाणि तत्त्वं पंच तथापराणि ज्ञानेन्द्रियाणि मनः अहंकृतिः बुद्धिः पंच प्राणादि पंचकम् अथो विपर्यादिकं च काम कर्म च तमः पुनः अष्टमी
पुरीति प्रसिद्धः पर्यास्त्वं नमस्त्वो वा धिमध्ये एवं इत्याक्षां न भावान् अत्र पुरीति तम एव यात्त्वं तेन कारणोपाधिष्वपि आत्मनो विविक्तत्वदर्शितं पुरुषर्षभेति त्वमप्येतद्

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते १५

भवितुं योग्योऽसि सर्वे पुरुषश्रेष्ठत्वादिति सूचयति उपाधित्रयसाम्ये समदुःखसुखं तेन हि समाधिस्थः सुखदुःखापवादशीतोष्णस्पर्शो भवतीति पु
रुषस्य समदुःखसुखत्वं धीरं ध्यायिनं योगिनं न व्यथयन्ति सोऽमृतत्वाय कल्पते योग्यो भवति १५

ननु क्षिप्रमप्यागमापायिनोऽसक्तो यावद्देहमनः समदुःखसुखत्वेऽपि सोपाधिकदृशा यान्तस्तापः पिंडस्य दृष्टमूलमिव तत्त्वदुःखित्वं दुर्ग्राह्यं उपाधिश्च मूलप्रकृतेर्वा पिकायामात्रा हर्षरति
तत्त्वेन निर्मूलोच्छेद्य महे त्यतः सोऽमृतत्वाय कल्पत इत्यनुपपन्नमिति आशंक्याह नासत इति असमात्रो ह्यागमापायित्वेन कदाचित्कत्वान्नाशुकादिवत् असतः भावः सत्ता कालत्रयेऽपि
नास्तीत्ययमर्थः आगमापायिनोऽनिर्मूलास्तेनेन चिद्रूपमनिकल्पितः मूलाज्ञानस्य वा त्यक्तत्वेन निवृत्तौ कारणाभावात् पुनः समावायु द्भवोऽस्तीति निष्प्रत्यूहमसतः सत्त्वं ज्ञानास्थिय
नीति [illegible] नन्वप्रतीतिमात्रात्ममात्रादेः पिंड्याः लोपाये आत्मनोऽपि तुच्छत्वापत्त्या वा प्रतीयमानत्वादि विशेषामिथ्यात्वप्रसक्तेः इत्याशंक्याह नाभावो विद्यते सत इति सद्रूपस्य न
स्वभावोऽसत्त्वं कदाचिदपि न विद्यते प्रत्यक्षानुभूतयोः सदसतोः सत्त्वमहम स्वात्मकं न किंचिदपि द्वैधमिति उत्थानिपामर्षदर्शनात्तत्त्वदर्शिभिरनयोः प

नासतो विद्यते भावो नाभावो विद्यते सतः उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः १६

रामर्शसंभवात् अतः सतोः सत्त्वं नास्ति श्रुतिरपि केवलमात्राय भावं दृशो नित्यत्वं च यत्र हि द्वैतमिव पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविना
शित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति हि मात्रादिः सत्यस्तादृशः सतोऽर्थस्य स्याद्वा वरदर्शनं सा निष्ठाभावाद् दृष्टृदृष्ट्योरपि ह्यावकल्पं नाद्यः आत्मनिरूपण ४
नभावस्यात्मन्न सद्भावकल्पनायोगात् तेनोऽसः उदाहृतपाशुभे वत्त्रिविधमूलत्वात् उभयोरसत्त्वेन मिथ्यात्वेन वा सामग्र्ये दुर्वचनेन तत्तत्राकाशादेः क्वचिदपि दृशेका
लेवाभावोऽयं यदपि नास्ति तथापि सत एव व्यामोहात् दृशांते भावोऽस्ति प्रागसतो विघटादेर्भावस्वरूपः तत्कथमुच्यते नासतो विद्यते भावो नाभावो विद्यते सत इत्याशंक्य

मी० म० वृ०
५६

गिहृहरनुभवेन निरस्यति उभयोरपीति स्थूलंतोपाद्यास्यंपद्यालवेन नभः कुंभकुंभाद्यपो निरस्यानिसत्वमसत्वादिधर्मापेततयानिश्चिता अपि प्रबोधेनाप्यन्ते तद्वृत्ता
ग्रहृष्टास्वपि तेन लयस्तास्ते नवाध्यंते तेन तु ज्ञाग्रहृष्टमनाव शानस्वप्नमप्यासेनिसत्वादि निश्चयो भ्रमइति चेत् अनादिकालप्रवृत्तप्रागभावी पसंस्कारवशात् जाग्रत्
भ्रमग्राहृत्व विभ्रममइति तत्संनतु स्वरूपमइवाजतादिकंप्राक्याहृाव ध्यस्ते तेन तत्वमतशशशृंगादिकं गगनादिकं तुल्यद्वीसास्वरूपेणाश्रमइपि कथमात्मन्यध्यस्तइ
ति चेतन्न ध्यासेहि पूर्वानुभवमात्रमहूपेपेक्षते न तत्तनुभूतस्वरूपेणसत्वमपि रर्थणाप्रतितिविद्धितेगगनेपि नैत्याध्यास दर्शनात् तनचगगनेनेत्वं स्वरूपेणासत्व
मस्तिस्वप्नचात्यत्राध्यस्तेन स्मात् भ्रमपरंपरया : तं भवान्तरप्रहृष्टमिति वास्याभिरहृष्टमपि मइसंतोर्षाध्यास्यं प्रवृत्तेहूर्ंइष्टुंशक्यमेव तथाचश्रुत यः नेहनानास्ति
किंचनस्थलीसेवोपलभ्य : श्रुतो माहृनमिस्याधाः अनात्मनोः सत्वस्यामनस्वमत्वंशतिपाद्यंतिएवंप्रतोक्तानेनासंतोवाधात्केवलं मिध्यात्वमिति भाव:

सम०
५६

यस्याभावो नास्ति स सतः। यतो विकारान् मिथ्यात्वं यथा तु अपि विनाशीति तत्त्वेषु न प्रकृतं तत्सत्यं यत्र स्वरूपं तेन सत्ता इदं सर्वं विपरीतं इति अस्य तत्वं प्राप्तं परः सन्नपरः साक्षीति सर्वस्य सदृशे
दानुभवान्तस्य पश्यादीनां सत्तया नाशनात् इति घटादीनां घटस्यैव नानुभवे मृद्घटादयः कल्पितो भ्रमे न नु स्वरूपस्य इति किं विकारकारणं वस्तु सा प्राप्तं तु अविनाशीति तत्र सत्र अविनाशि विद्धि
अस्यमर्थः पूर्वावस्थापरित्यागो ऽत्र विनाशः सद्भिर्विकारकारणं मृदादि न भवति अतः साक्षिविनाशशीलाविकारिणः अपरत्वात् अनयोः अत्र तथा किं तर्हि इदं वस्तुस्वरूपमविनश्वरं कार्य
कारणं भवति लोके पेच सत्तास्फुरणं कार्यं वर्यति अतो ऽविनाशि तद्याचष्टे तु नयः अजायमानो बहुधा विजायते जात एव न जायते को न्वेनं जनयेत् पुनः अजायमानः जन्माद्
विकारमलभमानो विजायते विपर्यासे सेनाधिभवति तथा लोकदृष्ट्या जातो घटादिकोपि परमार्थदृष्ट्या न जायते परिणामस्फुरणं सत्ता भासात् मृदादेः स्वाप्नपदार्थवत्

अविनाशि तु तद्विद्धि येन सर्वमिदं ततं विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति १७

घटत्वात् अतएव घटादिकोत्पत्तौ न चक्रेपि कुतर्हि सभासत इति चेत् तद्रूपाणां घटादीनां हि तदानीं तत्तत् प्रमाणावेशसंबन्धे प्रमेयं तत्स्वभावा सर्वमिदं विभाति
तत्सतः सत्त्वेन प्रकाशोपलक्षितस्य प्रपंचस्य सत्त्वं सतो भानमेव प्रपंचस्य भानमिति तथा च प्रपंचगता सत्ता स्फुर्तिः सत्त्वे प्रत्यात्मानमर्थः श्रुतिश्चात्र
तेनात्मशुङ्गेन आपो मूलमन्विच्छ अद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठा इति
सतो जगद्रूपानलंकार्यलिंगेन दृष्टत्वात् सतो विनाशित्वं च विनाशहेतुभावादित्याह अविनाशमिति नाशविनाशस्य एतेन सर्वविकारशून्यस्य विनाशो
नास्तीत्यर्थः अपरस्यापि तस्मादिविकारवतः एव भवतीति सत्यात्र सर्वविकारोपलक्षणमपायोऽयः न कश्चिदित्यनेन तदन्यस्य विनाशहेतोर्भावो दर्शितः द्वितीया
भावं भवतीति श्रुतेः १७

भी॰ प
पृ ७

एवं सतस्त्वात्मनो नित्यत्वं असतो देहादेरनित्यत्वं चोक्तमुपसंहरन् एनं युद्धाभिमुखं करोति अंतवंत इति यद्यपि नासतो विद्यते भाव इति असतां देहानां कालत्रयेपि सत्वं
नास्तीति परमार्थदृष्ट्या उक्तं तथापि तां दृष्टिमप्रतिपद्यमानस्य नरकादिभयमनुरुध्यमानस्य व्यवहाराभिप्रायेणानित्यानित्यविभागमभिप्रेत्य देहानामंतवत्वमुच्यते
इति न दोषः नित्यत्वं कालापरिच्छेद्यत्वं तच्च व्यवहारेणाप्यस्तीत्यत उक्तं अनाशिन इति नाशो अदर्शनं तदपि नहि आकाशः न च आत्मा नित्यलोप इति नित्यस्यैते अपि
तु नन्वेतस्य नाशो मा भूदेवमप्रकाशमाननइत्यर्थः एतदृष्टिपरादिवदृश्यत्वेनेत्याह अप्रमेयस्येति तथा च श्रुतिरात्मनः अप्रमेयत्वमाह एतदप्रमेयं ध्रुवमिति अप्रमेयमि

अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत १८

त्यर्थः एतद्वात्मनि प्रमाणाप्रमाणतत्वेनैतत्तथा च श्रुतिः येनेदं सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयादिति प्रसिद्धित्वस्यास्य गात्मत्वा
दयस्मात्स्वप्रकाशोऽयमात्मा सर्वान्तर इति श्रुतेः उक्तं च प्रमाणान्यप्रमाणाभासत्वमेव च यस्य प्रकाशात्सिध्यन्ति तत्र संभावना कुत इति तस्माद्युद्धस्व भारत न मोहादि
देहानां मिथ्यात्वेनित्यत्वाच्चात्मनो युद्धस्य नच प्रापनया हन्तव्योऽस्ति त्वात् अयापात्स्वधर्मेनिनाशनीय इति भावः १८ ॥ ॥ १८

प्रमाणं व २

राम
५७

ननु नासतो विद्यते भाव इति न्यायेनासतो मात्रादेर्मिथ्यात्वेन निःस्वरूपत्वात्कर्तृत्वेन संभवतिस्त्वतः सत्यस्य कर्तृत्वं वंभ्रमो भ्रमात्कं च वाच्यमस्य यथोऽतः कालो वधस्यात्म
नश्च मोक्ष इति तत्पौर्वापर्यविकारात्पणाततत्थापेन सर्वमिदं ततमिति सतोऽस्य गुणाश्रमनन्तं च योक्तं न वाच्य हन्तेः क्रियां प्रसेकस्येयकर्तृत्वे कर्मत्वे चापततीति न च्चेद्विहन्तृत्वात्मनि
व्यापारयोगात्वतन हि च न्निं विदूरे हन्ता नित्युक्तमिमामाशंक्याह य एनमिति पञ्चतार्किका हि नमात्मानं हन्तारं हननक्रियायाः कर्तारं मन्यते यश्चार्वाका हि एनं मे हतं ह
ननक्रियायाः कर्मीभूतं मन्यते तावुभावपि न जानीतः अस्य सत्त्वमिति शेषः यस्मान्नायं हन्ति न हन्यते न हि यः कर्ता स आत्मा नापि देह आत्मा तेषां प्रागेवानात्मत्वावधे

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतं उभौ तौ न विजानीतो नायं हन्ति न हन्यते १९

रणात् तस्यैवं भावः पर्यायः पिण्डे वह्निसंबन्धादेव दग्धृत्वं न स्वतः एवं मात्राद्युपाधिसमनियतं कर्तृत्वं मात्रादिधर्मस्य नात्मनः आत्मनि तत्कर्तृत्वप्रतीतिर्मात्रादिसं
योगेन अतो मात्रादिविशिष्टस्यैवेषां नैकैकत्वं स्पष्टो स च मात्रादिवियोगे भवति न वे धर्मो ह्ययौवैयधिकरण्यं न च मात्रादेर्निःस्वरूपत्वमस्ति सत्त्वासत्त्वाभ्यामनिर्वचनी
यस्य व्यवहारयोग्यस्य ग्रहणान्नैकबाध्यस्य सम्भावीं अनर्थं च नगणरिक त्यक्तत्वरूपस्याभ्युपगमात्तस्मान्न कर्तृत्वमात्मधर्मः यथोक्तं आत्मा कर्ता हि रूपश्चेन्नाकांक्षील
हि मुक्तेनां न हि स्वभावो भावानां व्यावर्तेतौष्ण्यवद्रवेरिति किं च कर्तृत्वं गेहादिविकारवत् एव संभवति न हि तत्सुदुःखीति आत्मनो भपमानेशाक्षित्वं व्याहन्येत यथोक्तं

३-१

गी० प
५८

नैर्नस्पृहिक्रियां दुःखीभाभिनाकांक्षिकारिताः धीविक्रियासहस्राणां साक्ष्यतो हमविक्रिय इति न च मत्तो देहाद्युपादानेन त्वं न हन्ता न क्रियाकर्त्ता त्वं भवसि विवर्त्तवा
दाभ्युपगमात् न त्यक्ष्यते स्वधर्मो ऽधिष्ठानं विकारो हृश्यं तेन पश्चात्के भोक्ष्यपत्रपत्रपद्यस्तं मनत्वं तेन गुणो न दोषेणावाः गुणमात्रेणापि न संबध्यन इति विवृतं चैतदेहे
न हि भूमिः षष्ठ्नीमरुगरून्नक्वाहि नीमरितं समुद्रह्यति मृगवारिपूरपरिपूर्णवतीन न दीन यथा सर्वं भुवं व्याप्तानीति एतेन कर्तृत्वकर्मत्वयोरनात्मधर्मत्वात् नात्मन स्त्र
न्यकरूपलादेकत्वात्मानि तदुभयपरिहारो ज्ञानमात्रित्वं सिद्धिमाचार्यैः कृतोक्तिः मिमनोदेहात्मकर्ता त्मना ये देहं हन्ता च न मनो हंकं हतस्त्वन्मन्येते हन्तेउभौतौ
न विजानीतो नायं हन्ति न हन्यत इति काठकोक्तेन मंत्रेणापूर्वार्द्धपाठभेदापठितेन परिहृतं वेदितव्यं ॥ २९ ॥ ३१ ॥

राम
५८

४२ ५१

नायं हन्ति न हन्यत इत्युक्तं तत्र न हन्यत इत्येतदुपपादयति न जायत इति हेतोः सर्वेषां हि तैर्येन मंत्रेणानजायत इति अयं आत्मा कदाचित् न जायते अभिनवो नोत्पद्यते न वा म्रियते निरन्वयो न
नश्यति नाकिंचित्काभिमते एवं न तत्र क्रमेण हेतुद्वयं अजो नित्य इति अजत्वान्न जायते नित्यत्वान्न वा म्रियत इत्यर्थः अस्तु तर्हि क्षणिकविज्ञानवत्प्रागभूत्वा तस्य विज्ञान
वादिभिः अजत्वनित्यत्वाद्युपगमादित्याशंक्याह भूत्वा भविता वा न भूय इति अयं पिसमनुवर्तते अयं भूत्वा भूयो भविता न भूयोऽस्मत्कृतमत्वा भवितेति भवनक्रियाद्व
यस्यान्वयाप्रयोगात् कर्तृत्वधीरेवमाभिप्रायेण भूत्वैव तानं न भूत्वा स्थित्वा स्थित्वा स्थित्वा विनश्यतीति नाकिंचित्काणां हि विज्ञानं उत्पत्ति स्थिति नाश क्षणव्यापित्वा

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे २०

त्रिक्षणावस्थायित्वं विज्ञानवादिनोऽभ्युपगच्छन्नाशक्षणएवोत्पन्नोत्पत्तिक्षणः स एव तस्य स्थितिक्षणोऽस्तीति क्षणिकत्वान्न विज्ञानानां भवनक्रियाद्वयस्याऽवधानाद् भूत्वा
भवितेत्युक्तं नात्र शोच्यत्वं न यतः शाश्वतः शश्वदेकरूपः योऽहं बाल्ये पितरावन्वभूवं सोऽहं स्थविरे प्रणप्तॄननुभवामीति वा स्मृत्या विरोध एवमेकाश्रयाभिज्ञानान्न च यस्मादृश्य
त्वस्याभिज्ञानस्य दृश्यता हेतुः स्थिरत्वाभावात् पश्चाज्जन्ममरणाद्यो नोत्पद्यमानो विशिष्टः पूर्वमभूत्वा पुनर्धर्मान्तरविशिष्टो भविता इत्यपि न भूत्वैव भविता न त्वभूत्वेति यो
जनानाऽहं तानि हि शरीराणि मानमात्मानं अभ्युपगच्छन्तो नित्यस्ये के स्वेवात्मनः क्रमेणाद्युक्तो मरणावमशक्यमनु जनमतं गजशरीरं प्राप्तोऽपि मानामेहे मम मानाः भूतस्येवा
२१

दुः

त्मनो विशेषणी भूतपरिमाणाभवनो देहपञ्चादि कं भवनमप्युपगच्छन्ति तद्रूपिनः शाश्वतत्वाद्वेदरुपपद्यापचयवतो मध्यमपरिमाणस्य चात्मनो नित्यत्वायोगात् अनेनैव
मृतव [illegible] दुःखादिधर्मान्तरे समनोभावं कं भूत्वा भवनं प्रसाद्ध्ये पं न हि दुःखादिधर्मिणः एवं नाशमन्तरेण अस्ति किंचित् दुःखोच्छेदः संभवति यदा देहो पावद्रूपनाशः दर्शनान्
नन्वन्तत्वं नित्यत्वं शाश्वतत्वं चाकाशेऽप्यस्ति अतस्त्वाह पुराण इति पुराण विपर्हा रिमि प्रागपि सत्त्वमेव एतेन अपक्षयादि धर्मराहित्यमस्य उक्तम् अजत्वादिकं श्लोकान्तरेण विवृ
णोति अल्पमुक्तं न हि इति हार्दिकं अजत्व शरीरे हन्यमाने न हन्यते भाष्यतया शरूद्धार्थं न जायते म्रियते वे सर्वः तत्रोपपत्तिः अयं न भूत्वा अभूत्वा अनुत्पद्य न भविता दरादि
वृद्धेत्वा न जायते अथवा न जः पूर्वानुत्पत्तिलं न जायते नवा म्रियते ह्निर्यतो भूत्वा अभविता परं च हि तावि नश्वतो न म्रियते इति शाश्वतः पुराण इत्येताभ्यामपक्षयोपच
योर्निषेधोऽनेह इति न हन्यते न विपरिणमते इति व्याख्याने केचिदेवमाहुः न जायते म्रियते इति प्रतिज्ञा कदाचिदित्यादिना अस्या उपपादनं अजत्वादिरुपसंहार इति ॥ २० ॥

दे१

नोयंहन्तीत्येतदुपपादयति वेदेति विनष्टं पूर्णं नं तं तद्शीलमस्येति विनाशि तद्भूतं तस्मस्यपाधित्वपंचभूतमसूक्ष्मकारणशरीराख्यं नतेतोऽसंवविनाशिनं अतएव नित्यं नाशहीनं
नत्वहेतः अजंजन्मवान हि अनित्यः अथं तस्माज्जन्मानित्य संबंध सर्वः ननुविनाशिनः स्वकार्यापेक्षपाश्रमत्वमजत्वं नित्यत्वं च सांख्याभिमतप्रधानेनार्किकाभिमतेनम सिद्धास्ति अ
तउक्तं अव्ययमिति नविद्यते व्ययः पूर्वावस्थांशः तनोत्यव्ययं परिणामिप्रधानं सावयवत्वं गुणहेतमपिनित्यापेनगुणसम्यावस्थायामपिपरिणाममात्रमेव सर्वहृत्ती नि तेषामभ्युपगमात
व्याकाशस्यापितस्माद्वायुस्तस्मादग्निरात्मानस्त्रांश्चशः संभूतइतिश्रुतिभ्रवणादनत्वाभावादेवं तामपत्वंनाद्दशमात्मानं योवेदअपरोक्षीकरोतिसपुमानकथं केनप्रकारेणकमम्
कन्त्य

वेदाविनाशिनंनित्यं यएनमजमव्ययं कथंसपुरुषःपार्थकंघातयतिहन्तिकं २१

घातयतिहननक्रियायांप्रवर्त्तयति कंवाहन्तिनकेनचित्प्रकारेणकमपिघातयतिनवाहन्तीत्यर्थः हेत्वाभावात तथाहि भुतिविद्यावस्थायां सर्वकारकव्यापारं निषेधति
यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादिः अविद्यावस्थायामेव च सर्वकारकव्यवहारं दर्शयतियत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्यादिना तेन सर्वकारकोपमर्दि
न्यविद्यापाः सर्वकारकसापेक्षैः कर्मभिः सहसमुच्चयोनिलः परस्परविरुद्धस्वभावत्वेनसमीनोसमयोर्विद्ययोरेककार्यकारित्वसंभवाभावात्तमन्यायेनात्मासंभवादि रहस्यत्रविलासःमा
दृशानां मुख्यानकालेविद्यालेशानुषलाधानपित्वादेः अप्रसक्तावपि विषयान स्वाधिनत्वाद्योगाभिक्रमणामत्रेषाद्वानंहोषः तथा च वक्ष्यति हत्वापिसइमांल्लोकानहं
तिननिबध्यतेइति २१

ननु यथा हस्तो पजेन नजातपत्रः कृतकेशो ग्रीनार्थीनेति स्त्रात्मानं वयोवस्थादि विशेषणानं नमेवाधिक्रस्यकर्मविषयः प्रवर्तते न नन्वित्याहु स्तत्रमिव देहाद्दम स्त्रात्मावधार पितेन शक्यत इत्याशंकाहू वासांसीति देही प्रेषणेन त्वाहे नितं दुरुपविशेषणात्वेपि नैवप्रेषानुवर्त्स्य स्वरूपांतर्गत त्वं एवं ह्यात्मणत्वादेरपि नस्तर्गकामनस्वरूपांतर्गत त्वमिति वस्त्रेदेवहनयो रपि नयु ज्ञ्येयी ईहात्मनोऽसंतविलक्षणात्वमत्तानि वस्त्रनाशो न देहहननाशं मन्वान श्येवनदेहनाशात्मनाशमन्वानस्यासंतमो ह्यामेवमिति

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि तथा शरीराणि विहाय जीर्णा न्यन्यानि संयाति नवानि देही २३ नैनं छिंदंति शस्त्राणि नैनं दहति पावकः न चैनं क्लेदयंत्यापो न शोषयति मारुतः २४

भावः एतदर्थं श्लोकः कीदृशोसौ देही यत स्त्राहे नेनमिति एनं शस्त्राणि न छिंदंति न द्वेधा कुर्वंति अस्थूलत्वात् तर्हि पार्थिवपरमाणुवत्साकत्तनरूपाया अग्रेयो भविष्यतीत्याशं क्याह नैनं दहतिपावक इति अग्रनरणुत्वात् तस्मादापश्चैनं न क्लेदयंति अस्पर्शत्वात् स्पर्शवदिद्रव्यमद्भिरार्द्री कर्तव्यं न त्वस्पर्शं न शोषयति मारुतः अस्नेहत्वात् एते नस्थूलत्वम नणु त्व मस्पर्शमस्नेहमव्ययं तथा रसं नित्य मगंधवच्च यत् इति श्रुतिप्रसिद्धानाम हेतूनांशक्तेनामपि संग्रहो ज्ञेयः २३ ॥ ॥ राम ॥

कुतो हेतोरस्य शस्त्रादीनि [illegible] छेदादीन्न कुर्वन्तीत्याशंक्य तस्य छेदाद्ययोग्यत्वादित्याह अच्छेद्योऽयमिति अयं छेद्यत्वे पूर्वोक्तान्येव शस्त्रादीनि कारणानि नैनं यान्ति एवमच्छे-
द्यत्वादिना स्थूलादीन्भावान्नित्यानुत्क्वा भावरूपान्नपि गुणान्नाह नित्यः इति सर्वैर्विशेषैरयोग्यत्वेऽकार्यमेव वस्तुनो न स्यात् नित्यत्वादिभिः स्वाभाविकैरेव निएक्तिः पते
पतो नित्यस्वभावोऽपरस्तु स्याद्यः पतः सर्वगतः अतो ग्रामवत्प्राप्यः पतः स्थाणुः पूर्वरूपापरित्यागेन स्थिरस्वभावः अतः क्षीणविवृद्धिकार्यः अचलः यथारूपेण स्वतः
स्वाभ्यासस्य तेषिमलक्षणा वर्तिनश्चाव्यस्थानमात्मनेऽएवं तत्प्रत्याहारविश्वसमं योगाद्यं च अमस्त्रीडितमच्चहेतुकापकर्षपालभ्रमणसंस्कारमेव भूतेषु अयं तत्रावलत्वात्

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च नित्यः सर्वगतस्थाणुरचलोऽयं सनातनः २४

तथा एवं च तस्य सापि विकृतिसंस्कृतिरूपं च तद्विधं क्रियाफलमात्मनि न संभवतीत्युक्तं तत्र हेतुः सनातन इति सनातन इत्याह सर्वदा नैरन्तर्येण तत्त्वेन देशतः कालतो वस्तुतश्चाप-
रिच्छेद्यस्य हि स्वरूपमनेन प्रमाणेनाकालतः परिच्छेदाभावे देशपरिच्छेदोऽस्ति आकाशस्य न तु भयाभावे विवक्षितः परिच्छेदोऽस्ति सोऽपि त्रिविधः सजातीयविजातीयस्वगतभेदः
पः यथा वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः वृक्षान्तरात्सजातीयो विजातीयः शिलादिभिः तत आत्मनो नैरन्तर्येण त्रिविधपरिच्छेदराहित्येन भवतीत्यतो नित्यः सनातनः
खंडेकाभावस्मात्तस्मात्तनोऽस्य [illegible] अपारमार्थ्यः २५

न४

एवं तेयं व्यक्तत्वेन तत्त्वतत्त्वाध्यस्तदेहद्वयनिराशेन स्वरूपेणापरोक्षीकर्तुमशक्यत्वादाह अव्यक्तोयमिति अव्यक्तं स्थूलशरीरं प्रत्यक्षगम्यं तद्रूपोयं प्रत्यक्षगम्यात्मा न तथा अचिन्त्योयं चिन्तायोग्यं रूपादिमत्कार्यकार्यं तन्नायं पंचभूतादिसमुदायात्मकं लिंगशरीरं स्थूलप्रत्यक्षं तन्नायमयं न तथा अविकार्योयं विकारं स्थूलसूक्ष्मकार्यभावेनावस्थानमर्हतीति विकार्यं त्रिगुणात्मकं मूलाज्ञानं कारणशरीरं तद्धोस्थितं न किंचिद्वेदिषमिति यावन्मनसीदृशेनाहंत्र ज्ञानामीत्यनुभवाद्वासाक्षिकाम्यं तन्नोप्ययं उच्यते अक्षरादिनिषेधमुखे न तत्पदलक्ष्यो ग्राह्यः स्कंधपाःमेवंविधप्रतिविधिमुखेनोच्यते यस्मादेवमयमुच्यते तस्मादेनं विदित्वा नानुशोचितुमर्हसीति तरति शोकमात्मविदिति श्रुतेरात्मविद्भूत्वा बंधुवियोग जं शोकं माकार्षीरित्यर्थः उक्तं चात्मनो वस्त्वात्रयातीतत्वं स्वप्ननिद्रायुतावाप्योप्राज्ञस्तस्त्रस्वप्ननिद्रया न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिता इति २५ एवं तत्त्वदृष्ट्या शोको

म॰१

अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि २५ अथ चैनं नित्यजा तं नित्यं वा मन्यसे मृतं तथापि त्वं महाबाहो नैवं शोचितुमर्हसि २६ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृत स्य च तस्मादपरिहार्येर्थे न त्वं शोचितुमर्हसि २७

नोचितस्तत्त्वमंगीकृत्य नोप्राकृतजनदृष्ट्यापि शोको नोचित इत्याह अथचेदिति नित्यसंनियमेन जातं नित्यजातमिति चार्वाकपक्षः नित्यं सर्वदा जातमिति क्षणिकविज्ञानवा दिपक्षः नित्यमृतं सोप्यपूर्वदेहेदिपसंबंधाज्जातमृतनित्यांकीकारादिपक्षः एवं नित्यं वा मन्यसे मृतमित्यपि वियोजं पक्षत्रयेपि शोको न युक्तः महाबाहो इति पुरुषार्थमुत्साहयति २६ शोचितुं नार्हसीत्युक्तं तत्र हेतुमाह जातस्य ध्रुवोपरिहार्यः मरणमित्यपरिहार्येर्थे मारणात्मके त्वद्युद्धोद्योगं विनापि अवश्यंभाविनि विषये न त्वं शोचितुमर्हसि मया स्पीतचमयैवै ते निहताः पूर्वमेवेति १७

अस्त्वात्मनो शोच्यत्वं तथापि स्थूलदेहविनाशजः शोको भवत्येवेत्याशंक्यास्य कारणस्य देहा[illegible]देर्मिथ्यात्वं दर्शयति अव्यक्तादीनीतिभूतानि वियदादीनि तत्कार्याणि भूतानि जरायुजादीनि च न व्यक्तमव्य
क्तं अज्ञानं तदेव आदिर्येषां तथाविधानि व्यक्तः स्पष्टः मध्य उत्पत्तिमारभ्य मरणात् प्रागवस्थाएषां अव्यक्तैरव निधनं लयो येषां तथाविधानि अयमर्थः रज्जुरगादिकारणमज्ञानं रज्जुवत् उरगवद्भूत्वा व्यक्तमस्तिपरीक्षमाणां व्यक्त
स्थितमवतरति अतस्तत्स्व्यक्तं ततः उत्पन्नः सर्पस्तत्रैव लीयते न शङ्कां एवं आत्मनि कल्पितानां भूतानां आदिरंतश्चाव्यक्तमेवं तेन आरावं तेचयत्रास्ति वर्त्तमाने पितत् तथैति न्यायेन मध्ये भासमानान्यपि तानि
रज्जुरगवत् असंत्येवसर्वविधेन तत्र तस्मिन्विषयेका परिदेवना को वा विलापः न हि मरुमरीचिकाजले नष्टे इति कश्चित्त्ववित्तविलपति अतएव भूतानां रज्जुरगादीनामिव प्रतीतिसमकालिकी सृष्टिरभि

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अव्यक्त निधनान्येव तत्र का परिदेवना २८॥

प्रेत्यकोषीतकिब्राह्मणे स्वापप्रबोधयोर्जगल्लयोदयौ पञ्चते सयत्रास्व पितितित्तदेनं वाक्सर्वैर्नामभिः सहाप्येति चक्षुः सर्वैरूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति सयदा
प्रबुध्यते यथैतस्मादात्मनः सर्वे प्राणायथायतनं विप्रतिष्ठंते प्राणेभ्यो लोका इति प्राणाः चक्षुरादीन्द्रियाणि देवास्तदनुग्राहकाः सूर्यादयः लोकाः रूपादयः न चिहान्यत्रव आत्मैव सर्वभूतानां लयोदय स्थ
नमित्युच्यते नान्यत्तत्कथमेषामव्यक्ते लयोदयस्थानमित्युच्यते सत्यं अज्ञानाश्रयत्वाद्ब्रह्मणि तथात्वव्यपदेशो न वस्तुगत्या न हि अपरिणामिनः कूटस्थस्य मह्यत्तत्कथमेषामव्यक्तं लयोदयस्थानत्वं
॥संभवतियथोक्तं अस्यैव हि तेंद्रजालसपदृपादानकारणं अज्ञानं तदुपाश्रितत्वब्रह्मकारणमुच्यतेइति २८॥

भी०
६१

का१ न२

नन्वेवं पंजरतुल्यस्य सर्वप्रमाणासिद्धस्य विपदादिप्रपंचस्य कथं रज्जुरगादिवदज्ञानप्रभवत्वेनात्यंततुच्छत्वमुच्यते कथं वा मेत्तां कांडाये क्षितमात्मनो युज्ञादिकर्त्तृत्वं वापद्ध्यत इत्याशंक्याह आश्चर्य
वदिति कश्चित्तज्ज्ञानात्मनतः एनं अतीतानंतरश्लोकोक्तं भूतग्रामं आश्चर्यवत् आश्चर्यं अद्भुतं स्वप्नमार्थ्यं इन्द्रजालादिकं तेन तुल्यं आश्चर्यवत् तथाभूतं पश्यति तथा कश्चिदेनं आश्चर्यवत् वदति सत्त्वे
न असत्त्वेन वा निर्वक्तुमशक्यमपि अनिर्वचनीयं नेव लोकप्रसिद्धेन रूपेणोपपादयति तथा हि रज्जुरगवत्प्रपंचः सत्त्वे हानानास्ति किंचनेति श्रुत्या नवाध्येत असत्त्वे न प्रतीयेत तस्मादनिर्व
चनीयोऽयमिति तदिदं सर्वव्यवहारास्पदस्यापि प्रपंचमिथ्यात्वोपपादनं मेत्याश्चर्यमित्यर्थः तथा स एनं प्रपंचं अन्य आश्चर्यवत् शृणोति इमे लोका इमे देवा इमे वेदा इदं सर्वं यदयमात्मेति प्रत्य
क्षेणानात्मतयोपलभ्यमानस्यापि प्रपंचस्य प्रत्यगात्मभिन्नत्वेन श्रवणं तदत्यंतमाश्चर्यं न हीयं श्रुतिः यजमानः प्रस्तर इत्यादिवदुपचरिता अप्रपंचस्यात्मनः एकत्वे आत्मा नो वा अरे

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् २९॥

६३
शेनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितं भवतीत्येकविज्ञानात्सर्वविज्ञानप्रतिज्ञोपरोधापत्तेः न च प्रतिज्ञायोपचारिकी प्रदेशांतरे श्रुतस्य यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्यादित्यादिदृष्टांतस्यो
परोधापत्तेः न च प्रतिज्ञाप्यौपचारिकी प्रतिज्ञादृष्टांतनिगमनानामेकवाक्यत्वात् न प्रपंचस्यात्मान्यत्वं तत्र भेददृष्टा हि प्रत्यक्षविरोधादाश्चर्यमिव शृणोति तथा कश्चिदेनं प्रपंचं प्रत्यगतत्वेन श्रुत्वा अपि शास्त्रतु
ल्यास्वप्नादिदृष्टांतैः रूपपादितं ध्यानेन च साक्षात्कृत्वापि तत्त्वतो न वेद न जानाति तथा हि प्रामाण्यप्रज्ञातो बत विक्षेपवतः परिहीयत इति वक्ष्यति तस्मा

ब

ति१

गाम०
६२

हात्मैकात्म्यं भवत्येव प्रपंचस्याज्ञ ... रागादितुल्यत्वेन तुच्छत्वं प्रदर्शनेन आत्मानेकत्व भोक्तृत्व दुःखितत्वानित्यत्व जडत्व संसारित्व परिच्छिन्नत्वादि धर्मवत्तया प्रसिद्धोपि तत्त्वमसीत्यागमोत्थया ब्रह्माकारां
तःकरणवृत्त्या ब्रह्मविद्याख्यया अकर्त्तारमभोक्तारमानंदघनं सत्यचिद्रूपमसंगमनंतमपरोक्षीकरोतीति महदाश्चर्यं यत्पश्यतितदाश्चर्यवदिति क्रियाविशेषणं वा अविद्यकमपि दर्शनमविद्यास्वात्मानं
चकर्त्तकरज्जो वह्निवत्तेयतीति यद्वा यः पश्यति स आश्चर्यवदिति कर्तृविशेषणं यतः स करणविहीनस्समाधिप्रत्याश्चर्यरसरविरहस्य मनोब्रह्मभावं जीवभावं च यावद्दार्ढ्य स्वकर्मरूपमनुभवतीति तत्
था वाक्यं न समातीतमप्यात्मानं यद्ब्रह्मावदतीति तदप्याश्चर्यं अगृहीतसंगतिकेनापि शब्देन यथासुप्तः प्रबोध्यते तत्त्वमस्यादिवाक्येनापि अगृहीतसंबंधमभिधानाभिधेययोः हित्वानिद्रां प्रबुध्यते सुप्तो वोधितः
परैः जागर्ति नयतः शब्दं सुषुप्तेवेतिकश्चन धत्ते अतोऽज्ञानतोऽज्ञानेब्रह्मास्मीति भवेत्फलं अविद्याध्वंसिनः शब्दाद्यहं ब्रह्मेति धीर्भवेत्तस्य त्वविद्यया सार्द्धं हत्वा रागादिबोध धर्मिति तथाऽयः शृणोति सोपिआ
श्चर्यवत् अतिदुर्लभ इत्यर्थः श्रवणायापि बहुभिर्यो न लभ्य इति श्रुतेः श्रवणेनापि बहवोयन्न विद्युरिति श्रुतिर्द्वितीययार्द्धार्थसंग्रहाति श्रुत्वाप्येनमिति आश्चर्योवक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता
कुशलेनानुशिष्ट इति ज्ञात्वा तृतीयश्लोकपूर्वार्द्धेन संगृहीत इति ज्ञेयं दुर्विज्ञेयोयमात्मातेनैतत्त्वज्ञानार्थं यत्नः कर्तव्य इति भावः २९ ॥ ॥ ॥

प्रकृतमर्थमुपसंहरति देहीति सर्वाणि भूतानि कथं मे ते हीना अल्पबलाः बलवन्तो वा मया हंतव्याः कथं मे बंधुपुत्रादयः एते विनाशी विष्यंति कथं वा अहं भीष्मादिगुरुभिर्विनाशी विष्यामीति शोचि
तुं नार्हसीत्यर्थः ३० अर्जुनस्य अनात्मनि देहे आत्मधीरूपो मोहो निवारितः इदानीं स्वधर्मे युद्धे अधर्मधीरूपं मोहं निवारयति स्वधर्ममपीत्यादिना युद्धं क्षत्रियस्य स्वो धर्मः तमवेक्ष्यापि विकंपितुं
चलितुं नार्हसि यस्मात् धर्म्यात् अनपेतात् युद्धादन्यत् क्षत्रियस्य श्रेयः प्रशस्ततरं नास्ति ३१ किंच यदृच्छया अप्रार्थितमेव उपपन्नं उपस्थितं स्वर्गद्वारं अपावृतमुद्घाटितं ये क्षत्रियाः लभंते ते सुखिनो धन्या

देही नित्यमवध्योयं देहे सर्वस्य भारत तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ३० स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि धर्म्याद्धि युद्धाच्छ्रेयोन्यत् क्षत्रियस्य न विद्यते ३१ यदृच्छ
या चोपपन्नं स्वर्गद्वारमपावृतं सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशं ३२ अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ३३ अकीर्तिं चापि
भूतानि कथयिष्यंति तेव्ययां संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ३४ भयाद्रणादुपरतं मंस्यंते त्वां महारथाः येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवं ३५ ॥ ॥

भवंतीति संबंधः ३२ युद्धत्यागे इष्टनाशो अनिष्टप्राप्तिश्च भवतीत्याह अथ चेदिति ३३ अव्ययां दीर्घकालां ३४ अकीर्तिमेवाह भयादिति त्वं बहुमतो भूत्वा स्वत एव अतिश्लाघ्यत्वं संत्
लाघवं लघुभावं कातरत्वं येषां पुरतो यास्यसि ते महारथास्त्वां भयाद्रणादुपरतं मंस्यंत इति योजना ३५ ॥ ३५ ॥ ॥ ३५ ॥ ३५ ॥

किंच अवाच्यवादान्वक्तुमयोग्यान् शब्दान्बहून्वदिष्यंति तेर्जुन इत्यादीन्सामर्थ्यं निंदंतः धिगस्य शौर्यं यो भीष्मादिभ्यः पलायित इति दुःखं वचनं मरणादपि अधिकं दुःखं न ततोन्यत् दुःखतरमधिकं दुः
खं किं न किमपीत्यर्थः ३६ यद्वा जयेम यदि वा नो जयेयुरित्युक्तं तत्राह हतो वेति हतोसि यदि स्वर्गो वा राज्यं वा भुवं भुंक्ष्यसीति पक्षद्वयमपि हितावहमित्यर्थः ३७ स्वधर्मस्य युद्धस्याकरणो धर्मकीर्त्यो
र्नाशः पापावाप्तिश्चाथ चेदिति श्लोकेन भवता यद्युक्तं तथापि युद्धस्य अर्जुनेनाभिमते काम्यत्वपक्षे अस्त्येव तमहत्पापं कर्तव्यं वसितावयं यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यता इति तन्न करणो
पायप्रसक्तिरस्ति तां निवारयितुं सिध्यसिध्योः समत्वलक्षणायोगस्सुखदुःखे इति समे कृत्वा सुखयोस्तद्धेत्वोः राज्यलाभालाभयोः तद्धेत्वोश्च जयपराजययोः रागद्वेषावकृत्वेत्यर्थः केवलं स्वधर्मो

अवाच्यवादांश्च बहून्वदिष्यंति तवाहिताः निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किं ३६ हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीं तस्मादुत्तिष्ठ कौंते
य युद्धाय कृतनिश्चयः ३७ सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ३८ ॥ ३८

पमिति [illegible] मत्वा युद्धाय युज्यस्व घटस्व एवं कुर्वंस्त्वं पापं नावाप्स्यसि यस्तु राज्यलोभेन स्वल्पं युद्धं करोति तस्य स्यादेव पापमिति भावः कथं तर्हि स्वधर्मत्वेनानुष्ठितेपि युद्धे हतो
वा प्राप्स्यसि स्वर्गमित्यादि फलार्थनिमित्ते छायां गंध इत्यनुत्पद्यते एवं धर्मं चर्यमाणा मथो अनूत्पद्यते न धर्महानिर्भवतीति आम्रनिदर्शनेन प्रतिपादयति ३८ ॥ ३८

अस्मरणमानुषंगिकमिति भ्रमः तथा वा सत्त्वः तथ पाप्नेद्

एवमर्जुनस्यपूर्वोक्तौह्यावपिमोहावपनीतौतत्रकंघातयतिहंतिकमितिकर्तृत्वकारयितृत्वयोरात्मन्यसंभवउक्तःततोयुद्ध्यस्वयुज्यस्वेतिनियोगश्चोक्तःनत्वकर्तुरकाशवत्सर्वगतस्यनियोजसंभ
भवतीतिपरस्परव्याहत मेतदितिमामाशंकांत्र्यधिकारभेदेनउभयंव्यवस्थापयन्परिहरतिएषातेतिएषातेतुभ्यंअभिहिताअशोच्यानन्वशोचस्त्वमित्यादिनास्वध मर्मपिचावे
क्षेत्यतःप्रक्रमेनसंदर्भेणाज्ञानासांख्येसम्यक्ख्यायतेप्रकथ्यतेवस्तुतत्त्वमनयेतिसंख्याउपनिषत्तत्रविदितेतिसांख्यऔपनिषदेब्रह्मणिविषयेबुद्धिर्ज्ञानंसंसारनिवर्तकंएषात
सांख्येबुद्धिरभिहितेतिसंबंधःयोगेसिद्ध्यसिद्ध्योःसमोभूत्वासमत्वंयोगउच्यतइत्यादिवक्ष्यमाणलक्षणेविषयेतुशब्दःपूर्ववैलक्षण्यद्योतनार्थःवक्ष्यतिचज्ञानकर्मनिष्ठयोर्विभिन्नाधि
कारित्वंलोकेस्मिन्द्विविधानिष्ठापुराप्रोक्तामयानघज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनामितिएतेन तकर्मणोःसमुच्चयशंकाप्यपास्ताइमांस्वधर्ममपिचावेक्ष्येत्यादिनां
का०१

एषातेभिहितासांख्येबुद्धिर्योगेत्विमांशृणु वुध्यायुक्तोययापार्थकर्मवंधंप्रहास्यसि ३९

तरनंथेनोक्तामपिविस्तरेणाभिधीयमानांशृणुइमामेवबुद्धिंस्तौतिसार्धेनवुध्येत्यादिनानतुकर्मवंधप्राहारणामात्मज्ञानेनैवकश्चयतेतत्सैवात्मायदंविदित्वानलिप्यतेकर्मणापापकेने
तिश्रुतेःकर्मःयोगस्तुकर्मवंधंदृष्टीकरिष्यत्येवेतिकथमुच्यतेकर्मवंधंप्रहास्यसीतिचेत्सत्यंश्रुतिवलाद्रितिब्रूमःतथाहिईशावास्यमिदंसर्वंयत्किंचिज्जगत्यांजगत्तेनत्यक्तेनभुंजीथा
मागृधःकस्यचिद्धनंकुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाःएवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरेइतिश्रुतिरीश्वरेणोहंसर्वंवस्तुभितमस्तीतिनकश्चित्किंचित्स्वेच्छयाकर्तुंप्रभव
तिअतःसर्वत्रममताहीनःसन्भोक्तृत्वकर्तृत्वाभिमानत्यागेनैवभोगान्भुंक्ष्वकर्माणिचकुरुएवंकुर्वतित्वयिकर्मलेपोनास्तिइतोन्यदुपायांतरंचनास्तीतिवस्तिनतस्मात्कतककार्य
यसास्थिरस्केनचिद्धिशोधरूपेणायंतंकर्मैवसजातीयोच्छेदनिमित्तंभविष्यतीतियुक्तमुक्तंकर्मयोगेनापिकर्मवंधंप्रहास्यसीति ३९ ॥ ॥ ३९ ॥

एतदेवोपपादयति नेहेति इह कर्मवं धप्रणार्थे कर्मयोगेऽनुष्ठीयमाने अधिक्रियते वाप्यतइत्यभिक्रमः कर्मारंभः कर्मैव वा तस्य नाशो नास्ति अनुष्ठस्य फलं दत्वानश्यतीनात्विष्टमिष्ट कृन्तस्याजननात् तन्वेत्वत्र पिकाम्यांतःपातित्वयानित्याकरणाजनितः प्रत्यवायउत्पद्यते वसकृदनुष्ठितस्यैवं धप्रहाणाप्रत्यवायपरिहाराख्यफल द्वय हेतुत्वा योगादिमाशंक्याह प्रत्यवायो न विद्यत इति तमेवं वेदानुवचनेन ब्राह्मणा विविदिषंतियज्ञेन दानेन तपसाऽनाशकेनेति श्रुत्या संयोगपृथक्त्वन्यायेन दृष्टं दिव्यकामस्य ज्ञहुयादित्यनेन नित्यस्यदर्श्रावीर्यार्थं नित्यानामपि कर्मणां विविदिषार्थत्वं विनियोगबलात्सिध्यति ततत्र काम्येनैव प्रयोगेणानित्यसापि सिद्धेर्नित्याकरणानिमित्तो वा काम्यत्वात्सर्वांगानुपसंहारनिमित्तो वा प्रत्यवायो विद्यते नित्यानामेव विनियोगात्तु नित्येषु च यथा शक्तुपवं धस्यानुज्ञानात् वाग्निं

नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयात् ४०॥

केतु काम्यानामप्यत्र विनियोगो दृष्टः यथा वेदानुवचनादीनामेकात्म्यज्ञानजन्मनेत्तमेत्तमिति वाक्येन नित्यानां वस्यनेविधिः यद्वा विविदिषार्थत्वं काम्यानामपि कर्मणां तमेतमिति वाक्येन संयोगस्यएय त्वात्त इति अस्मिन्पक्षे काम्यानामपि तुल्यफलत्वात् नित्यवद्यथाशक्तुपवं धो भविष्यतीति न सर्वांगोपसंहारज नितः प्रत्यवायो विद्यते स्वल्पमपि अस्य योग धर्मस्यानुष्ठितं अनुपष्टुतावीजकल्पं जन्मजन्मांतराभ्यस्तेदानमध्यमनं तपः तेनैवाप्यासयोगेनतीव्रवाप्य सन्तेपुनरितिस्मते तन्तरोत्तरसंस्काराधानद्वारा स्वसजातीयद्वेहेनिमित्तं संतकामादिदोषक्षपणद्वारा महतोभया ॥संसारात्त्रायते तस्मात्संख्यानधिकारिणा कर्मयोग एवानुष्ठेय इति भावः ४०॥

नन्वेवं सांख्ययोगयोः महाभयात्त्राणहेतुत्वं तुल्यं चेत्को नयो विशेषस्त्याशंक्य सांख्यानां पातशंका नास्ति योगिनां तु यावद्बुद्धिर्हृद्दैवल्यं पातशंकास्तीत्याह व्यवसायात्मिकेति व्यवसायस्तत्वनिश्च
यस्तत्स्वात्मिका तदाकारा बुद्धिरंतःकरणवृत्तिः अहं ब्रह्मास्मीति वाक्यजन्या ब्रह्माकारांतःकरणवृत्तिर्ब्रह्मविद्याभिधाना समस्तद्वैतं तद्बाधेन समस्तद्वैतारकाएकैव सत्वाद्धि भान्तोस्येष ब्रह्मलोक इति श्रुतेः
ब्रह्मैव लोको ब्रह्मलोक इत्यब्रह्मैव न हि सद्वक्तस्तज्ज्ञातव्यं कर्तव्यं वा किंचिदवशिष्यते कृतकृत्यत्वाद्ब्रह्मविदोऽतोऽस्य पातशंका नास्ति अव्यवसायिनामज्ञानिनां तु बुद्धयोऽनंताः तासु प्रत्येकं बहुशाखा इति इहमेव
मम श्रेय इति निश्चयसद्भावे लेमत्वा कदाचित् श्रेयस्यपि श्रेयोबुद्धेः सत्त्वात्पातकशंकास्तीति महांस्तयोर्विशेष इति भावः ४१ उक्तार्थमेव विवृणोति यामिमामित्यादिना अव्यवसायिनो मूढाः यां पु

व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनां ४१
यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः वेदवादरताः पार्थ नान्यदस्तीति वादिनः ४२

ष्पितां पुष्पितद्रुमवद्रमणीयां वाचं श्रवणरुच्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोममममृता अभूमेत्येवं रूपां प्रवदंति अविपश्चितः अव्यवसायिनो मूढाः यतो वेदवादरताः
वेदांतरगतेषु अर्थवादेषु यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्येवमादिषु रताः हे पार्थ एवा अतएव कर्मभ्योऽन्यत् आत्मज्ञानं तत्फलं मोक्षश्च नास्तीति वादिनो वदन
॥श्लोकः ४२॥

तथा भोगश्चैश्वर्यं च तयोर्गतिः प्राप्तिः तां प्रति तदर्थमित्यर्थः कामात्मानः कामग्रस्तचित्ताः अत एव स्वर्गपराः कीदृशीं भोगैश्वर्यगतिं जन्मकर्मफलप्रदां भोगैश्वर्यो हि पुरुषस्तद्वासनावासितः पुनर्भोगै
श्वर्यप्राप्तये जन्म लभते तत्र तदर्थं कर्माणि च करोति तेषां फलं च ततो भोगादिकं प्राप्नोतीति चक्रमनिशमावर्त्तते न निष्कामस्तु तो भवतीत्यर्थः किं च क्रियाविशेषेण बहुलां यथा यथा वित्त । व्यायामसाध्याधिकं
तथा तथा भोगैश्वर्यप्राप्ते र प्याधिक्यमित्यर्थः एतेन संतापासमाधेषु पि कर्मसु फललोभात्सर्जं तदसुक्तं भाष्ये भोगैश्वर्यगतिं प्रति साधनभूताः ये क्रियाविशेषा अग्निहोत्रादयः तद्बहुलां
जन्मरूपां जन्मरूपं च कर्मफलं तत्प्रदां च वाचमेवैति व्याख्यातं ४३ भोगेति तत्पाशुष्पितया वाचा अपहृतचेतसां पुंसां बुद्धिः समाधौ समाध्यनुष्ठानकाले व्यवसायात्मिका व्यवसायो ज्ञा

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां । क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ४३

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां । व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ४४

नं तदात्मिका शुद्धचिन्मात्राकारेण विधीयते न भवति कर्मकर्त्तेरिलकारः विरक्तस्य बुद्धिः समाधौ चिन्मात्राकारा भवति न तु भोगाद्यासक्तस्येति स्पष्टमेव भाष्ये तु समाधौ अंतःकरणे व्यव
सायात्मिका बुद्धिर्न भवतीति व्याख्यातं यद्वा समाध्यनुष्ठानार्थमेव निश्चयात्मिका तेषां बुद्धिर्न भवतीति व्याख्येयं ४४ ॥ ४४ ॥ ४४ ॥ ४४

भी०
६६

कस्तर्हि समाधौ बुद्धिर्भवतीत्यत आह त्रैगुण्येति त्रैगुण्यं गुणत्रयं गुणत्रयकार्यं ऊर्ध्वमधोगतिरूपं संसारं तत्प्रकाशकत्वेन विषयो येषां ते तादृशाः कर्मकाण्डपरा वेदाः त्वं तु निस्त्रैगुण्यो भव ऊर्ध्वगतावपि विरक्तो भवेत्यर्थः वक्ष्यति च तत्त्वगुणप्रधानं गतिर्वयं ऊर्ध्वं गच्छन्ति सत्त्वस्था इति निद्वयोपि विषयेभ्यो विरक्तः समाधावधिक्रियत इति भावः किंलक्षणो यो निस्त्रैगुण्य इत्यत आह निर्द्वन्द्व इति सुखदुःखे मानापमानौ शत्रुमित्रौ शीतोष्णे इत्यादीनि द्वन्द्वानि सप्रतिपक्षपदार्थरूपाणि तेभ्यो निर्गतो निर्द्वन्द्वः सर्वत्र समबुद्धिरित्यर्थः ननु बाधमानसुखादिकं कथं शीतादिवत् संतुं शक्यमत आह नित्यसत्त्वस्थ इति नित्यं सर्वदा सत्त्वं धैर्यं सत्त्वगुणो वा तदाश्रितो भूत्वा धीरो हि सर्वं सोढुं शक्तः सात्त्विको वा प्रारब्धकर्मोपस्थापितमिदं दुःखमपरिहार्यं किमुत्तप्तमतयेति जानन्

द्वो१

॥ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ४५

सर्वं सोढुं शक्नोत्येव ननु अत्यन्तदुःसहं क्षुधादिदुःखं कथं निस्त्रैगुण्येन सर्वथा प्रवृत्तिशून्येन सोढुं शक्यमत आह निर्योगक्षेम इति अप्राप्तस्य प्राप्तिर्योगः प्राप्तसंरक्षणं क्षेमः एतत्तद्व्यमपि प्रारब्धकर्माधीनमिति ततोपि निर्गत इत्यर्थः तत्र हेतुरात्मवान् जितचित्तः सर्वं हि सर्वदा स्वाप्यायत्तः अनाकुलो नित्यसत्त्वतया निरुद्धमस्त्वभवतीति त्वमप्येतादृशो निस्त्रैगुण्यो भवेत्यर्थः
॥४५॥ २१

राम०
६६

ननु आत्मतत्त्वं चित्तशुद्धौ सत्यामेव भवति सा च सकलवेदोक्तकर्मानुष्ठानसाध्या अतो निस्त्रैगुण्यपरत्वं दुर्लभमित्याशंक्याह यावानिति सर्वतः संप्लुतोदके महति उदपाने जलाशये पुरुषस्य यावान् अर्थः यावत्
स्नानपानादिकं प्रयोजनं घटमात्रजलानिर्वर्त्यं भवति न तु तज्जलाशयव्ययनिर्वर्त्यं तावानेवार्थः विजानतो ब्रह्मतत्त्वं न चित्तस्य ब्राह्मणस्य ब्रह्मभूतस्य सर्वेषु वेदेषु वेदैकदेशोपनिषच्छ्रवणमात्रनिर्वर्त्यो भवति नहि
तत्त्ववेदार्थानुष्ठानं स्वसिद्ध्यर्थमपेक्षते एकेन जन्मना हि तत्त्ववेदार्थानुष्ठानासंभवात् एहिकेन जन्मान्तरीयेण वाजपेयादिना चित्तशुद्धौ सत्यामुपनिषच्छ्रवणान्निस्त्रैगुण्यपाता संभवतीति भावः दृष्टान्तस्तु संप्लुतोदकस्थानीये
संप्लुतोदकस्थानीयश्चात्मज्ञाने पुरुषस्य तावानर्थः क्रोशोपि भवति यावान् अनेककूपतडागादिस्थानीयेषु सकलवेदोक्तकर्मस्वनुष्ठितेषु भवति ब्रह्मविदः सकलानां मन्त्रभागानां तथा च श्रुतिः ज्ञानेन वे

यावानर्थ उदपाने सर्वतः संप्लुतोदके तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ४६ कर्मण्येवाधि
कारस्ते मा फलेषु कदाचन मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ४७ ॥ ४७ ॥

कर्मफलं तत्र भोक्तृत्वं दर्शयति यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेदेति वक्ष्यति च सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते
इति गंगातुल्यज्ञानोदयात्त्यागेव कूपोपमानि कर्माणि कर्तव्यानीति भाव इति वाचस्पतिः अस्मिन्पक्षे पूर्वार्द्धे अनेकस्मिन् यथा तथा भवतीति पदद्वयस्याध्याहारः [illegible]
[illegible] यावान् तावानपत्ययोः अनुषंगश्च द्वार्थान्तिके द्रष्टव्यः ४६ ननु ममापि औपनिषदात्मज्ञानार्थिनः शमदमादिवेष्टस्तत्कथं मां युध्यस्वेति प्रेरयसीत्याशंक्याह कर्म
ण्येवेति कर्मण्येवाधिकारो न ज्ञाननिष्ठायां मा फलेषु संगोऽस्त्विति पप्रख्यते कर्मफलं स्वर्गपश्वादि हेतुः कर्मसु प्रवर्त्तकं यस्य तादृशो मा भूः अकर्मणि कर्माकरणेऽपि तव संगो मास्तु ४७ ॥

एतदेव विवृणोति योगस्थ इति योगस्थः सन् संगं फलतृष्णां कर्तृत्वाभिमानं च त्यक्त्वा कर्माणि ज्ञानार्थं कुरु हे धनंजय सिध्यसिध्योः कर्मफलस्य विविदिषायाः सिद्धौ असिद्धौ वा समो हर्षविषाद शून्यो भूत्वा कर्माणि कुर्वीति संबंधः इदमेव सिध्यसिध्ययोः समत्वं योग इत्युच्यते ४८ इममेव बुद्धियोगं स्तौति दूरेणेति कर्मफलकामेन क्रियमाणं बुद्धियोगात्पूर्वोक्तान्निष्कामात्कर्म णः दूरेणातिशयेन हि यस्मिन्नवरं अत्यंत निकृष्टं यतो वस्तीयो गम्या पापोत्पत्तफलभूतायां संसारप्रयोवात्तोविभिन्नं शरणं रक्षितारं आश्रयं वाऽऽस्पदं अन्विच्छ प्रार्थय स्वतत्वार्थ कर्माणि कुर्वीत ये फलहेतवः फलमेव हेतुः प्रवर्तकं येषां ता दृशाः फलतृष्णावंतः कृपणाः हीनाः भवंति यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति ४९ किं च बुद्धी ति बुद्धि युक्तः समत्वबुद्धियुक्तः योगाय समत्वबुद्धियोगाय युज्यस्व घटस्व योगः सिध्यसिध्योः समत्वबुद्धिः कर्मसु स्वबंधकेष्वपि कौशलं बंधनिवर्त्तकत्व संपादनं बुद्धियुक्तः कर्मभिः दुष्कृतं त्यजति

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजयं सिध्यसिध्योः समो भूत्वा समत्वं योग उच्यते ४८ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय बुद्धौ शरणमन्विच्छ कृपणाः फल हेतवः ४९ बुद्धियुक्तो जहातीह उभे सुकृत दुष्कृते तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलं ५० ॥ ५० ॥ ॥ ५० ॥ ५० ॥

सु धर्मेणापापमनुहंतीति श्रुतेः सुकृतं तु सजातीयत्वात्ते दुःपरिहरमिति कथं उभे सुकृतदुष्कृते जहातीत्युच्यते सत्वशुद्धिज्ञानोत्पत्तिद्वारेति प्राचः अर्वाचस्तु दुष्कृतत्यागसुकृ तीत्यापुये त्यफलत्यागात्सुकृतत्यागोपि कर्मयोगिनो भवति दुष्कृत फलवन्मोक्षप्रतिबंधकतत्फलस्यानुत्पादात् यत्तु आपस्तंबोक्ताम्रह्रस्वनिदर्शनेन नांतरीयकं सुकृतफलं सुकृते न तत्फलत्वेनोपपद्यते नांतरीयकत्वादेव तस्मात्फलद्वारा मोक्षप्रतिबंधके क्रियमाणे एव सुकृत दुष्कृते कर्मयोगी जहाति ज्ञानी तु संचिते अपि ते जहातीति तयोर्विशेष इत्याहुः ५०॥

गी १

एतदेवाह कर्मजमिति बुद्धियुक्ताः समत्वबुद्धियुक्ताः क्रियमाणकर्मजं फलं त्यक्त्वा मनीषिणोऽमतेति अहसमर्थो भूत्वा जन्मरूपेण बंधेन युक्ताः संतोऽनामयं निरुपद्रवं पदं मोक्षाख्यं गच्छंति ५१
कदा मनीषिणो भवंतीत्यत आह यदेति तेतव मोहः इष्टानिष्टवियोगसंयोगजपरितापजं वैचित्त्यं तदेव कलि [illegible] लमिव कलिलं कालुष्यं बुद्धिगतं बुद्धिर्व्यतितरिष्यति व्यतिक्रमिष्यति बुद्धिः
प्रसन्ना भविष्यति तदा श्रोतव्यशास्त्रभागस्य श्रुतस्य च निर्वेदं वैराग्यं गंतासि अयं भावः मलिनायां बुद्धौ असकृद्गृहीतस्यापि शास्त्रार्थस्यास्फुरणात् श्रोतव्यं श्रुतं च व्यर्थमेव तदह तथा शुद्धाया
मपि बुद्धौ सद्यः शास्त्रार्थस्फुरणात्तयोर्वैयर्थ्यमित्युभयथापि तत्र निर्वेदं उचितः प्रसन्नाच बुद्धिर्किं गृहीतं येत्तया भवती निश्चयेन हि कं तस्माध्यान निष्ठैव भवेदिति ५२ ननु बुद्धिप्रसादे

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयं ५१ यदा ते मोहकलिलं बुद्धिर्व्यतितरि
ष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ५२ श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला समाधावचला बुद्धि

॥स्तदा योगमवाप्स्यसि ५३॥

पि केन लिंगेन ज्ञेयइत्यत आह श्रुतीति श्रुतिभिर्नानाविधशास्त्रश्रवणैः विप्रतिपन्ना आत्मा नित्यो [illegible] अनित्यो वा नित्योपि कर्त्ता अकर्त्ता वा अकर्त्तोप्येको नेको वेत्येवमादिसंशयग्र
स्ता सतीयदा असंभावनाय विपरीतभावनानिरासपूर्वकं श्रुतितात्पर्यविषयीभूते ब्रह्मात्मैक्ये निश्चला पुनः कुतर्कैरनास्कंदनीया निर्विचिकित्सा यदा निश्चयवती भूत्वा समाधौ निर्विक
ल्पके प्रत्यगात्मनि अचला लयविक्षेपशून्या स्थास्यति स्थिरा भविष्यति तदा योगं विवेकप्रज्ञां प्राप्स्यसि निश्चलसमाधिलाभ एव बुद्धिप्रसादलिंगमिति भावः ५३ ॥

स्व १

लब्धसमाधेः स्थितप्रज्ञापरनाम्नो लक्षणानि बुभुत्सुरर्जुन उवाच स्थितप्रज्ञस्येति स्थिता प्रत्यगात्मनि प्रतिष्ठीता प्रज्ञा यस्य तस्य स्थितप्रज्ञस्य समाधिस्थस्य समाधौ स्थितस्य का भाषा भा षणं वचनं कथमसौ परैर्भाष्यत इत्येकः प्रश्नः स्थितधीः स्थितप्रज्ञः अर्थाद्व्युत्थितः सन् किं प्रभाषेत कथं वदतीति कथमासीत कथं वा व्रजति विषयान् भुंक्ते इति प्रश्नत्रयं ५४ एतेषां क्रमेणोत्तराण्याह भगवान् प्रजहातीत्यादिना अत्र यान्येव कृतार्थलक्षणानि तान्येव ज्ञानसाधनानीति मत्वा उपदिश्यन्ते स्थितप्रज्ञलक्षणानि तेषां अकृतार्थेषु यत्नसाध्यत्वात् कृतार्थेषु स्वाभाविकत्वात् यथोक्तं उत्पन्नात्मप्रबोधस्य त्वद्वेष्टृत्वादयो गुणाः भवंत्ययत्नतस्तस्य न तु साधकरूपिण इति यदा यो योगी सर्वान् स्थूलसूक्ष्मकारणशरीरभोग्यान् कामान् काम्यमानान् विषयान् प्रकर्षेण मू लं जहाति त्यजति कीदृशान् कामान् मनोगतान् मनस्येव संकल्प विकल्पात्मके स्थितान् न तु बहिः यथोक्तमक्षपादाचार्यैः दोषनिमित्तं रूपादयो विषयाः संकल्पकृता इति। तत्र स्थूलानां कामा

अर्जुन उवाच स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ५४ श्रीभगवानुवाच प्रजहाति यदा कामा

॥न् सर्वान् पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ५५॥

नां त्यागः एकांतसेवनमात्राद्भवतीति सूक्ष्मवीर्यानेव विलीनकरणान् मनस्य समनस्कस्य जाग्रद्ध्यासनामयः स्वप्ने ये कामाः स्फुरंति तेषामपि त्यागो ऽसंप्रज्ञातसमाध्यभ्यासबलेन भवति ए वं त्रिविधान् कामान् यात्यक्त्वा आत्मन्येवाखंडैकरसे आत्मना स्वेनैव स्वरूपानंदेन तुष्टः वा स्वविषयनिरपेक्षोपदाभवति तदायं स्थितप्रज्ञ इत्युच्यते ५५ ॥ ५५ ॥ ५५॥

भगवद्ध्यानादि रूपसद्वासनाभ्यासबले न भवति ये तु प संस्कृतकरण संप्रज्ञातसमाधिकाले दिव्याः का मीः संकल्प मात्रोपनतादृदृरविद्या सुप्रसिद्धास्तेषामपि त्यागी २

५४

सकलेषु॥

दुःखेषु आध्यात्मिकादिषु दुःखसाधनेषु प्राप्तेष्वपि अनुद्विग्नमना अचंचलमनाः वक्ष्यति च यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यत इति सुखेषु सुखसाधनेषु स्रक्चन्दनादिषु प्राप्तेष्वपि
विगतस्पृहो नित्यतृप्तिकत्वाद्भवति अत एव वीतरागभयक्रोधः यस्मात् स तथा न हि तस्याभवस्थायां रागात् भयात् दुःखाद् योवा संभवंति एवंविधः समाधिस्थः स्थितधीः स्थितप्रज्ञ उच्यते ५६
स्थितधीः किं प्रभाषेत तस्योत्तरमाह यः सर्वत्रेति सर्वेषु धनदारजीवनादिषु अनभिस्नेहः अभिस्नेहवान् धनदारादिषु विकलेषु वाहमेव विकलः सकलोस्मीति दैन्यहर्षोपेतः पूर्वापरानु

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ५६ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं नाभिनंद
ति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ५७ यदा संहरते चायं कूर्मोंगानीव सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ५८ ॥ ॥ ॥

संधानरहितो जल्पति अयं तु न तथेति भावः तथा शुभं प्राप्य नाभिनंदति संतुष्टो भूत्वा शुभं प्रापयितारं न प्रशंसति तथा अशुभं प्राप्य न द्वेष्टि दुःखी भूत्वा अशुभं प्रापयितारं न निंदति य
तस्य प्रज्ञा प्रतिष्ठिता ५७ किमासीतेति तस्योत्तरमाह यदेति इंद्रियार्थेभ्यः शब्दादिविषयेभ्यः प्रारब्धकर्मवशेन सुस्थितोपि योगी द्वैतदर्शनादुद्विग्नः सन् निरोधसंस्कारप्राबल्या
॥त्प्रीत्या समाधिमनुतिष्ठन्नेवास्त इत्यर्थः शेषं स्पष्टं ५८॥

योग:

ननुविषयेभ्यइंद्रियाणांनिवृत्तिश्चेत्स्थितप्रज्ञ नाहेतुस्तर्हिहस्तिमूर्छालयगत्यावेशादावपिसास्तीतिसर्वोपिस्थितप्रज्ञएवेत्याशंक्याहविषयाइतिसत्यंदेहिनोदेहाभिमानवतोमनुष्य
स्यापिहोनिराहारस्यइंद्रियैर्विषयाननाहरतोअभुंजानस्यविषयाःविनिवर्त्तंतएवतथापिरसवर्जंरसोभोगास्तहर्ज्जंनिवर्त्ततेत्वादापिसत्क्ष्मरूपेणागमोस्तीरागमूलस्यात्माज्ञानस्यादाह
त्वात्सोस्थितप्रज्ञइत्यर्थःअस्यैवपुनःपरंदृष्ट्वाआत्मानंसाक्षात्कृत्यनिराहारस्यपुरुषस्यापिविषयाननाहरतोरसवर्जंविषयाविनिवर्त्ततेतस्यैवपरंदृष्ट्वास्थितस्यरसोनिवर्त्तत इतिव्याचख्युः५९ किंचयत्नादेरिंद्रिया
तिभावःअंचस्तुरोगिणःकाष्टतपस्विनोवामूढस्यापिविषयाननाहरतोरसवर्जंविषयाविनिवर्त्ततेतस्यैवपरंदृष्ट्वास्थितस्यरसोनिवर्त्ततइतिव्याचख्युः५९ किंचयत्नादेरिंद्रिया

विषयाविनिवर्त्तंतेनिराहारस्यदेहिनः रसवर्जंरसोप्यस्यपरंदृष्ट्वानिवर्त्तते ५९ यततोह्यपिकौं ॥
तेयपुरुषस्यविपश्चितः इंद्रियाणिप्रमाथीनिहरंतिप्रसभंमनः ६० ॥ ६० ॥ ॥

णिस्त्रांत्यास्वयमेवलीयंतेसमाहितेनतुतानिक्रमेणांगानीवस्वेच्छयासंद्रियंतेएतच्चात्यंतायासमाध्यमित्याहयततइतिविपश्चितःशास्त्राचार्योपदेशवतोयततोपिसमाधि
सिध्यर्थंयतमानस्यापिपुरुषस्यइंद्रियाणिकर्तृणिमनःप्रतीचिस्थिरीक्रियमाणंकर्मीभूतंहरंतिविषयप्रवणंकुर्वंतियतःप्रमाथीनियथावहवश्चोरावनेएकंपुरुषंप्रमथ्यत
॥स्यचित्तंहरंतियतःप्रसभमतिशयेनप्रमथनशीलानि ६०॥

यद्यप्येवं तथापि तानि निर्यत्नव्यान्येवान्यथा स्थितप्रज्ञत्वस्यैवासिद्धेरित्याह तानीति संयम्य वशीकृत्य युक्तः संनद्धः मत्परः अहमेव सर्वेषां प्रत्यगात्मा परः स्यात्स्मिन्यो ब्राह्मणो मोदेहेंद्रि
यादिभ्य आंतरो यश्च उत्कृष्टः प्रियतमः यस्य स मत्परः सन्नासीत तद्धि यस्मात्वशे अग्रे यानीन्द्रियाणि स्पष्टं ६१ यदा पंचावतिष्ठंते ज्ञानानि मनसा सह बुद्धिश्च न वि चेष्टे ततामाहुः परमां गतिमिति श्रु
तौ इंद्रियमनोबुद्धीनां निग्रहे परमपदप्राप्तिरित्युक्तं तत्र उपसंहृतकरणस्य वा स्थानं शब्दादीन् स्मरतो मनोमात्रेण विस्थितस्य योगिनः मनसा अनिग्रहे किं स्यादित्याह ध्यायत इति हि
त्यां विषयान् शब्दादीन् ध्यायतश्चिंतयतः पुंसः पुरुषस्य तेषु शब्दादिषु संगः संबंधो जायते वा स्वार्थेभ्यो निगृहीतानपि इंद्रियाणि मनो ह्येषां पुनर्वा त्वोथगृहीतानीत्यर्थः ततः सं

६२

तानि सर्वाणि संयम्य युक्त आसीत मत्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ६१ ध्यायतो विषयान्पुंसः संगस्तेषूपजायते संगात्संजायते कामः
कामात्क्रोधोभिजायते ६२ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ६३ ॥ ॥ ६२॥

गात्कामः तस्मिन्विषये अभिलाषः संजायते कामात्क तस्मिन्हेतोः प्रतिहतादभिज्वलनात्मा क्रोधोभिजायते ६२ ततः क्रोधात्संमोहः कार्याकार्यविवेकाभावो भवति ततः
स्मृतिविभ्रमः शास्त्रार्थानुसंधानस्य विभ्रंशः स्खलनं भवति स्मृतिभ्रंशाद्बुद्धिनाशः शास्त्रार्थस्य निश्चितस्यापि तिरोधानं भवति तस्मिंश्च शास्त्रज्ञेपरोक्षज्ञानेपि नष्टे पुरुषो नश्य
॥ति पुरुषार्थायोग्यो भवति यो हि तादृशः स नष्ट एवेति लोके वदंतीति ६३॥

ननुविषयान् अध्यायतोपियोगिनोवश्यत्यानेप्रमाणात्स्वाभाव्यादिंद्रियाणांविषयेषुसंगोदुष्परिहारस्तत्स्वोक्तरीत्यातस्यापिनाशप्रसक्तिरित्याशंक्याहरागद्वेषेतिविधेयात्मा किंकरीकृतमनास्तु आत्मवश्यैर्मनोधीनैरिंद्रियैःस्वाभिनश्चिह्नस्यकिंकरीकृतस्यकामक्रोधहीनत्वात्स्वयमपिरागद्वेषवियुक्तैःविषयान् अप्रतिषिद्धान् रागादिनिवारणेच्छयाचरन् उपभुञ्जानोपि प्रमाद् तत्रकामाद्युत्पत्तिः प्रसादंसंकल्पविकल्पपंकलेपप्रक्षालनेनमनसःस्वास्थ्यंअभिगच्छतिमनसःस्वास्थ्यमेवप्रसन्नात्मनःस्वास्थ्यंतस्यतदुपयोगस्वात् अजितमनस्कमिवजि

रागद्वेषवियुक्तैस्तुविषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति ६४ ॥
प्रसादेसर्वदुःखानांहानिरस्योपजायते प्रसन्नचेतसोह्याशुबुद्धिःपर्यवतिष्ठति ६५ ॥

तमनस्कंविषयसंगोनबाधते अतोमनोजयेऽवश्यंकर्तव्यइत्यर्थः ६४ किंचचित्तस्यप्रसादेहिअस्यपुंसःसर्वदुःखानांकाममूलकानांकामाभावात् हानिःपरिहारोजायतेकामानुदयेहेतुमाहप्रसन्नेतिहियस्मात्प्रसन्नचेतसःपुंसोबुद्धिर्विषयेभ्योनिवृत्यआशुशीघ्रंपर्यवतिष्ठतेस्थिराभवतितस्मिंश्चसतिप्रमाणाभावात्कामोदयइत्यर्थः ६५ ॥

समनस्कानामिन्द्रियाणामनिग्रहे दोषमुक्त्वा बुद्धेरपर्यवसाने को दोष इत्यपेक्ष्य आह नास्तीति अयुक्तस्य अवशीकृतमनसोऽनात्मज्ञस्य बुद्धिः प्रज्ञात्मैक्यनिश्चयो नास्ति प्रमाणविषयासंभावना
याः प्रमेयविषयासंभावनायाश्च निरासात् तथा अयुक्तस्य असमाहितमनसः भावना ब्रह्माकारान्तःकरणवृत्तिप्रवाहो नास्ति मनसश्चांचल्येन बुद्धेरपि चांचल्यात् अभावयतो ध्यानम्
कुर्वतः शांतिः सर्वदुःखोपरमश्च नास्ति चेतसोऽनवस्थितत्वेन दुःखावश्यंभावात् अशान्तस्य तु यस्तस्य सर्वदुःखस्य सुखं प्रत्यगद्वयानन्दात्मकं कुतः न कुतश्चिदहो विवादेव आद्ये अयुक्तस्ये
तिपदं युजिर्योगे इत्यस्य संपत्तिरिति युज समाधावित्यस्य तस्माद्बुद्धेः पर्यवसानमावश्यकं ३६ तदभावे दोषमाह इंद्रियाणां हीति हि यस्मात् इंद्रियाणां चरतां स्वस्वविषये प्रवर्तमानानां
मेलितं षष्ठी पदं रागादिकलुषं मनः तान्यनुलक्षीकृत्य विधीयते प्रवर्त्यते कर्मकर्तरि लकारः प्रवर्तते तदस्यार्थः तत् इंद्रियानुसारि मनः अस्य साधकस्य प्रज्ञां आत्मतत्त्वविषयां बुद्धिं हरति

नास्तिबुद्धिरयुक्तस्यनचायुक्तस्यभावना नचाभावयतःशांतिरशांतस्यकुतःसुखं ६६ इंद्रियाणांहिचरतांयन्मनोनुविधीयते तदस्यहरतिप्रज्ञांवायु
र्नावमिवांभसि ६७ तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ६८ ॥ ॥ ॥

तस्याः मनोनुसारित्वात् दृष्टान्तः स्पष्टार्थः अन्ये तु इंद्रियाणां मध्ये यदिंद्रियमनुलक्षीकृत्य मनः प्रवर्तते तदिंद्रियं अस्य साधकस्य मनसो वा प्रज्ञां हरतीति योजयन्ति आत्मविषयां प्रज्ञां हृ
त्वा मनो विषयविषयां करोतीति भाष्ये लोचनीयं ६७ यत्ततो ह्यपीत्युपक्रान्तमर्थं बहुधा उपपाद्य उपसंहरति तस्मादिति यस्मादिंद्रियाधीनं मनो मनोनुगा च प्रज्ञा तस्मात् हे महा
बाहो यस्य यतेः इंद्रियाणि सर्वशः सर्वप्रकारेण स्वकारणेन मनसा सहितानीति यावत् इंद्रियार्थेभ्यः शब्दादिभ्यो निगृहीतानि भवन्ति तस्य प्रज्ञा प्रतिष्ठितेति विद्धि ६८ ॥

प्पा १

प२

मां१

यसायं चावतिष्ठतह्ह्स्तुदात्सतभुतेः ता ह्यः परमांगतिमित्येवं चतुर्थेपादे व्याचष्टेयानिशेतिसर्वेषां भूतानामज्ञानांयानिशेवनिशायस्यांमध्येदिने लूकाद्वानेधाअर्थं धामवसवेप्राणिनो भवंतितस्यांतस्मिन्प्रत्यग्ज्योतिषिसंमीइंद्रियमनोबुद्धीनांनिग्रहणा शीलोयोगीजागर्तिइंद्रियादीनांहठशक्तिलोपेपिअनुपरतदृक्शक्तिस्वास्तितथाचश्रुतिः नहिद्रष्टुर्दृष्टेर्विपरिलो पो विद्यते ऽविनाशित्वादितियस्यामविद्यायां क्रियाकारकादिद्वैतस्वप्रवर्त्तिकायांसर्वाणिभूतानिजाग्रतितिनिशीथेउलूकादिवस्वस्वव्यापारेप्रवर्त्तंतेसाअविद्यापश्यतोमुनेः आत्मद र्शनवतोयोगिनः प्रारब्धकर्मणाविदेहकैवल्येप्रतिबंधात्लेशतोनुवर्त्तमानाव्युत्थानकालेप्यवहारतोस्त्यात्मांधकारिणीनिशेवक्लेशकारीभवतिअतिसुकुमाराह्रियोगिनः वाख्यवहा

व१

यानिशासर्वभूतानांतस्यांजागर्तिसंयमी यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः ६९

कारे ध१

राहिजंतेनराइवगाढांधकारेसंचारात्पथोत्तंयोगभाष्ये अक्षिमात्रकल्पोहिविद्वानतस्त्वदुःखलेशेनाप्युद्विजततिअत्रवार्त्तिकानिकारकव्यवहारेहिशुद्धंवस्तुनवीक्ष्यतेशुद्धेवस्तुनिवि हेवकारकव्यावृत्तिस्तयाकाकोलूकनिशेवायंसंसारोऽज्ञात्मवेदिनोः यानिशासर्वभूतानामित्यवोचत्स्वयंहरिरितिबृहत्तस्वस्पलेकोंजडोन्मत्तपिशाचवत्तद्वत्तत्त्वोपिलोकस्यजडोन्मत्तपि शाचवत्प्रतिभातितदेवंकिमासीतेत्यस्योत्तरंयदासंहरतेचायमित्यादिनाएतदंतेनग्रंथेनस्थितप्रज्ञःसदासमाधिमनुतिष्ठंपरमांगतिंप्राप्यास्तद्युक्तं ६९ ॥ ६९ ॥

२ पं२

ननु प्रजहाति यदा कामान् इंद्रियाणीन्द्रियार्थेभ्यो निगृह्णीतानीत्यादिना उक्त विषयाणां प्रहाणं तेभ्यश्च इंद्रियाणीनां प्रत्याहरणमुक्तं तेषां न तेषमात्मनः पृथक् सत्त्वमस्तीति सिद्धं न च नेह नाना
स्ति किंचनेत्यादिश्रुत्या तेषां बाधान्नत इस्तीति वाच्यं दृष्टेति प्रतीच्येवं तन्निषेधात् न हि दृष्टभूतलेघटो नास्तीत्युक्ते घटस्य स्वरूपं निषिध्यते किंतु तस्य भूतलसंबंधमात्रं तस्मात्कामानां पृथक् सत्त्वमस्त्यतो
नाद्वैतसिद्धिरित्याशंक्य सदृष्टांतं परिहरति आपूर्यमाणमिति प्रविशंतीभिरद्भिरापूर्यमाणमपि अचलप्रतिष्ठं अनुद्रिक्तं वृद्धिहीनत्वात् सर्वनिर्गच्छंतीभिरद्भिरिच्यमानमपि अचलप्रतिष्ठं अपूर्णं ह्रा
सहीनत्वादित्यपि बोध्यं एवंविधं समुद्रं यद्वत् आत्मप्रभवा आपः प्रविशंति तद्वत् यं पुरुषं कामैरापूर्यमाणं हीयमानं हि अचलप्रतिष्ठं निर्विकारं वृद्धिह्रासहीनत्वात् आत्मप्रभवाः सर्वे
कामाः प्रविशंति स एव शांतिं मोक्षं आ संतिकदुःखोपरमं प्राप्नोति न तु कामकामी विषयार्थी अयं भावः कूटस्थात्मनः सर्वस्य उत्पत्तिरेव चलयति इति सर्वे श्रुतिस्मृतिप्रसिद्धेन
कामानां प्रहाणं तेभ्य इंद्रियाणां प्रत्याहरणं स्मर्यमाणं न तेषां परमार्थतः पृथक् सत्त्वं साधयति बहुप्रमाणविरोधात् किंतु यामरणप्रसिद्धं पृथक्त्वमभिप्रेत्य प्रहाणादिकमुक्तं प्रविला

स्मर

यत्

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत्। तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी॥ ७०॥

पनत्वेन व्याख्येयं यथा गन्ये (दि) ते घटकपालं निर्वपेदित्यादौ निर्वपतिना पागउच्यते न नु श्रोतार्थमात्रं तद्वदिहापि ज्ञेयं नेह नानास्तीत्यपि इहापरिदृश्यमाने प्रपंचे आत्मातिरिक्तं नानाकिं
मपि नास्तीत्येवं परतया व्याख्येयं तथा च आत्मैवेदं सर्वं ब्रह्मैवेदं सर्वं खल्विदं ब्रह्मैवेत्यादयः श्रुतिवादाः संगच्छंते आत्मनि कल्पितस्यास्य तत्रैव निषेधे नान्यत्र सत्त्वानुपपत्तेर्न कामानां पृ
थक् सत्त्वमस्तीति युक्त एव समुद्रदृष्टांतः यत्तु समुद्रात्स्य गंगागायाः सत्त्वमस्तीति तन्न कार्यैकारणयोः सत्त्वातिरिक्तसत्ताया अभावात् वाचारंभणं विकारो नामधेयमिति कार्यस्य वाग
॥ लंबनमात्रत्वश्रवणादित्यन्यत्र विस्तरः ७०॥

हवि१

प्रासंगिकीमाशंकांपरिहृत्यव्रजेतकिमित्यस्यप्रश्नस्योत्तरमाहविहायेतिपूर्वोक्तान्विविधान्कामान्विहाययःचरतिविषयान्भुंक्तेनिस्पृहस्सन्यतोनिर्ममःममतावान्नहिदंममभूयादित्यन्यधनाद्यर्थस्पृ
हांकरोतिनिर्ममोपिकुतःयतोनिरहंकारःनत्पहंकारशून्यस्यसमाद्दोममताहृष्टात्तस्मादहंकारप्रविलयात्शांतिंमोक्षंप्राप्नोति अन्वयःसर्वत्रानभिस्नेहइतिसर्वत्रयच्छब्ददर्शनात्तस्माद्धनवि
धियरशावार्यंग्रंथः अन्यथास्थितप्रज्ञस्यप्रकृतत्वात्तद्वाक्यार्थोयच्छब्दोऽनर्थःप्राप्नोतिलोकेपिहिपरस्वभावकथनेसएवंकरोतीतितच्छब्दएवप्रयुज्यतेनतुयच्छब्दः विधौतुयएवंकरोति
सइष्टंप्राप्नोतीतिद्वयोरपिप्रयोगोदृश्यतेलक्षणाकथनार्थत्वेपितत्रतात्पर्याभावाद्विधावेवपर्यवसानमितिदिक् ७१ प्रतिपादितांकर्मयोगप्राप्यांसांख्यनिष्ठांफलेनस्तुवन्नुपसंहरति
एषेतिएषास्थितप्रज्ञलक्षणप्रसंगात्कथिताब्राह्मी ब्रह्मशब्देनात्रब्रह्मविद्युच्यतेब्रह्मविद्ब्रह्मैवभवतीतिश्रुतेःयस्यैवंब्राह्मीस्थितिः निष्कामतोनिष्ठांप्राप्यनरोनविमुह्यतिपुन

विहायकामान्यःसर्वान्पुमांश्चरतिनिस्पृहः निर्ममोनिरहंकारःसशांतिमधिगच्छति एषाब्राह्मीस्थितिःपार्थनैनांप्राप्यविमुह्यति स्थित्वास्यामंतकालेपिब्र
ह्मनिर्वाणमृच्छति ७२ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेसांख्ययोगोनामद्वितीयोध्यायः २ ॥

मोहंनप्राप्नोति [illegible] अस्यांअंतकालेपिस्थित्वेतिसकृज्ज्ञातापीयंफलवतीनतूपासनावच्चिराभ्यासमपेक्षेसुतरांब्रह्मऋच्छतिप्राप्नोतिकिंलोकांतरवत्गतिप्राप्यंब्रह्मने
त्याहनिर्वाणमितिनिर्गतंवानंगमनंयस्मिन्प्राप्येब्रह्मणितन्निर्वाणं तथाचश्रुतिःनतस्यप्राणाउत्क्रामंत्यत्रैवसमवनीयंतेब्रह्मैवसन्ब्रह्माप्येतीतिगतिमंतरेणप्राणाद्युपा
धिप्रविलयमात्रात्तुघटाकाशस्यमहाकाशत्वप्राप्तिवत् जीवस्यब्रह्मत्वप्राप्तिमाह अंतकालेपीत्यपिशब्दात्पूर्वंब्रह्मचर्यादारभ्यावतिष्ठतिसब्रह्मनिर्वाणंकैमुतिकन्यायेनप्राप्नोतीति
गम्यते अस्याध्यायस्यार्थःसंगृहीतोमधुसूदनश्रीपादैः ज्ञानंतत्साधनंकर्मसत्त्वशुद्धिश्चतत्फलं ज्ञाननिष्ठैवेत्यध्यायेस्मिन्प्रकीर्तितं अ० ॥ ॥ ॥ ॥

इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोःश्रीनीलकंठस्यकृतौभारतभावदीपेभीष्मपर्वणिभगवद्गीतार्थप्रकाशेद्वितीयोध्याय २ पूर्वस्मिन्न
ध्यायेएषातेभिहितासांख्येबुद्धिर्योगेत्विमांशृण्वितिबुद्धिद्वयंप्रदर्श्यव्यवसायात्मिकाबुद्धिरितिश्लोकेनसांख्यनिष्ठावतांपाताशंकानास्तिकर्मसंयोगनिष्ठावतांतुसास्तीत्युक्तायावा
नर्थउदपानेइतिसांख्यनिष्ठायांसर्वकर्मफलांतर्भावश्चवर्णितस्तामेवप्रशमात्मिकांस्वाशयानुकूलांमत्वानोर्जुनउवाचज्यायसीतिहेजनार्दनकर्मणोनिष्कामकर्मयोगा
पेक्षयाबुद्धिःसांख्यनिष्ठालक्षणंज्ञानंज्यायसीप्रशस्ततराचेत्तेतवमतातत्तर्हिमोक्षहेतुभूतायांतस्यांसत्यांघोरेबंधुवधात्मकेकर्मणिकिंनुकुतोहेतोर्नियोजयसिपुनःपुनर्युध्यस्वेतिव
दन् १ ननुतवज्ञाननिष्ठायामनधिकारात्कर्मैवकुर्वितित्वांब्रवीमीत्याशंक्याहव्यामिश्रेणेति अविविक्तेनेवशब्दोविविक्तोपिबुद्धिदोषादविविक्ततांगच्छामीतिसूचयति
[गा २]

अर्जुनउवाच ज्यायसीचेत्कर्मणस्तेमताबुद्धिर्जनार्दन तत्किंकर्मणिघोरेमांनियोजयसिकेशव १ व्यामिश्रेणेववाक्येनबुद्धिंमोहयसीवमे
॥तदेकंवदनिश्चित्ययेनश्रेयोहमाप्नुयाम् २॥

तेनवाक्येनत्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुनेतिक्वचिद्वेदनिष्ठांत्याजयसिकर्मण्येवाधिकारस्तेइतितामेवचग्राहयसितथानिर्द्वंद्वोनित्यसत्त्वस्थोनिर्योगक्षेमआ
त्मवान्भवेतिचनिवृत्तिमार्गमुपदिशसिधर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यतइतिप्रवृत्तिमप्युपदिशसिनस्त्वेतन्मयायुगपदनुष्ठातुंशक्यमतोमे
ममबुद्धिंमोहयसीववस्तुतोममोहंनाशयितुंप्रवृत्तोसीतिइवशब्देनोच्यतेतत्तयोर्मध्येएकंप्रधानंमद्योग्यंतत्निश्चित्यवदयेनानुष्ठितेनाहंश्रेयःकल्याणंआप्नुयाम् २
[तत्र] [प २]

अत्रोत्तरं श्रीभगवानुवाच लोकेस्मिन्निति पुरा पूर्वाध्याये मया निष्ठा एकैव प्रोक्ता परं तु सा द्विविधा द्विप्रकारा सैकस्याएव ब्रह्मनिष्ठायाः प्रकारद्वयमुक्तं अधिकारिभेदेन न तु ब्रह्मप्राप्तये परस्परनिरपेक्षमार्गद्वयमुक्तमिति भावः हेऽनघ विशुद्धांतःकरण मद्वचनस्यार्थं सम्यगालोचयेत्यर्थः तदेव प्रकारद्वयमाह ज्ञानयोगेनेति सांख्यानां प्रकृतिपुरुषयोर्विविक्तत्वं ज्ञानतो आत्मना त्मविवेकज्ञानयोगः ज्ञानोपायो वेदांतश्रवणमननिदिध्यासनात्मकस्तेन ज्ञानयोगेन ब्रह्मणि निष्ठां परिसमाप्तिं सांख्याः प्राप्नुवंतीत्यर्थः योगिनां सिध्यसिध्योः समो

श्रीभगवानुवाच लोकेस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघः ज्ञानयोगेन सांख्या
॥नां कर्मयोगेन योगिनां ३॥

भूत्वा समत्वं योग उच्यत इति उक्तलक्षणा योगवंतां कर्मयोगेन संध्योपासनादि निर्विकल्पकसमाध्यनुष्ठानांतमिह कर्मयोगपदार्थः तेन योगिनो ब्रह्मनिष्ठां प्राप्नुवंतीत्यर्थः अयं भावः इहजन्मनि जन्मांतरे वा ईश्वरप्रीत्यर्थमनुष्ठितैः कर्मभिर्विशुद्धसत्वो विवेकवैराग्यशमादिषट्कादियेनो मुमुक्षुः प्रत्यक्श्रवणाचितः श्रवणमननाभ्यासेनैव कृतकृत्यो भवति स चेत् श्रवणादेः प्रातं समाहितचित्तस्तर्हि निदिध्यासनस्यापि अपेक्षितत्वमुक्तं सोयं सांख्यमार्गः तथा सर्वाणि कर्माणि परमगुरावर्पयन् श्रवणमननात्मकविचारमंतरेणैव केवलं
॥अनुष्ठानात्प्रतीचोनि ॥

की२

विशेषब्रह्मरूपत्वं गुरुवाक्यतो निश्चित्यासंभावनादिदोषरहित आचार्योऽग्निर्गुरणाब्रह्मोपास्तिप्रकारमधिगम्य कर्मछिद्रेषु समाध्यभ्यासं कुर्वन्ननिष्फलं प्रत्यगात्मस्वरूपं साक्षात्क
रोतीति सोऽयं योग[illegible]मार्गः तेन ऊहांको शल्यं येषामस्ति ते सांख्याः येषां तन्नास्ति मियोगिन इति अत इत्यं हि प्रकारा निष्ठा न तु द्वे निष्ठे इति भ्रमित्तव्यं यथोक्तं वशिष्ठेन द्वौ क्रमौ चित्तनाशाय
योगो ज्ञानं च राघव योगस्तु वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणं यासाध्यः कस्यचित्तस्य निश्चयः प्रकारौ द्वौ ततो देवो जगाद परमः शिव इति चित्तादर्शनोपलक्षितस्य ब्रह्मसाक्षा
त्कारस्य द्वौ क्रमौ चित्तादेर्मिथ्यात्वपक्षे ज्ञानमेव यथा रज्जु[illegible]गादि सम्यगवेक्षणे नैव नश्यति तद्वत्तस्य सत्वपक्षे योग एव यथा सत्यजरगः मंत्रादिना निरुद्धप्रचारः
स्वयमेव नश्यति तद्वच्चित्तमपि योगेन निरुध्यमानं नश्यति तस्य निरन्वयोच्छेदस्तु प्रारब्धकर्मान्ते पक्षद्वयेऽपि तुल्य इति ३ ॥ ३ ॥ ३ ॥

६२

अनयोः प्रकारयोरंगांगिभाव माहनकर्मणामितिकर्मणा यज्ञादीनो अनारंभात् अननुष्ठानात् नैष्कर्म्यं ज्ञाननिष्ठां नाश्नुते न प्राप्नोति विविदिषंति यज्ञेनेतिश्रुत्या यज्ञादीनां विविदिषायोगत्वेन विधानात्
ननु संन्यस्य प्राधान्यात् कर्मणां विविदिषांगत्वमत्र गम्यते तेन विविदिषायां यज्ञादिना सिद्धायां एतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीतिश्रुतेः प्रव्रज्यारूपमेव नैष्कर्म्यमिह ज्ञाननिष्ठासाध
नं न त्वास्यं न ज्ञानं नैष्कर्म्यसिद्धिं समाधिगच्छतीतियोजनायां परमात्मिस्याहा विवात्र न तु ब्राह्मकस्य परमस्य विशेषणस्याभावात् न च कर्मयोगजनितचित्तशुध्यभावे केवलात् संन्यासात् सिद्धिं समधि
गच्छतीतियोजनायां विशेषयोर्ज्ञानकर्मणोः समुच्चया संभवस्याभी ष्टस्य सिद्धेः किमिति नैष्कर्म्यशब्देन ज्ञाननिष्ठा ग्राह्यतः इतिचेत् सत्यं गुरोः कर्मकार्यत इतिवाक्यशेषान्नैर्गुण्य हेतुकं मुख्यं
ज्ञानमेवेह नैष्कर्म्यं यथार्थः न तु प्रव्रज्या विविदिषंति यज्ञेनेत्यत्रापि जिज्ञासित्वस्येन जिज्ञासस्यसिनेत्यदविवक्षितीयांतस्य धात्वर्थे नैवान्वयात् अश्वादीनां गमनादिविषय ज्ञादीनां वेदनस्यवा
योज्ञेयः स तमेवेति श्रुतिस्तु विविदिषासंन्यासमभिप्रायेण प्रवृत्ता एतं वैतमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरंतीति ज्ञान

६३

नकर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते नचसंन्यसनादेव सिद्धिं समधिगच्छति ४॥

६१

परिणाकार्थे सजीवन्मुक्तिसुखार्थे स्य याज्ञवल्क्यादिभिरनुष्ठितस्य विद्वत्संन्यासस्यापिशास्त्रे दर्शनात् असंन्यासिनो ज्ञानमेव नोत्पद्यत इति प्रावामगन्हो विक्षेपकर्मत्यागरूप संन्यासविष
यः न तु काषायपरिधानमात्र विषयः गर्गीव्याधवशिष्ठादीनामतथाविधानामपि ज्ञानोत्पत्यवगमादित्यास्तां तावत् कर्मभिरशोधितचित्तस्य मंदबुद्धेः रागद्वेषादिग्रस्तस्यात्मानात्म विवेक
द्वारा वा नैष्कर्म्यप्राप्तिर्नास्तीति पूर्वार्धार्थः नन्वभयं सर्वभूतेभ्यो दत्वा नैष्कर्म्यमाचरेदिति केवलात्कर्मसंन्यासादपि नैष्कर्म्यसिद्धिः स्मर्यते तत्कथमुच्यते नकर्मणामनारंभान्नैष्कर्म्यमस्तीति तत्राह
न चेति कर्मजचित्तशुध्यभावे कृतादपि संन्यासान्न मोक्षसिद्धिः उदाहृतस्मृतिस्तु चित्तशुद्धिपूर्वकसंन्यासाभिप्रायान हिरण्यादिग्रस्तः सर्वभूतेभ्यः सर्वात्मनाभयं दातुमिष्टे तोपपन्नमुक्तं न
चसंन्यसनादेवेति ४॥ ४॥

एतदेव प्रपंचयति नहीति अवशः कर्मजशुध्यभावात् अजितचित्तः कश्चिदपि जातु कदाचित्समाधिकालेपि क्षणमपि अकर्मकृत्कर्माणि इर्मनोवाक्कायादीनि अकुर्वन् नहि प्रसिद्धं न तिष्ठति हि यस्मात्सर्वोपि लोकः प्रकृतिजैः गुणैः सत्वरजस्तमोभिः स्वभावप्रभवैः रागद्वेषादिभिः कर्म कायिकं वा चिकं मानसिकं वा कार्यते अवश्यं तत्र प्रवर्त्यते ५ ननु एवं ध्यानेनैव चित्तशुद्धि म... पि सैयादपि ध्यामीं किं कर्मभिरित्याशंक्याह कर्मेंद्रियाणीति यो विमूढात्मा गाधाक्रांतचित्तः कर्मेंद्रियाणि वागादीनि संयम्य निगृह्य आस्ते एकांते ध्यानापदेशेनोपविशति स मिथ्याचारः तस्य तदासनादिकं आचरणं मिथ्या आलीकमेव निष्फलत्वात् तत्र हेतुः इंद्रियार्थान् मनसा स्मरन् निंतियन् इंद्रियार्थान् शब्दादीन् श्रोत्रादिभिर्गृहीतुं

नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ५ कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् ॥ इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ६ यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते ७ ॥ ७ ॥

नसा च स्मरति अतो मिथ्याचारः स विषयान् चिंतयन् योगनिष्ठामात्मनो लोके अभिव्यक्तनक्ति अतः कपटीत्यर्थः तस्मात्कर्मव्यतिरिक्तः कश्चित्तु शुद्धयुपायो नास्तीति भावः ६ यस्तु पूर्वस्मान्मिथ्याचारात् विलक्षणः पुरुषधौरेयः इंद्रियाणि मनसा सह नियम्य रागद्वेषवियुक्तानि कृत्वा कर्मेंद्रियैः कर्मयोगं आरभते हे अर्जुन असक्तः कर्मफले स्वर्गादौ ऐहिके ॥ शब्दादौ असक्तः अनासक्तो विशिष्यते पर्वं स्मात् अधिको भवतीत्यर्थः ७ ॥

नियतमितियस्मादेवंतस्मात्त्वंनियतंसंध्योपासनादिकंमेवकुरुयद्वानियतंनियमेनत्वंकर्मनित्यकाम्यसाधारणंयत्पापविनिकृंतनंस्वभावंतदेवकुरुहियस्मात्ह्यकर्मणःसकाशात्क
र्मैवज्यायःप्रशस्ततरंअपिचतेतवक्षत्रियस्यअकर्मणःसत्यामपिचित्तशुद्धौसर्वकर्मत्यागिनःशरीरयात्रादेहयात्रापि नप्रसि
ध्येत्भैक्ष्यचर्यायामनधिकारात्ब्राह्मणाःपुत्रैषिणायाश्चवित्तैषिणायाश्चलोकैषणायाश्चव्युत्थायाथभिक्षाचर्यंचरंतीतिसंन्यासविधायकेवाक्येराजाराजसूयेनस्वाराज्यकामोयजेतेत्यत्रराज
पदवत्ब्राह्मणपदस्यविवक्षितत्वात्अर्थवत्त्वात्चत्वारआश्रमाब्राह्मणस्यत्रयोराजन्यस्यद्वौवैश्यस्येतिस्मृतेश्चअन्यत्राप्युक्तंप्राज्यंकृत्यमुखंराज्ञांनामधर्मोदेवअवलिंगधारणं

नियतंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः शरीरयात्रापिचतेनप्रसिध्येदकर्मणः ८ यज्ञार्थात्क
र्मणोन्यत्रलोकोयंकर्मबंधनः तदर्थंकर्मकौंतेयमुक्त संगः समाचर ९ ॥ ॥

हिजातेराज्ञांनानांनायंधर्मोविधीयतइति ८ ननुकर्मणाबध्यतेजंतुरितिकर्मणांबंधकत्वस्मृतेःकथंमुमुक्षुंमांतत्रनियोजसीत्याशंक्याह यज्ञार्थादितियज्ञःपरमेश्वराराधनं
यज्ञोवैविष्णुरितिधात्वर्थानुगमात्तदर्थंयज्ञोवैविष्णुरितिश्रुतेर्विष्णुर्वातदाराधनार्थंयत्कर्मततोन्यत्रकर्मणिस्वर्गाद्यर्थेप्रवृत्तोयंलोकःकर्मबंधनःकर्मणाबध्यतेनत्वी
श्वराराधनार्थंअतस्तदर्थंईश्वराराधनार्थंकर्मवर्णाश्रमोचितंहेकौंतेयमुक्तसंगःफलाभिलाषशून्यःसन्समाचारसम्यक्कुरु ९ ॥ ॥ ९ ॥ ॥ ९ ॥ ९ ॥

तः२ वि१

यत्तद्देवार्थवादेन द्रढयति सहेति यज्ञैः सहेति सहयज्ञाः वोपसर्जनस्येति पक्षे मादेशाभावः कर्माधिकृता इति यावत् प्रजा द्विवर्णिकाः अनेन यज्ञेन प्रसविष्यध्वं सवो वृद्धिस्तां लभध्वं एष यज्ञः
युष्माकं इष्टकामधुक् इष्टार्थप्रदो ऽस्तु १० इष्टार्थप्रदत्वमेवाह देवानिति भावयत तर्पयत अनेन देवतापूजात्मकेन यज्ञेन वयुष्मान् भावयन्तु इष्टवृष्ट्यादिना एवं परस्परं भावयन्तो देवा
श्च यूयं च श्रेयः परं प्राप्स्यथ ११ किंच इष्टान् पुत्रपश्वादीन् वः युष्मभ्यं यज्ञैर्देवभावितैस्तैर्दत्तानेव व्रीहियवाज्यादीन् अप्रदाय अदत्त्वा देवतोद्देशेन द्रव्यत्यागात्मकं यागं नित्यनैमि
त्तिकरूपं वैश्वदेवाग्निहोत्रज्ञानेष्ठ्यादिरूपं अकृत्वेत्यर्थः अदत्त्वा यो भुङ्क्ते स स्तेन एव १२ ये तु यज्ञशिष्टाशिनः वैश्वदेवादिशिष्टान्नभोजनशीलाः सन्तः प्राणापाकारणात्ते मुच्यं

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् १० देवान्भावयतानेन ते देवा भावयन्तु वः परस्परं भावयन्तः श्रेयः प
रमवाप्स्यथ ११ इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः १२ यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः भुञ्जते ते
॥ त्वघं पापा ये पचन्त्यात्मकारणात् १३ ॥

ते मुच्यन्ते सर्वकिल्बिषैः प्रमादकृतैः विहिताकरणानिमित्तैः ये त्वात्मकारणात् स्वार्थमेव पचन्ति न तु पञ्चमहायज्ञार्थं ते पापाः स्वयं पापरूपा एव सन्तः पापमेव भुञ्जते तथा च स्मृतिः
कण्डनी पेषणी चुल्ली उदकुम्भी च मार्जनी पञ्च सूना गृहस्थस्य ताभिः स्वर्गं न विन्दति इति पञ्चसूनाकृतं पापं पञ्चयज्ञैर्व्यपोहति इति च श्रुतिश्च केवलमेवास्य तत्साधारणमन्नं यदिद
मद्यते स य एतदुपास्ते न स पाप्मनो व्यावर्तते मिश्रं ह्येतदिति मन्त्रवर्णोऽपि मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य नार्यमणं पुष्यति नो सखायं केवलाघो भवति
॥ केवलादीति १३ ॥

जगच्चक्रप्रवृत्तिहेतुत्वादपि कर्मकर्तव्यमित्याह अन्नादिति अन्नात् रेतोरूपेण परिणतात् भूतानि प्राणिशरीराणि भवंति अन्नं च पर्जन्यात्तत्तु प्रसिद्धमेव यज्ञाद्भवति पर्जन्यः अ
ग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मृतेः यज्ञो देवताराधनरूपो धर्मः कर्मभ्यो यागहोमदानादिभ्यः समुद्भवतीति कर्मसमुद्भवः १४
कर्म ब्रह्मोद्भवं वेदोद्भवं वेद एव धर्मे प्रमाणं न तु पाखंडादिप्रणीतागमः ब्रह्म वेदोपि अक्षरसमुद्भवं अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेद इत्यादिश्रुतेः सा क्षा

अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः १४
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं १५॥

त्परमेश्वरादेवोत्पन्नः अतो न तत्र भ्रमविप्रलंभत्वादिदोषाक्रांतपाखंडादिवाक्यवदप्रामाण्यशंकास्तीति भावः यस्मादेवं तस्मात्सर्वस्मिन् देशे काले च वर्त्तमानं ब्रह्म वेदः स
तेन देवस्य नित्यत्वं शब्दस्य विभुत्वं च दर्शितं नित्यं नियमेन यज्ञे प्रतिष्ठितं तात्पर्येण पर्यवसन्नं १५ ॥१५॥ ॥१५॥ ॥१५॥ ॥१५॥ ॥१५॥

मवलेवं तत किं फलितमित्यत आह एवमिति भूतानामाहारो देहाभिगामस्त तत्कर्मजान्नं ततः कर्मानुष्ठानं ततो देवानां तृप्तिस्ततो वृष्टिस्ततो ऽन्नं ततो भूतानीत्येवं वेदाधिगम्यमित्येवं हेतुचक्रमिदं चक्रं विरेतस्मा वर्तमानं जगता
त्रा निर्वाहकं नानुवर्त्तयति नानुतिष्ठति सः अघायुः पापजीवनः इंद्रियारामो ऽनतु धर्माराम आत्मारामो वा मोघं व्यर्थं दशमस्य काहिकजीवति पार्थ स इदमनुवर्त्तयति स जगदुपकारको ऽधन्य इति भावः तथा च
श्रुतिः अथो अयं वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत्पितृभ्यो निपृणाति यत्प्रजामिच्छति तेन पितॄणामथ यन्मनुष्यान्
वासयते यदेभ्यो ऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विंदति तेन पशूनां यदस्य गृहेषु श्वापदा वयांस्या पिपीलिकाभ्य उपजीवंति तेन तेषां लोक इति १६ एवमीश्वरेणावेद

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः अघायुरिंद्रियारामो मोघं पार्थ स जीवति १६ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य

॥ कार्यं न विद्यते १७ ॥

पस्य पूर्वकं जगच्चक्रं प्रवर्त्तितमन्यैरधिकृतैरनुवर्तितव्यमित्युक्तं अस्या ननुवर्त्तने च महाननुत्पत्यवाय उक्तः स त्वन्य विदपि स्पृशेदिति संभावितामाशंकां परिहरति य इति आत्म
न्येव रतिः प्रीतिर्यस्य न तु स्त्र्यादौ स तथा न चात्मनि प्रीतिः प्राणिमात्रस्यानौपाधिकोऽस्तीत्यतस्तदर्थत्वेनैवान्यत्रापि प्रीतिर्भवतीत्यत उक्तं आत्मतृप्तश्चेति आत्मनैव परमानं
दरूपेणात्मनो ऽन्नमिष्टान्नादिना न तु मंदाग्निरपि स्त्र्यादौ न रमते नाप्यमिष्टान्नेन तृप्यति अत उक्तं आत्मन्येव च संतुष्ट इति मंदाग्निर्हि धातुदृढ्ह्यं जाठरोद्दीपनं च कामयमान ओष
धाद्यर्थमितस्ततो धावति न त्वयमात्मन्येव तुष्यति विद्वांस्तु रति तुष्टी रात्मनैवानुभवति न स्त्र्यन्नधनादिभिरिति तस्य कार्यं कर्त्तव्यं किमपि नास्ति क्रियां प्राप्य कस्यचिदप्यर्थस्याभावा

॥ नं १७॥ ॥ १७॥

गी०
७७

एतदेवाह नैवेति तस्यात्मरतेः कृतेन कर्मणा अर्थः प्रयोजनं नास्ति स्वर्गादेरलिप्साभावात् मोक्षं वा क्रियासाध्यत्वात् तस्यैक्यतः कृतेनेति श्रुतेः अकृतेनापि कर्मणा नास्तीति स्पष्टं यः अकृतेन विहितकर्मणापि अर्थो नरकादिरस्य नास्ति अत्र कृताकृतशब्दौ मिथो मिथः परस्परविरुद्धार्थवाचितया गुणप्रधानभावेनोपेतौ अकृतेनेति भावे निष्ठा नित्याकरणानिमित्तं प्रत्यवायप्रतिरूपो वा कश्चन योऽपि दुःखोनास्तीति व्याचक्षते तेषामप्यभावाद्वा वोन्नेतुमभ्युपगमात् नित्यानां कालेयस्य विहितं क्रियते तत एव प्रत्यवायोत्पादो वक्तव्य इति ध्येयं कु

घा २

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन नचास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः १८ ॥

तस्मादसक्तः सततं कार्यं कर्म समाचर असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः १९ ॥

प्रि०यो१

प्रामात्तरन्तांत आप घते अत्रोपपत्तिमाह न चेहेतौ यस्मात् अस्य आत्मरतेः सर्वभूतेषु चेतनाचेतनेषु उत्तममध्यमाधमेषु कश्चिदपि अर्थव्यपाश्रयः सुखभोगात्मकप्रयोजनाभिसंबंधो नास्ति आत्मरतित्वादेव निष्कामत्वाद्दुःख सुखपापफलसंबंधो नास्तीत्यर्थः १८ यस्मान्निष्कामस्य कर्मलेपो नास्ति तस्मात् असक्तत्वमपि असक्तः फलासक्तिशून्यः सततं सर्वदा कार्यं अवश्यं कर्तव्यं कर्म नित्यं नैमित्तिकं समाचर हि यस्मात् असक्तः कर्माचरन् परं मोक्षं सत्वशुद्धिद्वारेणाप्नोति। १९ ॥ ॥१९॥ ॥१९॥

राम०
७७

अत्र शिष्टाचारं प्रमाणयति कर्मणेति कर्मणैव संसिद्धिं श्रवणादिसाध्यां ज्ञाननिष्ठां गन्तुं आस्थिताः प्रवृत्ताः जनकादयस्त्वादृशाः क्षत्रियाः न तु संन्यासेन ननु शुद्धचित्तस्य नास्ति कर्मापेक्षेत्याशंक्याह लोकेति। लोकस्य संग्रहः स्वधर्मे प्रवर्त्तनं तु स्वप्रयोजनाभावेपि केवलं लोकसंग्रहार्थं चेत्कर्म कर्त्तव्यं तदा विदुषां ब्राह्मणानामपि संन्यासो न स्यात् अत्यत्नेनैव संन्यासधर्मोनुग्राहयितं तेषां संन्यासः इति चेत् अर्जुनेपि न तर्हि इत्थं वारितमस्ति न तु क्षत्रियस्य संन्यासेधिकारो नास्तीति चेत् तल्लिंगधारणे विकाराभावेपि भरतऋषभादिवत्स्वरूपकर्मत्यागमात्रेधीकारात्तु वार्त्तिके सर्वाधिकारविच्छेदिज्ञानं चेत्सु

कर्मणैव हि संसिद्धिमास्थिता जनकादयः लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि २० यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते २१ न मे पार्थोस्ति कर्तव्यं त्रिषु लोकेषु किंचन नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि २२ यदि ह्यहं न वर्त्तेयं जातु कर्मण्यतन्द्रितः मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः २३ ॥

येपि तेनकुतो विकारनियमो बुध्यानेन्द्रियतेवला इति विद्वत्संन्यासे क्षत्रियादेरपि अधिकारस्य साधितत्वात् अतो लोकसंग्रहो न मुख्यं कर्मप्रयोजनमिति चेत् सत्यं न मे पार्थास्ति कर्त्तव्यमिति स्वदृष्टान्तेन अधिकारिकत्वादर्जुन एवैवं नियोज्यते न क्षत्रियमात्रमिति तुष्यतु भवान् २० २१ कर्मणि वर्त्त एव अहं कर्म करोम्येवेत्यर्थः २२ यद्यहं कर्मणि न वर्त्तेयं तर्हि मनुष्याः ममैव वर्त्मानुवर्त्तन्ते अवर्त्तन्ते अवर्त्तेरन् न कर्म न कुर्वीरन्नित्यर्थः अतन्द्रितोऽनलसः सर्वशः सर्वप्रकारैः २३॥

ततस्त्वं किमित्यत आह उत्सीदेयुरितियद्यहंचरतीत्यादेरपरन्योजनाकेवलंलोकसंग्रहं पश्यनकर्तुमर्हसि अपितुश्रेष्ठाचारत्वात्यी त्याह यद्यदितितथाचममश्रेष्ठस्त्वयाहशाचाचारस्ताहशस्त्वमस्तु
वर्तिनात्वया अनुष्ठेयः नस्वातंत्र्येणान्यहत्यर्थः कीहशस्तवाचारोयोमयानुवर्तनीयइत्याकांक्षायांनमेपार्थेत्यादिभिस्त्रिभिश्लोकैस्तत्प्रदर्शनमितिमधुसूदनश्रीपादाः २४ यस्मादृशेणवत्त्वंहत
थैसि तथापि तथापियराजुग्नहार्थकर्माणिकर्वित्याह सक्ताइतिकर्मणिकर्मफलेकुर्वंतिकर्माणी विशेषः असक्त इतिछेदः २५ विद्वान्अज्ञानांकर्मस्वारकानरंबुद्धिमेहंबुद्धेश्चालनंनजनयेत्तेन
त्पादयेत् किंतुतानुसर्वाणिजोषयेत्सेवयेत्कथंयुक्तआहतो भत्वासमाचरन् २६ अविद्वानकथंकर्मसुसज्जततइत्यत आह प्रकृतेरितिप्रकृतेः पारमेश्वर्याः सत्वरजस्तमोगुणात्मिकायाःहे

उत्सीदेयुरिमेलोकानकुर्यांकर्मचेदहं संकरस्यचकर्त्तास्यामुपहन्यामिमाः प्रजाः २४ सक्ताः कर्मण्यविद्वांसोयथाकुर्वंतिभारत कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसं
ग्रहं २५ नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनां जोषयेत्सर्वकर्माणिविद्वान्युक्तः समाचरन् २६ प्रकृतेःक्रियमाणानिगुणैः कर्माणिसर्वशः अहंकारविमू
॥ढात्माकर्त्ताहमितिमन्यते २७॥

वात्मशक्तिंस्वगुणैर्निगूढामितिश्रुतिप्रसिद्धायाः शक्तेर्गुणैः कार्यकारणसंघातात्मकैः क्रियमाणानिकर्माणि अहंकारेणस्वस्मिन्नध्यस्तेनमूढः तदीयात्कर्तृत्वात्तदीनात्मधर्मत्वेनपश्य
न् आत्मनश्चअसंगानंदसंविद्रूपतामपश्यन् आत्मा अहंकारेणविमूढश्चावोसौतेमतिविग्रहः अहंकर्माणिकर्मणांकर्तेतिमन्यतेकर्त्रध्यासेन कर्त्ताहमिति तत्प्रत्ययःतेनननलो
कात्ययनिष्ठारवलथैतनामितिषष्ठीनिषेधः अन्यथातत्प्रत्ययेकर्मणांकर्त्ताहमितिषष्ठ्याभाव्यं २७ ॥ २७ ॥ २७ ॥ २७ ॥ २७ ॥

एवं सक्तस्य कर्माचरणं प्रदर्श्यासक्तस्य तद्दर्शयति तत्त्वविदिति गुणकर्मविभागयोः गुणविभागस्य कर्मविभागस्य च तत्त्ववित् इति भाष्यं नाहं गुणात्मक इति गुणेभ्य आत्मनो विभागः नाहं कर्मा-
त्मक इति कर्मभ्य आत्मनो विभागयोस्तत्त्वं वेत्तीति श्रीधरः मधुसूदनस्तु गुणा देहेन्द्रियान्तःकरणानि अहंकारः यद्वा निकर्माणि तत्तु तेषां व्यापारः तानि ममकारास्पदानि गुणकर्माणि तेषु देहेकवद्भ्यो
विभज्यन्ते सर्वेषां जडानां भासकत्वेन पृथग्भवतीति विभागः स्वप्रकाशज्ञानरूपोऽसंग आत्मा गुणकर्मणोश्च विभागश्चेति द्वन्द्वः तयोर्जडाजडरूपयोस्तत्त्वं यो वेत्ति स करणात्मका गुणा
गुणेषु विषयेषु वर्तन्त इति मत्वा न सज्जते कर्तृत्वाभिनिवेशं न करोति त्वर्थे गुणविभागस्य कर्मविभागस्य च तत्त्ववित् इति पक्षे गुणकर्मणोरभिन्नत्वमिष्टं विभागपदं व्यर्थमिति यद्वा यस्तत्त्ववि

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते २८॥

त् स गुणाः गुणेषु वर्तन्त इति मत्वा गुणविभागे च न सज्जते इति योजना गुणानां सत्त्वरजस्तमसां विभागाः बुद्ध्यहंकारज्ञानेन्द्रियविषयरूपेण विभज्यावस्थानं तस्मिन्न सज्जते इदं मह्यमि-
ति न मन्यते तथा हि शरीरी अहं गौरोऽस्मि हस्ताभ्यामास्ते मेऽपेक्षान्नमिति च यथा हृष्टं ममेदं हृष्टमिति अहंकारेणाभिमन्यते मेऽस्मीत्यभिमन्यते उभे विज्ञीथमाराणामहं सुखीति च सर्वेषु
बुद्ध्यादिषु विभागेषु समारोपोऽपि प्रत्येकं प्रत्यक्षमध्यासाहमिदमिति ममेदं कर्मेति च मन्यते एतेन कर्मविभागोऽप्यावश्यकत्वेन व्याख्यातः अन्यथा चिदात्मन्येव आज्ञानादिक-
॥ र्तृत्वं दुःखादिमत्त्वं चापततीति अयं च कर्मविभागः श्रुत्यापि दर्शितः अंधो मणिमविंदत् तमंगुलावयत् अग्रीवः प्रत्यमुंचत । ॥ ॥ ॥

भी०
७९

ततमजिह्नोऽयमस्त्वेति अधः स्वयंप्रकाशाहीनोपि च स्फुरद्रश्मिर्गोरूपाश्रितं विषयं [illegible] अविंदत प्रकाशयति अंगुलीः काष्ठकोष्ठादिवत्तु जडत्वात्स्वयं कर्मकर्तृत्वमशक्तोपि परापरि
आवयत् आसीद्यत विषयं जपादन्ते अनवच्छिन्नशिरस्कवन्निर्जीवो हंकारस्तं प्रत्यसंचतनी वायोधारयन्निमपे हंलव्यमिति मन्यते अजिह्मो धीयात्तुः जडत्वात्स्वगतस्य सुखदुःखयोः
घटद्रवस्वगतरूपादेः प्रकाशने असमर्थोपि अहं सुखी दुःखी नित्यानुभवति तथा च आत्मानात्मनोऽपोह्योत्यक्त व्याहृत्ते घहंकारादिषु तत्केममत्वाभिमानादिषु कुसुमेषु सूत्रमिवानु
मत्वंतद्वियर्यत्वासुरीसंपदितिदर्शयितुंश्रीभगवानुवाचअभयमितिअभयंस्वोच्छेदबुध्यभावःसत्वसंशुद्धिःचित्तनैर्मल्यंज्ञानंश्रवणादिजन्यंयोगोज्ञाते
र्थेचित्तप्रणिधायपरायणत्वंव्यवस्थितिर्निष्ठाएषामुख्यादैवीसंपत्दानंयथाशक्तिसंविभागोऽन्नादीनांदमोबाह्येंद्रियनियमःयज्ञःश्रौतस्मार्तादिःस्वाध्या
योवेदाध्ययनंतपोवक्ष्यमाणलक्षणंशारीरादित्रिविधंआर्जवंऋजुत्वंसर्वदा १ किंचअहिंसाप्राणिपीडावर्जनंसत्यंअप्रियानृतवर्जनेयथाभूतार्थ
भाषणंअक्रोधःपरैराकृष्टस्यापितिमस्यक्रोधस्योपशमनंत्यागःसर्वकर्मसंन्यासःपूर्वंदानस्योक्तत्वातशांतिःअंतःकरणस्योपशमःअपैशुनंतद्वर्ज मे

श्रीभगवानुवाच अभयंसत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः दानंदमश्चयज्ञश्चस्वाध्यायस्तपआर्जवं १ अहिंसासत्यमक्रो
धस्त्यागः शांतिरपैशुनं दयाभूतेष्वलोलत्वंमार्दवंह्रीरचापलं २ तेजः क्षमाधृतिः शौचमद्रोहोनातिमानिता भवंतिसंपदंदै
वीमभिजातस्यभारत ३

नमपैशुनंतथादुःखितेषुभूतेषुकृपाअलोलत्वंइंद्रियाणांविषयसंनिधावप्यविक्रियामार्दवंमृदुताह्रीर्लज्जाअचापलंअसतिप्रयोजनेवाक्पाणि
पादादीनामव्यापारयितृत्वं २ किंचतेजःप्रागल्भ्यंनतुत्वग्गतादीप्तिःक्षमाआक्रुष्टस्यताडितस्यवांतर्विक्रियानुत्पत्तिःउत्पन्नायांविक्रियायांप्रशमनं
क्रोधउपशमनंधृतिर्देहेंद्रियेष्ववसादप्राप्तेषुतस्यप्रतिषेधकोंतःकरणवृत्तिविशेषःयेनोत्तंभितानिदेहादीनिनावसीदंतिशौचंद्विविधंमृज्जलाभ्यां
बाह्यंआभ्यंतरंमनोबुद्ध्योर्नैर्मल्यंमायारागादिकालुष्याभावःनातिमानिताअत्यंतंमानराहित्यंएतानिअभयादीनिदैवीसत्वप्रधानांसंपदंअ
भिलक्ष्यजातस्यस्वभावतोभवंतिहेभारत ३

ह१

अथेदानीं जन्मतो मयी आसुरीं संपदं आह दंभ इति दंभो धर्मध्वजित्वं दर्पः धनाभिजनादिनिमित्त उत्सेकः अभिमानः आत्मनि पू[illegible]ताबुद्धिः क्रोधः प्रसिद्धः पा
रुष्यं निष्ठुरभाषणं अज्ञानं अविवेकजनितो मिथ्याभ्रमय एते आसुरीं संपदं अभिलक्ष्य जातस्य भवंति हे पार्थ ४ अनयोः संपदोः कार्यमाह दैवीति [illegible] दै
वी पूर्वोक्ता अर्जुनस्य शंका किमहमासुरीं संपदमभिजातोस्मीति तामपनुदति मा शुच इति ५ द्वौ द्विसंख्यौ भूतसर्गौ भूतानां स्वभावौ मे मद्वचनात् शृणु ६
प्रवृत्तिं विधिवाक्यं निवृत्तिं निषेधवाक्यं न विदुः धर्माधर्मयोरिष्टानिष्टहेतुत्वज्ञानरहिता इत्यर्थः ७ असत्यं सत्यवर्जितं जगत् प्रामाणात्ततया प्रतिष्ठं धर्माध

दंभो दर्पोभिमानश्च क्रोधः पारुष्यमेव च अज्ञानं चाभिजातस्य पार्थ संपदमासुरीं ४ दैवी संपद्विमोक्षाय निबंधायासुरी मता मा शु
चः संपदं दैवीमभिजातोसि पांडव ५ द्वौ भूतसर्गौ लोकेस्मिन् दैव आसुर एव च दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ६ प्रवृत्तिं च नि
वृत्तिं च जना न विदुरासुराः न शौचं नापि चाचारो न सत्यं तेषु विद्यते ७ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं अपरस्परसंभूतं किमन्यत्कामहे
तुकं ८ एतां दृष्टिमवष्टभ्य नष्टात्मानोल्पबुद्धयः प्रभवंत्युग्रकर्माणः क्षयाय जगतोहिताः ९ ॥ छ ॥ छ ॥ छ ॥ छ ॥

र्मौ स्या प्रतिष्ठा आस्थितं [illegible] अनीश्वरं अनियंतृकं आहुः अपरस्परसंभूतं अपरस्पराः क्रियासातत्यमिति सूढवीजांकुरवत् तस्मात् कारणीभूतानां धर्मा
धर्मतद्रहस्यानामनाद्यसातत्यं तस्माज्जातं किमन्यल्लोकेस्मिन् किंचिदीश्वरमधिपेक्ष्य वा उत्पद्यते किंतु सर्वं कामहैतुकं स्त्रीपुंसयोर्मिथुनीभावः कामस्त
दुक्तस्वभावादेव जंतुर्जायते न त्वदृष्टादित्यर्थः ८ एतामनुपदोक्तां लोकायतिकानामभिमतां दृष्टिं अवष्टभ्य आश्रित्य नष्टात्मानः कादिवसत्वेन
नष्टधैर्याः यतोल्पबुद्धयः दृष्टसुखैकबुद्धिर्येषां ते अल्पबुद्धयः अहिताहिंस्राः ९

मा२

असद्ग्राहान्वश्याकर्षणानि अंजनकायसिध्यादिसाधनेषु असमीचीनेषु ग्राहाः निर्बंधास्तानभिनिवेशाः तान्गृहीत्वा अशुचीनि मद्यमांसादिविषये व्रतानि व्रतानि नियमविशेषा येषां ते तथाभूताः सन्तः कुमार्गप्रवर्तनेन प्रवर्तन्ते हठात्क्रियायामिति संबंधः १० चिंता योगक्षेमविषयां प्रलयांतां मरणावधिं एतावत् देहरूप आत्मा काम्यभोग एव पुरुषार्थ इतोऽन्यो नास्तीति निश्चिताः निश्चयवंतः तथा च बार्हस्पत्यसूत्रं चैतन्यविशिष्टः कायः पुरुषः काम एवैकः पुरुषार्थ इति च ११

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः १० चिंतामपरिमेयां च प्रलयांतामुपाश्रिताः कामोपभोगपरमा एतावदिति निश्चिताः ११ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ईहंते कामभोगार्थमन्यायेनार्थसंचयान् १२ इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथं इदमस्तीदमपि मे भविष्यति पुनर्धनं १३ असौ मया हतः शत्रुर्हनिष्ये चापरानपि ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी १४ आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः १५ ॥ छ ॥

अन्यायेन परवंचनादिना अर्थसंचयान् धनराशीन् ईहंते लिप्सन्ते आशापाशशतैर्बद्धाः तिदुरमद्येति १३ क्रोधपरायणाः त्वं कामपरायणास्त्वं च [illegible] पूर्वैस्त्रिभिर्मया महार्थ्या मा हन्यासौ विजितः ईश्वरः समर्थः सर्वेषां निग्रहे सिद्धः लब्धाखिलभोगसाधनः बलवान् विषयोपभोगे समर्थः अत एव सुखी १५ आढ्यः धनी अभिजनवान् कुलीनः अज्ञानेनाविवेकेन मोहिताः विविधं भ्रमं प्रापिताः १५

अनेकं नास्ति एकं चित्तं नीयेपस्य ततः अनेकं बहुषु विषयेषु प्रवीणेषु [illegible] लग्नं चित्तं येषां ते अनेकचित्ताः ते च ते विभ्रान्ताश्च किमिदं मादृशो साधनीयमिदमा
दृशो साधनीयमिति विशेषेण भ्रान्त्याकुलाः अनेकचित्तविभ्रान्ताः मोहो सत्त्वपि सद्बुद्धिः तदेव जालं तेन आवृताः प्रसक्ताः प्रकर्षेण लग्नाः अशुचौ विरामस्त्वारिम
ये १६ आत्मनैवात्मानं मन्यन्ते ते आत्मसंभाविताः स्तब्धाः अप्रणताः धननिमित्तो मानो गर्वो मदो मत्तता ताभ्यां अन्विताः धनमानमदान्विताः नामयज्ञैर्नाममात्रैर्यज्ञैर्द
म्भेन धर्मध्वजितया अविधिपूर्वकं यथोक्तधनज्ञानस्वयमृत्विक्प्रत्यादि हित्वा हिंसितं यजन्ते १७ अहंकारो अहमेव सर्वश्रेष्ठ इति बुद्धिः बलं शारीरं ज्ञातिधनाभिजननिमित्तं चाहं यं प

अनेकचित्तविभ्रान्ता मोहजालसमावृताः प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ १६ आत्मसंभाविताः स्तब्धा धनमानमदान्विताः यजन्ते ना
मयज्ञैस्ते दम्भेनाविधिपूर्वकं १७ अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः १८ तानहं द्विषतः क्रूरान्संसारेषु
नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु १९

रावज्ञां कामं क्रोधं च संश्रिताः मां सर्वदेहेषु प्रद्विषन्तः आत्मदेहे स्वदेहशोषणेन कर्षयन्तः शरीरस्थं भूतग्राममचेतसः मां चैवान्तः शरीरस्थं तान्विद्ध्यासुरनिश्चया
निति वचनात् पारदारादिना परदेहे च हिंसादिना प्रद्विषन्तः अभ्यसूयकाः सर्वत्र गुणेषु वेदोक्तेषु शमादिषु अशक्तत्वादि लक्षणं दोषमारोपयन्तः १८ तेषां फलमाह तानिति
सर्वभूतसमोऽप्यहं तान्वेदोक्तशासनातिगान् भक्तद्रोहकान् अहं नित्यमात्मानं नु तत्स्थोऽपि न मे वैषम्यं स्यात् पूर्वपूर्वसंस्कारान्ते तथैव पापं कुर्वन्ति तदनुरूपं फलं च प्राप्नु
वन्तीत्यर्थः १९

आसुरीं योनिमापन्ना इत्यस्यापि फलमाह आसुरीमिति अधमां नारकीं तिर्यक्स्थावरादिरूपां वा २० संक्षेपमासुर्याः संपत्तेराह त्रिविधमिति २० कामादिपरित्यागे किं स्यादत आह एतैरिति तमोद्वारैः । नरकसाधनैः स्वमोहात्मकस्य द्वारभूतैर्विमुक्तः सन्नात्मनः श्रेयः कल्याणं भगवदाराधनादिकं आचरति तेन च परां गतिं मोक्षं

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि मामप्राप्यैव कौंतेय ततो यांत्यधमां गतिं २० त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् २१ एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः आचरत्यात्मनः श्रेयस्ततो याति परां गतिं २२ यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः न स सिद्धिमवाप्नोति न सुखं न परां गतिं २३ ५ ५ ५ ५ ५॥

याति तस्मात्कामादित्रयं त्यजेदिति २२ न केवलं काशदृष्टिवत् कामादित्यागमात्रेणाउत्सृष्टशास्त्रवर्ती सिध्यति इत्याह य इति शास्त्रविधिं शास्त्रोक्तं इष्टसाधनतया निष्टसाधनतया च ज्ञापितं ब्रह्मणो यजेत नसुरां पिबेदित्यादिना विहितं निषिद्धं च उत्सृज्य विहितमकरणेन निषिद्धमाचरणेन च उत्सृज्य यो वर्तते कामकारत इच्छया स सिद्धिं चित्तशुद्धिं सुखं वैराग्यादिजनितं न तत्पिपरां गतिं मोक्षं च नावाप्नोति २३

यस्मात् शास्त्रातिगः शुध्यादिकं त्रयं नाप्नोति तस्मात्तेन च शुध्यादिकामस्य शास्त्रमेव प्रमाणं किं कार्यं किं न कार्यमित्यस्यां व्यवस्थायां एवं ज्ञात्वा शास्त्रं इदं कर्त्तव्य मिदं न कर्त्तव्यमिति शासनं वेदः ज्ञानरूपं निधानं च तत्तु ल्लंघनेन प्रतिसमाधानं अग्निहोत्राद्यकरणे यं दोषस्तत्परिमार्गार्थमिदं कृच्छ्रादिकं प्रायश्चित्तं ब्रह्महत्या दिकरणे यं दोषस्तत्परिहारार्थमिदं वा अश्वमेधादिकं महाप्रायश्चित्तं शास्त्रं च विधानेन च ताभ्यामुक्तं कर्म इह मनुष्यलोके कर्तुमर्हसि लोकांतरे कर्मस्व नधिकारं दर्शयितुमिह इत्युक्तं तेन त्वं शास्त्रानुवर्त्तिन एव चित्तशुध्यादिकेनाम्य स्यतीति सिद्धं २४ इति नीलकंठीये भारतभावदीपे भीष्मपर्वणि गीतार्थे षोडशोऽध्यायः तस्माच्छास्त्रं प्रमाणं ते इति प्रश्नविजमुपलभ्यार्जुन उवाच य इति ये पुरुषाः शास्त्रविधिं शास्त्रपरेनाचं श्रुतिस्मृतिशिष्टाचारकुलाचारागतं ते सर्वं बांधमेव

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि २४ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्म विद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसंपद्विभागो नाम षोडशोऽध्यायः अर्जुन उवाच ये शास्त्रविधिमुत्सृज्य यजंते श्र द्धयान्विताः तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः १

मात्यागात्तत्र यो विधिर्विधेयं तमुत्सृज्य सर्वात्मना परित्यज्य यजंते ईजयंते तातकृपाहीनमपित्वामू ते यं कूपो गंगाशनाटष्यधिको ऽत्रैव स्नानपानाव हनादुपरि च यो युगंधरे प्रक्रमसाधनेत्येव नाहमिष्टफलमवश्यं प्राप्स्यामीति हठजया श्रद्धयान्विताः संतः तेषां निष्ठा इयं का कीदृशी किं सत्त्वं सात्वि की वा पिश्चकूपेष्वश्रद्धाधिक्यदर्शनात् किं रजः राजसी वा तेषां निष्ठा शास्त्रातिक्रमेणाकामकारित्वात् तमः आहो इति प्रश्ने किं तमः तामसी वा सा निष्ठा योगे जनधीः स्त्रीशोऽहीयात्मलेभमहत्त्वबुद्धेर्विषयानुपायाः दर्शितास्तत्पश्यपितुमाप्येवं व्यवहारदर्शनादेव श्रद्धधानतयादेवादीन्यजनेन इत्युक्तं तत्रापि वि गीत एव कृद्धव्यवहारोऽसाद्ध्यः अविगीते स्मिन्नाम सत्त्वादिशंकापात्रयोगात् १

एवं सामान्यतः पृष्टे सामान्यमेवोत्तरं श्रीभगवानुवाच त्रिविधेति स्वभावः प्राग्भावीयो धर्माधर्मौ तेनोजाता स्वभावजा यदि प्राग्भावे सात्त्विको देवता
पूजादिधर्मः तेनानुष्ठित स्तर्हि तत्संस्कार सात्त्विक्येव श्रद्धा भवति यदि राजसो यक्षादिपूजादिस्तर्हि राजस्येव यदि तामसो भूतप्रेतादिपूजादिस्तर्हि
तामसी श्रद्धा भवति एवं त्रिविधा श्रद्धा देहिनां देहाभिमानवतां भवति तां मया व्याख्यायमानां शृणु २ ननु श्रद्धा चित्तो भूत्वात्ममेवात्मा
नंप स्येदिति श्रद्धाया अन्यात्मदर्शनसाधनेष्वन्तरंगत्वमुच्यते कथं तस्या राजस्त्वं चोच्यते इत्याह सत्त्वेति प्राक्कर्मसंस्कारोपेतं यादृशं बुद्धिसत्त्वं
सात्त्विकं राजसं तामसं वा तदनुरूपैव सात्त्विक्यादिभेदेन तादृशत्वा सुफलाय त्रयं भावनिश्चयो हि श्रद्धापि भवति तथायं पुरुषोपि श्रद्धामयः श्रद्धाप्रधा
नो यो यच्छ्रद्धो यथा श्रद्धयोपेतः स एव स इति सात्त्विक्या श्रद्धयोपेतः सात्त्विकः एवं राजस्या राजसस्तामस्या तामस इति स्वं सत्ययजानरूपमंक्षेप

श्रीभगवानुवाच त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा सात्त्विकी राजसी चैव तामसी चेति तां शृणु २ सत्त्वा
नुरूपा सर्वस्य श्रद्धा भवति भारत श्रद्धामयोयं पुरुषो यो यच्छ्रद्धः स एव सः ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

द्वैपुराणवसानेहेववन्मन्यते न हि तत्सात्त्विकं पुंडरीकमिव देवान्नानुग्रहं तिनिमित्तकर्मण्यागति भिन्नमपि दोषमस्यापनुदेति यदि त्वेनं मंत्रतंत्रादिना सिद्धं देवी
वासनावशाद्यक्षादिरूपं मन्यते तदा तं यक्षा एवानुगृह्णन्ति ना एकं कामवतो निमकर्ममाराजंदोषमपनेतुमर्हति न हि देवता परा धीयहे स्वानुशक्नुते
यदि त्वयं प्रेतः पितामकुर्वं वमावाधिवेति सर्वेव मंममत्का एनमस्याविधिं ह्लपे प्रजपामीति मन्यते तदा तं पितरि वेतत्व बुद्धियोगा द्विपर्यस्तं तामसं देवे
ता एवानुगृह्णन्ति स्वदुर्भोगैः क्लेशनरके पातयंति ३

काम ३

का१

सत्वैकरूपत्वेप्यस्मात्तस्मात्सात्विकादयो देवादीनेव यजंते इत्याह यजंत इति यजंते यजंतीति ४ सात्विकानां दोषेलेशमभिप्रेत्याह अशास्त्रेति शास्त्रेविहि
हितं हिंसा... षिनाकौलिगाद्यागमेन विहितं घोरं स्वमांसहोमेन राज्ञा रणालोहितं हिनावादेवतासंतर्पणाद्यात्मकं ये जनाः तपस्तप्यंते ते तानासुरनिश्चया
न्विद्धीति द्वयोः संबंधः दंभोधर्मध्वजित्वं अहंकारः स्वस्मिन् पूज्यत्वबुद्धिः तयासंयुक्ताः कामरागो विषयाभिलाषः बलं साहसं तेनापि विषयसाधने उत्साहः
ताभ्यामन्विताः ५ कर्षयंतः कृशीकुर्वंतः भूतग्रामं करणसमूहं अचेतसोमूढाः मां चैवांतःशरीरस्थं भोक्तृरूपेण शरीरांतःस्थं मां परमेश्वरं वा भोगपस्य श

यजंते सात्विका देवान् यक्षरक्षांसि राजसाः प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः ४ अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः।
दंभाहंकारसंयुक्ताः कामरागबलान्विताः ५ कर्षयंतः शरीरस्थं भूतग्राममचेतसः मां चैवांतःशरीरस्थं तान्विद्ध्यासुरनिश्चयान्
६ आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ७

का। प१

रीरस्य कृशीकरणेन मदाज्ञालंघनेन वा कृशीकुर्वंतः तान्विद्ध्यासुरनिश्चयान् ६ अत्र सात्विकानां आहाराद्याहारं यज्ञतपोदानानां परिग्रहार्थं राजसतामस
सानां वर्जनार्थं च तेषु प्रत्येकं त्रैविध्यं विधीयते तथापि आहारत्रैविध्यं आरण्ये त्रैविध्यं च प्रागेवोक्तं आहारादीनां त्रैविध्यं प्रतिज्ञापूर्वकमाह आहारस्त्विति आ
हि सत इमाहारोन्नं अतः परं प्रायेण पदार्थस्य ए तथापि कचिकचिकिंचित्किंचिद्व्याख्यापते ७ ६ ६ ६ ऽऽऽऽऽऽ ६ ६ ६ ६ ६ ६

आयुर्जीवनं सत्वमुत्साहः बलं शक्तिः आरोग्यं रोगराहित्यं सुखं चित्तप्रसादः प्रीतिः अभिरुचिः एतेषां विवर्धनाः वृद्धिकराः ते आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः रसोपेताः स्निग्धाः स्नेहवन्तः स्थिराः देहस्थाः चिरकालस्थायिनः हृद्याः हृदयप्रियाः आहाराः घृतक्षीरादिरूपाः सात्विकप्रियाः ८ कट्विति अम्लितश्च सर्वत्र अतिशब्दोऽन्वेति अतिकटुर्निम्बादिः अत्यम्लस्तिलवणाद्युष्णाः प्रसिद्धाः अतितीक्ष्णो मरीचादिः अतिरूक्षः स्नेहशून्यः कंगुकोद्रवादिः दुःखं तात्कालिकीं पीडां

आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः ८ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ९ यातयामं गतरसं पूति पर्युषितं च यत् उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं १० अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते यष्टव्यमेवेति मनः समाधाय स सात्विकः ११ अभिसंधाय तु फलं दंभार्थमपि चैव यत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं १२

शोकः पश्चाद्भावि दौर्मनस्यं आमयो धातुवैषम्याद्रोगः तत्प्रदाः ९ यातयामं प्रहरात्प्राक् तं शीतलतां गतमित्यर्थः यातयाममर्धपक्वं निर्वीर्यस्य गतेत्येके गतरसं ... पूति दुर्गन्धि पर्युषितं दिनान्तरपक्वं उच्छिष्टं अमेध्यं यत् तादृशं भोजनं अन्नं तामसप्रियं १० यतो त्रिविधमाहारमुक्त्वा अफलेति विधिदृष्टः शास्त्रतया विहितः यष्टव्यमेवेति तु यत् तादृशं स्वफलं प्राप्तव्यमिति मनः समाधाय समाहितं कृत्वा यो यज्ञ इज्यते स सात्विकः ११ राजसं यज्ञमाह अभिसंधायेति १२ ॥

विधिहीनंशास्त्रोक्तविधिहीनंअसृष्टंनसृष्टंअन्नंयस्मिन्असृष्टान्नं १३ देवाःविष्णुमुख्याःद्विजाःब्राह्मणाः गुरवोमातृपित्राचार्यादयःप्राज्ञाःब्रह्मनिष्ठा
तेषांपूजनंआर्जवमकौटिल्यं १४ प्रियंचतत्हितंचप्रियहितंश्रवणकालेपरिणामेचसुखदमित्यर्थः १५ मनःप्रसादःरागद्वेषाद्यभावःसौम्यत्वंपराहि

न ३

विधिहीनमसृष्टान्नंमंत्रहीनमदक्षिणं श्रद्धाविरहितंयज्ञंतामसंपरिचक्षते १३ देवद्विजगुरुप्राज्ञपूजनंशौचमार्जवं ब्रह्मचर्य
महिंसाचशारीरंतपउच्यते १४ अनुद्वेगकरंवाक्यंसत्यंप्रियहितंचयत् स्वाध्यायाभ्यसनंचैववाङ्मयंतपउच्यते १५ मनःप्रसादः
सौम्यत्वंमौनमात्मविनिग्रहः भावसंशुद्धिरित्येतत्तपोमानसमुच्यते १६ श्रद्धयापरयातप्तंतपस्तत्त्रिविधंनरैः अफलाकांक्षिभि
र्युक्तैःसात्विकंपरिचक्षते १७ सत्कारमानपूजार्थंतपोदंभेनचैवयत् क्रियतेतदिहप्रोक्तंराजसंचलमध्रुवं १८ मूढग्राहेणा
त्मनोयत्पीडयाक्रियतेतपः परस्योत्सादनार्थंवातत्तामसमुदाहृतं १९

य नि १

तैषित्वंमौनंवाक्संयमः आत्मविनिग्रहोमनोनिरोधःभावसंशुद्धिःपरैः व्यवहारकालेमायाराहित्यंइतिएवंप्रकारंअमत्सरत्वादिकंएतन्मानसंतपउच्यते १६
त्रिविधंकायिकवाचिकमानसभेदेनयुक्तैः अवहितैः १७ सत्कारः लोकेसाधुरयमितिवाक्पूजामानः अभ्युत्थानाभिवादनादिः कायिकी [illegible] पूजा
लाभादिःएतदर्थंदंभेनचयत्तपःक्रियतेतत्राजसंचलंविनाशि अध्रुवंअनिश्चितफलंमूढग्राहेणअविवेककृतेनदुराग्रहेणआत्मनःशरीरस्यउ
त्सादनार्थंविनाशार्थं १९

दातव्यमेवेति बुध्या यद्दानं प्रदेयद्रव्यं दीयते न तु फलमुद्दिश्य दीयते कस्मै अनुकारिणे प्रत्युपकारासमर्थाय देशे कुरुक्षेत्रादौ काले संक्रान्त्यादौ यद्दीयते तत्सा
त्विकमिति संबंधः यच्च दानं पात्रे समर्पणं तदपि सात्विकमिति योजना अन्यत्र आद्यो दानशब्दः कर्मणि ल्युडन्तः प्रदेयद्रव्यवाची द्वितीयान्तः तत्संयोगात्संप्र
दाने चतुर्थ्यपि स्यादिति यस्तु भावल्युडन्तः त्यागमात्रवाची तेन तत्र पात्रभूतेषु न च चतुर्थ्यपेक्षा कर्मणा यमभिप्रैति स संप्रदानमिति पारिभाषिकत्वाः संप्र

दातव्यमिति यद्दानं दीयतेनुपकारिणे देशे काले च पात्रे च तद्दानं सात्विकं स्मृतं २० यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः दीयते
च परिक्लिष्टं तद्दानं राजसं स्मृतं २१ अदेशकाले यद्दानमपात्रेभ्यश्च दीयते असत्कृतमवज्ञातं तत्तामसमुदाहृतं २२

दानसंज्ञ यास्त्रकर्मविमन्नाभावेनाप्रवृत्तेः तेन पात्रे इति चतुर्थ्यर्थे सप्तमीति वा पात्रशब्दस्य चतुर्थीयमिति वा कल्पनं व्यर्थमेव दानशब्दस्य द्वमा
चदेशकालानुपकारित्वविशिष्टे दानमिमे काकोक्तिः पात्रे दानमिम परं उभयत्र समुच्चये तु महान्गुण इति भावः २० परिक्लिष्टं कथमेतावद्द्रव्यव्ययः
कर्तव्य इत्याकुलान्तो युक्तं यथा स्यात्तथा दीयत इति क्रियाविशेषणं २१ असत्कृतं प्रियभाषणपादप्रक्षालनादिपूजासत्कारसहितं अवज्ञा
तं पात्रपरिभवयुक्तं दानं प्रदेयं हिरण्यादि २२

च दृष्टार्थानां यज्ञदानतपः प्रभृतीनां संकल्पशंकायां तादृगुणपसिध्यर्थं प्रायश्चित्तमुपदिशपते ॐ तत्सदिति ॐमिति तदिति सदिति च त्रिविधस्त्रिप्रका
रोयं ब्रह्मणो निर्देशो नाम्ना पाठः यथा सहस्रनामानि एवमस्मिन्नपि नामपाठे श्रीपरेव नामानीत्यर्थः ओमिति ब्रह्मेति तैत्तिरीये तदिति एतस्य
महतो भूतस्य नाम भवतीमितरेयके सदेव सोम्येदमग्र आसीदिति छान्दोग्ये च एतेषां शब्दानां ब्रह्मनामत्वप्रसिद्धेः तेन नामत्रयेण ब्राह्मणाद

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा २३ तस्मादोमित्युदाहृत्य यज्ञ
दानतपः क्रियाः प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनां २४

यो विहिताः युगसर्गादौ ब्रह्मणा एतन्नामत्रयोच्चारणसामर्थ्यात् एव विधात्राभिप्रायो विहिताः प्रकाशिता इत्यर्थः यस्मादेतत्त्रयं नाम पूर्वके
एतेषां विधानं सपौरोहं तस्मात् त्रिविधेषु नामसु ओमित्येकमेव नाम उदाहृत्य ब्रह्मवादिनां वैदिकानां विधानोक्ताः यज्ञादयः क्रियाः स
ततं प्रवर्त्तन्ते तथा च श्रुतिः ओमिति ब्रह्मा प्रसौति ओं ३ शोमिति शस्त्राणि शंसन्ति ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति ओमिति सामानि गा
यंतीति यद्वा सर्वेषामृत्विजां क्रिया ओंकारपूर्विका इमेतद्दर्शयति २४

भी०
१७३

ॐ मिति नाम्नः काम्याकाम्यकर्मसाधारणोपनयत्तादौ विनियोगमुक्त्वा तदिति नाम्नो निष्कामेषु मुमुक्षुकर्मसु विनियोगं दर्शयति तदिति
मोक्षकांक्षिभिः फलं अनभिसंधाय विविधाः यज्ञतपःक्रियाः दानक्रियाश्च क्रियंते इति योजना तान् अनुफलं चेन्नाभिसंधीयते तर्हि किमभि
संधाय क्रियंत इत्याकांक्षायामाह तदिति क्रियंते इति सर्वाः क्रियास्तदिति ब्रह्मेति क्रियंते यथा ब्रह्मवादिभिर्ब्रह्मार्पणं ब्रह्म हविर्ब्रह्मा

तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः २५

ग्नौ ब्रह्मणा हुतं ब्रह्मैव तेन गंतव्यं ब्रह्मकर्मसमाधिना मुक्तैर्हि शास्त्रवाः ससाधनफलाः क्रियाः ब्रह्मैवेदं सर्वमिति बुध्या क्रियंते तथा मुमुक्षु
भिरपि सामर्थ्ये सदेव हि मुक्तानां स्वभाविकं शीलं तदेव मुमुक्षूणां शास्त्रेण विधीयत इति प्रसिद्धेः फलमनभिसंधायेति सा निष्कामत्वादि
त्यत्रापि सामर्थ्यादभिसंधायेति लभ्यते तेन फलमनभिसंधाय तदित्यभिसंधाय क्रियाः प्रवर्त्तंत इत्यन्वयोपि सुलभ एव तदिति ब्रह्माभि
धानमुच्चार्येति भाष्ये पि उदाहृत्येति पूर्वश्लोकोक्तक्रियानुवृत्त्या योजनमस्मद्गुरुक्ताभिप्रायेणोच्चार्य एव उच्चारणस्यापि ब्रह्मानुसंधा
नार्थत्वादिति दिक् २५

श्री०
१७३

मै ७

ॐ तत्सच्छब्दयोर्विनियोगमुक्त्वा सच्छब्दस्य विनियोगमाह द्वाभ्यां सद्भाव इति सद्भावे अस्तित्वे साधुभावे समीचीने च सच्छब्दः सदितिकं तिप्रशस्ते कर्मणि समत
त्ववेदो नवाहस्त वे तिमत शब्दः प्रयुज्यते आस्तिकैः २६ किं च यज्ञादौ स्थितिर्निष्ठा सदिति समीचीनेति उच्यते तदर्थीयं सच्छब्द इत्यर्थः क्षत्रं तदर्थीयं परमेश्वरा
र्थं कृतं कर्म सदित्येव समीचीनमित्येवाभिधीयते लोके जडेनं अस्मात्त्रिकं त्रिगुणा वायत्तादिकं अन्नदापूर्वकं ब्रह्मणोऽभिधानत्रयोच्चारणेन सात्विकं स

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते २६ यज्ञे तपसि दाने च स्थितिः सदिति चोच्य
ते कर्म चैव तदर्थीयं सदित्येवाभिधीयते २७ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ३
२८ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ७

गुणं च संपादितं भवति २७ सर्वत्र च अश्रद्धैव साद्गुण्यहेतुरिति व्यतिरेकमुखेनाह अश्रद्धयेति हुतं होमः दत्तं दानं तपः तप्तं अनुष्ठितं कृतं अश्रद्धया विहि
तं भगवन्नामत्रयस्मरणमपि पद्धामतत्सर्वमसत् अभावमिसुच्यते पार्थ अतएव तत् प्रेत्य परलोके नोपयुज्यते इह अस्मिन् लोके वा नैवानुपयुज्य
ते तस्मात् श्रद्धैव सात्त्विकी मातेव मुमुक्षुभिः शरणीकरणीयेति भावः २८ इति नैलकण्ठीये भारतभावदीपे गीतार्थप्रकाशे सप्तदशोऽध्यायः १७ ७

भी०
१७४

अस्यामष्टादशाध्यायां प्रथमेऽपोद्धातेतानां द्वितीयेसत्रितानांशेषेसुर्यादितानामर्थानांकार्त्स्न्येनोपसंहारार्थोयमंतिमोध्यायस्तत्रारम्भेतेतत्र पूर्वाध्यायांऽतेऽत्र श्रद्धयाहुतंतसर्वं अर्थमित्युक्तेतत्र फलावश्यंभाविनिश्चयः अदृष्टाच्चफलवतोकर्मणामेवांगंनतुकर्मविरहस्यस्वसमासस्यभा वरूपफलवर्जितस्य अभावाद्भावोत्पुत्तरयोगात्तस्मात् अदृष्टापेक्षंकर्मैकमपेक्ष्या अदृष्टादृष्टानपेक्षः संन्यासः श्रेयानित्यासेवंद्वयस्य श्रद्धात्रैविध्यप्रयुक्तेसात्विकादिभेदेनत्रैवीध्यंसंभवतियेनफलेनारतम्यंस्यात्तत्फलस्यदृष्टविदिहैष्पनिरूपिणस्यसर्वत्रतुल्यत्वात्तस्वसमा

अर्जुनउवाच संन्यासस्यमहाबाहोतत्त्वमिच्छामिवेदितुं त्यागस्यचहृषीकेशपृथक्केशिनिषूदन १

सोपाधिकर्मत्यागएवतर्हिसिद्धंतः समीहितंपरित्यज्योभिन्नोनर्हितयोर्वैलक्षण्यंविचारयेमित्याशयेनार्जुनउवाचसंन्यासस्येतिहेमहाबा होहेहृषीकेशहेकेशिनिषूदनेतिवहुत्वः संबोधयनजिज्ञासितेर्थेमाहात्म्यंदर्शयतिसंन्यासस्यतत्त्वंयाथात्म्यंत्यागस्यपृथग्भूतंवेदितुमि च्छामित्यागस्ययाथात्म्यसंन्यासात्पृथग्भूतंवेदितुमिच्छामीतिचकारेणानुकृष्यते १

हा २

म३ नो२

अत्रोत्तरं श्रीभगवानुवाच काम्यानामिति काम्यानां रागतः प्राप्तानां पुत्रकामेष्ट्यादीनां न त्वनुफलस्य कामनाविषयात्सर्वस्य कर्मणः फलवत्त्वनियमात्सर्वं
काम्यमेवेति नित्यादीनामपि मुमुक्षोः त्यागः स्यादिति तेषु च न समीहितमित्याशंक्याह सर्वेति सर्वेषां नित्यनैमित्तिकानां काम्यानां कर्मणां फलत्यागमेव संन्या
सं विचक्षणाः प्राहुर्न स्वरूपतस्त्यागं प्राहुस्तेन न हि दृष्टः संन्यासः सिध्यतीत्यर्थः अयमाशयः यद्यपि संन्यासत्यागशब्दौ निवृत्तिमेवेच्छतः तथापि संन्यासो रूपाद्
कायक्लेशभयाद्वा मोक्ष्याद्वा भवतीति तत्कारणानां सात्विकादिभेदेन भिन्नत्वात्तस्यापि सात्विकराजसतामसभेदेन त्रैविध्यं त्रिविधस्त्यागः प्रधानत्वं

श्रीभगवानुवाच काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः २

६१ नो१

चतुर्वोरं न चाविरक्तो अधुना त्वमसक्तकर्मापि दृष्टं विद्वेषहीनो दृश्यते यथोक्तं वार्त्तिकाचार्यैः शमादिहीनो बहिश्चित्ताः मिथुनाः कलहोत्सुकाः संन्यासिनोऽपि
दृश्यन्ते दैवसंदूषिताशया इति तस्माद्विरक्तस्य [illegible] संन्यासापेक्ष्या निष्कामकर्माचरणमेव श्रेय इत्याशयेन भ
गवता काम्यकर्मत्यागः संन्यासत्वेन नित्यादिकर्मणां फलानभिसंधानं च त्यागत्वेन तत्त्वत इति तस्मात्स्वरूपात्कृतः संन्यासोऽप्यसन्नेवेति संन्यासाद्दुष्क
रः स्यान्न इति स्वफलेहानं तेन समर्थ इति युक्तमुक्तं भगवता अत्र शङ्कयाहुः तत्सर्वं व्यर्थमिति यत्तु नित्यानामेव परिहाणयोगात्काम्यानां त्यागः स्वरूप
तोऽपि त्यागः पूर्वार्धस्यार्थः सर्वेषां कर्मणां फलत्यागस्तु उत्तरार्धस्येति व्याख्याने पहृदय प्रदर्शनं पण्डितम्मन्यैरिमे लोकेन पौनरुक्त्यमावहतीत्युपेक्ष्यते ४

न ३

इदमेव पक्षद्वयमाह त्याज्यमिति एके मुख्याः मनीषिणो मनोनिग्रहसमर्थाः परमात्मनिष्ठत्वन्न विविदिषाणां दोषवत् रागादिवद्यथा त्याज्यस्तद्वत्कर्म
त्याज्यमिति प्राहुः अपरे तु विविदिषार्थिनां यज्ञादिकं न त्याज्यमिति चान्ये आरुरुक्षवोऽनुवर्त्तन्ते यथा चाह द्विविधा अनयद्वृपलभ्य मेनेन कर्मणा न प्रजया धनेन त्यागेनै
केनामृतत्वमानशुः कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इत्याद्याः अविद्वद्विषयमेवैतन्महद्द्वयं विदुषां तु कर्मसु प्रवृत्तिकारणस्याज्ञानस्य नष्टत्वात्

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः यज्ञदानतपःकर्म न त्याज्यमिति चापरे ३ निश्चयं
शृणु मे तत्र त्यागे भरतसत्तम त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ४

स्वतः सिद्ध एव त्याग इति तात्पर्यवृत्ति कर्मविधिर्वा तत्त्यागविधिर्वा न प्रवर्त्तेते यथोक्तं न कर्मणामजेयो योगी कर्मभिर्लिप्यते तल्लक्षणावित्तिनिश्चयमिति तत्र कर्म
णां त्यागात्यागविप्रतिपत्तौ सत्यां प्रथमोपात्ते त्यागे विषये मम वचनात्त्वं शृणु हि यस्मात् हे पुरुषव्याघ्र त्यागस्त्रिविधः सात्त्विकराजसतामसभेदे
न त्रिप्रकारः परिकीर्तितः शास्त्रदृढवैराग्यपूर्वकः कर्मसंन्यासः सात्त्विकः आयासभयात्त्यागो राजसः मोहात्त्यागस्तामस इति तस्मादिह हेतुत्वा
त्यागो निश्चयेनैव विचारणीय इत्यर्थः ४

स्वीकृत्य गृहस्थायेन संन्यासस्वरूपकथनात् श्रीकृष्णमतमसंन्यासपक्षं उपन्यस्यति यज्ञेति यज्ञादिकं कर्म न त्याज्यं किंतु कार्यमेव विधिगृहीतेन पुंसा सम्यक् अवश्यं अनुष्ठेयमेव तत् तस्य करणे प्रमत्ततया यस्त्ववर्णात् चकारो हेत्वर्थः यस्मात् यज्ञो दानं तपश्चैव मनीषिणां निष्कामाणां हंसाद्यहितत्वेन पावनानि चित्तशोधकानि तथा च श्रुतिः त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयः सर्व एते पुण्यलोका भवन्तीति यज्ञादीनां गृहस्थधर्माणां तपसो वनस्थधर्मस्य आचार्यकुलवासस्य ब्रह्मचारिधर्मस्य च पावनत्वं दर्शयति श्रुतिः अपि यज्ञदानशब्देन गृहस्थधर्मा ज्ञेयाः तप

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् यज्ञो दानं तपश्चैव पावनानि मनीषिणां ५ एता
न्यपि तु कर्माणि संगं त्यक्त्वा फलानि च कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं ६ ॥ ॥

इति वानप्रस्थधर्मः परिशेषात् कर्मेति ब्रह्मचारिधर्मो ज्ञेयाः ५ एवमसंन्यासपक्षमुक्त्वा श्रीभगवान् स्वमतमभिमतं संन्यासं त्यागं समुच्चयपक्षं दर्शयति अपि शब्द एवशब्दार्थः एतान्येव कर्माणि यज्ञदानतपांसि संगं त्यक्त्वा अहमेतेषां कर्तास्मि यावदपमेतानि कर्तव्यानीत्यभिमानं वयोवर्णाद्यध्यासनिमित्तं त्यक्त्वा एतैरनुष्ठितैरहं स्वर्गं वा चित्तशुद्धिं वा ज्ञानं वा प्राप्स्यामीति फलानि त्यक्त्वा चकारादेषामकरणे मम प्रत्यवायो भविष्यतीत्येतदमपि अभिसंधिं त्यक्त्वा ब्रह्मणि निष्ठुर संगत्वभावेन पुरुषेण कर्तव्यानि इति एवंप्रकारं मे मम मतमुत्तमं पूर्वमतात् श्रेष्ठं तत्र कर्तृत्वाभिमानरूपेण संगेन प्रत्यवायो मा भूत् भयात् च कर्मानुष्ठानं विहितं च तत् तदभावात् संगत्यागांशेन कर्मणां त्यागः स्वरूपेण नत्सराइति भेदः ६ ॥ ॥ ॥ ॥

गी०
१७६

प्राक्प्रतिज्ञातं त्यागत्रैविध्यमाह नियतस्येति तु शब्दः पूर्वोक्तपक्षद्वयव्यावृत्त्यर्थः यस्मादविहितस्य मुमुक्षोः नियतस्य अवश्यानुष्ठेयस्य कर्मणः स
न्न्यासः स्वरूपेण त्यागो नोपपद्यते न युज्यते अशुद्धस्य शुद्धिहेतुत्वात् एवं सति यो मोहादज्ञानात्तस्य नियतस्य कर्मणः परित्यागः स तामसः परिकीर्तितः अव
श्यकं च मन्यते चेति विप्रतिषेधात् ७ एवं तामसमुपपाद्य राजसं त्यागमाह दुःखमिति [illegible] दुःखमेवेदं कर्मेति मत्वा कायक्लेशभयात् त्यजेत्स
तमसप्रमानन्तस्मात्स्वहेतोः राजसं तेन गुणेन निर्वृत्तं त्यागं कृत्वा त्यागफलं चित्तशुद्धिमसौ नैव लभेत ८ एवं द्वाभ्यां श्लोकाभ्यां तामसराजसौ न मुमुक्त्वे
त्यागावुक्तौ तामसराजसयोः संभवस्य भगवतैव मोहात्तस्य परित्याग इति कायक्लेशभयात्त्यजेदिति च वचनात् तत्त्वविदः संभवति मूढस्य करोति

नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः ७ दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ८ कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन संगं त्यक्त्वा फलं चैव स त्यागः सात्विको मतः ९

चेति विप्रतिषेधात् यदि करोति नैव मूढः यदि मूढस्तर्हि नैव करोति एवं कायक्लेशात् बिभेति नैव करोति यदि करोति नैव कायक्लेशाद्बिभेति तस्मात्करोति
कायक्लेशाद्बिभेति चेति विप्रतिषिद्धं अतस्तामसराजसयोः मुमुक्षुत्यागयोः असंभवान्नैवोक्तौ सात्त्विकस्य मुमुक्षुत्यागः संभवति यथास्मा[illegible]के नयाकु
मुमाश्रितं लोहितं विवेकिनोऽप्रतीतित एवास्ति न वस्तुत एवमात्मनि देहाद्यध्यासे विवेकिनो कर्तृत्वप्रतीतित एवास्ति न वस्तुतः इति वक्तुं शक्यं एवं वक
र्तृत्वाभिनिवेशशून्यः मुमुक्षुः प्रतीतितः करोत्येव न वस्तुतः संभवत्येव मुमुक्षोरपि सात्विकस्त्यागः इति तमेव मुमुक्षुत्यागोऽधिकारहेतुं प्रशंसार्थमाह कार्यमिति का
र्यं कर्त्तव्यमित्येव यत्कर्म नियतं नित्यं क्रियतेऽर्जुन ९

म२

राम
१७६

संगंचसक्त्वाचेतिअवधारणांशागुरुस्यामागपदस्यव्याकृतमर्थमएवंमत्वत्यागः स्यातिकोमतः वेदेदृष्टंतथाचश्रुतिः ईशावास्यमिदंसर्वंयत्किंचितजगत्यांज
गत् तेनत्यक्तेनभुंजीथामागृधः कस्यस्विद्धनमिति ईशापरमेश्वरेणसर्वकारणकर्त्रीत्मप्रवर्तकेनइदंजगतस्थावरजंगमंजगत्यांब्रह्मांडेस्थितंवास्यमाच्छादितं
व्याप्तं येनहेतुनासर्वंजरधीनंतेनकारणेनत्यक्तेनत्यागेनकर्तृत्वभोक्तृत्वाभिमानवर्जनेनभुंजीथाः विषयान्भुंक्ष्व मागृधः गर्धकांक्षांमाकार्षीः कस्यचिद्धनेनकस्या
पितवस्वामित्वमस्तीतिदृष्टैवतन्त्राद्युद्देश्यमर्थः एवंकर्माण्यपियज्ञादीनिकर्तृत्वाभिमानंसक्त्वाकुर्वन्मंगलेपीनभविष्यतिएतद्व्यतिरेकेणचउपायांतरंनास्तीति
अग्रिममंत्रेणप्रदर्शयतेकुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाः एवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरेइतिइदमेवमुख्यमस्वमतेभावनाप्रदर्शितिएता
न्यपितृकर्माणीतिश्लोकेनतुनित्यानांफलमेवनास्तिकिंत्यक्तव्यमितिचेतदुत्तमेवभगवद्वचनान्तेषामपिफलमस्तीतिज्ञानीहिनिष्फलवेदेनानुष्ठानासं
भवात्तथाचापस्तंबः तद्यथाम्रेफलार्थेनिमित्तेछयागंधइत्यनूत्पद्यते एवंधर्मंचर्यमाणमर्थाअनुत्पद्यंतइति अनेनुषंगिकंफलंनित्यानांदर्शयतिअकु
र्वन्वस्तवायस्मृत्यापितेषांअसवायपरीहारः फलमितिप्रदर्शितेधर्मता यागमपनुदतीत्यादिनाचनित्येष्वपिकर्मसुफलंदर्शयतेतदेवत्यक्तव्यमितिनको
पिविशेषः ८

भी०
१७७

एवममुख्यंसात्विकंत्यागमुक्त्वामुख्यंतमाहनद्वेष्टीतिसत्वेनसम्यग्याविष्टोव्याप्तस्त्यागीमुख्यःसात्विकस्त्यागीसंन्यासीमर्थःअकुशलंअसुखदंकर्मत्रिष
वनस्नानचतुर्गुणाशेचभिक्षाटनादि प्रयासरूपेनद्वेष्टिकुशलेमिष्टान्नभिक्षादौनानुषज्जतेनसंगंप्रीतिंकरोतिपद्धाकर्मकुशलेमेवारिकर्मकुशलेशिष्या
दौनसज्जतेतत्राकुशलेवानद्वेष्टिएतेनरागद्वेषशून्यत्वमस्यदर्शितंतद्रूपिकुतइत्यपेक्षायामाहमेधावीतिऊहापोहकुशलवन्नयानिमानिमवस्तुविवेचनादौप्र
ज्ञावानस्मात्एवछिन्नसंशयःकिंकर्माणिएवमुक्तिसाधनानिउतसंन्यासएवेतिविचिकित्सारहितःएवंत्यागीसनेनयज्ञोदानंतपःकर्मनत्याज्यमित्युक्ताःस्त्या
गाच्याहृताःमेधावीसनेनमोहात्तस्यपरित्यागइत्युक्तातामसत्यागाद्व्यावृत्तिःसर्वाहैनत्यागोदुःखाभावप्रतिपादनेनकायक्लेशभयात्त्यजेदित्युक्ताद्राजसा
गाद्व्यावृत्तिःछिन्नसंशयइत्यनेनकार्यमित्येवयत्कर्मेत्युक्तादमुख्यसात्विकत्यागाद्व्यावृत्तिः नत्यसौकर्माणांतुछत्वंसंन्यासस्यमहाभाग्यत्वंतत्त्वतोवेदवेद्य

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते । त्यागी सत्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १० ॥

चेत्स्तामपिकर्मसुनतिष्ठतनहितस्यापशमार्थीनिकरस्थंज्ञानन्द्वीमहाफलंज्ञानन्श्रीघ्रोषमद्गत्तस्यपार्थसिपल्वक्षाणमपिरमेतसंशयच्छेदपिहेतुःसत्व
समाविष्टइतियतःसत्वेनैवकर्त्रासम्यक्त्याविष्टोयंनतुअयंसत्वमाश्रितइतिमहान्विशेषःएवंचपूर्वश्लोकोक्तस्यसात्विकत्यागस्यस्यकर्मयोगफलभूतो
यंमुख्यःसंन्यासोविविदिषाणामनुष्ठेयोयद्दहोवविरजेतद्दहोवप्रव्रजेतएतमेवप्रव्राजिनोलोकमिच्छन्तःप्रव्रजन्तीतिश्रुतिभ्यःभाष्येतुननुकर्मपरित्याग
स्त्रिविधःसंन्यासइतिचप्रकृतःतत्रतामसोराजसश्चत्यागःकथमिहसंगफलत्यागत्वजीयत्वेनोच्यतेत्रयोब्राह्मणात्त्यागनात्त्रषडंगाद्देहोकृतित्रियत्त
नीयइतितद्वत्तेनेषदोषःत्यागसामान्येपूर्वस्तुत्यर्थत्वात्अस्तिकर्मसंन्यासस्यफलाभिसंधित्यागस्यचत्यागत्वसामान्यंतत्रराजसतामसत्वेनकर्मत्यागस्तु
दयाकर्मफलाभिसंधित्यागःसात्विकत्वेनस्तूयतेसत्यागःसात्विकोमतइ

श्री०
१८०

मि २

तिष्ठंथेनत्यागेत्रैविध्यंसमाधायएवंसंगफलत्यागपूर्वकंनित्यकर्मानुष्ठानेनविशुद्धांतःकरणस्यतत्त्वज्ञानाभिमुखस्यसंनिष्ठाकमेकथवार्थीयंश्लो
कइत्युक्तः तथैवश्लोकंव्याख्यायपूर्वोक्तस्यकर्मयोगस्यप्रयोजनमनेनश्लोकेनोक्तमित्युपसंहृतं।अनेनतुफलांशेधिविशिष्टस्यकर्मणस्त्यागस्त्रिविधः
विशेषणाभावात्विशेष्याभावात्उभयाभावात्त्याद्यात्रैवविधिस्थितः द्वितीयस्तुतामसराजसभेदेनद्विविधोप्यत्रैवनिर्दिष्टः तृतीयस्तुकर्मा
नधिकारिणाविविदिषुणाचकर्तुंयोग्योद्विविधः तत्रैषःस्थितप्रज्ञलक्षणादौप्राग्व्याख्यातः द्वितीयस्तुनैष्कर्म्यसिद्धिंपरमामित्यत्रवक्ष्यतेतत्रभा
ष्येतुसंन्यासविधाःप्रतिज्ञापदेहुयथावत्प्रदर्शितःतृतीयापिकेनविन्न्यासेनप्रदर्शिताश्चतुरएकस्याद्वयोरंतर्भाविहत्वोद्वरएवविधैरुपयाद्यंतृतीया
प्रदेशांतरोप्रक्षिप्तमितिवक्ष्यतेप्रतिज्ञायाश्चनिर्वाहइतिशेषः१०

तिपा २

म ५

भी॰
१७८

स्वयमेव सात्त्विकं त्यागं अनूद्य तत्प्रयोजनमाह न हीति देहभृता देहाभिमानिना हि यस्मात् अशेषतः कर्माणि त्यक्तुं न शक्यं अशक्यं प्राणाया
मालोपप्रसंगात् तस्मात् अविहितः सन् यः कर्मफलत्यागशीलः तु शब्दश्चार्थः स एव त्यागीत्यभिधीयते यस्त्वशेषतः कर्माणि त्यक्तुं श[क्नो]ति पर
मार्थदर्शी स मुख्यस्त्यागीत्यर्थः ११ एवंभूतस्य त्यागस्य फलमाह अनिष्टमिति अनिष्टं नारकतिर्यगादि इष्टं देवतादिरूपं मिश्रं मानुष्यं भावं इति कर्म
णः कर्मजातीयस्य फलं त्रिविधं प्रेत्य मरणानन्तरं त्यागिनां पूर्वोक्तसत्त्वसंन्यासरहितानां भवति मुख्यसंन्यासिनां तु न कश्चिद्भवतीति तेषां कर्तृत्वाभिमाना

नहिदेहभृताशक्यंत्यक्तुंकर्माण्यशेषतः यस्तुकर्मफलत्यागीसत्यागीत्यभिधीयते ११ अनिष्टमिष्टंमिश्रंचत्रि
विधंकर्मणःफलं भवत्यत्यागिनांप्रेत्यनतुसंन्यासिनांक्वचित् १२

भावात् अन्ये तु गौणसंन्यासिनामेवायं कर्मलेप इत्याहुः तथा च व्याख्यातं कार्यमित्येव यत्कर्मेत्यत्र संन्यासिनां गौणसंन्यासिनां च विशेषो न स्यात्तन्नैवे
वं मुख्यसंन्यासिनां गौणसंन्यासिनां च विशेषापत्तिरिति वाच्यं उभयोरप्यमुत्र कर्मालेपसाम्येपि पूर्वकर्मदाहादाहकृतस्य विशेषस्य सत्वात् गौणसंन्यासि
नां जन्मान्तरादिकमपि पूर्वकर्मभिर्भविष्यति आपन्नं वोक्तं प्रतिदर्शनेन योगभ्रष्टगतिवर्णनात् तदीयकं न तु तस्य धावता वफलं स्वर्गादि भवितुमर्हत्यनुदि
ष्टत्वादिति १२

श्रीराम॰
१७८

ननु आत्मनः कर्मलेपनिमित्तं यत्कर्तृत्वानुसंधानं तत्किं योषिदस्मिदृष्टादिवदाहार्यं तु तत्वास्तवमेव सहि द्याध्ययन तुक्तेर्न्वे नौत्रमिति शास्त्रदृष्टा
कर्तृत्वतिरोधाने नाकर्तृत्वमेव भाव्यते इत्याशंक्य अग्नित्वे तु दृष्टायां योषिति दृष्ट्वा दर्शनेन कल्पिते नाकर्तृत्वेन स्तत्कर्मलेपस्यासंभवात् आ
घं निरस्य द्वितीयमुपपादयितुं नयी कामाचरति हे महाबाहो सर्वकर्मणां सिद्धये इमानि वक्ष्यमाणानि पंच कारणानि निर्वर्तकानि मत्सकाशाद्वोध
स्ववचने विश्वासोत्पादनार्थं कारणानां सम्मूलत्वमाह सांख्ये कृतान्ते प्रोक्तानीति सम्यक्ख्यायते प्रकाश्यते येन तत्त्वानि स्यात्मा ना
त्मपदार्थरूपणाय यस्मिन् तत्सांख्यं वेदान्तशास्त्रं तस्मिन् वेदान्ते नष्टीकृतस्य कर्मणोऽन्तः परिसमाप्तिर्यस्मिन् सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इ
ति आत्मज्ञाने सति सर्वकर्मणां समाप्तेर्दर्शनात् तस्मिन् सांख्ये कृतान्ते प्रोक्तानि १३ तान्येव पंच गणयति अधिष्ठानमिति अधिष्ठानं इच्छाद्वेषसुख

पंचैतानि महाबाहो कारणानि निबोध मे सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणां १३ अधिष्ठानं तथा कर्ता क
रणं च पृथग्विधं विविधाश्च पृथक् चेष्टा दैवं चैवात्र पंचमं १४

दुःखज्ञानादीनामभिव्यक्तेराश्रयो देहः तस्मात् आत्मत्वं चार्वाकमतिरिक्तस्य समस्तवादिसिद्धं तथा कर्ता बुद्धिविशिष्टश्चिदाभासः प्रमाता तेन ना
हं मम विषयोऽहंकारः तथा अनेन तद्देहस्य अनात्मत्वे पक्षे पुरस्कृते देहस्यैव सृष्टौ प्रलये च तस्मान्नाप्रमविनाशयोर्दर्शनान्न स्तत्वविशेषणानाशादि
शिष्टनाशे विशेषणो आत्मा च विशिष्टो न विनाभिषसम्पत् विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति यथा अग्नेः क्षुद्रा विस्फु
लिंगा व्युच्चरंत्येवमेतस्मादात्मनः सर्वे प्राणा आत्मनो व्युच्चरंतीति विशिष्टस्य कार्यानिविशिष्टस्य चानतिरेकेणात्मत्वं सिद्धं कारणं च शब्दाद्युपलब्धि
साधनं पृथग्विधं द्वादशविधं पंच कर्मेंद्रियाणि पंच ज्ञानेंद्रियाणि मनो बुद्धिश्च तथा विविधाश्च पृथक् चेष्टाः वायवीयाः प्राणादिरूपाः दैवं पुण्यपा
पस्पृष्टं तत्रत्य कारणानुग्राहक सूर्यादिदेवताख्यं च पंचमं पंचानां पूरणं १४

शरीरेति न्याय्यं धर्म्यं शास्त्रीयं विपरीतमन्याय्यं अधर्म्यमशास्त्रीयं ननु शारीरादिभिस्त्रिभिरारभ्यन्ते पंचैते तस्य हेतव इति च विप्रतिषिद्धमुच्यते नैष दोषः
अत्रापि शरीरपदेनाधिष्ठानस्य नरपदेन कर्तुर्वाङ्मन इति करणस्य आरभत इति चेष्टानां न्यायमिति धर्माधर्मदृष्टस्य दैवस्य च संग्रहात् सर्वेषु कर्मसु पंचानां समा
नेपि उपयोगे विधिप्रतिषेधलक्षणं त्रिविधमेव कर्म शास्त्रप्रसिद्धमिति इदं शारीरं कर्म इदं मानसमिदं वाचकमिति व्यपदेशो देहादीनां प्राधान्यापेक्ष इति
न कश्चिद्विरोधः १५ एवं प्रतिपादनफलं कर्तृत्वस्यारोपितत्वसिद्धि [illegible] कर्तृत्वस्य स्वाभाविकत्वसिद्धिश्चेति द्वाभ्यां श्लो

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः १५ तत्रैवं सति कर्तारमात्मानं केव
लं तु यः पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः १६

काभ्यां दर्शयति [illegible] तत्रेति तत्र तस्मिन् कर्मणि एवं उक्तरीत्या पंचभिर्निर्वर्त्ये सति केवलं तं अकर्तारमपि आत्मानं चेतनं साक्षी चेता केवलो निर्गु
णश्चेति श्रुतेः अधिष्ठानादिपंचकप्रचारदर्शिनमुदासीनमपि यः कर्तारं कर्तृत्वाश्रयं पश्यति स दुर्मतिः पापाभिभूतमतिर्न पश्यति अध एव
सः अदर्शने हेतुः अकृतबुद्धित्वादिति शास्त्राचार्योपदेशशमदमादिसंस्कृता बुद्धिर्यस्य स कृतबुद्धिः तद्विपरीतोऽकृतबुद्धिस्तस्य भावस्तत्त्वं तस्मा
त् यथा स्वमुखस्यादर्शपात्रसंसर्गित्वं पश्यता जलचांचल्यमपि तत्रारोप्यते एवमात्मनो बुद्धिसंसृष्टत्वं पश्यता बुद्धिधर्मः कर्तृत्वादिरप्यात्मन्यारोप्य
त इति भावः १६

द्वितीयं प्रयोजनमाह यस्येति यस्य प्रमातुर्भावः प्रमयमात्रस्वरूप आत्मा नाहंकृतः अहमिव कृतो अहंकारतादात्म्यं प्रापितो नाहंकृतः तथा न यस्य बुद्धिर्लिप्यते आत्माभावेनांजिता न भवति यस्य बुद्धेर्यतिरिक्तमात्मानं प्रपश्यतो बुद्धिधर्माः कर्तृत्वादयो नात्मनि प्रतीयन्ते इति कर्त्रात्मवादितार्किकनिरासः यस्य च आत्मधर्मश्चैतन्यमात्रयो बुद्धौ न संक्रान्तः इति बुद्धिमेव चेतनां वदतो बौद्धस्य निरासः इत्थंविधो योसौ असिमित्तो मा मधमर्थ्याक्षेपस्य नास्तीत्य

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमांल्लोकान्न हंति न निबध्यते १७ छ छः

र्थः अत्र न हंतीत्यात्मनि कर्तृत्वाभावो दर्शितः न निबध्यत इति दुःखादिसंसर्गनिषेधेन भोक्तृत्वाभावो दर्शितः हत्वापि स इमांल्लोकान्न हंति न निबध्यत इति तु स्तुतिमात्रं कर्तृत्वस्यैव बाधेन हंतृत्वायोगात् तदध्यपठवत्कर्तृत्वानुदृष्टत्वापि हननक्रियायां प्रवर्तकस्य रागद्वेषादेरभावाच्च एतेन आत्मनस्तात्त्विकमकर्तृत्वं भावयता हननकर्मण्यतात्त्विककर्तृत्वाभिमाननिमित्तं स्वफलं संप्राप्तुं नार्हतीति दर्शितं नहि रज्जुबुद्ध्या हत्वा प्रहरतः सर्पद्रोहो भजत्येन फलं भवति सर्पं तु तथा कुर्वतस्तद्भवत्येव तद्वदिहापि ज्ञेयं १७

९२ ६१

न निवध्यते इति भोक्तृत्वमपि प्रत्याख्यातं तन्न मृष्यामहे नहि कुलालादयः स्वयुक्ताः एव घटादीन्निर्वर्तयन्ति किंतु २

समाप्तः सात्विकत्यागोपपादनो योगी ग्रन्थात्मनोऽकर्तृत्वोपपादनप्रकारः अत्राह सांख्येयः यदुक्तं पंचैते तस्य हेतव इति यच्चोक्तं नाहं तोति तन्न मृष्या
महे न सः परिणामी चेतनः परिस्पंदात्मकस्य कायिकादिभेदेन त्रिविधस्य कर्मणः कर्त्ता भवतीति वक्तुं युज्यते यत्तु भोक्तृत्वं पुरुषस्य युक्ताः अस्य था
भोक्तृणाम भावे व्यर्थैव तत्प्रवृत्तिरित्यायततीति एवं प्रधानमात्रा भूताः कर्त्रादयः पुरुषस्य भोगापवर्गसाधनप्रयुक्ताः सर्वाणि निवर्त्तयंतीति तस्मा
त्पुरुषस्य भोक्तृत्वस्वभावत्वात् तस्य कर्तृत्वानुसंधानपूर्वकमपि कृतं कर्म भोक्ता स्वरूपमेव भोक्तव्यमिति सात्विकत्यागोपिकर्मालेपवचनमसंगतमि
ति अत्र प्रतिविधत्ते ज्ञानं ज्ञेयमिति ज्ञानं ज्ञायतेऽनेन प्रकाश्यते वस्तु तत्त्वमनेनेति प्रमाणादिप्रमाणजमोघटादिप्रकाशः वर्त्तमानमती तं वाज्ञेयं बोधविष
यो घटादिः परिज्ञाता विषयी सा भासमनीहः सो भोक्तुमिमुच्यते एवं रूपप्रकारत्रयवती त्रिविधा कर्मणां चोदना नाम यमनुष्ठितं सत्कर्मणि प्रवर्त्तक

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना करणं कर्म कर्त्तेति त्रिविधः कर्मसंग्रहः १८ ॥ ॥ ६७ ॥

मित्यर्थः सत्यपि ज्ञेये ज्ञातरि वा ज्ञाने प्रवृत्त्यनुपपत्तेः ज्ञाने ज्ञातरि च सति देशकालव्यवहिते ज्ञेये प्रवृत्त्यनुपपत्तेः सत्यपि संस्कारात्मके ज्ञाने ज्ञेये च वर्त्त
नि हिते तथापि प्रमात्रभावात् प्रवृत्त्यदर्शनादेतत्त्रयं त्रिरेषु विधं भवत्यतो मापेक्ष्य समस्तं कार्यं जनयति हानोपादानोपेक्षा बुद्धित्वात् ज्ञानादि अनुकूले
व्यापारे प्रवर्त्तयंतीति कर्तव्यताभिधेयमित्यर्थः चोदनेति करणादिषु प्रवृत्तिहेतुप्रथमानत्वेन चोदनाशब्दः कृतवाचि लिंगमभिप्रायं लोकाख्यं वालि
गस्पेति वा तथा करणमिंद्रियं कर्म तेन क्रियमाणं विषयग्रहणं कर्तापूर्वोक्तः एव परिज्ञाता एतत्त्रयं समुदितं सत्कर्मसंग्रहः ईप्सिततमस्य भो
ग्यस्य संग्रहः संगृह्यते अस्मिन्निति संश्रयस्थानं भोक्तृसर्वः सत्यपि भोक्तरि करणे च क्रियां विना भोगासंभवात् किं पाया ग्राम्य१८

यं विना स्वरूपलाभाद्याश्रयस्य करणं विना भोगकर्तृत्वानुपपत्तेः एतत्त्रयमिति तं समस्तं भोक्तेत्युच्यत इत्यर्थः तथा च श्रुतिः आत्मेन्द्रियमनोयुक्तं
भोक्तेत्याहुर्मनीषिण इति इन्द्रियेत्र सिद्धं मनस्तन्मनेन बुद्धिरेव गृह्यते तद्युक्तं इन्द्रियद्वारा मनस्तेनैव समहमेव बन्धक्रियां इन्द्रियं च मनश्च युक्तं चेति विग्रहे इन्द्रि
यमनोयुक्तमिति द्वन्द्वैकवद्भावः एवं अयं भोक्ता आत्मेत्याहुर्मनीषिण इति श्रुत्यर्थः एवं हि श्रुतिस्मृत्योर्व्याख्यानेन तयोर्मूलमूलिभावो युक्त
तेनास्था तथा च कर्तृत्ववत् भोक्तुरपि अज्ञानात्मगुणापतितत्वात् भोक्तृत्वं भोगकर्तृत्वं भोक्तृभावमिति निर्वचनात् यः कर्ता स एव भोक्तेति प्रतिपादना
त् अहमकर्ता भोक्तेति चानुसन्धानपूर्वकं कर्माणि कुर्वीत कर्तृत्वभोक्तृभावकृतकर्मलेपो नास्तीति सिद्धं भाष्येऽप्ययमेवार्थः येन तु कारणं क्रि
यायाः साधकरूपं दशविधं वा स्वं मनोबुद्धिरूपं मां तं कर्मसंग्रहः कर्म कर्तुरीप्सिततमं क्रियया व्याप्यमानमुत्पाद्यमाप्यं विकार्यं संस्कार्यं चेति च
तुर्विधं कर्ता क्रियाप्रयोजकः स्विद्धातुरपि एतत्त्रयं कर्मसंग्रहः कर्माश्रयः कर्तेत्यर्थः ज्ञानं विषयप्रकाशनशक्तिः ज्ञेयं विषयः परिज्ञाता ज्ञा
नाश्रयो भोक्ता एतत्त्रयं कर्मणां प्रवर्तकमिति व्याचक्षते तेषामपि आत्मानं कर्तारमपि सांख्यानामिव भोक्तृत्वेन प्रकृतेः प्रवर्तकत्वमेवा
शयः तथापि क्रियया व्याप्यमानस्य बलयांसमानिकादिनेशानहीस्पृधारिकं यस्य कर्मणः कर्तरि कोऽपि प्रवेशायोगः तस्य नित्या
भूयतमात्रविवक्षायां प्रकृते कथमनुपयोगं अस्माकं तु घटादिव्यापकक्रियायाः कर्मशब्दवाच्यत्वं मुख्यं कोऽपि प्रवेश इति क्रि
या क्रियावतो धर्मधर्मिणोरभेदापेक्षया युज्यते तथा ज्ञानेन प्रकाशमानं क्रियेति मते क्रियारूपेऽस्मिन् प्रवर्तके ज्ञानान्तरस्यापेक्षेति तत्र तत्र
तस्यास्तस्यापेक्षेत्यनवस्थानुवारा १८

प

वि

एवंश्लोकोक्तेऽज्ञानाद्विपर्ययेऽपिज्ञाताकर्त्ताचैकएवेतिप्रतिशिष्टः पंचेतयंप्राकृतत्वेनत्रिगुणात्मकत्वंप्रसिद्धंज्ञेयकरणयोर्घटकुठारकल्पयोः प्रसि
द्धत्वादर्थत्रयाणामेवप्रमेयकेत्रिविधत्वंविवृणोतुंप्रतिजानीतेज्ञानंकर्मचकर्त्ताचेतित्रयमेवगुणभेदतस्त्रिधानतुज्ञेयकरणेगुणसंख्यानेकापिल
शास्त्रेयद्यपितत्रएकस्यांप्रम दायांभर्त्तुःसुखंजायतेतंप्रतितस्याः सत्वोद्भूतत्वात्तामविंदतस्त्वेत्रस्यदुःखंजायतेतंप्रतितस्याः रजउद्भू

ज्ञानंकर्मचकर्त्ताचत्रिधैवगुणभेदतः प्रोच्यतेगुणसंख्यानेयथावच्छृणुतान्यपि १९ १९

तत्वात्तस्यामेवसपत्न्याद्वेषः तांप्रतितस्यास्तमसउद्भूतत्वात्प्रमदयैवसर्वेभावव्याख्याताइतिकापिलानांज्ञेयकरणयोरपित्रैविध्यं
प्रसिद्धंतथापिप्रमदारूपस्यएकस्यैवपुंसोनिमित्तभेदेनप्रीतिदुःखद्वेषविषयात्रपिभवंतीतिपूर्वोक्तव्यवस्थयानिर्मूलित्वात्प्रीत्यादीनां
कर्त्तृसमवायितयाप्रतीयमानानामालंबनभूतायाः प्रमदायाः प्रीत्याद्यात्मत्वंकल्पयितुंनशक्यतइतिनभगवतातयोस्त्रैविध
त्वमाख्यायतेअक्षरार्थःस्पष्टः १९

एवं ज्ञानादित्रयस्य त्रैविध्यं वक्तुं प्रतिज्ञाय ज्ञाने त्रैविध्यं तावदाह सर्वभूतेष्विति तथा कटककुंडलादिषु आवर्तमानेषु तत्त्वविदेकं कांचनमेवेदमिति
पश्यति एवं येन ज्ञानेन सर्वभूतेषु विभक्तेषु नानारूपभेदभिन्नेषु अव्ययमपरिणामिनमेकं भावं चिन्मात्रमीक्षते सर्वं ब्रह्मैवेति पश्यति तत् ज्ञानं
सात्त्विकं विद्धि एकात्म्यज्ञानमेव सात्त्विकमित्यर्थः २० भेदज्ञानस्य राजसत्वमाह पृथक्त्वेनेति यत् यत पृथक्त्वेन भिन्नत्वेन ज्ञानं तद्राजसमिति सं
बंधः पृथक्त्वेनेत्येतत् [illegible]णोति सर्वेषु भूतेषु पांचभौतिकत्वेनाविशिष्टेषु नानाभावान् पुरुष रतिर्यक् स्थावरत्वभेदेन नानाभावानिति बहुवचनं अ
त्यंतभेदप्रदर्शनार्थं पृथक् विधान् एकजातीयेष्वपि नरादिषु प्रत्येकं विभिन्नप्रकारान् यत् ज्ञानं वेत्ति विषयीकरोतीति येन ज्ञानेन वेत्तीति वक्त

सर्वभूतेषु येनैकं भावमव्ययमीक्षते अविभक्तं विभक्तेषु तत् ज्ञानं विद्धि सात्त्विकं २० पृथक्त्वेन तु यज्ज्ञानं नाना
भावान्पृथग्विधान् वेत्ति सर्वेषु भूतेषु तत् ज्ञानं विद्धि राजसं २१ यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकं अतत्त्वा
र्थवदल्पं च तत्तामसमुदाहृतं २२

व्ये एधांसि पचंतीतिवत् ज्ञानं वेत्तीति करणे कर्तृत्वोपचारो बोध्यः तेन आत्मनां परस्परभेदस्तेषामीश्वरात् भेदः तेभ्योऽपीश्वरादन्यो मत्स्वज
डवर्गस्य भेद इत्येवं औपाधिकभेदज्ञानं कृतार्किकाणां राजसमेवेत्यभिप्रायः २१ यत्तु ज्ञानं एकस्मिन् कार्ये देहे प्रतिमादौ वा कृत्स्नवत्
परिपूर्णवदेतावानेवात्मा ईश्वरो वेति सक्तं अभिनिवेशयुक्तं अहेतुकं निरुपपत्तिकं अतत्त्वार्थवत् परमार्थावलंबनशून्यं अल्पं तुच्छवि
षयत्वात् अल्पफलत्वात् यदेवंभूतं ज्ञानं तत्तामसमुदाहृतं २२

अथकर्मत्रैविध्यमाह नियतमित्यादिना नियतं नित्यं संगरहितं अभिमानवर्जं रागः इष्टे प्रीतिः द्वेषो ऽनिष्टे अप्रीतिः ताभ्यां कृतं इष्टानिष्टप्राप्ति
परिहारार्थं कृतं रागद्वेषतः कृतं तस्मात् अरागद्वेषतः कृतं निष्काममित्यर्थः फलानुवल्लीयतेनेनेति फलं क्रियया प्राप्यमनावसृज्य स्मरफलमनागं
तुकं परिपूर्णमविनाशि आत्मतत्त्वं तत्प्रेप्सुना कृतं विविदिषन्ति यज्ञेनेति श्रुत्या आत्मलाभार्थं यज्ञादेर्विनियोगात् तत् कर्म सात्विकमुच्य
ते २३ यत्तु कामेप्सुना फलार्थिना साहंकारेण वा यद्यपि सात्विकोप्यनात्मवित् साहंकारस्तथापि अहमेव कर्मकुशलो महाश्रोत्रिय इत्यभि
मानो हंकारस्तद्वता साहंकारेण वा शब्दः चार्थे क्रियते बहुलायासं अतिश्रमकरं तत्कर्म राजसमुदाहृतं २४ अनुबध्यतेनेनेत्यनुबंधः फ

नियतं संगरहितमरागद्वेषतः कृतं अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते २३ यत्तु कामेप्सुना कर्म साहंकारेण
वा पुनः क्रियते बहुलायासं तद्राजसमुदाहृतं अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषं मोहादारभ्यते कर्म तत्तामसमु
दाहृतं २५ मुक्तसंगोनहंवादी धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते २६ ६६६६

लं क्षयं शक्तेर्थानां च नाशं हिंसां परपीडां पौरुषं सामर्थ्यं अनपेक्ष्य अतालोच्य केवलं मोहादविवेकतो यदारभ्यते कर्म तत्तामसमुदाहृतं
२५ कर्तृत्रैविध्यमाह मुक्तेत्यादिना मुक्तसंगः त्यक्ताभिनिवेशः अनहंकारी गर्वोक्तिरहितः धृतिर्धैर्यं उत्साहः साधयिष्याम्येवेति बुद्धिनिश्च
यः ताभ्यां समन्वितः सिद्ध्यसिद्ध्योः कर्मणः आरब्धस्येति शेषः निर्विकारः हर्षविषादशून्यः कर्ता सात्विक उच्यते २६ ॥ ॥ ॥

रागीविषयलोलुपः अतएवकर्मणः फलंप्रेप्सतीतिकर्मफलप्रेप्सुः लुब्धः परद्रव्यादौसंजाततृष्णः तीर्थादौवाद्रव्यापरित्यागीहिंसात्मकः परपीडाकरस्व
भावः अशुचिर्बाह्यांतःशौचवर्जितः इष्टानिष्टप्राप्तौहर्षशोकाभ्यामन्वितश्चयःकर्तासराजसःपरिकीर्त्तितः २७ अयुक्तअवहितः प्राकृतोऽसंस्कृतबुद्धि
र्बालसमः स्तब्धः दंडवन्नमतिकस्मैचित्शठः शक्तिगूहनकारीनैष्कृतिकःपरावमानीवाअलसःअप्रवृत्तिशीलः कर्तव्येष्वपिनिषादीसर्वदाअवसन्नस्व
भावःदीर्घसूत्रीचिरकालीयकाहसाध्यंकार्यंमासेनापिकरोतीत्यर्थःयएवंभूतःकर्तासतामसउच्यते २८ बुद्धेर्धृतेश्चैविध्येनव्याख्यातुमाहबुद्धेरितितत्रबुद्धि
विशिष्टस्थिराभासःकर्त्तावुद्धिर्निर्णीते चपाठकंअत्रतुकेवलाबुद्धिर्निमतोनतदीयवृत्त्यंतरोपलक्षणार्थंत ... निविशेषोऽधृतिस्तुकथ्यतेत्रैविध्येनकथ्य
दृढ

रागीकर्मफलप्रेप्सुर्लुब्धोहिंसात्मकोऽशुचिः हर्षशोकान्वितःकर्त्तारराजसःपरिकीर्तितः २७ अयुक्तःप्राकृतस्तब्धःशठोनै
ष्कृतिकोऽलसः विषादीदीर्घसूत्रीचकर्त्तातामसउच्यते २८ बुद्धेर्भेदंधृतेश्चैवगुणतस्त्रिविधंशृणु प्रोच्यमानमशेषेणपृथक्त्वे
नधनंजय २९ प्रवृत्तिंचनिवृत्तिंचकार्याकार्येभयाभये बंधंमोक्षंचयावेत्तिबुद्धिःसापार्थसात्त्विकी ३०

तद्दृर्थः ३९ प्रवृत्तिनिवृत्तोशास्त्रविहितप्रतिषिद्धविषयेयजेतस्वर्गकामःनसुरांपिबेत्यादिरूपंकार्येकृतिसाध्यंस्वर्गादिअकार्येनित्यसिद्धंतेन
नित्यानित्यवस्तुनीभयाभयेकार्यनिमित्तेबंधमोक्षंचयावेत्तीतिपूर्ववत्कर्णोकर्त्त्वोपचारःबुद्धिःसापार्थसात्त्विकी ३० ३० ३ ३ ३ ३ ३

श्रीराम०

प्या एपा ना२

अ[illegible]वत्संदेहास्पदत्वेनस्पष्टमप्यत् ३१ अधर्ममितिविपरीतयाहितातिबुद्धिस्तामसीत्यर्थः ३२ ययाधृत्याअव्यभिचारिण्यासमाध्यनुगतयामनःप्रा
णेंद्रियाणांक्रियाश्चेष्टाःसंकल्पश्वासप्रश्वासशब्दादिग्रहणरूपायोगेनचित्तवृत्तिनिरोधेनएकाग्रतयावासंपन्नास्तास्तथैवनिरोधावस्थायामेकाग्रा
वस्थायांवाधारयतिविरामवस्थापयतिसाधृतिःपार्थसात्विकी ३३ ययाधृत्याधर्मादीन्धारयतेःनुरूप्यतनोतिप्रसंगेनधर्मादिःसंबंधेनफलकां
क्षीचभवतिपुरुषःसाधृतिःपार्थराजसी ३४ स्वप्नंनिद्राभयंत्रासंशोकंप्रमिद्धंविषादंविषण्णतांमदंअशास्त्रीयविषयसेवयाचित्तस्यविवश

ययाधर्ममधर्मंचकार्यंचाकार्यमेवच अयथावत्प्रजानातिबुद्धिःसापार्थराजसी ३१ अधर्मंधर्ममितियामन्यतेतमसा
वृता सर्वार्थान्विपरीतांश्चबुद्धिःसापार्थतामसी ३२ धृत्याययाधारयतेमनःप्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्या
धृतिःसापार्थसात्विकी ३३ ययातुधर्मकामार्थान्धृत्याधारयतेऽर्जुन प्रसंगेनफलाकांक्षीधृतिःसापार्थराजसी ३४ यया
स्वप्नंभयंशोकंविषादंमदमेवच नविमुंचतिदुर्मेधाधृतिःसापार्थतामसी ३५ सुखंत्विदानींत्रिविधंशृणुमेभरतर्षभ अ
भ्यासाद्रमतेयत्रदुःखांतंचनिगच्छति ३६

त्वंएतान्नमुंचतिधारयत्येवययासाधृतिःपार्थतामसी ३५ गुणभेदेनक्रियाणांचत्रैविध्यंउक्तंतत्फलस्यसुखस्यत्रैविध्यमाह सुखंत्वित्यादिना
अभ्यासात्पौनःपुन्येनसेवनात्प्रत्यस्मात्विकराजसतामसेवासुखेरमतेरतिंप्राप्नोतिप्रयस्माद्दुःखस्यप्रशोकादेरपिअंतंअवसानंनिगच्छ
तिनिश्चयेनप्राप्नोतितत्सुखंत्रिविधंशृणुपद्यान्वयमात्रार्थः सात्विकसुखस्यैवलक्षणमाहार्थात्तदायत्रसमाधिसुखेअभ्यासाद्रमतेनतुविषयसु
खइवआगान्दुःखांतंमोक्षंचनिगच्छतीत्यर्थः ३६

यत्र त्वभिरंसुः सर्वे प्राणिनो भ्यासं श्रयेत आध्यारंभकाले मनः प्राणेंद्रियसंयमनिरोधेन यद्द्वेसं तप्यमानस्य पशोरिव जायमानं विषमिवा ती वेद
नाकं परिणामे सात्त्विकाधृत्या निरूढासु मन आदिक्रियासु अमृतोपमं आत्माकारस्थं आत्मनः स्वस्यैव बुद्धेः प्रसादो नैर्मल्यं रजस्तमोमलराहित्यं तत
जं तस्मात् आविर्भूतं न तु विषयसंगजनिद्रालस्यादिजं वा तत्सुखं सात्त्विकं ३७ राजसं सुखमाह विषयेति अग्रे भोगकाले परिणामे विषमिव विषयो

यत्तदग्रे विषमिव परिणामेऽमृतोपमं तत्सुखं सात्त्विकं विद्धि आत्मबुद्धिप्रसादजं ३७ विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमं प
रिणामे विषमिव तत्सुखं राजसं स्मृतं यदग्रे चानुबंधे च सुखं मोहनमात्मनः निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ३९ न
तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४०

गकाले इहामुत्र च दुःखप्रदत्वात् ३८ अग्रे आरंभे अनुबंधे परिणामे मोहनं मोहकरं आत्मनो बुद्धेः यतो निद्राजं ३९ प्रकरणार्थमुपसंहरन्न
नुक्तमपि संहरन् न तदस्तीति मनुष्यं प्राणिजातं मध्याज्जऽस्यापि सर्वस्यापि सर्वस्य त्रिगुणविकारत्वात् प्रकृतिजैर्जन्मांतरीयधर्माधर्मसंस्का
रजैः मायाप्रभवैर्गुणैर्बंधसंभवे ४०

श्री०
१८४

भ३

एवंपंचदशे संसाराश्वत्थमसंगशस्त्रेण छित्त्वा परं पदं मृगितव्यमित्युक्तं तत्रात्मनोऽसंगत्वोपपादनाय क्रियाकारकफललक्षणस्य कृत्स्नस्य संसारस्य त्रिगु
णात्मकत्वमुक्तं न त्वात्मनात्मनो गुणातीतत्वे गुणात्मकयोः संगः संभवति न ह्याकाशं तद्वर्तिभिः पृथिव्यादिगुणैर्गंधादिभिराकाशः संसृज्यते तद्वदित्युक्तं समासः
शास्त्रार्थः अथेदानीं सर्वगीताशास्त्रार्थमुपसंहर्तुमसंगशास्त्रानुपायं वक्तुं पृथगपि तु प्रकरणांतरमारभते ब्राह्मणादिशूद्राणामसमासकरणं वेदानधिकारा
त्पृथग्विभक्तानि अस्मिंकर्माणि नितत्र हेतुमाह स्वभावप्रभवैर्गुणैः स्वभाव ईश्वरस्य प्रकृतिस्त्रिगुणात्मिका सैव प्रभवो हेतुर्येषां गुणानां ते स्वभावप्रभवास्तैः यद्वा
ब्राह्मणस्य स्वभावस्य सत्त्वगुण एव प्रभवः शांतत्वात् क्षत्रियस्वभावस्य सत्त्वोपसर्जनं रजः ईश्वरस्वभावत्वात् वैश्यस्वभावस्य तमउपसर्जनं रजः कृष्यादिस्वभा

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ४१ ॥ छ ॥ ९

वत्वात् शूद्रस्य रजउपसर्जनं तमः शूद्र[illegible]भावत्वात् अथवा स्वभावः प्राग्भवी
यः संस्कारस्तत्प्रभवैः न तु जातिमात्रप्रभवैः पक्षिणामाकाशगमनवत् अत एव जात्यंतरव्यावृत्तानां धर्माणां शमादिषु पाठो न दृश्येते न हि शूद्राद्याद्वृष्टं ते त्रैव
र्णिकानामध्ययनादिकं वा दृष्टं तद्वद्याद्वृत्ते ब्राह्मणानामध्ययनादिकं वा दृष्टपद्यते किं तु सर्वे सर्वे जातीयानां साधारणा धर्माः शमादयो दृश्यंते तथा हि द्रोणादि
षु ब्राह्मणेष्वपि शौर्यादिकं भारतादिषु क्षत्रियेष्वपि शमादिकं दृष्टं एवमितरत्र तस्माद्यस्मिन्कस्मिंश्चित्वर्णे शमादयो दृश्यंते स शूद्रोऽपि एतैर्लक्ष
णो ब्राह्मण एव ज्ञातव्यः यत्र च ब्राह्मणोऽपि शूद्रधर्मादि दृश्यंते स शूद्र एव तथा चारण्यके सर्पीभूतं नहुषं प्रति युधिष्ठिरवाक्यं समं राने छ छ छः

नो३

श्री०
१८४

ह्मासीलमान्दृष्टं स्पंतपो घृणा दृष्टं पतेयत्र नागोदृष्टं ब्राह्मणा इति स्मृत: तथायं त्रेतद्दृष्टं पतेस्तपेष्टं त्रं स ब्राह्मणा: स्मृत: यत्रैतन्नभवेत्सर्पितं शूद्रमिति नि
र्दिशेदिति ज्ञातिधर्मास्तु मनुना दर्शिता: अध्यापनं चाध्ययनं यजनं याजनं तथा दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् प्रजानां रक्षणं दानमि
ज्याध्ययनमेव च विषयेष्वप्रसक्तिं च क्षत्रियस्य समादिशत् १ शस्त्रं नाम रक्षणं दानमिज्याध्ययनमेव च वाणिक्कार्यं कुशीदं च वैश्यस्य कृषिमेव च कर्ममेव तु
शूद्रस्य प्रभु: कर्म समादिशत् एतेषामेव वर्णानां शुश्रूषामनसूययेति तस्मात् शमादयो यत्र ब्राह्मणो ब्राह्मणो वा दृष्टं पतेत्स एव ब्राह्मण इत्यत्रापि
वहितं स्वे स्वे कर्मण्यभिरत: संसिद्धिं लभते परामिसम चतुर्वर्णाम ध्यायनादीमेव स्वकर्माणि ग्राह्याणि न तु शमादीनि न हि तानविज्ञानवतो: स्मा
संसिद्धिर्वक्तव्यास्तितस्मात् शमदमादयो ब्रह्मनिष्ठस्यैव ब्राह्मणास्य लक्षणामिति दिक् ॥ ५१

ब्राह्मणकर्माण्याह शम इति अन्तःकरणनिग्रहः शमः बाह्येन्द्रियनिग्रहो दमः तपः पूर्वोक्तं शारीरादिभेदेन त्रिविधं शौचं बाह्यं मृज्जलाभ्यां आभ्यन्तरं भा
वशुद्धिः क्षान्तिः क्षमा आर्जवम् अकौटिल्यं ज्ञानं शास्त्रीयं कर्म ब्रह्मविषयं विज्ञानं तदनुष्ठानानुभवात्मकं आस्तिक्यं श्रद्धा एतदात्मकं ब्रह्मकर्म ब्रह्मत्वजातम
भिव्यञ्जकं कर्म स्वभावजं प्राचीनधर्मसंस्कारजं ४२ शौर्यं पराक्रमः तेजः प्रागल्भ्यं धृतिः धैर्यं दाक्ष्यं युद्धे कौशलम् उक्ताहो वा दानं औदार्यं ईश्वरभावः उन्मा

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजं ४२ शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं दा
नमीश्वरभावश्च क्षात्रं कर्म स्वभावजं ४३ कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजं परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं ४४ स्वे
स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ४५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ३ ३ ३

गवर्त्तिनां नियमनशक्तिः एतत्क्षात्रं कर्म स्वभावजं ४३ वैश्यशूद्रयोः कर्माण्याह कृषीति स्पष्टार्थः ४४ कर्मप्रविभागफलमाह स्वे स्वे इति स्वे
स्वे मन्वादिभिरुक्ते अध्ययनादौ भूमाधारणो शमदमादौ ना धारणे वा कर्मणि अभिरतः निष्ठावान् संसिद्धिं ज्ञानयोग्यतां लभते नरः एतदेव विप
रीतं प्रतिजानीते स्वेति सिद्धिं विन्दति भूमारणां सुख्यसंम्पात्सल्लक्षणां नैष्कर्म्यसिद्धिं यथा येन प्रकारेण ४५ ३ ३ ३

तमेवंप्रकारमाहयतइतिप्रवृत्तिः कायवाङ्मनोनिर्वर्त्यमाचेष्टायतोहेतोः अंतर्यामिणः येनवागभ्युद्यतइत्यादिश्रुतेः येनइदंसर्वंदृश्यं ततंव्याप्तं उपादानत्वात् स्वक
र्मणातमभ्यर्च्यैहतत्त्वैसिद्धिंविमोक्षंविंदतिलभतेमानवोमनुष्याधिकारत्वाच्छास्त्रस्यपरमेश्वरनिजकर्मणामेवमोक्षद्वारत्वमित्यर्थः ४६ स्वकर्मणोविशेष
स्यफलमाहश्रेयानितिस्वधर्मोविगुणः किंचिदंगहीनोपिश्रेयान्प्रशस्ततरः परधर्मात्स्वनुष्ठितात्सम्यग्विहितात्उक्तंचस्वधर्मेनिधनंश्रेयः परधर्मोभया

यतःप्रवृत्तिर्भूतानांयेनसर्वमिदंततं स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवः ४६ श्रेयान्स्वधर्मोविगुणः परधर्मात्स्वनुष्ठितात् स्वभाव
नियतंकर्मकुर्वन्नाप्नोतिकिल्बिषं ४७ सहजंकर्मकौंतेयसदोषमपिनत्यजेत् सर्वारंभाहिदोषेणधूमेनाग्निरिवावृताः ४८ ३३ ३ः

ना१
वहइतिस्वभावनियतंपूर्वोक्तविधस्वभावाज्जातंकर्मकुर्वन्किल्बिषंदोषंवा नाप्नोतिविषकृमेर्विषमिवनदोषकरंतस्मात्त्ववैमेहैःहिंसाद्युक्तमपिनयुक्तं
किंतुहिंसायुक्तोस्वधर्मएवप्रशस्यतरः धर्मत्वेनविहितेस्मिन्नग्नीषोमीयमश्वालंभव तदेवंकृतेसतिनकिल्बिषप्रसंगोस्तीत्यर्थः ४७ किंचसहजंस्वाभा
विकंक्षात्रंकर्मसदोषंहिंसामिश्रमपिनत्यजेत्हियस्मात्सर्वारंभाःसर्वकर्माणिदोषेणहिंसादिनाभ्यावृताभवंतियस्मात्परधर्मोभयावहस्तस्मात्स्व
३३३ कर्मनत्यजेदित्यर्थः ४८ ३३३ यं.पश्वालंभ[illegible]

गी०
१८६

स्वकर्मणामीश्वरे समर्पणं कर्त्तव्यमित्युक्तः नंतरश्लोकद्वयेन स्वकर्मणामावश्यकत्वमुक्तं तेषां परमेश्वरेऽर्पणे न किं फलं स्यादित्यत आह अस
क्तेति तस्मात्सेन कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन संगं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः इति पूर्वोक्तेनामुख्यसात्त्विकत्यागेन असक्तबुद्धिः पुत्रदा
रादिषु सक्तिः परं ह्यासक्तिर्वर्जिता बुद्धिर्यस्य सः सक्तबुद्धिः विरक्त इत्यर्थः अत एव जितात्मा शांतचित्तः विगतस्पृहः विशेषेणागता स्पृहा तत्सायस्य

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ४९ सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति नि
बोध मे समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा ५०

तादृशो भूत्वा नैष्कर्म्यसिद्धिं कर्त्तृत्वाभिमानरहितः कर्मत्यागलक्षणां परिसंन्यासिद्धिं परमां पूर्वोक्तां मुख्यत्यागापेक्षया तिश्रेष्ठां न द्वेष्ट्यकुशलं कर्मेति श्लो
केव्याख्यातं अधिगच्छति प्राप्नोति ५० स्वकर्मनिरतः सिद्धिं यथा विंदति तमेतत्त्रितात्मनमुपपादितं इदानीं नैष्कर्म्यसिद्धिं प्राप्तो विपरिव्राट्वशीकार
संज्ञावैराग्यवान् समर्थः ब्रह्म प्राप्नोतीति तथा यथा वक्ष्यते जानीते सिद्धिमिति सिद्धिं निबोध बुध्यस्व मे मद्वचनात् समासेन कौंतेय यथावत्प्राप्यं ब्र
ह्म सविधेयापेक्षं स्त्रीत्वं ज्ञानस्य परा निष्ठा यदपेक्षया मतशेषं अन्तरान्तरं नास्तीत्यर्थः ५०

श्री०
१८६

तमेव ब्रह्मप्राप्तिप्रकारमाह त्रिभिः बुद्ध्येति बुद्ध्या वेदान्तश्रवणमननपरिपाकोत्थया अहं ब्रह्मास्मीति परोक्षनिश्चयरूपया विशुद्धया सर्वसंशयभ्रमे
आदिभावनया विशोधितया युक्तः धृत्या धैर्येण योगजन्यादिनिमित्तेन वैरस्यं तत्र हि सेन आत्मानं देहेन्द्रियसंघातं नियम्य हठात् सन्तो भूत्वेत्यर्थः चकारात्प्रा
णांश्च नियम्य शब्दादीन् विषयान् त्यक्त्वा ततः इंद्रियाणि प्रमाथीनि स्युः सामर्थ्यः प्रमादस्य करणेऽपि अतं मनसैव विषयान्स्मरति तन्निरासाय माह रागद्वे
षौ व्युदस्यैवेति संकल्पं त्यक्त्वेत्यर्थः सहि विषयप्रीतिस्तत्र रागं जनयतीति प्रसिद्धं तथा चाहुः पादाचार्यास्तत्र दोषनिमित्तरूपाश्रयो विषयाः संकल्प

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ५१ विविक्तसेवी लघ्वाशी यतवाक्का
यमानसः ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ५२ ३३

कृतान् इति दोषो रागादिः चकारात् अयमहमस्मीत्येवमपि भावं व्युदस्येति ज्ञेयं ततो ब्रह्मभूयाय ब्रह्मभावाय तं प्राप्तुं कल्पते योग्यो भवतीति तृतीयेन
संबंधः ५१ केन साधनजातेन एवंभूतो भवतीत्यत आह विविक्तेति यतः शुद्धदेशाभ्याहारेणायोग्यं नित्यमिति सर्वत्र संबध्यते ये यो नित्यं विविक्तसेवी
एकान्तशीलो लघ्वाशी मिताशनशीलस्तथा नित्यं वैराग्यं रागाभावं समुपाश्रितस्तथा नित्यं ध्यानयोगपरो यो भवति यतवाक्कायमनसो भवति
यतः कायः आसनदार्ढ्येन यद्वा विषयेभ्य इंद्रियाणां प्रत्याहरणेन यतमानसः सर्वसंकल्पत्यागेन अत्र चतुर्भिः साधनैर्यतवाक्कायमनसो भूत्वा
ब्रह्मभूयाय कल्पत इत्युत्तरेणान्वयः ५२

भी०
१८०

एवंयतवाक्कायमानसस्ययोगिनोयोगजाः सिद्धयउपतिष्ठंतितास्त्वप्रमादशिताः एथ्वाप्यतेजोनिलखेसमुत्थितेपंचात्मकेयोगगुणेप्रवृत्तेनत
स्यरोगोनजरानमृत्युः प्राप्तस्ययोगाग्निमयंशरीरमितितथायंलोकमनसासंविभातिशुद्धसत्वः कामयतेयांश्चकामान्तंतंलोकंजयतेतांश्चकामा
न्तस्मादात्मज्ञंह्यर्चयेद्भूतिचसंभाविति संकल्पतिलोकंलोचनीयमतीतानागतमर्थंजानंकामानकाम्यमानविषयानर्त्यतेउपलभतेइतिश्रुतिपरा
नामर्थः तथानाविरतोदुश्चरितान्नाशांतोनासमाहितः नियद्धचित्तस्त्रिरपिस्थशांतमनसोयोगैश्वर्यमसक्तचित्तएनमात्मानंतनप्राप्नुयादितिश्रुत
र्थः नहिद्दमात्मअहंकारमितियदानुयोगीयतमानसोस्मितामात्रप्रत्ययोभवतितदानीमेवास्मितास्थितिविषयाभिमुखोहंकारस्मुच्यतेवि

अहंकारंबलंदर्पंकामंक्रोधंपरिग्रहं विमुच्यनिर्ममः शांतोब्रह्मभूयायकल्पते ५३ ॥

षयविमुखत्वात्स्मितेतितत्स्तमहंकारंनिग्रह्णीयात्तत्रनिग्रहेयोगीवलंतत्ससंकल्पत्वादिसामर्थ्यमात्मनः पश्यन्दर्पंकरोतिनमत्तुल्योस्मीति
तिमत्वातततश्चदर्पोधर्ममतिक्रामतीत्याप्तवचनात्तद्विद्याःकामानिगच्छतितत्रकेनचिन्निमित्तेनकामप्रतिबंधेसतिक्रोधवान्भवतितततःप
रोत्काद्दनायभूयांसंशिष्यादिपरिग्रहंसंपादयतिततोनश्यतीतितस्मात्सर्वानर्थमूलभूतमहंकारमेवविमुच्यउत्तएनसर्वान्विमुंचतिस्त्रहंका
रविमोहेपिनिर्ममत्वेनतत्त्रदर्शितेषुविषयेषुममनाशत्यत्वेसत्यहंकारःशिथिलीभूतोविषयवैमुख्यंप्राप्यस्वकारणेःस्मितायांविलीयतेतत
तःशांतोस्मितायाअपिप्रलयेनिरोधनाग्निवदुपरतोयोगीब्रह्मभूयायकल्पते ५३ ॥

श्रीराम०
१८०

म२ श्रौ

अस्यैवं शांतस्य केवलस्य योगिनो व्युत्थानावस्थामाह ब्रह्मभूत इति यो हि सुषुप्तो हृषेवासंपन्नो योगी च व्युत्थित स्वेच्छया देहः तमोयस्त इव तेह्यालुव
तिष्ठति ब्रह्मभूतस्तु प्रसन्नात्मा प्रसन्नचेताः लघुशरीरः अमृतेनेव समाधिसुखेन तृप्तः न रेकुपथवतो न शोचति नष्टं नाप्राप्तं कांक्षति शरीरे
सर्वेषु चतुर्विधेषु समः ब्रह्मैवेदं सर्वमिति बुद्ध्या वैषम्यवर्जितः सत्परां भक्तिं दृष्टतद्दृष्टिविवर्जितां भावनां लभते ध्यातं जलयोगी तु नपरां दृष्टिं लभते
भेददर्शित्वात् स्वयं च भक्तः श्रीभागवते दर्शितः सर्वभूतेषु यैनेकं भगवद्भावमीक्षते भूतानि भगवत्यात्मन्येष भागवतोत्तम इति सोयं चतुर्थो भक्तो ज्ञा
नीत्वात्मैव मे मतमिति भगवता [illegible] दर्शितः ५४ अस्या हेतोस्तमज्ञाननलक्षणायाः भक्तेः फलमाह भक्त्येति मां उक्तविधया भक्त्या ज्ञानीत्वभितः

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ५४ भक्त्या मामभिजानाति यावान्यश्चास्मि
तत्वतः ततो मां तत्वतो ज्ञात्वा विशते तदनंतरं ५५

साकल्येन जानाति सा कल्समेवाह यावानिति अणुपरिमाणो वा देहसंमितो वा तार्किकाणामिवाकाशवत् सकलमूर्तद्रव्यसंयोगिलक्षणो वि
भुत्वाश्रयो वा सप्रपंचो द्वैतवादिनामिव स्वगतस्वगतभेदवान् वा यः स्वैरैकरसो वेति सा पारतस्त्वतो मां तत्पदार्थं जानाति तथा यश्चास्मीति किं
देहेन्द्रियप्राणमनसामन्यतमः किंयत्कालस्थायी वा क्षणिकविज्ञानरूपो वा शश्वत्संगा कर्ता भोक्ता वा नृरूपो वा चिद्रूपो भोक्ता वा कर्तृ
त्वभोक्तृत्ववर्जितस्त्वानंदघनो वेत्येवं मामजरममरमभयमशोकं जानाति तथा च श्रुतिः भिद्यते हृदयग्रंथिश्छिद्यन्ते सर्वसंशयाः क्षीयंते
चास्य कर्माणि तस्मिन्दृष्टे परावरे इति आत्मदर्शने सति सर्वसंशयोच्छेदं दर्शयति एवं क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारतेत्युक्तेः सर्वक्षे

चैवैवं मां विभुं सच्चिदानंदघनं ज्ञात्वा सर्वोपाधिविनिर्मुक्तं यथात्म्येन ज्ञात्वा सोत्क्रमततो मां प्राप्नो ब्रह्मभावं गतो भवतीत्यर्थः ब्रह्मविद् ब्रह्मैव भवती
ति श्रुतिः पश्चात्तदित्तिकारणाद्ब्रह्मभावापत्तिः सर्वात्मप्रक्रपावथ ममुक्तापयेवं देहाहं ब्रह्मास्मीति स इदं सर्वं भवति स एतेन मेव पुरुषं ब्रह्मततमम पश्यति इति
श्रुतिभ्यो मुक्तानां सर्वात्मभावश्रमात्ततत्तमं एकस्तश्छाद्यास्या प्रक्रियया लुप्तो हृष्टव्य इति श्रुतिभाष्यं च अनंतरं कारणाभावात् पांतु पदमेव ततब्रह्मतम
साभिधेयं तदिति वा एतस्य महतो भूतस्य नाम भवतीति श्रुतेः शुद्धं ब्रह्म विशतीति दर्पणापाये प्रतिबिंबो [illegible] बिंबमिव प्रविशति कार्योपाधीनो ज्ञा
नानां कारणोपाधीश्वरप्राप्तिद्वारैव निष्कलब्रह्मप्राप्तिरित्यावेदितं प्रागेव परां ज्ञात्वा तद्विशत इमे ताभ्यं ते व ज्ञानप्रवेशयोः पौर्वापर्यसिद्धेत
दनंतरमिति पदेन तच्छब्देन बुद्धिस्थं देहपातमपतस्यातानंतरमिति व्याख्येयं यतो ज्ञातेपि तत्त्वज्ञाने यावद्देहपातं प्रारब्धकर्मणां प्रतिबंधाद्विदेह
कैवल्यं न प्राप्यते अन्यथा ज्ञानसमकालमेव देहपातापत्तिः स्यात् विमुच्यते मन्यद्वांते विश्वमायानिवृत्तिरित्यादि मुक्तस्यामुक्तिनिवृत्तायाश्च
मायायाः पुनर्निवृत्तिवर्ज्जीवन्मुक्तिशास्त्रं च बाधितं स्यात् यथा तार्किकाणां नष्टेपि समवायिकारणोपदारिकं क्षणमात्रमवतिष्ठते एवमस्माक
मपि अनादिकाया देहाद्युपादानभूतायाश्च विद्याविनाशेपि किंचित्कालं देहाभिधाने पुमस्ते हद्दृशामेव जीवन्मुक्तमपेक्ष्य भगवता उक्तं उपदेक्ष्यं
ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इति स्थितप्रज्ञलक्षणानां स्थिरापितस्तु लक्षणाभिधित्सेयेव प्रवृत्तेति हि कु

५५ २ २ २ २ २ २ २ २ ५५ ५२ ५५

ननु तथापि योगात्फलमग्नीषोमीयं तं प्रकृष्टं चैव ब्रह्मसंस्पर्शमेवाप्नोति। प्रकृष्टं न इति पूर्वकर्मणां ज्ञानेन नाशाय स्थितत्वेनैव सम्यगपि नाशश्च भवेत् ज्ञानोत्तरकालीनानां
कर्मणां नाशाभावात् ज्ञानोत्तरमपि देहधारणेऽवश्यंभाविकानां कर्मणां वर्जनस्याऽसंभवात् स्वर्गं ज्ञानिनोऽपि बंधः स्यादित्याशंक्याह सर्वकर्माणीति मद्व्यपा
श्रयोऽहमेव प्रज्ञानघनः प्रत्यगात्मा व्यपाश्रयः आश्रयो यस्य स मद्व्यपाश्रयो ज्ञानी सर्वकर्माणि विहितानि निषिद्धानि सदा कुर्वाणोऽपि मत्प्रसादा
न्मदनुग्रहात् शाश्वतं नित्यं पदं स्थानं सर्वोत्कृष्टं परं पदं तुरीयं मोक्षमवाप्नोति न तु ज्ञानोत्तरमपि क्रियमाणैः कर्मभिर्बध्यते तस्य पुत्रा दायमुपयांति सुहृदः सा
धुकृत्यां द्विषंतः पापकृत्यामिति न हि वाक्यैर्विदितं किं च नाऽज्ञस्याध्वंसते विदित्वा न लिप्यते कर्मणा पापकेनेत्यादि शास्त्रेणात्तत्त्वज्ञानिनः कर्मलेपश्च

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं ५६ चेतसा सर्वकर्माणि मयि संन्यस्य
मत्परः बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ५७

वणात् ५६ एवं वर्णाश्रमादिधर्मे पुरस्कारेण मम आराधनात् फला ब्रह्मविद्या निरूपिता अस्याः प्राप्त्युपायेन साधनत्वेन भक्तिमेव विधत्ते चेतसेति
चेतसा विवेकबुद्ध्या सर्वाणि नित्यनैमित्तिकानि मयि भगवति वासुदेवे संन्यस्य यत्करोषि यदश्नासीत्युक्तरीत्या समर्प्य मत्परः अहमेव परः प्राप्यो
यस्य सः बुद्धियोगं पूर्वोक्तं सिध्यसिध्योः समत्वलक्षणं च कर्मणां मोक्षहेतुत्वसंपादकं उपाश्रित्य मच्चित्तः मदेकशरणः सततं सर्वदा भव ५७ ॥

६४

एतस्य भक्तियोगस्य करणे गुणमाह मच्चित्त इति दुर्गाणि आध्यात्मिकादीनि लोकाशीनि संकटानि अहंकारात् तु स्वपांडित्याभिमानात् न श्रो-
ष्यसि मद्वाक्यं तर्हि विनंक्ष्यसि पुरुषार्थभ्रंशो भविष्यसि ५८ स्वतंत्रोहं तत् युद्धं न करिष्यामीत्याशंक्याह यदीति यत् यदि अहंकारं गर्वं आश्रित्य न योत्स्ये

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ५८ यदहंकारमाश्रित्य न योत्स्य इति
मन्यसे मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ५९ स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा कर्तुं नेच्छसि यन्मोहात्क-
रिष्यस्यवशोपि तत् ६०

युद्धं न करिष्ये इति मन्यसे एष ते तव व्यवसायो मिथ्या यतः प्रकृतिः क्षत्रिय स्वभावः त्वां नियोक्ष्यति प्रकृतिं यांति भूतानि निग्रहः किं करिष्यतीति
चोक्तं ५९ प्रकृतिस्त्वां नियोक्ष्यतीत्येतदेव व्याचष्टे स्वभावजेनेति पूर्वोक्तेन स्वभावजेन शौर्यादिना अवशोपि परवशः सन् तत् करिष्यसि ६०

क्रासोपरमेश्वरोयं हमस्मीत्यत आह ईश्वर इति ईश्वर ईशानशीलोन्तर्यामी पृथिव्यादीनां सर्वभूतानां हृद्देशे बुद्धिगुहायां सर्वप्राणिप्रवर्त्तकत्वेन ति‑
तिकीदृशः सर्वभूतानि भ्रामयन् ऊर्ध्वाधोमार्गेषु संसारयन् काष्ठपुत्रिकाइव सूत्रधारः यंत्रारूढानि यंत्रमिव यंत्रं उक्तलक्षणमाधन्तं प्राणाद्यात्मकं त्रिगुणं तं य‑
न्त्रारूढानि मायया स्वशक्त्या भ्रामयन्निति संबंधः हे अर्जुन शङ्कते शुद्धान्तःकरणेस्म्योसीति भाव अत्राहंकारपूर्वकं यः कर्म करोतीति यत्तु ईश्वरपरवशोहं क‑
रोमीति बुद्ध्या करोति तयोरत्यन्तवैलक्षण्यप्रदर्शनार्थो मंत्रो भाष्ये उदाहृतो अहश्च कृष्णमहरर्जुनं च विवर्त्तेते रजसी वेद्याभिरिति भारद्वाजार्थं अहश्च कृ‑
ष्णमर्जुनं चेमाग्निमारुतस्य प्रतिपादितं ब्राह्मणेन आग्निमारुतशस्त्रे विनियुक्ता प्रथमे यस्मिन् दिवसे सोमः सूयते यागार्थं तद्देवजन्मसाकल्यदिने
मुख्यं अहः शब्देनाभिधीयते अन्यत्तु दिनमदिनमेव निष्फलत्वात् तथा च स्मृतिः दशभिर्जन्मभिर्विप्रो अधीते शतजन्मभिः सहस्रैर्जन्मभिः सोमं प्राप्य

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ६१ ॥ छ ॥

हि
ग्यं यातु मतीति सोमयागस्य द्वितीयं दिनं दर्शयति तदेवमहः शब्दः कालवचनोपि सोम्ये कर्मणि वर्त्तते यथा दर्शपूर्णमासशब्दौ तद्वत् संसृतिरहः यागः कृष्णं अविदु‑
षाकृतं अप्रकाशमिव भवति तथाहरर्जुनं स्वच्छं तद्देवविद्वद्भाकृतं प्रकाशरूपमिव भवति तेन ते उभे विद्वद्विद्वत्कृते अहनी रजसी प्रवृत्तिरूपत्वात् रजोगु‑
णकार्ये अपि वेद्याभिः कर्मभिर्गावद्वोपासनात्मिका अहंकारो मीत्यभिमानरूपा वा विद्या विज्ञानानि ताभिः निवर्त्तेते पृथ्वीन वर्त्तेते सोपासनं कर्म श्वेतं परमा‑
त्म तत्वप्रकाशकं बंधविच्छेदहेतुः मूढकृतं कर्म कृष्णं स्वरूपावरकं बंधहेतुरित्यर्थः तदेवं भगवान् पार्थं अर्जुनेति संबोधयन् एतस्य स्वच्छान्तःकरणत्वं घो‑
तनेनमुक्तधर्माधिकारं दर्शयति ६१

तमेव शरणं सर्वभावेन सर्वात्मना शरणमाश्रयं गच्छ आश्रय तत्प्रसादात्तदनुग्रहात्परां शान्तिमुपरतिं समाधिमिति यावत् तथा च सूत्रं समाधिसिद्धिरीश्वरप्रणि-
धानादिति स्थानं च परं विष्णोः परं धाम शाश्वतं नित्यं प्राप्स्यसि ६२ सर्वगीतार्थमुपसंहरति इतीति एवं प्रकारं ते तुभ्यं मया सर्वज्ञेन परमकारुणिकेन ज्ञानमाख्या-
तं गुह्यतरं मन्त्रतन्त्ररसायनादिरूपात् गुह्यात् गुह्यतरं अतिशयितं रहस्यमेतद्यथोक्तं शास्त्रार्थजातं विमृश्य समग्रमालोच्य यथेच्छसि तथा कुरु ६३ एवं यथेष्टकारणम-

तमेव शरणं गच्छ सर्वभावेन भारत तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतं ६२ इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ६३ सर्वगुह्यतमं भूयः शृणु मे परमं वचः इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितं ६४

भ्यनुज्ञायापि अतिवात्सल्यात् श्लोकद्वयेनैव कृत्स्नं शास्त्रार्थमुपसंहरन् तद्ग्रहणे काठिन्यमस्य संपाठयितुमाह सर्वेति सर्वेभ्यः गुह्येभ्यः अतिशयितत-
मं भूयः पुनः असकृदुक्तमपि मे मम वचनं शृणु परमं परमार्थविषयत्वात् न लोभान्नापि भयात्त्वां वक्ष्यामि किन्तु हि मे मम इष्टोऽसि परमाप्तोऽसि इति हेतोः
दृढं अतिशयितं तेन ते तव हितं यत्तत्ते तव वक्ष्यामि त्वदिष्टत्वात् विधेयाप्तहितत्वात् इदं च त्वमेनावश्यं कर्त्तव्यमिति भावः ६४ ॥ ॥ ॥ ॥

म२

तदेवगुह्यतमंहितमाह मन्मनाइति अहंभगवान्वासुदेवघनःपरिपूर्णः जगदाकारंमनोयस्यसमन्मनाःभवएतेनब्रह्मात्माभेदेनापिसाक्षात्करणीयइतिउ
क्तापदार्थज्ञानंकथमेवंविधाज्ञाननिष्ठालभ्यतेतत्राहमद्भक्तोभवएतेनभगवदुपासनात्मकोमध्यमपदार्थउक्तःकथमस्यैतदुपास्यभक्तिरूढेःस्यादितिमतत्रा
हमद्याजीभगवदर्थंकर्माणांशीलोभवएतेनकर्मविधानमाद्यपदार्थविहितःननुयस्यभगवद्याजित्वंनसंभवति [illegible] दारिद्र्यात्आद्यभावाद्वातस्यभगवद्भक्ति
दौर्लभ्यात्कृतार्थकायदेतत्तोवृत्तिर्दुर्लभतोमाशंक्याहमांनमस्कुरु प्राकृतमक्रेयेवप्रतिमादौभगवतेसर्वार्पणात्मकमर्पितेननमस्कारादिनामम्युग्रतासर्थः

मन्मनाभवमद्भक्तोमद्याजी [illegible] मांनमस्कुरु मामेवैष्यसिसत्यंतेप्रतिजानेप्रियोसिमे ६५

तथाचाश्वलायनोनमस्कारस्यैवयज्ञत्वमुक्तवान् इतियोनमसास्वध्वरइतियज्ञोवैनमइतिहिब्राह्मणंभवतीतिचएवमुक्तस्यसोपानत्रयात्म[illegible] स्यफलमाह
मामितिमामेवतमहार्थंसर्वजगत्कारणंसर्वेश्वरंसर्वशक्तिमन्तंएकरसंतंएष्यसिप्राप्स्यसिबिंबंवइवप्रतिबिंबंघटाकाशइवमहाकाशंअस्मिन्नर्थेशपथंको
तितेतवपरःसत्यंअवबोधनार्थंभूतंप्रतिज्ञानेप्रतिज्ञांकरोमिमामेवैष्यसीतिप्रियोसिमेयतस्त्वंममप्रियोसिअतःप्रतारणांनेहंत्वयि [illegible] सत्यमेवा
हंब्रवीमीत्यर्थः ६५

गी०
१८२

नी पा

एवं मन्मनयजन भजनम वैकमेणासांख्यनिष्ठा उक्तायां पूर्वं ध्यानेनात्मनि पश्यंती मनेन श्लोकेन दर्शितः इदानीं अन्येत्वेवमजानंतः श्रुत्वा मेभ्य उपासते तेपि
चातितरंत्येव मृत्युं श्रुतिपरायणा इति कलौ पास्ति निष्ठा येषां तेषामुक्तानामाह सर्वधर्मानिति सर्वेषां वर्णानामाश्रमाणां देहेन्द्रियबुद्धीनां च धर्मान् अग्नि
होत्रादीन् सुखदुःखादीन् परित्यज्य मामेकं सर्वेश्वरं सर्वशक्तिं सोपाधिं निरुपाधिं वा अखंडैकरसानंदघनं परमात्मानं शरणं गत्वा इति हि नस्त्वविघारीनुले
शाननिति शरणमाश्रयः प्रापणं गच्छ प्राप्नुहि मदेकशरणो भवेत्यर्थः अत्र श्रुत्यैवतत्पतिनं जलमात्रंपीत्वेति वत हेतुत्वं उक्तं परमयार्थः सर्वध

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ६६ ॥

र्मपरित्यागेन मां शरणं व्रजेत्यर्थः यथोक्तं अनात्मादर्शने नैव परात्मानमुपास्महे एतस्य भगवच्छरणीकरणस्य फलमाह अहं त्वेति अहं परमात्मा सूर्यांघंत
र्यामी नारायणः सकलपापविनिर्मुक्तः सम्यक् ज्ञातः मनत्वा त्वां सर्वपापेभ्यः संचितक्रियमाणेभ्यो गोत्रवधादिभ्यः मोक्षयिष्यामि मा शुचः शोकं माकार्षीः
तथा हि तत्त्वज्ञानफलं पापापरोक्षः शोकतरणं च सर्वश्रुतिस्मृतिप्रसिद्धं स्मृतिः सांतर्वर्तिनि नारायणे अक्षयं छांदोग्ये श्रूयंते सएष सर्वेभ्यः पाप्मभ्य उदि
त उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद तरति शोकमात्मवित् तत्र को मोहः कः शोक एकत्वमनुपश्यत इति उदितः ऊर्ध्वं इतो गतः पापान्युत्क्रम्य गतो निष्पाप
इति श्रुतिपदस्यार्थः वर्णाश्रमधर्मस्य मास्त्वर्थं कथं छान्दोग्योक्तेन योगेन देहादीनां धर्मीश्वरस्य कानि विकल्पमात्मानं माहात्म्यं कुर्वतो न कर्मलेपइत्यर्थः ६६

श्रीराम०
१८१

पा३ रू२

श्री०

२४

एवं श्लोकद्वयेन ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनामिति सांख्ययोगौ हि तौ याध्यायेरशितो उपसंहृत्य विद्यासंप्रदायविधिमाह इ
दमिति अर्थेन तपस्काय तपश्चालोचनं तद्रहिताय अयत्नशीलाये मर्थ्यः अभक्ताय श्रद्धाहीनाय अशुश्रूषवे गुरुसेवामकुर्वते मां परमात्मानं यो
भ्यसूयति मदीयगुणानसहिष्णुर्ममापि दोषारोपयो भवति न स्मैन आद्यमेकं संवत्सरं तेषां विशेषणानामन्यतमाभावेपि करणं च नुमहमपि संकर
इदं स्वाच्यं नोपदेष्टव्यं विद्या ह वै ब्राह्मणमाजगाम गोपाय मा सेवधिष्टेहमस्मि असूयकायानृजवेयता यन मा ब्रूया वीर्यवती तथा स्यां यस
देवे परा भक्तिर्यथा देवे तथा गुरौ [illegible] तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति श्रवणात् असूयाहिताय आर्जवोपेताय आत्मशीला
य गुरुपरमेश्वराराधनपराय चाहस्येदं यं नामस्मैरसमर्थः ६७ एवं संप्रदायविधिमुक्त्वा संप्रदायकर्तुः फलमाह य इदमिति इदं परमं गुह्यं यो भक्तिहो

इदं ते नातपस्काय नाभक्ताय कदाचन न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ६७ य इदं परमं गुह्यं मद्भक्तेष्व
भिधास्यति भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयं ६८

नो मानपूजाद्यर्थी सन्मद्भक्तेष्वभिधास्यति सोपि तत एव प्रणपान्मयि परमेश्वरे विदेका सेपरां भक्तिं अद्वैतलक्षणां उपासनां कृत्वा तत्र अद्वैतं प्रा
प्य तामनुष्ठीय च मामेवैष्यति मुक्तिं प्राप्स्यतीत्यर्थः अशंशयं संशयोऽत्र नास्ति स्मर्यते हि अज्ञामिलादीनां भक्तिगंधहीनानामपि पुत्रसंकेति
तेन नारायणेति नाम्नास्ति हव शारोद्धयतो तावन्मात्रतुष्टेन भगवतात्मप्राप्तिरिति किमु वक्तव्यं यो वा चापरतावच्छास्त्ररहस्यं प्रतिपादयति तस्य
भक्तिनामादि क्रमेणात्मनः कृतत्वं भविष्यतीति ६८

भी॰
१८२

ननु श्रद्धया कृतं सर्वं अर्थमिति तत्र यैवोक्तं कथमभक्तस्यापि एतच्छास्त्राभिधानतो भक्त्यादिलाभः संभवेदित्याशंक्याह नचेति तस्मात् एतच्छास्त्र
प्रवर्त्तकात् अस्मात् मनुष्येषु मे मम प्रियकृत्तमः न च कश्चिद् इत्थमेव मम महतीवाचि कीर्तिं क्लिष्टां कृत्वा सोपानारोहक्रमेण मम प्रियतरो भवि
ता भविष्यति अनिच्छयापि संस्पृष्टो दहत्येव हि पावक इति न च भुवि एतस्मात् मम परमार्थसाधनमस्तीति भावः अक्षरार्थः स्पष्टः ६९ अध्यापकस्य

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः भविता न च मे तस्मादन्यः प्रियतरो भुवि ६९ अध्येष्यते च य इमं धर्म्यं संवाद
मावयोः ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ७० श्रद्धावाननसूयश्च शृणुयादपि यो नरः सोऽपि मुक्तः शुभान्
लोकान्प्राप्नुयात्पुण्यकर्मणां ७१

म२

फलमुक्त्वाध्येतुः फलमाह अध्येष्यते चेति ज्ञानयज्ञेन निर्विकल्पसमाधिना इष्टः पूजितः स्यां हि धर्मस्य घना माउक्कल्पव्याप्तिकास्त्वहेतत
स्य शास्त्रस्याध्ययनं पीमर्थः इति मे मम सर्वेश्वरस्य मतिः तेनात्र स्तुतिमात्रमेतदिति न मंतव्यं किंतु स्तार्थ्यो वा एवोमिति भावः ७०
प्रवक्तुरध्येतुश्च फलमुक्त्वाश्रोतुरपि फलमाह श्रद्धावानिति श्रृणुयादपि अन्यत्र अवांतकुर्यादपि किमुत वक्तुमत्रार्थे रेणार्थग्रहणाय कु
र्यात्स मुक्तः फलं प्राप्नुयादिति स्पष्टार्थः श्लोकः तथाचोक्तं श्रीभगवता स्वेवकथा अश्ववः पुरुषां श्रोत्रणुना निहिव करोरुहाणं केचिद्
स्नात्समलिलं यथेति ७१

नु२ प२

श्रीराम॰
१८२

सर्वांतर्यामीसर्वज्ञोपिभगवान्लोकशिक्षार्थंशिष्यस्यज्ञानंज्ञातंनवेतिपृच्छतिअथवापुनःस्वयमेवउपदेशंकृतवतःआत्मगुणानिराघइवमा
याधंशनकृत्वोप्युपदेशेनकृतार्थःकृतंमयइमाशयेनाहकच्चिदितिकच्चिदितिकामप्रश्नेइहेपार्थएतत्त्वयाएकाग्रेणचेतसाश्रोतव्यंशब्दतोर्थ
तश्चवोद्धुमितिममकामोस्तितत्त्वंपृच्छामिकिमिदंत्वयाश्रुतमितिश्रुतवतोपितत्अज्ञानकृतःसंमोहोविपर्ययःअनात्मन्यात्मधीरूपःस्वध
र्मयुद्धेवाधर्मधीरूपइतिसद्विविधोपिनष्टःकच्चितमुमुक्षुममाफलमिदंत्वामहंपृच्छामीत्यर्थः ७२ एवंपृष्टःस्वस्यकृतार्थतांज्ञापयन्नर्जुनउवाच

कच्चिदेतच्छ्रुतंपार्थत्वयैकाग्रेणचेतसा कच्चिदज्ञानसंमोहःप्रनष्टस्तेधनंजय ७२ अर्जुनउवाच
नष्टोमोहःस्मृतिर्लब्धात्वत्प्रसादान्मयाच्युत स्थितोस्मिगतसंदेहःकरिष्येवचनंतव ७३

ष्टोमोहइतिमोहःपूर्वोक्तोद्विविधोपिनष्टःस्मृतिरयमहमस्मिपरंब्रह्मेत्यात्मानुसंधानरूपाआत्मतत्त्वविषयालब्धायस्याःलाभेनसर्वहृदयग्रं
थीनांपापानामस्यात्मतत्त्वतद्दृस्त्रोहादृतानांविप्रकृष्टैकभ्रमप्रभवानांविमोक्षोभवतितथाचश्रूयतेस्मृतिलंभेसर्वग्रंथीनांविप्रमोक्षइति
त्वत्प्रसादात्मयाच्युतस्मृतिर्लब्धेतिसंबंधःस्थितोस्मिगतसंदेहोनष्टसंदेहइत्यनेनानात्मन्यात्मधीरूपोमोहोनष्टइतिदर्शितंकरिष्येवच
नंतवेत्यनेनस्वधर्मयुद्धेवाधर्मधीरूपोपिमोहोनष्टइतिदर्शितं ७३ ७३

भी०
१८५

समाप्तः शास्त्रार्थः इदानीं कथाप्रबंधमेवानुवर्त्तयन् संजय उवाच इतीति अद्भुतं चेतसो विस्मयकरं रोमहर्षणं रोमांचोद्गमजनकं ७४ कथमयं त्वया श्रु-
तो ऽपि वासुदेवार्जुनयोः संवादः अत आह व्यासप्रसादादिति भगवता व्यासेन दिव्यं चक्षुः श्रोत्रादिकं मह्यं दत्तं येन नाहं व्यवहितं विप्रकृष्टं वा सर्वं क-
रतलामलकवद्विजानामि अतो व्यासप्रसादादेतद्गुह्यं परं गुह्यं गोप्यं अहं श्रुतवान् योगं च परं परमं योगमेश्वरमिति प्रतिज्ञापूर्वकं प्रदर्शितं वैश्वरूप्यं तमपि
दृष्टवानिति शेषः स्वयं कथयत इमामुक्तेः अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इति श्रुतेः स्वनिश्वसितं वेदं शिष्याचार्यपरंपरया कथयत इमा यातीति न दृष्टं

संजय उवाच इत्यहं वासुदेवस्य पार्थस्य च महात्मनः संवादमिममश्रौषमद्भुतं रोमहर्षणं ७४ व्यासप्रसादाच्छ्रुतवानेतद्गु-
ह्यमहं परं योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयं ७५ राजन् संस्मृत्य संस्मृत्य संवादमिममद्भुतं केशवार्जुनयोः पुण्यं
हृष्यामि च मुहुर्मुहुः ७६

म ५

साक्षात्कथयत इति स्पष्टीकरणाय प्रवृत्तिविद्यानां मल्लुतं प्रति साक्षात्कथयतः श्रुतवानहमिमम्यैः तेन भगवद्दनुग्रहपात्रतया ब्रह्मणा समं तस्य
योग्यते अनुपनयोगनिमित्तेनान्वयेनानुग्रहायेहं पापरयोगमितिपुत्र अस्य कलिंगयोरपि सामानाधिकरण्यं शक्यं वयन्ति किं च न तावत् चरणेषु प्रहृष्टं तुमि
त्यादाविव पूर्वपदस्य लिंगसंस्कारप्राबल्यादुत्तरपदे भिन्नलिंगविशेष्यज्ञानेपि पूर्वसंस्कारेणानिवर्त्तनदितिसामानाधिकरण्यवल्लिंगयोरपि वर्त्तमानका
मितिज्ञेयं ७५ केशवार्जुनसंवादश्रवणं विश्वरूपस्य योगदर्शनं जेवाह्लादकमेण श्लोकद्वयेनाह राजन्निति हे राजन् हे धृतराष्ट्र पुण्यं पुण्यकर्मपा
पहं चेमर्यात संस्मृत्य संस्मृत्यैतत्संवादं मे हृदि तिष्ठति शेषं स्पष्टार्थं ७६

भी०
१८५

न चेति रूपं विश्वरूपं एतद्दर्शनं हि व्यवहारभी ज्ञा इति दर्शनो विप्रकृष्टं वस्तु स्वाणि तेन तु सामान्यावि शन्तीति काल तो व्यवहितं भो यादिद्वयं चकारं तत्का
लकव दृष्ट्वा नत च्चजगतो मिथ्यात्व मतो रात नसंभवनीति प्रतिपादितं वेदांत कृत के अतीतानागतं वस्तु वीक्षते कथं विल्ववत योगि संकल्पमात्र
न्यमिति शास्त्रोपदिष्टिम: माया सर्व दा सर्वं सर्वावस्थमिदं जगत अतीतितदुपाधिच्छिन्नत्वात्स्यात्सर्वमोहते १ आदंसपरिणामाभ्यांस्व

ति २

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरे: विस्मयो मे महाराजन् हृष्यामि च पुन: पुन: ७७ यत्र योगेश्वर: कृष्णो यत्र पा
र्थो धनुर्धर: तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ७८ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृ
ष्णार्जुनसंवादे सन्न्यासादितत्त्वनिर्णययोगो नामाष्टादशोऽध्याय: ४०

नह्येतायत्र सतत्र्यतीतानागतं वस्तु योगिनिर्दृष्टं तां कथं ३ संकल्पमात्रभातं वस्त्वतातादि स्थिराप्यते न स्वेद्दर्शनाभं तस्माद्योगिज्ञान
मपूर्वा ४ योगिसंकल्पमात्रेणातस्यासन्निर्यद्दोष्यते ईश संकल्पमात्रेणासर्वे सन्निकृष्टे दृश्यतां श्रां भे परिणाममेवादेशकालाद्यतिक्र
म: नैव दृष्ट: कश्चित्योयं स्वप्नमायादिषु स्फुट: ६ युगपद्दृश्यते कुंभो नानादेशस्थयोगिभि: जलसूर्य इवाभ्याभिन्नेनासौ कल्पित: स्फुट: यो
गिभिर्गृह्यमाणत्वाद्ध्रुव: सर्वत्र सर्वदा सन्नेवास्तीति चेत्कार्यं कथमीदृग्विधं भवेत् ८ आदृतं हीष्यते कार्यं युगपद्भिन्नदेशतात्वेत्कल्प

सर्व २

नं विनाश्येष्टदेशं नक्तं चरन्नाश्रियः ॥७६॥ यस्मात्त्वं शुभिहारश्च मिति वन्नापि गम्य वक्तृप्रकृतेः परिणामं वा न गन्तुं किं त्विंद्रजालश्च ॥ ७७ ॥ समं च हरेः
जालामविभ्रमरागभ्रूशो श्चनाधिष्ठानादते शुद्धं नास्मेवते इत्यादिति ॥७७॥ स्पष्टार्थं मूलश्लोकः ॥७७॥ यस्मादनंतैश्वर्यो भगवान् स्वानुग्रहीतो
र्जुनो युधिष्ठिरपक्षे स्थित्वानत्त्वया जयाशानकार्येत्याहुः यत्रेति यत्र पक्षे ध्रुवेति सर्वत्र संबध्यते श्रीरैव हसनादि शोभा विजयः प्रसिद्धः भूतिरै
श्वर्यं सर्वनियंतृत्वं नीतिर्नयः स्व एतत्सर्वं तत्र तस्मिन्पक्षे ध्रुवमिति मम मतिः अतः पांडवैः सहसंधिरेव कर्त्तव्य इति भावः ॥७८॥ इति श्रीमत्स
र्वाम्नायप्रमाणज्ञमर्यादाधुरंधरवंशावतंसश्रीगोविंदसूनोः ॥ श्रीनीलकंठस्य कृतौ भारतभावदीपे भीष्मपर्वणि गीतार्थप्रका
शेष्टादशोध्यायः ॥ श्रीकृष्णजयकृष्णजयजयकृष्णः ॥ छ ॥ छ ॥ ॥ ॥ ॥ राम

स्था २

गीताः सुगीताः कर्त्तव्याः इत्यादयः सार्धाः पंच श्लोकाः गौडैर्न पठ्यंते ५ एवं गीतां तेमन्त्रवाभवे माहिन्नानि शमानामात्मनिष्ठाया [illegible] मामे वैष्ण
वीमपश्चामि स्वतमकलभूतार्शितामकामानांत्वर्थाधीनाकामसिद्धिः अर्थस्वम नामपि पांडवानामिव गुरुव धानृताघा श्रेयेणो वसिष्ठस्तोपिव
लवदन्तयहारमेघान्तकैरवाणामिव माध्यमानो निरन्वयो छेदायमवेतीति दर्शयितुम् मुद्धप्रधानं ग्रंथम् औपमपर्वंतिमारभते अथस्यानर्थहेतु

गी २

वैशंपायनउवाच गीताः सुगीताः कर्त्तव्याः किमन्यैः शास्त्रविस्तरैः याचेयंपद्मनाभस्य मुखपद्माद्विनिःसृता १ सर्वशास्त्र
मयीगीता सर्वदेवमयोहरिः सर्वतीर्थमयीगंगा सर्ववेदमयोमनुः २ गीतागंगाचगायत्री गोविंदेचहृदिस्थिते चतुर्गकारसं
युक्तेपुनर्जन्मनविद्यते ३ षट्शतानिसविंशानि श्लोकानांप्राहकेशवः अर्जुनःसप्तपंचाशत्सप्तषष्टिस्तुसंजयः ४ धृतरा
ष्ट्रःश्लोकमेकंगीतायामानमुच्यते भारतामृतसर्वस्वगीतायामथितस्य च सारमुद्धृत्यकृष्णेनअर्जुनस्यमुखेहुतं ५ संज
यउवाच ततोधनंजयंदृष्ट्वाबाणगांडीवधारिणं पुनरेवमहानादंव्यसृजंतमहारथाः १ पांडवाःसंजयाश्चैवयेचैषामनुया
यिनः दध्मुःसुमुदिताःशंखान्वीराःसागरसंभवान् २ ततोभेर्यश्चशतशःक्रकचागोविषाणिकाः सहसैवाभ्यहन्यंतसमंताद्

त्वेविवक्षीनुततोधनंजयंदृष्ट्वेतिततः अर्जुनस्यकरिष्यवचनंतवेममंबाहुःप्रतिज्ञानंतं धनंजयंयुद्धार्थसंनद्धंदृष्ट्वैवंमर्थी १ १ भेर्यः बृहत्सोहुडुक्काः
पेशपः काहलाः क्रकचाः जयमंगलाः गोविषाणिकाः गवादिशृंगाणि सहसा युगपदेव अभ्यहन्यंत अवाद्यंत ३ ३ ३ ३ ३ ३

ध ५ वराणंधनुःश्रेष्ठं अवरुह्यावतीर्य ७ येनविजयाख्येनप्रयोजनेनत्वंयुधिष्ठिरः संग्रामेदृढबुद्धिः तस्मिन्नर्थे अभिप्रेक्ष्य आलोक्य प्रथमं

अथदेवाःसगंधर्वाःपितरश्चजनेश्वराः सिद्धचारणसंघाश्चसमीयुस्तेदिदृक्षया ४ ऋषयश्चमहाभागाःपुरस्कृत्यशतक्रतुं समीयुस्तत्रसहिताद्रष्टुंतद्देशसंमर्दम् ५ ततोयुधिष्ठिरोदृष्ट्वायुद्धायसुसमुद्यते तेसेनेसागरप्रख्येमुहुःप्रचलितेनृप ६ विमुच्यकवचंवीरोनिक्षिप्यचवरायुधं अवरुह्यरथात्तूर्णंपद्भ्यामेवकृतांजलिः ७ पितामहमभिप्रेक्ष्यधर्मराजोयुधिष्ठिरः वाग्यतः प्रययौयेनप्राङ्मुखोरिपुवाहिनी ८ तंप्रयांतमभिप्रेक्ष्यकुंतीपुत्रोधनंजयः अवतीर्यरथात्तूर्णंभ्रातृभिः सहितोन्वगात् ९ वासुदेवश्चभगवान्पृष्ठतोनुजगामह पार्थिवाश्चवराजानस्तमनुजग्मुरुत्सुकाः १० अर्जुनउवाच किंतेव्यवसितंराजन्यदस्मानपहायवै पद्भ्यामेवप्रयातोसिप्राङ्मुखोरिपुवाहिनीं ११ भीमसेनउवाच क्वगमिष्यसिराजेंद्रनिक्षिप्तकवचायुधः दंशितेष्वरिसैन्येषुभ्रातॄनुत्सृज्यपार्थिव १२ नकुलउवाच एवंगतेत्वयिज्येष्ठेममभ्रातरिभारत भीर्मेदुनोतिहृदयंब्रूहि गंताभवान्क्वनु १३ सहदेवउवाच अस्मिन्रणसमूहेवैवर्तमानेमहाभये योद्धव्येक्वनुगंतासिशत्रूनभिमुखोनृप १४ संजयउवाच एवमाभाष्यमाणोपिभ्रातृभिःकुरुनंदन नोवाचवाग्यतःकिंचिद्गच्छत्येवयुधिष्ठिरः १५

पितामहंप्रतिप्रययौरिपुवाहिनींप्रविश्यपतितोरिपुः ८ ११ दंशितेषुसंनद्धेषु १२ १३ १४ १५

वै २

गोतमंकृपं १७ प्राकल्पेप्राचीनकाले १८ १९ मिथोमोमंत्रयोहीहीतिसुलोपाभावश्छार्षे २० व्यक्तंनियतंभीष्मंभीष्मसञ्चति

तानुवाचमहाप्राज्ञोवासुदेवोमहामनाः अभिप्रायोस्यविज्ञातोमयेतिप्रहसंनिव १६ एषभीष्मंतथाद्रोणंगोतमंशल्यमेवच अनुमान्यगुरून्सर्वान्योत्स्यतेमहष्पशत्रुभिः १७ श्रूयतेहिपुराकल्पेगुरूनननुमान्ययः अनुमान्ययथाशास्त्रंयस्तुयुद्धेन्महत्तरैः १८ ध्रुवस्तस्यजयोयुद्धेभवेदितिमतिर्मम एवंब्रुवतिकृष्णेतुधार्त्तराष्ट्रचमूंप्रति १९ हाहाकारोमहानासीन्निःशब्दास्त्वपरेभवन् दृष्ट्वायुधिष्ठिरंवीरोधार्त्तराष्ट्रस्यसैनिकाः २० मिथःसंकथयांचक्रुर्नेषोहिकुलपांसनः व्यक्तंभीतइवाभ्येतिराजासौभीष्ममंतिकं २१ युधिष्ठिरःससोदर्यःशरणार्थंप्रयाचकः धनंजयेकथंनाथेपांडुपुत्रेवृकोदरे २२ नकुलेसहदेवेचभीतोभ्येतिचपांडवः ननूनंक्षत्रियकुलेजातःसंप्रथितोभुवि यथास्यहृदयंभीतमल्पसत्वस्यसंयुगे २३ ततस्तेसैनिकाःसर्वेप्रशंसंतिस्मकौरवान् हृष्टाःसुमनसोभूत्वाचैलानिदुधुवुःपृथक् २४ व्यनिंदंतततःसर्वेयोधास्तत्रविशांपते युधिष्ठिरंससोदर्यंसहितंकेशवेनतु २५ ततस्तत्कौरवंसैन्यंधिःकृत्वातुयुधिष्ठिरं निःशब्दमभवत्तूर्णंपुनरेवविशांपते २६ किंनुवक्ष्यतिराजासौकिंभीष्मःप्रतिवक्ष्यति किंभीमःसमरश्लाघीकिंनुकृष्णार्जुनाविति २७

श्री०

कंसमीपं २१ २४ धिःकृत्वाधिक्कृत्य असमासआर्षेधिगितिस्मकरोदितिवा

२५ २६ २७ २७ २७ २७

भी०
१९६

विवक्षितं वक्तुमिष्टं नु वितर्के २८ ३० पराभवाय पराक्रूतो निरस्तो भावः सन्नायत्र सः तस्मै मारणायेत्यर्थः पराभावाभावस्वतिविग्रहे पि समानो

विवक्षितं किमस्येति संशयः सुमहानभूत् उभयोः सेनयो राजन् युधिष्ठिरकृते तदा २७ सोवगाह्य चमूं शत्रोः शरशक्तिस
माकुलां भीष्ममेवाभ्ययात्तूर्णं भ्रातृभिः परिवारितः २८ तमुवाच ततः पादौ कराभ्यां पीड्य पाण्डवः भीष्मं शान्तनवं राजा यु
द्धाय समुपस्थितं २९ युधिष्ठिर उवाच आमंत्रये त्वां दुर्धर्ष त्वया योत्स्यामहे सह अनुजानीहि मां तात आशिषश्च प्र
योजय ३० भीष्म उवाच यद्येवं नाभिगच्छेथा युधि मां पृथिवीपते शपेयं त्वां महाराज पराभावाय भारत ३१ प्रीतो
स्मि पुत्र युध्यस्व जयमाप्नुहि पाण्डव यत्तेभिलषितं चान्यत्तदवाप्नुहि संयुगे व्रियतां च वरः पार्थ किमस्मत्तोभिकांक्ष
सि एवंगते महाराज न तवास्ति पराजयः ३३ अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् इति सत्यं महाराज बद्धोस्म्य
र्थेन कौरवैः ३४ अतस्त्वां क्लीबवद्वाक्यं ब्रवीमि कुरुनन्दन भृतोस्म्यर्थेन कौरव्य युद्धादन्यत्किमिच्छसि ३५ युधिष्ठि
र उवाच मंत्रयस्व महाप्राज्ञ हितार्थी मम नित्यशः युध्यस्व कौरवार्थाय ममैष सततं वरः ३६ भीष्म उ० राजन् कि
मत्र सह्यं ते करोमि कुरुनन्दन कामं योत्स्ये परस्यार्थे ब्रूहि यत्ते विवक्षितं ३७

२४ श्लो ४

र्थः ३१ ३२ एवंगते ईदृगाचारवति त्वयि सति ३३ ३४ क्लीबवत् स्वोत्कर्षपरस्य युद्धादन्यदिति स्वेनैव संकोचनात्कात
रवत् धज योषितः युद्धात्प्रातिभव्यात् ३५ ३६ सह्यं साहाय्यं ३७

भी०
१९६

श्रेयः पश्यामि यदि वक्तुं योग्यमिति मम मतं हि वरे समर्थ ३८ ४० तावत् संप्रति ४१ ४३ आत्मनिःश्रेयसं स्वहितसाधनं ४४ अहं पितृन कथं ज

युधिष्ठिरउवाच कथंजयेयंसंग्रामेभवंतमपराजितं एतन्मेमंत्रयहितंयदिश्रेयःप्रपश्यसि ३८ भीष्मउवाच नतंपश्या
मिकौंतेययोमांयुध्यंतमाहवे विजयेतपुमान्कश्चिदपिसाक्षाच्छतक्रतुः ३९ युधिष्ठिरउवाच तस्मात्पृच्छाम्यहंतुत्वांपि
तामहनमोस्तुते जयोपायंब्रवीहित्वमात्मनःसमरेपरैः ४० भीष्मउवाच नशत्रुंतातपश्यामिसमरेयोजयेतमां न
तावन्मृत्युकालोमेपुनरागमनंकुरु ४१ ततोयुधिष्ठिरोवाक्यंभीष्मस्यकुरुनंदन शिरसाप्रतिजग्राहभूयस्तमभि
वाद्यच ४२ प्रायात्पुनर्महाबाहुराचार्यस्यरथंप्रति पश्यतांसर्वसैन्यानांमध्येनभ्रातृभिःसह ४३ सद्रोणमभिवा
द्याथकृत्वाचैवप्रदक्षिणं उवाचवाचादुर्धर्षमात्मनिःश्रेयसंवचः ४४ आमंत्रयेत्वांभगवन्योत्स्येविगतकल्मषः क
थंजयेयंरिपून्सर्वाननुज्ञातस्त्वयाद्विज ४५ द्रोणउवाच यदिमांनाभिगच्छेथायुद्धायकृतनिश्चयः शपेयंत्वांमहारा
जपराभवायसर्वशः ४६ तद्युधिष्ठिरतुष्टोस्मिपूजितश्चत्वयानघ अनुजानामियुध्यस्वविजयंसमवाप्नुहि ४७ क
रवाणिचतेकामंब्रूहियत्तेविवक्षितं एवंगतेमहाराजयुद्धादन्यत्किमिच्छसि ४८ अर्थस्यपुरुषोदासोदासस्त्वर्थोनक
स्यचित् इतिसत्यंमहाराजबद्धोस्म्यर्थेनकौरवैः ४९

येतत्वंविगतकल्मषःसन्कथयेतिशेषः ४५ ४६ ४७ ४८ ४९ ॥

५० ५१ ध्रुवोवश्यंभावी अभिजानामि अनुजानामि विमोक्ष्यसे शत्रून्जीवितादितिशेषः ५२ ५५ हंतविषादे ५६ ५७ प्रायगतंमरणाय

भी०
१५७

अतस्त्वांक्लीबवद्ब्रूयांयुद्धादन्यत्किमिछसि योत्स्यामिकौरवस्यार्थेतवाशास्योजयोमम ५० युधिष्ठिरउवाच जयमा
शास्त्वमेब्रह्मन्मंत्रयस्वचमद्धितं युध्यस्वकौरवार्थेनवारएषवृतोमया ५१ द्रोणउवाच ध्रुवस्तेविजयोराजन्यस्यमंत्रीह
रिस्तव अहंत्वामभिजानामिरणेशत्रून्विजेष्यसि ५२ यतोधर्मस्ततःकृष्णोयतःकृष्णस्ततोजयः युध्यस्वगछकौंतेय
पृछमांकिंब्रवीमिते ५३ युधिष्ठिरउवाच पृछामित्वांद्विजश्रेष्ठशृणुमेयद्विवक्षितं कथंजयेयंसंग्रामेभवंतमपराजि
तं ५४ द्रोणउवाच नतेस्तिविजयस्तावद्यावद्युध्याम्यहंरणे ममाशुनिधनेराजन्यतस्वसहसोदरैः ५५ युधिष्ठिरउवा
च हंततस्मान्महाबाहोवधोपायंवदात्मनः आचार्यप्रणिपत्यैषपृछामित्वांनमोस्तुते ५६ द्रोणउ० नशत्रुंतातप
श्यामियोमांहन्याद्रणेस्थितं युध्यमानंसुसंरब्धंशरवर्षौघवर्षिणं ५७ ऋतेप्रायगतंराजन्न्यस्तशस्त्रमचेतनं हं
न्यान्मांयुधियोधानांसत्यमेतद्ब्रवीमिते ५८ शस्त्रंचाहंरणेजह्यांश्रुत्वासुमहदप्रियं श्रद्धेयवाक्यात्पुरुषादितिसत्यं
ब्रवीमिते ५९ एतच्छ्रुत्वामहाराजभारद्वाजस्यधीमतः अनुमान्यतमाचार्यंप्रायाच्छारद्वतंप्रति ६० ॥ ३ ॥

भी०
१५७

नियतंअचेतनंयोगबलेनसमंदेहंयोधानांमध्येकश्चिदितिशेषः ५८ जह्यांत्यजेयंश्रद्धेयवाक्यात् आप्तवचनात् ५९ ६० ३

६१ ७० प्रानवक्स्टान ७१ ७२ श्रीकृष्णायनमः श्रीरामायनमः श्रीगंगायैनमः

सोभिवाद्यकृपंराजन्कृत्वाचाभिप्रदक्षिणं उवाचदुर्धर्षतमंवाक्यंवाक्यविशारदः ६१ अनुमानयेत्वांयोत्स्येगुरोविगतकल्मषः
जयेयंचरिपून्सर्वाननुज्ञातस्त्वयानघ ६२ कृपउवाच यदिमांनाभिगच्छेथायुद्धायकृतनिश्चयः शपेयंत्वामहाराजपराभवा
यसर्वशः ६३ अर्थस्यपुरुषोदासोदासस्त्वर्थोनकस्यचित् इतिसत्यंमहाराजबद्धोस्म्यर्थेनकौरवैः ६४ तेषामर्थेमहाराजयो
द्धव्यमितिमेमतिः ब्रवीम्यतःक्लीबवत्त्वांयुद्धादन्यत्किमिच्छसि ६५ युधिष्ठिरउवाच हंतपृच्छामितेतस्मादाचार्यशृणुमेव
चः इत्युक्त्वाव्यथितोराजानोवाचगतचेतनः ६६ संजयउवाच तंगौतमःप्रत्युवाचविज्ञायास्यविवक्षितं अवध्योहंम
हाराजयुध्यस्वजयमाप्नुहि ६७ प्रीतस्तेभिगमेनाहंजयंतवनराधिप आशासिष्येसदोत्थायसत्यमेतद्ब्रवीमिते ६८
एतच्छ्रुत्वामहाराजगौतमस्यवचस्तदा अनुमान्यकृपंराजाप्रययौयेनमद्रराट् ६९ सशल्यमभिवाद्याथकृत्वाचाभिप्र
दक्षिणं उवाचराजादुर्धर्षमात्मनःश्रेयसंवचः ७० अनुमानयेत्वांदुर्धर्षयोत्स्येविगतकल्मषः जयेयंचपरान्राजन्ननुज्ञा
तस्त्वयारिपून् ७१ शल्यउवाच यदिमांनाभिगच्छेथायुद्धायकृतनिश्चयः शपेयंत्वांमहाराजपराभावायवैरिणो ७२

७३ ७९ प्रतिजानेऽङ्गीकारोमि ८० ८४ श्रीकृष्णायनमः

तुष्टोस्मि पूजितस्त्वामि यत्कांक्षसि तदस्तुते अनुजानामि चैव त्वां युध्यस्व जयमाप्नुहि ७३ ब्रूहि चैव वचो वीर केनार्थः किं ददा
मि ते एवं गते महाराज युद्धादन्यत्किमिच्छसि ७४ अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् इति सत्यं महाराज बद्धोस्म्यर्थे
न कौरवैः ७५ करिष्यामि हि ते कामं भागिनेय यथेप्सितं ब्रवीम्यतः क्लीबवत्त्वां युद्धादन्यत्किमिच्छसि ७६ युधिष्ठिर उवाच मे
त्रयस्व महाराज नित्यं मद्धितमुत्तमं कामं युध्य परस्यार्थे वरमेतद्वृणोम्यहं ७७ शल्य उवाच किमत्र ब्रूहि साह्यं ते करोमि नृपसत्त
म कामं योत्स्ये परस्यार्थे भर्तास्म्यर्थेन कौरवैः ७८ युधिष्ठिर उवाच स एव मे वरः शल्य उद्योगे यस्त्वया कृतः सूतपुत्रस्य सं
ग्रामे कार्यस्तेजोवधस्त्वया ७९ शल्य उवाच संपत्स्यत्येष ते कामः कुन्तीपुत्र युधिष्ठिर यथेप्सितं गच्छ युध्य प्रतिजाने जयं
तव ८० संजय उवाच अनुमान्याथ कौन्तेयो मातुलं मद्रकेश्वरं निर्जगाम महासैन्याद्भ्रातृभिः परिवारितः ८१ वा
सुदेवस्तु राधेयमाहवेभिजगाम ह तत एनमुवाचेदं पाण्डवार्थे गदाग्रजः ८२ श्रुतं मे कर्ण भीष्मस्य द्वेषात्किल न योत्स्य
सि अस्मान्वरय राधेय यावद्भीष्मो न हन्यते ८३ हते तु भीष्मे राधेय पुनरेष्यसि संयुगं धार्तराष्ट्रस्य साहाय्यं यदि पश्यसि
चेत्समं ८४

श्रीकृष्णायनमः

८५ ८६ इदं वक्ष्यमाणां वचनं युधिष्ठिरं प्रति अब्रवीत् ८८ भवतः भवत्संबंधिनो मित्रत इति पाठे पक्षेऽत्र स्त्वेति शेषः ८९ ९० तंतुः संततिः पिंडः पि

न विप्रियं करिष्यामि धार्तराष्ट्रस्य केशव संजयार्थां हि मां विद्धि दुर्योधनहितैषिणं ८५ तच्छ्रुत्वा वचनं कृष्णः समवर्तत भारत युधिष्ठिरपुरोगैश्च पांडवैः सहसंगतः ८६ अथ सैन्यस्य मध्ये तु प्राक्रोशत् पांडवाग्रजः योऽस्मान्वृणोति तमहं वरये स्वकारणात् ८७ अथ तान्समभिप्रेक्ष्य युयुत्सुरिदमब्रवीत् प्रीतात्मा धर्मराजानं कुंतीपुत्रं युधिष्ठिरं ८८ अहं योत्स्यामि भवतः संयुगे धृतराष्ट्रजान् युष्मदर्थे महाराज यदि मां वृणुषेऽनघ ८९ युधिष्ठिर उवाच एह्येहि सर्वे योत्स्यामस्तव भ्रातॄनपंडितान् युयुत्सो वासुदेवश्च वयं च ब्रूम सर्वशः ९० वृणोमि त्वां महाबाहो युध्यस्व मम कारणात् त्वयि तंतुश्च पिंडश्च धृतराष्ट्रस्य दृश्यते ९१ भजस्वास्मान् राजपुत्र भजमानान्महाद्युते न भविष्यति दुर्बुद्धिर्धार्तराष्ट्रोऽत्यमर्षणः ९२ संजय उवाच ततो युयुत्सुः कौरव्यान्परित्यज्य सुतांस्तव जगाम पांडुपुत्राणां सेनां विश्राव्य दुंदुभिः ९३ ततो युधिष्ठिरो राजा संप्रहृष्टो महाभुजः जग्राह कवचं भूयो दीप्तिमत्कनकोज्ज्वलं ९४ प्रत्यपद्यंत ते सर्वे रथान्स्वान्पुरुषर्षभाः ततो व्यूहं यथापूर्वं प्रत्यव्यूहंत ते

तदग्रजः अस्मिन् सैन्ये मरिष्यतीति भावः ९१ भजस्वेति अभजमानः सर्वोऽपि धृतराष्ट्रपुत्रो न भविष्यति मरिष्यतीत्यर्थः ९२ ९३ ९४
९५

भी०टी०

१९९

पक्षकान् दीर्घकालान् हीनपक्षकान् इति पाठे मुरजान् ९६ ९७ गौरवं मानमत्र ९८ सौहृदं मैत्री कृपां स्नेहं दयां परदुःखप्रहाणेच्छां ९९
कीर्तिमतां पांडवानां स्तुतिसंहिता वाच इति संबंधः १०० आर्याः कुलीनाः वृत्तं चरितं मम सप्तम स्यैव रथस्वरं विदुः १०१ १०२ भीष्मपर्वभावदीपे

अवादयन्दुंदुभींश्च शतशश्चैव पुष्करान् सिंहनादांश्च विविधान्विनेदुः पुरुषर्षभाः ९६ रथस्थान्पुरुषव्याघ्रान्पांडवानेव श्चया
र्थिवाः यत्र युद्धमाहयः सर्वे उत्तजहृषिरे तदा ॥ ९७ ॥ गौरवं पांडुपुत्राणां तं मासान्मानयतां च तान् दृष्ट्वा महीक्षितस्तत्र पूजयां
चक्रिरे भृशं ९८ सौहृद्यं च कृपां चैव प्राप्तकालं महात्मनां दयां च ज्ञातिषु परां कथयां चक्रिरे नृपाः ९९ साधु साध्विति सर्वे
त्र निश्चेरुः स्तुतिसंहिताः ॥ वाचः पुण्याः कीर्तिमतां मनोहृदयकर्षणाः १०० म्लेच्छाश्चार्याश्च ये तत्र ह्यदृशन् शुश्रुवुस्तदा वृत्तं
तत्पांडुपुत्राणां रुरुदुस्ते सगद्गदाः ॥ १ ॥ ततो जघ्नुर्महाभेरीः शतशश्चैव पुष्करान् शंखांश्च गोक्षीरनिभान्दध्मुर्हृष्टमनस्विनः २
इति भीष्मपर्वणि अध्यायः ॥ ४ ॥ धृतराष्ट्र उवाच ॥ एवं व्यूहेष्वनीकेषु मामकेष्वितरेषु च के पूर्वं प्राहरंस्तत्र कुरवः पांडवास्तथा
१ संजय उवाच भ्रातृभिः सहितं युद्धे पुत्रो दुःशासनस्तव भीष्मं प्रमुखतः कृत्वा प्रययौ सेनया सह २ तथैव पांडवाः सर्वे भी
मसेनपुरोगमाः भीष्मेण युद्धमिच्छंतः प्रययुर्हृष्टमानसाः ३

ध्यायः एवं व्यूहेष्वित्यारभ्य दृष्ट्वा भीमस्य विक्रममित्यंतस्य ग्रंथस्य भीष्मस्य पराक्रम इति तात्पर्यार्थः ॥ ॥ ॥ ॥ ॥ ॥

श्रीराम०

१९९

क्ष्वेलाः सिंहनादाः मदंगामर्दलाः मुरजाः सुद्रुमर्दलाः ४ समाद्रवन्नमोमंसंगताभ्रमवन् ५ महानसमुच्छ्रयःसंप्रहारोयत्र ६ ७ गोवृषोबलीवर्दे

क्ष्वेलाः किलिकिलाशब्दाः ककचागोविषाणिकाः भेरीमृदंगामुरजाहयकुंजरनिस्वनाः ४ उभयोःसेनयोराजंस्ततस्तेस्म समाद्रवन् वयंतास्वतिनर्दंतस्तदासीत्तुमुलंमहत् ५ महांत्यनीकानिमहासमुच्छ्रयेसमागमेपांडवधार्त्तराष्ट्रयोः चकंपिरेशंखमृदंगनिस्वनैः प्रकंपितानीववनानिवायुना ६ नरेंद्रनागाश्वसमाकुलानामागच्छतीनामशिवेमुहूर्ते बभूवघोषस्तुमुलश्चमूनांवातोद्धतानामिवसागराणां ७ तस्मिन्समुत्थितेशब्देतुमुलेरोमहर्षणे भीमसेनोमहाबाहुःप्राणदद्गोवृषोयथा ८ शंखदुंदुभिनिर्घोषानवारणानांचबृंहितं सिंहनादंचसैन्यानांभीमसेनरवोभ्यभूत् ९ हयानांहेषमाणानांअनीकेषुमहस्रशः सर्वानभ्यभवच्छब्दान्भीमसेनस्यनिस्वनः तंश्रुत्वानिनदंतस्यसैन्यास्तववितत्रसुः जीमूतस्येवनिनदःशक्राशनिसमस्वनं ११ वाहनानिचसर्वाणिशकृन्मूत्रंप्रसुस्रुवुः शब्देनतस्यवीरस्यसिंहस्येवेतरेमृगाः १२ दर्शयन्घोररूपमात्मानंमहाभ्रमिवनादयन् भीषयंस्तवपुत्रांस्तान्भीमसेनोभ्यपात् १३ तमायांतंमहेष्वासंसोदर्याःपर्यवारयन् छादयंतःशरव्रातैर्मेघाइवदिवाकरं १४ दुर्योधनश्चपुत्रस्तेदुर्मुखोदुःसहःसहः दुःशासनश्चाति

श्रेष्ठः ८ अभ्यभूतअभिभूतवान् ९ १० सैन्याःसेनामुख्याः संनादयन्नादंकुर्वन् १३ सोदर्याःराजानुजाः १४ १५

निर्मुक्ताः मुक्तकंचुकास्याशीविषाउपमायेषांतान १८ १९ भीमाभयंकरास्फानांतलानांध्वनिः स्वनायेते २० लाघवंक्षिप्रहस्ततांनिमि

श्व २

विविंशतिश्चित्रसेनोविकर्णश्चमहारथः पुरुमित्रोजयोभोजः सोमदत्तिश्चवीर्यवान १६ महाचापानिधुन्वंतोजलदाइवविद्युतः स्वा
ददानाश्चनाराचान्निर्मुक्ताशीविषोपमान १७ अथतेद्रौपदीपुत्राः सौभद्रश्चमहारथः नकुलः सहदेवश्चधृष्टद्युम्नश्चपार्षतः १८ धार्त
राष्ट्रानप्रतिपप्रतस्थेपतः शितैः शरैः वज्रैरिवमहावेगैः शिखराणिधराभृतां १९ तस्मिन्प्रथमसंग्रामेभीमज्यातलनिस्वनैः ताव
कानांपरेषांचनासीत्कश्चित्पराङ्मुखः २० लाघवंद्रोणशिष्याणामपश्यंभरतर्षभ निमित्तवेधिनांराजञ्छरानुत्सृजतांभृशं २१
नोपशाम्यतिनिर्घोषोधनुषांकूजितंतदा विनिश्चेरुः शराः दीप्ताज्योतींषीवनभस्तलात २२ सर्वेत्वन्येमहीपालाः प्रेक्षकाइव
भारत ददृशुर्दर्शनीयंतंभीमंज्ञातिसमागमं २३ ततस्तेजातसंरंभाः परस्परकृतागसः अन्योन्यस्पर्धयाराजन व्यायच्छंत
महारथाः २४ कुरुपांडवसेनेतेहस्त्यश्वरथसंकुले शुशुभातेरणेतीवपटेचित्रगतेइव २५ ततस्तेपार्थिवाः सर्वेप्रगृहीतश
रासनाः सहसेनाः समापेतुः पुत्रस्यतववाहिनीं २६ ॥ ॥

जंलक्षराः २१ २२ जातसंरंभाश्चिरसंभृतकोपाः कृतागसः कृतापराधाः भीमोपिबाल्येधार्तराष्ट्रान्मर्दयन्कृतापराधोस्तीत्य
र्थः परस्परेतिव्यायच्छंतः व्यायामंचक्रुः २४ पटेइतिसमम्पंत २५ २६

शरस्तात तेषामाधावतांतत्रगजाश्चरुचि लोमहान् सिंहनादद्भुवेनमिश्रः शंखभेरीसमाकुलः सद्योषवांश्चरणाहे धनुर्नागोसिकवचः
व्यावक्षितपुरोधातमासीन्महदेशेधिवत्स्वनः पुथिविहैर्नेवादिद्याःपार्थिवास्तेसहस्रशः विनदन्तः समापेतुः पुत्रस्यतव [illegible] २५शरमपादि

अंतर्धीयत अंतर्हितः अउभावः अउभावः आर्षः सैन्येन सेनाभ्येत्य २२ २९ अति अतिक्रम्य ३० अध्यायः पूर्वाह्णे तस्याह्नः पूर्वाह्णे

५१

उभयोः सेनयोस्तीव्रः सैन्यानां समसमागमः अंतर्धीयत चादित्यः सैन्येन रजसावृतः २८ प्रयुद्धानां प्रभग्नानां पुनरावर्ततामपि नात्र स्वेषां परेषां च विशेषः समदृश्यत २९ तस्मिन्सुतुमुले युद्धे वर्तमाने महाभये अतिसर्वाण्यनीकानि पिता ते तिव्यरोचत ३० इति भीष्मपर्वणि अध्यायः ४२ संजय उवाच पूर्वाह्णे तस्य रौद्रस्य युद्धमह्नो विशांपते प्रावर्तत महाघोरो राज्ञां देहावकर्तनः १ कुरूणां संजयानां च संग्रामे विजिगीषतां सिंहानामिव संह्रादो दिवमुर्वीं च नादयन् २ आसीत्किलकिलाशब्दस्तलशंखरवैः सह जज्ञिरे सिंहनादाश्च नराणां प्रतिगर्जतां ३ तलत्राभिहतश्चैव ज्याशब्दो भरतर्षभ पत्तीनां पदशब्दश्च वाजिनां च महास्वनः ४ तोत्रांकुशनिपातश्च आयुधानां च निस्वनः घंटाशब्दश्च नागानामन्योन्यमभिधावतां ५ तस्मिन्समुदिते शब्दे तुमुले लोमहर्षणे बभूव रथनिर्घोषः पर्जन्यनिनदोपमः ६ ते मनः क्रूरमास्थाय समभित्यक्तजीविताः पांडवानभ्यवर्तंत सर्व एवोच्छ्रितध्वजाः ७ स्वयं शांतनवो राजन्नभ्यधावद्धनंजयं प्रगृह्य कार्मुकं घोरं कालदंडोपमं रणे ८ अर्जुनोपि धनुर्गृह्य गांडीवं लोकविश्रुतं अभ्यधावत तेजस्वी गांगेयं रणमूर्द्धनि ९

प्राद्लस ४

भोग १ संज्ञानां पांचालभेरानां २ तलत्राघातवाराणां ३४ तोत्रं गजदमनं वेणु कार्ष्यं वा राजबुध्नमाकरं ५ ८ रणमूर्धनि रणाग्रे ९

१० महेष्वासो महानस्त्रासो धनुर्यस्य ११ १२ आनर्छतुः पीडितवंतौ तक्षमाणौ तनूकुर्वाणौ १३ पुष्पैः शबलौ विचित्रौ किं

स्वर (पु२ ध

तावुभौ कुरुशार्दूलौ परस्परवधैषिणौ गांगेयस्तु रणे पार्थं विध्वा नाकंपयद्बली १० तथैव पांडवो राजन् भीष्मं नाकंपयद्युधि सात्यकि
स्तु महेष्वासः कृतवर्माणमभ्ययात् ११ तयोः समभवद्युद्धं सुमहल्लोमहर्षणं सात्यकिः कृतवर्माणं कृतवर्मा च सात्यकिं १२
जो } आनर्छतुः शरैर्घोरैस्तक्षमाणौ परस्परं तौ शराचितसर्वांगौ शुशुभाते महाबलौ १३ वसंते पुष्पशबलौ पुष्पिताविव किंशुकौ अ
भिमन्युर्महेष्वासो बृहद्बलमयोधयत् १४ ततः कोशलको राजा अभिमन्योर्विशांपते ध्वजं विच्छेद समरे सारथिं चाप्यपातयत् १५ सौ
भद्रस्तु ततः क्रुद्धः पातिते रथसारथौ बृहद्बलं महाराज विव्याध नवभिः शरैः १६ तथापरं सुतीक्ष्णाभ्यां सिताभ्यामरिमर्दनः ध्वज
मेकेन चिच्छेद पार्ष्णिमेकेन सारथिं १७ अन्योन्यं च शरैस्तौ क्रुद्धौ ततक्षतुररिंदमौ मानिनं समरे दृप्तं कृतवैरं महारथं १८ भीमसे
नस्तव सुतं दुर्योधनमयोधयत् १ तावुभौ नरशार्दूलौ कुरुमुख्यौ महाबलौ १९ अन्योन्यं शरवर्षाभ्यां ववृषाते रणाजिरे तौ वीक्ष्य
तु महात्मानौ कृतिनौ चित्रयोधिनौ २० विस्मयः सर्वभूतानां समपद्यत भारत २१ दुःशासनस्तु नकुलं प्रत्युद्याय महारथं २१

शुक्लोपमौ १४ १६ सिताभ्यां तीक्ष्णाभ्यां ध्वजमिति पूर्वेणान्वयः एकेन पार्ष्णिं पृष्ठयोधं पपिपति १९ १९ कृतिनौ युद्धकुशलौ २०

रामजी रामजी ।। रामजी ॥

केतुंकृतं २२ स्तुद्रकाराणांवाराणाविशिषाणां २३ ३० पराभ्युकराणांमारणमाधनं ३१ ३२ ३३ ३४ श्रीकृष्णायनमः

अविध्यन्निशितैर्बाणैः प्रहसन्निवभारत तस्यमाद्रीसुतः केतुंसशरासनं २२ चिच्छेदनिशितैर्बाणैः प्रहसन्निवभारत अथैनंपंच विंशत्यास्तुद्रकाणांसमर्पयत २३ पुत्रस्तुतवदुर्धर्षोनकुलस्यमहाहवे तुरंगांश्चिच्छेदरथंचैवापातयत २४ दुर्मुखः सहदे वंतुप्रत्युद्यायमहाबलं विव्याधशरवर्षेणायतमानंमहाहवे २५ सहदेवस्ततोवीरोदुर्मुखस्यमहाहवे शरेणातिशतीक्ष्णेनपातयामा ससारथिं २६ तावन्योन्यंसमासाद्यसमरेयुद्धदुर्मदौ त्रासयेतांशरैर्घोरैः कृतप्रतिकृतैषिणौ २७ युधिष्ठिरः स्वयंराजा [illegible] मद्रराजा नमभ्ययात तस्यमद्रपतिश्चापंद्विधाचिच्छेदपश्यतः २८ तस्यपार्थधनुश्छिन्नंकुंतीपुत्रोयुधिष्ठिरः अन्यत्कार्मुकमादायवेगव त्तुलवत्तरं २९ ततोमद्रेश्वरंराजाशरैः संनतपर्वभिः छादयामाससंक्रुद्धस्तिष्ठतिचाब्रवीत ३० धृष्टद्युम्नस्ततोद्रोणमभ्यद्र वत्भारत तस्यद्रोणः सुसंक्रुद्धः परासुकरणंदृढं ३१ धनुश्चिच्छेदसमरेपांचाल्यस्यमहात्मनः शरंचैवमहाघोरंकालदंडमि वापरं ३२ प्रेषयामाससमरेसोस्यकायेन्यमज्जत अथान्यद्धनुरादायसायकांश्चचतुर्दश ३३ द्रोणंद्रुपदपुत्रस्तुप्रतिवि व्याधसंयुगे तावन्योन्यंसुसंरब्धौचक्रतुः सुभैरवं ३४

तिष्ठे ४

मा ५

भसंमत्वरं ३५ वीरः शंखं ज्रा त्रुदेशे त्रुमसंयो ३६ ३८ धृष्टकेतुः शिशुपालसुतः ३८ ४० समीपतुः आयोमसर्वधयासं मोलितो ४१

सोमदत्तिं रणे शंखो रभसं रभसो युधि अभ्युद्ययौ महाराज तिष्ठ तिष्ठेति चाब्रवीत् ३५ तस्य वै दक्षिणं वीरो निर्बिभेद रणे भुजं सो
मदत्तिस्ततः शंखं जत्रुदेशे समाहनत् ३६ तयोः समभवद्युद्धं घोररूपं विशांपते दृप्तयोः समरे राजन्वृत्रवासवयोरिव ३७
बाह्लिकं तु रणे क्रुद्धः क्रुद्धरूपं विशांपते अभ्यद्रवदमेयात्मा धृष्टकेतुर्महारथः ३८ बाह्लीकस्तु ततो राजन्धृष्टकेतुम
मर्षणं शरैर्बहुभिरानर्छत्सिंहनादमथानदत् ३९ चेदिराजस्तु संक्रुद्धो बाह्लीकं नवभिः शरैः विव्याध समरे तूर्णं म
त्तमत्तमिव द्विपं ४० तौ तत्र समरे क्रुद्धौ नर्दन्तौ च मुहुर्मुहुः समीयतुः सुसंक्रुद्धावङ्गारकबुधाविव ४१ राक्षसं क्रूरकर्माणं
क्रूरकर्मा घटोत्कचः अलंबुषं प्रत्युद्ययाद्बलं शक्र इवाहवे ४२ घटोत्कचस्तु संक्रुद्धो राक्षसं तं महाबलं नवत्या साय
कैस्तीक्ष्णैर्दारयामास भारत ४३ अलंबुषस्तु समरे भैमसेनिं महाबलं बहुधा दारयामास शरैः क्रुद्धः शिलाशितैः समवस्थि
तं नाराचेन सुतीक्ष्णेन भशं विव्याध कंपयत ४६ ॥ ॥ राम जी ॥

४३ सन्नतपर्वभिः अलक्षितप्रयोधिभिः ४४ ४५ ४६ ॥

सन्नतपर्वभिः ४४ विभ्राजेतां ततस्तौ तु संयुगे शरविक्षतौ [illegible] ४५ अपवत्स्यमानतः २ गु०

सुपीतेन सुसंहृष्टः प्रायितेन ततो द्रोणस्य स्ववीरायतः विशिखेन शरोणोह्लीर्टः ४७ मध्येसंग्रामे ४८ धृष्टद्युम्नस्तु संयुधिराष्ट्रः ५० ५६ तुमं

धिरं संख्ये भित्तेरा राजन्नेद्रोणपुत्रम ताडयत् सायकेन सुपीतेन ततो द्रोणिरविशिखेन च ४७ जघान ततोमिन्द्रार्थे तेहविधेमध्ये भारत

ततो द्रौपदेयाश्च विराटवाहिनीपतिः ४८ अभ्ययात्वरितो राजन् ततः युद्धमवर्त्तत विराटो भारत ततः तु जरावचेषणा भारत ४७ अभवत्पृत्स

संकुलं भीमघोरं धृष्टद्युम्नस्य चावलं भगदत्तस्तु कल्पूर्णो विराटं पृथिवीपतिं ५० छादयामास समरे मेघः सूर्यमिवोदितं धृष्टते स्वयं चैकेक

यं कृपः शारद्वतो ययौ ५१ तं कृपः शरवर्षेण छादयामास भारत गौतमं च सुसंक्रुद्धः शरवृष्ट्या समपूरयत् ५२ ततो सोमं हयान्हत्वा

धनुश्छित्वा च भारत विरथावसियुद्धाय समीयतुः स्वर्वेगाः ५३ तयोस्तत्र भवद्युद्धं घोररूपं दुरासदं द्रुपदस्तु ततो [illegible]

[illegible] राजानं धर्मयोधिनमभ्ययात् ५४ अभ्युद्ययौ सुसंरब्धो धृष्टद्युम्नं परंतप ततः मेधं वक्रोराजन्द्रुपदं विशिखैः

स्त्रिभिः ताडयामास समरे स्मच तं प्रत्यविध्यत तयोः समभवद्युद्धं घोररूपं सुदारुणं ५५ ह्रस्वराधीतिजनैः शुक्रांगारकयोरिव

विकर्णस्ततस्ततः सुतसोमं महाबलं ५७ अभ्ययाज्जवनैरश्वैस्ततो युद्धमवर्तत विकर्णः सुतसोमं तु विध्वानाकंपयच्छरैः ५८

सुतसोमो विकर्णं च वत स्तुतमिवाभवत सुशर्माणं नरव्याघ्रश्चेकितानो महारथः अभ्यद्रवत्सुसंक्रुद्धः पांडवार्थे पराक्रमी ५७

तत्र ५७ सुतसोमं भीमसेनिं ५८ चेकितानो पारश्वः ५७

६६ इरावांनर्जुनपुत्रः ६८ ६८ गदायेनागदस्मुखेन ७० समसक्तास्तु संसक्ता बभूवतां ७२ ४४ ॥

सुशर्मा तु महाराज चेकितानं महारथं महता शरवर्षेणावारयामास संयुगे ६० चेकितानोपि संरब्धः सुशर्माणं महाहवे ववर्ष शरवर्षेण महामेघ इवाचलं ६१ शकुनिः प्रतिविंध्यं तु पराक्रांतं पराक्रमी अभ्यद्रवत राजेन्द्र मत्तसिंह इव द्विपं ६२ युधिष्ठिरः सुसंक्रुद्धः सौबलं निशितैः शरैः व्यदारयत संग्रामे मघवानिव दानवं ६३ शकुनिः प्रतिविंध्यं तु प्रतिविध्यन्महाहवे व्यदारयन्महामानः शरैः सन्नतपर्वभिः ६४ सुदक्षिणं तु राजेन्द्र कांबोजानां महारथं श्रुतकर्मा [illegible] पराक्रांतमभ्यद्रवत संयुगे ६५ सुदक्षिणस्तु संक्रुद्धः माहेन्द्रः महारथं विव्याधाकंपयत्तैस्मैनाकमिव पर्वतं ६६ इरावानथ संक्रुद्धः श्रुतायुषममर्षणं प्रत्यु घयो रणयुत्तोय महरूपं परंतपः श्रुंतुमित्तस्य समरे हयान् हत्वा महारथः ननाद बलवान् राजन् तत्सैन्यं प्रत्यपूरयत ६७ श्रुतायुस्तु संक्रुद्धः फाल्गुनिः समरे हयान निजघान गदाग्रेण ततो युद्धमवर्तत ७० विंदानुविंदावावंत्यौ सौकुन्तिं भोजं महारथं ससेनं समुतं वीरं समसज्जतुराहवे ७१ तत्राद्भुतमपश्याम ल्पायो घोरपराक्रमं अयुध्येतां स्थिरो भूत्वा महत्या सेनया सह ७२ ॥ रामजीराम:

तेएवंद्वंद्वयुद्धमासन्ननुविंदइति ७३ ७७ द्वंद्वंद्वयोर्द्वयोर्युद्धं ८० ८५ विपरीतंअतीतकर्मनिर्मर्यादंसंक्षेपतव्यवहारं ८५ ः

अनुविंदस्तुगदयाकुंतिभोजमताडयत् कुंतिभोजस्ततंतूर्णंशरव्रातैरवाकिरत् ७३ कुंतिभोजसुतश्चापिविंदंविद्ध्वासायकैः सचतंप्र
तिविव्याधतदद्भुतमिवाभवत् ७४ केकयाभ्रातरःपंचगांधारान्पंचमारिषससैन्याः सहसैन्यांस्तुयोधयामासुराहवे ७५ वीरबाहुश्चतेपुत्रोवै
राटिंरथसत्तमं उत्तरंयोधयामासविव्याधनवभिःशरैः ७६ उत्तरश्चापितंवीरंविव्याधनिशितैःशरैः चेदिराट्समरेराजन्नुलूकंसमभिद्रवत्
७७ तथैवशरवर्षेणउलूकंसमविध्यत उलूकश्चापितंबाणैर्निशितैर्लोमवाहिभिः ७८ तयोर्युद्धंसमभवद्घोररूपंविशांपते दारयेतांसु
संक्रुद्धावन्योन्यमपराजितौ ७९ एवंद्वंद्वसहस्राणिरथवारणवाजिनां पदातीनांचसमरेतवतेषांचसंकुले ८० मुहूर्तमिवतद्युद्धमासीन्मधु
रदर्शनं ततउन्मत्तवद्राजन्नप्राज्ञायतकिंचन ८१ गजोगजेनसमरेरथीचरथिनंपपौ अश्वोश्वंसमभिप्रेक्ष्यपदातिश्चपदातिनं ८२ त
तोयुद्धंसुदुर्धर्षंव्याकुलंसमपद्यत शूराणांसमरेतत्रसमासाद्यपरस्परं ८३ तत्रदेवर्षयःसिद्धाश्चारणाश्चसमागताः प्रैक्षंततद्रणंघो
रंदेवासुरसमंयुधि ८४ ततोदंतिसहस्राणिरथानांचापिमारिष अश्वौघाःपुरुषौघाश्चविपरीतंसमापतुः ८५ ः

४६ अध्यायः राजन्नद्य युद्धानि युद्धं कृतवंति १ जज्ञे ज्ञातवान् न तत्र काले स्वस्त्रीयो भागिनेयः २ आवीद्धाः स्वभूता दिनास हीता स्व ३ युगानि अश्व
स्कंधा पिता निदारुणा ४ रथेषा रथदंडः कूबरः युगकीलः संगतैः सन्मुखागतैः ६ प्रभिन्नाः श्रोतन्मदाः विषाणैः दंतैः ७ तोरणानिव

तेत्र तत्राभवद्युद्धं तत्र रथवारणापत्तयः सादिनश्च नरव्याघ्र युध्यमाना मुहुर्मुहुः ८६ इति भीष्मपर्वणि अध्यायः ४३ संजय उवाच राजंस्तु
तमहं स्यारौ तत्र तत्र पदातिनां निर्मर्यादं प्रयुद्धानि तन्नेव स्यामि भारत नपुत्रः पितरं जज्ञे न पिता पुत्रमौरसं न भ्राता भ्रातरं तत्र स्वस्त्रियो न
चमातुलं १ न मातुलश्च स्वस्त्रियं न सखायं सखा तदा आविष्टा इव युध्यंते पांडवाः कुरुभिः सह २ रथानीकं नरव्याघ्राः केचिदभ्यपत
न्रथैः अभज्यंत रथै रखयुगानि भरतर्षभ ४ रथेषाश्च रथेषाभिः कूबरा रथकूबरैः संगतैः संहताः केचित्परस्परजिघांसवः ५ न शे
कुश्चलितुं केचित्संनिपत्य रथा रथैः प्रभिन्नास्तु महाकायाः संनिपत्य महागजैः ६ बहुधा दारयन्क्रुद्धा विषाणैरितरेतरं सतोरणा
वरवारणैः ७ अभिसृत्य महाराज वेगवद्भिर्महाजवैः दंतैरभिहतास्तत्र चुक्रुशुः परमातुराः अभिनीताश्च शिक्षाभिस्तोत्रांकुशसमा
हताः ८ अप्रभिन्नाः प्रभिन्नानां संमुखाभिमुखा ययुः प्रभिन्नैरपि संयुक्ताः केचित्तत्र महागजाः १० रामजी रामजी ः ः ः ः

पताकेश्च वारणा

तुस्तंभमंडपाकारस्य गतपल्याणस्य अंबारीति भाषया प्रसिद्धस्य द्वारतोरणपताकाश्च तैः अवस्तंभेरापरथाः ८ अभिनीताः सुशिक्षिताः ए
अप्रभिन्नाः अनुद्भिन्नमदाः संमुखाभिमुखाः अन्योन्यसंमुखाः स्वस्थं १०

प्रगीताः प्रयुक्ताः ऋष्टयः हस्तक्षेप्याः सूक्ष्मफलाः विंध्याख्यांकरकोटीति प्रसिद्धाः तोमराः दीर्घदंडफलाः नाराचाः महाशल्याः विस्तीर्ण
फलकाः शराः ११ १२ परश्वधैः कुठारैः १३ भिंदिपालैः फरशैः महाकाष्ठगांगोफणा इति प्रसिद्धैः परिघैः दंडैः निस्त्रिंशैः खड्गैः द्रवमाणाः धावं

केचित्क्ष्वेलितसंकृत्वा प्राद्रवंत ततस्ततः समसक्तप्रगीताश्च तथा प्रभिन्नकरटामुखाः ऋष्टितोमरनाराचैर्निकृत्ता वरवारणाः १३
विनेदुर्भिद्यमानाश्च निपेतुश्च गतासवः प्राधावंत दिशः केचित्तत्र नैमेरवान् १३ गजानां पादरक्षाश्च व्यूढोरस्काः महारिणः ऋष्टिभि
श्च धनुर्भिश्च विमलैश्च परश्वधैः १४ गदाभिर्मुसलैश्चैव भिंदिपालैः सतोमरैः आयसैः परिघैश्चापि निस्त्रिंशैर्विमलैः शितैः १५
सुगृहीतैः सुसंरब्धा द्रवमाणास्ततस्ततः प्रादृश्यंत महाराज परस्परजिघांसवः १६ राजमानाश्च निस्त्रिंशाः संसक्ता नरशोणि
तैः प्रत्यदृश्यंत शूराणामन्योन्यमभिधावतां १७ अवक्षिप्तावधूतानामसीनां वीरबाहुभिः संजज्ञे तुमुलः शब्दः पततां परमर्मसु
१८ गदामुसलरुग्णानां भिन्नानां च वरासिभिः दंतिदंतावभिन्नानां मृदितानां च दंतिभिः १९ तत्र तत्र नरौघाणां क्रोशतामितरे
तरं शुश्रुवुर्दारुणा वाचः प्रेतानामिव भारत २० : ४४ २० २० २० ::

तः १५ १६ अवक्षिप्तावधूतानां परेषां मर्मसु पततामसीनामिति संबंधः १७ रुग्णाः तीव्राघातात् भिन्नाः निकृत्तांगाः अवभिन्नाः स्तोकां
गः १८ प्रेतानां नारकाणां २० ४४

हयैः काश्चाश्रितैः चाश्वपीतैः श्यामरक्तपालाः तच्चारिभिः श्रुतमेव हेमैरिवश्वमभिविद्रुताः संमुखमुपागताः २० मामाहत्त्विप्याम ह्लाः सेतीं
द्युतिमत्सिन्द्वाः कुन्ताश्च सपरेश्चाशुगाः शीघ्रगाः २१ अश्वमेधव्रतमवेगाः २२ मल्लैः दीर्घकर्णैर्बाणैः २३ २४ सहसाबलेनश्रुतकिंतेवा

हयैरपि हयारोहाश्चामरापीडधारिभिः हेमैरिवमहावेगैरन्योन्यमभिविद्रुताः २० तेविमुक्तामहाप्रासानानांवूनदभि
षणाः आशुगाविमलास्तीक्ष्णाः संपेतुर्भुजगोपमाः २१ अश्वपृष्ठगतेभ्यैः केचित्अश्वारोहाः समहतोरथात शिरांस्याददि
रेवीराः रथिनामश्वसादिनः २२ बहूनपि हयारोहान्भल्लैः सन्नतपर्वभिः रथीसंधाय संप्राप्य बाणागोचरमागतान् २३ न
वमेघप्रतीकाशाश्चाक्षिप्य तुरगान्गजाः सपादैः रवमर्दुः मत्ताः कनकभूषणाः २४ मार्गेर्विमथिताः केचिद्विनेदुः
परमातुराः साश्वारोहान्हयान्केचिदुन्मथ्य वरवारणाः २५ सहसाचिक्षिपुस्तत्र संकुलेपरमेमृधे सास्वारोहान्विषाणाग्रैरु
त्क्षिप्य तुरगान्गजाः २६ रथौघानवमृद्नंतः सध्वजानभिचक्रमुः पुंस्त्वादतिमदत्वाच्च केचित्तत्र महागजाः २७ साश्वारोहान्पा
नजघ्नुः करैः सचरणैस्तथा प्रतिमानेषु गात्रेषु पार्श्वेष्वभिचवारणान् आशुगाविमलास्तीक्ष्णाः संपेतुर्भुजगोपमाः २८

४२३

मतिविघमाने २५ अमितौजयमभु पुंस्त्वात् वीर्यवत्वात् अतिमदत्वात् उत्क्लिष्टमदत्वात् २७ प्रतिमाने षु गात्रेषु अग्रेषु वारणानभिगजा
नामभितः पक्षपार्श्वदित्यपाश्चाशुगाः बाणाः २८

शक्तयः शक्त्यः कुन्तालोहदंडास्तस्त एव महोल्काप्रतिमाः २७ द्वीपिविकृव्याघ्रः विकोशैः प्रयोगकोविदैः ३० अभिद्रुतस्याभिमुखेन स्पर्शगांमारं अभि
मुतं तं रेअसारऽभिमुखं प्रोष्ठ रेशारिसंयुतं सामर्थ्यान्वितं यानमेकपार्श्वे विदारितं चर्मभ्रहारवासांगालक्ष्यतिप्रसिद्धं माषाया ३१ आक्षिप्य आकृष्य

नराश्चकायानिर्भिन्नलोहानिकवचानि च निपेतुर्विमलाः शक्तयो वीरबाहुभिरर्पिताः महोल्काप्रतिमा घोरास्तत्र तत्र विशांपते २९
ष्मोद्रोणमाचार्यसत्तमं ४० अवहारमथोचक्रेतावकानांमहारथः ततोवहारःसैन्यानांतवतेषांचमारिष ४१ अस्तंगच्छतिसूर्ये
ऽभूत्सन्ध्याकालेचवर्तति ४२ इतिश्री[illegible]अध्यायः ७१ संजयउवाच प्रभातायांतुशर्वर्यांभीष्मःशान्तनवस्ततः
अनीकान्यनुसंयानेव्यादिदेशपरंतपः १ गारुडंचमहाव्यूहंचक्रेशान्तनवस्तदा पुत्राणांतेजयाकांक्षीभीष्मःकुरुपितामहः २ गरु
डस्यस्वयंतुंडेपितादेवव्रतस्तव चक्षुषीचमहाभोजःकृतवर्माचसात्वतः ३ अश्वत्थामाकृपश्चैवशिरस्यास्तांयशस्विनौ त्रिग
र्तैर्मत्स्यकैकेयैर्वाटधानैश्चसंयुतैः ४ भूरिश्रवाःशलःशल्योभगदत्तश्चमारिष मद्रकाःसिन्धुसौवीरास्तथापंचनदाश्च
ये ५ जयद्रथेनसहितायीवायांसंनिवेशिताः पृष्ठेदुर्योधनोराजासोदर्यैःसानुगैर्वृतः श्रीगणेशायनमः ॥

६ किरातविदेहावावंसौ कांबोजाश्च शकैः सह पुच्छमासन्महाराज हारहूणाश्च मारिष ७ मागधाश्च कलिंगाश्च दासेरकगणैः सह दक्षिणं
पक्षमासाद्य स्थिता व्यूहस्य दंशिताः ८ कारूषाश्च विकुंजाश्च मुंडाः कौंडीवृषास्तथा बृहद्बलेन सहिता वामपार्श्वं समास्थिताः ९ दृष्ट्वा व्यू-
हं तु तत्सैन्यं सव्यसाची परंतपः धृष्टद्युम्नेन सहितः प्रत्यव्यूहत संयुगे १० तावकानां तु तं व्यूहं प्रत्यव्यूहंत पांडवाः अर्धचंद्रेण व्यूहेन व्यूहेनाति-
दारुणा ११ दक्षिणं शृंगमास्थाय भीमसेनो व्यरोचत नानाशस्त्रौघसंपन्नैः देशैर्नृपैर्वृतः १२ तदन्वेव विराटश्च द्रुपदश्च महारथः तदनंतरमेव
वायुनीलो नीलायुधैः सह १३ नीलादनंतरश्चैव धृष्टकेतुर्महारथः चेदिकाशिककारूषैः पौरवैश्चाभिसंवृतः १४ धृष्टद्युम्नः शिखंडी च पांचाला-
श्च प्रभद्रकाः मध्ये सैन्येन महता स्थिता युद्धाय भारत १५ तथैव धर्मराजोपि गजानीकेन संवृतः ततस्तु सात्यकी राजन् द्रौपद्याः पंच चात्मजाः
१६ अभिमन्युस्ततस्तूर्णं इरावांश्च ततः परं भैमसेनिस्ततो राजन् केकयाश्च महारथाः १७ ततोऽभूद् द्विपदां श्रेष्ठो वामपार्श्वमुपाश्रितः सर्व-
स्य जगतो गोप्ता यस्य गोप्ता जनार्दनः १८ एवमेतन्महाव्यूहं प्रत्यव्यूहंत पांडवाः वधार्थं तव पुत्राणां तत्पक्षं ये च संश्रिताः १९ ततः प्र-
ववृते युद्धं व्यतिषिक्तरथद्विपं तावकानां परेषां च निघ्नतामितरेतरं २० हस्त्यौघाश्च रथौघाश्च तत्र तत्र विशांपते संपतंतो व्यदृश्यं-
त निघ्नंतस्ते परस्परं २१ धावतां च रथौघानां पृथक्पृथक् बभूव तुमुलः शब्दो मिश्रो दुंदुभिनिस्वनैः २२ दिवस्पृङ् नरवी-
राणां निघ्नतामितरेतरं संप्रहारे सुतुमुले तव तेषां च भारत २३ इति श्रीभीष्मपर्वणि अध्याय ५१ संजय उवाच ततो व्यूढेष्व-
नीकेषु [illegible] तावकैः धनंजयो रथानीकमवधीत्तव भारत १ शरैरतिरथो युद्धे पातयन् रथयूथपान् ते वध्यमानाः पार्थे-
न कालेनेव युगक्षये २ धार्तराष्ट्रा रणे यत्ना पांडवान् प्रत्ययोधयन् प्रार्थयाना यशो दीप्तं मृत्युं कृत्वा निवर्तनं ३ एकाग्रमनसो भू-

ब्रितमेघवर

भी.
२२४

उद्यानांबरूपिणी नभंजुर्वहुशोणांजंस्ते चापजपंतसंयुगे ४ दुर्बद्धिरथ्यमग्नैश्चापविर्वेद्धिरेवच पांडवैः कौरवैयैश्चनप्राज्ञायतकिंचन ५ उदतिष्ठद्रजो
भौमंछादयानंदिवाकरं नदिशःप्रदिशश्चापितत्रोजुःकथंचन अनुमानेनसंज्ञाभिर्नामगोत्रैश्चसंयुगे ६ वर्त्ततेस्मतदायुद्धंतत्रतत्रविशांपते
नव्यूहोभिद्यतेतत्रकौरवाणांविशांपते रक्षितंसत्यसंधेनभारद्वाजेनमारिष तथैवपांडवेयानांरक्षितःसव्यसाचिना नाभिद्यतमहाव्यूहोभी
मेनचसुरक्षितं सेनाग्रादृत्तिनिष्पत्यप्रायुध्यंस्तत्रमानवाः उभयोःसेनयोराजन्व्यतिषिक्तरथद्विपाः १० हयारोहैर्हयारोहाःपातितेस्मिन्महाहवे ऋष्टि
भिर्विमलाग्राभिःप्रासैरपिचसंयुगे ११ रथीरथिनमासाद्यवारोःकनकभूषणैः पातयामाससमरेतस्मिन्नतिभयंकरे १२ गजारोहागजारोहा
न्नाराचशरतोमरैः संयुक्तान्पातयामासुस्तत्रैवचसंघशः १३ पत्तिसंघारणेपत्तीन्भिंडिपालपरश्वधैः न्यपातयंतसंहृष्टाःपरस्परकृता
गमः १४ रथीनंसमरेराजन्नासाद्यगजयोधिनं सगजंपातयामाससगजीचरथिनंतदा १५ रथिनंचहयारोहःप्रासेनभरतर्षभ पातयामा
ससमरेरथीचहयसादिनं १६ न्यपातयच्छितैःशस्त्रैःसेनयोरुभयोरपि गजारोहाहयारोहान्पातयामासुराहवे १७ हयारोहागजस्थांश्चतद
द्भुतमिवाभवत् गजारोहैश्चापितथातत्रपदातयः [illegible] पातिताःसमदृश्यंतत्तैश्चापिगजयोधिनः पत्तिसंघाहयारोहैःसादिसंघाश्चपत्तिभिः १९
पत्समानाव्यदृश्यंतशतशोथसहस्रशः ध्वजैस्तत्रापि [illegible] विद्धैश्चकार्मुकैस्तोमरैस्तथा
२० प्रासैस्तथागदाभिश्चपरिघैःकंपनैस्तथा शक्तिभिःकवचैश्चित्रैःकणपैरंकुशैरपि २१ निस्त्रिंशैर्विमलैश्चैवस्वर्णपुंखैःशरैस्तथा
परिस्तोमैःकुथाभिश्चकंबलैश्चमहाधनैः २२ भूर्भातिभरतश्रेष्ठस्रग्दामैरिवचित्रिता नराश्वकायैःपतितैर्दंतिभिश्चमहाहवे २३ अगम्य
रूपापृथिवीमांसशोणितकर्दमा प्रशशामरजोभौमंव्युक्षितं [illegible]

भा.
२२४

नरशोणितैः २४ दिशश्च विमलाः सर्वास्समपद्यंत भारत उत्थितान्यगणेयानि कबंधानि समंततः २५ चिह्नभूतानि जगतो विनाशार्थाय भारत तस्मि
न्युद्धे महारौद्रे वर्तमाने सुदारुणे २६ प्रत्यदृश्यंत रथिनो धावमानाः समंततः ततो भीष्मश्च द्रोणश्च सैंधवश्च जयद्रथः २७ पुरुमित्रो विकर्ण
श्च शकुनिश्चापि सौबलः एते समरदुर्धर्षाः सिंहतुल्यपराक्रमाः २८ पांडवानामनीकानि बभंजुः समरे स्थिताः तथैव भीमसेनोपि राक्षसश्च
घटोत्कचः २९ सात्यकिश्चेकितानश्च द्रौपदेयाश्च भारत तावकांस्तव पुत्रांश्च सहितान्सर्वराजभिः ३० द्रावयामासुराजौ ते त्रिदशा
दानवानिव तथा ते समरेन्योन्यं निघ्नंतः क्षत्रियर्षभाः ३१ रक्तोक्षिता घोररूपा विरेजुर्दानवा इव विजित्य च रिपून्वीरान्सेनयोरुभयोरपि
३२ व्यदृश्यंत महामात्रा ग्रहा इव नभस्तले ततो रथसहस्रेण पुत्रो दुर्योधनस्तव ३३ अभ्ययात्पांडवान्युद्धे राक्षसं च घटोत्कचं तथैव पां
डवाः सर्वे महत्या सेनया सह ३४ भीष्मद्रोणौ रणे शूरौ प्रत्युद्ययुररिंदमौ किरीटी तु ययौ क्रुद्धः समंतात्पार्थिवोत्तमान् ३५ आर्जुनिः सात्यकि
श्चैव प्ययातां सौबलं बले ततः प्रववृते भूयः संग्रामो लोमहर्षणः ३६ तावकानां परेषां च जिगीषूणां परस्परं ३६ इति भीष्मपर्वणि अध्याय ५२
५३ संजय उवाच ततस्ते पार्थिवाः क्रुद्धाः फाल्गुनं वीक्ष्य संयुगे रथैरनेकैः साहस्रैः समंतात्पर्यवारयन् १ अथैनं रथवंशेन कोष्ठकीकृत्य भारत शरैः
सुबहुसाहस्रैः समंतात्पर्यवारयन् २ शक्तीश्च विमलास्तीक्ष्णा गदाश्च परिघैः सह प्रासान्परश्वधांश्चैव मुद्गरान्मुसलानपि ३ चिक्षिपुः समरे क्रु
द्धाः फाल्गुनस्य रथं प्रति शस्त्राणामथ तां वृष्टिं शलभानामिवायतिं ४ रुरोध सर्वतः पार्थः शरैः कनकभूषणैः तत्र तल्लाघवं दृष्ट्वा बीभत्सोरति
मानुषं ५ देवदानवगंधर्वाः पिशाचोरगराक्षसाः साधु साध्विति राजेंद्र फाल्गुनं प्रत्यपूजयन् ६ सात्यकिश्चाभिमन्युश्च महत्या सेनया सह गां

धारानसमरेशूरान्कुरुन्पु·सहसौबलान् ७ ततः सौबलकाः शूरा वार्ष्णेयस्य रथोत्तमं तिलशश्छिच्छिदुः क्रोधाच्छरैर्नौविधैरपि ८ सात्यकिस्तु रथंस्य
त्वावर्त्तमानेमहाजवे अभिमन्योरथंतूर्णमारुरोहपरंतपः ९ तावेकरथसंयुक्तौ सौबलेयस्यवाहिनीं नघ्नतुर्निशितैस्तूर्णंशरैःसन्नतपर्वभिः १०
द्रोणभीष्मौरणेयत्तौ नौवस्यवाहिनीं नाशयेतांशरैस्तीक्ष्णैः कंकपत्रपरिच्छदैः ११ ततोधर्मसुतोराजामाद्रीपुत्रौचपाण्डवौ निघ्नतांसर्वसैन्यानांद्रोणानी
कमुपाद्रवन् १२ तत्रासीत्सुमहद्युद्धंतुमुलंलोमहर्षणं यथादेवासुरंयुद्धंपूर्वमासीत्सुदारुणं १३ कुर्वाणौतुमहत्कर्मभीमसेनघटोत्कचौ दुर्यो
धनस्ततोभ्येत्यतावुभाववारयत् १४ तत्राद्भुतमपश्यामहैडिंबस्यपराक्रमं अतीत्यपितरंयुद्धेयदयुध्यतभारत १५ भीमसेनस्तुसंक्रुद्धो दु
र्योधनममर्षणं हृदिविव्याधपृषत्केनप्रहसन्निवपाण्डवः ततोदुर्योधनोराजाप्रहारवरपीडितः निषसादरथोपस्थेकश्मलंचजगामह १७ तंविसं
ज्ञमथोदृष्ट्वात्वरमाणोस्यसारथिः अपोवाहरणाद्राजंस्ततःसैन्यमभज्यत १८ ततस्तांकौरवींसेनांद्रवमाणांततस्ततः निघ्नन्भीमःशरैस्तीक्ष्णैरनुव
व्राजपृष्ठतः १९ पार्षतश्चरथश्रेष्ठोधर्मपुत्रश्चपाण्डवः द्रोणस्यपश्यतःसैन्यंगांगेयस्यचभारत २० जघ्नतुर्विशिखैस्तीक्ष्णैः परानीकविनाशनैः
द्रवमाणंततःसैन्यंतवपुत्रस्यसंयुगे २१ नाशक्नुतांवारयितुंभीष्मद्रोणौमहारथौ वार्यमाणंचभीष्मेणद्रोणेनचमहात्मना २२ विद्रवत्येवतत्
सैन्यंपश्यतोर्द्रोणभीष्मयोः ततोरथसहस्रेषुविद्रवत्सुततस्ततः २३ तावस्थितावेकरथेसौभद्रशिनिपुंगवौ सौबलिंसमरेसेनांनाशयेतांपरंतप
२४ शुशुभातेततस्तौनशैनेयकुरुपुंगवौ अमावास्यांगतौयद्वत्सोमसूर्यौनभस्तले २५ अर्जुनस्तुततःक्रुद्धस्तवसैन्यंविशांपते ववर्षशरवर्षे
णधाराभिरिवतोयदः २६ वध्यमानंततस्तत्तुशरैःपार्थस्यसंयुगे दुद्रावकौरवंसैन्यंविषादभयकंपितं २७ द्रवतस्तान्समालोक्यभीष्मद्रोणौ।

महाबलौ न्यवारयेतां संक्रुद्धौ दुर्योधनादिभिस्तैर्विशितौ ततो दुर्योधनो राजा समामाभाष्य विशांपते स्ववर्णयत तत्सैन्यं रूपमासां समीपतः २९ पत्रपत्रस्तुतेन
सैधायः पश्यति भारत तत्र तत्र स्म वर्त्तन्ते क्षत्रियाणां महारथाः ३० नातिवृत्तान्समीक्ष्यैव ततो मे पीतो रजनाः अन्योन्यस्पर्द्धया राजन्तूत्त्वे यांश्चेवतस्थि
रे ३१ पुनरेव वर्त्तते तेषां वेगम्प्रसाद्य विशांपते एषितः सागरस्येव चन्द्रस्योदयनं प्रति ३२ सन्निवृत्तास्ततस्त [stain] स्तो दृष्ट्वा राजा सुयोधनः अब्रवीत्त्वरितो ग
त्वा भीष्मं शांतनवं वचः ३३ पितामह नियोद्धेयं पत्त्वा वस्यामि भारत नानुरूपमहं मन्ये त्वं जीवति कौरव ३४ द्रोणो चास्त्रविदां श्रेष्ठः सपुत्रः सुहृदस्तथाने
लुपैचैव महेष्वासः स्नेहो पहस्थिती न पांडवानतिबलांस्तव मन्ये कथंचन ३५ तथा द्रोणस्य संग्रामे द्रोणोश्चापि कृपस्तथा अनुमन्ता वा पा
पुत्रस्तानं तव पितामह ३६ यथेमां क्षमसे वीरवध्यमानां वरूथिनीं सोमिकाश्च तथा राजन्पूर्वमेव समागमे ३७ न यास्ये पांडवान्संख्ये
नापि मा सकि पार्षतौ श्रुत्वा हे ववचनं तस्य माध्यायेस्य च भारत ३८ कर्णो न सहितं हृषीचित्रपानस्तदैवहि पदिनाहे पीत्वाज्यो पुवाध्यामिह
संयुगे ३९ विक्रमे [illegible] णानुरूपेण युध्यतां पुरुषर्षभौ एतच्छ्रुत्वा वचो भीष्मः प्रहसन्वै मुहुर्मुहुः ४० अब्रवीत्तनयं तुभ्यं क्रोधाद्वारन्तवक्षु
षी वक्रुष्टोसि महाराजन पश्यमुक्तो हि ते वचः ४१ अजेयाः पांडवा युद्धे देवैरपि सवासवैः यत्तु शक्यं मया कर्त्तुं वृद्धेनाद्य नृपोत्तम ४२ करिष्या
मि यथाशक्तिः प्रेक्षेदानीं सबांधवः अद्य पाण्डुसुतान्सर्वान्ससैन्यान्सह बंधुभिः ४३ मिषतो वारयिष्यामि सर्वलोकस्य पश्यतः एवमुक्त
स्तु भीष्मेण पुत्रस्तव जनेश्वरः ४४ दध्मौ शंखं मुदा युक्तो भेरिञ्च समनादयत पांडवापि ततो राजन्श्रुत्वा तं निनदं महत् ४५ दध्मुः शंखांश्च
भेरीश्च मुरजांश्चाप्यवादयन् ४६ इति श्रीभीष्मपर्वणि अध्यायः ५२ धृतराष्ट्र उवाच प्रतिज्ञाते ततस्तस्मिन्युद्धे भीष्मेण दारुणे ॥

ममपुत्रस्यवायेत्रक्रोधितेनविशांपते १ भीष्मःकिमकरोत्तत्रपांडवेयेषुसंजय पितामहोवापांचालांस्तन्ममाचक्ष्वसंजय २ संजयउवाच गतेपू
र्वाह्णेपिहेतस्मिन्नहनिभारत पश्चिमांदिशमास्थायप्रस्थिते(?)चदिवाकरे ३ जयंप्राप्तेषुहृष्टेषुपांडवेषुमहात्मसु सर्वधर्मविशेषज्ञःपितादेवव्रतस्तव
४ अभ्ययाज्जवनैरश्वैःपांडवानामनीकिनीं महत्यासेनयागुप्तस्तवपुत्रैश्चसर्वशः प्रावर्ततततोयुद्धंतुमुलंलोमहर्षणं अस्माकंपांडवैःसार्द्धमनयात्त
वभारत ६ धनुषांकूजतांतत्रतलानांचाभिहन्यतां बभूवतुमुलःशब्दोगिरीणामिवदीर्यतां ७ तिष्ठस्थितोस्मिविध्यैनंनिवर्तस्वस्थिरोभवस्थि
तोस्मिप्रहरेत्येवंशब्दाःश्रूयंतसर्वतः ८ कांचनेषुतनुत्रेषुकिरीटेषुध्वजेषुच शिलानामिवशैलेषुपततांनामभूत्स्वनः ९ पतितान्युत्तमांगानि
बाहवश्चविभूषिताः व्यचेष्टंतमहींप्राप्यशतशोथसहस्रशः १० हृतोत्तमांगाःकेचित्तुतथैवोद्यतकार्मुकाः प्रगृहीतायुधाश्चैवतस्थुःपुरुषस
त्तमाः ११ प्रावर्ततमहावेगानदीरुधिरवाहिनी मातंगांगशिलाघोरामांसशोणितकर्दमा १२ वराश्वनरनागानांशरीरप्रभवातदापरलोका
र्णवमुखीगृध्रगोमायुमोदिनी १३ नदृष्टंनश्रुतंचापियुद्धमेतादृशंनृप यथातवसुतानांचपांडवानांचभारत नासीद्रथपथस्तत्रयोधैर्युधि
निपातितैः गजैर्निपतितैर्नीलैर्गिरिशृंगैरिवावृतं १५ विकीर्णैःकवचैश्चित्रैःशिरस्त्राणैश्चमारिष शुशुभेतद्रणस्थानंशरदीवनभस्तलं १६
विनिर्भिन्नानराःकेचित्तत्रापीउत्प्रकर्षिताः अदीनाःसमरेशत्रूनभ्यधावंतदर्पिताः १७ तातभ्रातःसखेबंधोवयस्यममातुल मामापरित्यजेत्य
न्येचुक्रुशुःपतितारणे आधावाभ्येहिकिंभीतोसिक्वयास्यसि स्थितोहंसमरेमाभैरितिचान्येविचुक्रुशुः १९ तत्रभीष्मःशांतनवोनि
त्यंमंडलकार्मुकः मुमोचबाणान्दीप्ताग्रानहीनाशीविषोपमान् २० शरैरेकायनीकुर्वन्दिशःसर्वायतव्रतः जघानपां॥७॥श्री

म३ नं३

उदरस्थानादिर्श्यदिशप्रभारत २१ नसन्धेरथमार्गेषुदर्शयन्पाणिलाघवं अलातचक्रवद्राजंस्तत्रतत्रस्मदृश्यते २२ तमेवंसमरेशत्रुपांडवाःसंजयैः
सहअनेकशतसाहस्रंसमपश्यंतलाघवे २३ मायाकृतात्मानमिवभीष्मंतत्रस्ममेनिरे पूर्वस्यादिशितंदृष्ट्वाप्रतीच्यांददृशुर्जनाः २४ उदीच्यांचैनमा
लोक्यदक्षिणापांतथैवच प्रतिएध्यत्समरेगांगेयंप्रत्यदृश्यत २५ नचैपाण्डवेयानांकश्चिद्भीष्मंकोतिवीक्षितुं विशिखानेवपश्यन्तिभीष्मचापच्युता
न्वहून् २६ कुर्वाणंसमरेकर्मसूदयानंचवाहिनीं व्याक्रोशंतरणेतत्रवीरावहुविधंवहु २७ अमानुषेणरूपेणचरंतंपितरंतव शलभाइवरा
जानःपतंतिस्मसमीरिताः २८ भीष्माग्निमभिसंक्रुद्धविनाशायसहस्रशः नहिमोघःशरःकश्चिदासीद्भीष्मस्यसंयुगे २९ नरनागाश्वकायेषुवहु
त्वाल्लघुवेधिनः भिनत्येकेनचरेणसमुक्तेनपतत्रिणा ३० गजंकंटकसन्नाहंवज्रेणेवशिलोच्चयं द्वौत्रीनपिगजारोहान्पिंडितान्वर्मितानपि ३१
नाराचेनसुतीक्ष्णेननिजघानपितातव योयोभीष्मंनरव्याघ्रमभ्येतियुधिकश्चन ३२ मुहूर्तदृष्टःसमयापतितोभुविदृश्यते एवंसाधर्मराजस्य
वध्यमानामहाचमूः ३३ भीष्मेणातुलवीर्येणव्यशीर्यतसहस्रधा प्रकाल्यतमहासेनाशरवर्षाभिपीडिता ३४ पश्यतोवासुदेवस्यपार्थस्यच
महात्मनः पतमानापितेवीरद्रवमाणान्महारथान् ३५ नाशक्नुवन्वारयितुंभीष्मबाणप्रपीडितान् महेंद्रसमवीर्येणभज्यमानामहा
चमूः ३६ अभज्यतमहाराजनवद्वौसहधावतः अविद्धनरनागाश्वंपतितध्वजकूवरं ३७ अनीकंपांडुपुत्राणांहाहाभूतमचेतनं जघाना
त्रपितापुत्रंपितरंतया ३८ प्रियंसखायंचाक्रंदेसखादैवबलात्कृतः विमुच्यकवचंचान्येपांडुपुत्रस्यसैनिकाः ३९ प्रकीर्यकेशान्
धावंतप्रत्यदृश्यंतभारत तद्गोकुलमिवोद्भ्रांतमुद्भ्रांतरथयूथपं ददृशेपांडुपुत्राणांसैन्यमार्तस्वनंतदा प्रभज्यमानंसैन्यंचदृष्ट्वापा

पत्र२ रा३

भा॰भी॰
२२७

एवमेवस्तनः ४१ उवाच पार्थः कृष्णं तु तिष्ठ यावत्समं अयं स कालः संप्राप्तः पार्थयः कांक्षितस्तव ४२ प्रहरास्मै नरव्याघ्र न चेन्मोहाद्विमुह्य
से पुरा पार्थ कथितं वाक्यं पुराणं हीसमागमे भीष्मद्रोणमुखान्सर्वान्धार्तराष्ट्रस्य सैनिकान् सानुबंधान्हनिष्यामि ये मां योत्स्यंति सं
युगे ४४ इति तत्कुरु कौंतेय सत्यं वाक्यमरिंदम बीभत्सो पश्य शोभेस्त्वं भज्यमानमितस्ततः ४५ एवं त्वमहीपालान्पश्य युधिष्ठिरे बले
दृष्ट्वा तु समरे भीष्मं व्यात्ताननमिवांतकं ४६ भयार्त्ता तत्र नश्यंति सिंहं क्षुद्रमृगा इव एवमुक्तः प्रत्युवाच वासुदेवं धनंजयः ४७ चोदयाश्वा
न्यतो भीष्मो विगाह्यैव बलार्णवं पातयिष्यामि दुर्धर्षं वृद्धं कुरुपितामहं ४७ ततोऽश्वान्रजतप्रख्यांश्चोदयामास माधवः यतो भीष्मरथो
राजन्दुष्प्रेक्ष्यो रश्मिवानिव ४९ ततस्तत्पुनरावृत्तं युधिष्ठिरबलं महत् दृष्ट्वा पार्थं महाबाहुं भीष्मायोद्यंतमाहवे ५० ततो भीष्मः कुरु
श्रेष्ठः सिंहवद्विनदन्मुहुः धनंजयरथं तूर्णं शरवर्षैरवाकिरत् ५१ क्षणेन स रथस्तस्य सध्वजः सहसारथिः शरवर्षेण महता संछन्नो न प्रका
शते ५२ वासुदेवस्त्वसंभ्रांतो धैर्यमास्थाय सत्ववान् चोदयामास तानश्वान्वितुन्नान्भीष्मसायकैः ५३ ततः पार्थो धनुर्गृह्य दिव्यं जल
दनिस्वनं पातयामास भीष्मस्य धनुश्छित्वा शितैः शरैः ५४ स छिन्नधन्वा कौरव्यः पुनरन्यन्महद्धनुः निमेषांतरमात्रेण सज्यं चक्रे पिता तव रामा॰
५५ विचकर्ष ततो दोर्भ्यां धनुर्जलदनिस्वनं अथास्य तदपि क्रुद्धश्चिच्छेद धनुरर्जुनः ५६ तस्य तत्पूजयामास लाघवं शांतनोः सुतः साधु २२७
पार्थ महाबाहो साधु भो॥ श्रीरामचंद्रजी सहाय श्रीगंगाजी सहाय श्रीहनुमानजी सहाय श्रीबीसरजी सहाय॥ अनपूर्णाजी सहाय॥॥

पांडुनंदन ५७ लब्धैवैतद्युक्तरूपंमहत्कर्मधनंजय प्रीतोस्मिसुदृढंपुत्रकुरुयुद्धंमयासह ५८ इतिपार्थंप्रशस्याथप्रगृह्यान्यन्महद्धनुः मु
मोचसमरेवीरःशरान्पार्थरथंप्रति ५९ अदर्शयद्वासुदेवोहययानेपरंबलं मोघान्कुर्वंछरांस्तस्यमंडलान्यचरल्लघु तथापिभीष्मः
सुदृढंवासुदेवधनंजयौ विव्याधनिशितैर्बाणैःसर्वगात्रेषुमारिषशुशुभातेनरव्याघ्रौतौभीष्मशरविक्षतौ ६० गोवृषाविवनर्दंतौ
विषाणोल्लिखितांकितौ पुनश्चापिसुसंक्रुद्धःशरैःशतसहस्रशः कृष्णयोर्मंदशास्संक्रुद्धोभीष्मश्चावारयद्दिशः वार्ष्णेयंचशरैस्ती
क्ष्णैःकंपयामासरोषितः ६२ मुहुरभ्युत्स्मयन्भीष्मःप्रहस्यस्वनवत्तदा ततः कृष्णस्तुसमरेदृष्ट्वाभीष्मपराक्रमं ६३ संप्रेक्ष्यचमहाबा
हुःपार्थस्यमृदुयुध्यतो तंभीष्मंशरवर्षाणिसृजंतमनिशंयुधि ६४ प्रतपंतमिवादित्यंमध्यमासाद्यसेनयोः वरान्वरान्विनिघ्नंतंपांडुपुत्रस्य
सैनिकान् ६५ युगांतमिवकुर्वाणंभीष्मंयौधिष्ठिरेबले अमृष्यमाणोभगवान्केशवःपरवीरहा ६६ अचिंत्यपरमेयात्मानास्तियौधि
ष्ठिरेबले एकाह्नाद्धिरणेभीष्मोनाशयेद्दैत्यदानवान् ६७ किमुपांडुसुतान्युद्धेसबलान्सपदानुगान् द्रवतेचमहत्सैन्यंपांडवस्यमहा
त्मनः ६८ एतेचकौरवास्तूर्णंप्रभग्नान्दृश्यसोमकान् आद्रवंतिहृष्टाहर्षयंतःपितामहं ६९ सोहंभीष्मंविहन्म्यद्यपांडवार्थायदं
शितः भारमेतंविनेष्यामिपांडवानांमहात्मनां ७० अर्जुनोपिहिशरैस्तीक्ष्णैर्वध्यमानोपिसंयुगे कर्तव्यंनाभिजानातिरणेभीष्मस्य
गौरवात् ७१ तथाचिंतयतस्तस्यभूयएवपितामहः प्रेषयामाससंक्रुद्धःशरान्पार्थरथंप्रति ७२ तेषांबहुत्वाद्धिभृशंशराणां
दिशोथसर्वाःपिहिताबभूवुः नचांतरिक्षंनदिशोनभूमिर्नभास्करोदृश्यतरश्मिमाली ववुश्चवातास्तुमुलाःसधूमादिशश्चसर्वाःक्षु
भिताबभूवुः द्रोणोविकर्णो ॥ ७ श्री ॥

पले५

श्चजयद्रथश्च भूरिश्रवाः कृतवर्मा कृपश्च ७३ श्रुतायुरम्बष्ठपतिश्च राजा विंदानुविंदौ च सुदक्षिणाश्च प्राच्याश्च सौवीरगणाश्च सर्वे वसातयः
क्षुद्रका मालवाश्च ७४ किरीटिनं त्वरमाणाभिसस्रुर्निदेशगाः शांतनवस्य राज्ञः तं वाजिपादातिरथौघजालैरनेकसाहस्रशतैर्दृशी ७५ किरी
टिनं संपरिवार्य मार्गणैः शिनेर्नप्तावारणायुथपैश्च ततस्तद्दृष्ट्वार्जुनवासुदेवौ पदातिनागाश्वरथैः समंतात ७६ अभिद्रुतौ शस्त्रभृतां
वरिष्ठौ शिनिप्रवीरोभिससार तूर्णं स तान्यनीकानि धनुष्मतां वरः शिनिप्रवीरः सहसाभिपत्य ७७ चकार साह्यमथार्जुनस्य विष्णुर्य
था वृत्रनिषूदनस्य विशीर्णनागाश्वरथध्वजौघं भीष्मेण वित्रासितसर्वयोधं ७८ युधिष्ठिरानीकमभिद्रवंतं प्रोवाच संहृश्य शिनि
प्रवीरः क्व क्षत्रिया यास्यथ नैष धर्मः सतां पुरस्तात्कथितः पुराणैः ७९ मा स्वप्रतिज्ञां समजत प्रवीराः स्ववीरधर्मान्न परिपालयध्वं
तान्वासवानंतरजो निशम्य नरेंद्रमुख्यान्द्रवतः समंतात् पार्थस्य दृष्ट्वा मृदुयुध्यतां च भीष्मं च संख्ये समुदीर्यमाणं अमृष्यमाणस्त
तो महात्मा यशस्विनं सर्वदशार्हभर्ता ८१ उवाच शैनेयमभिप्रशंसन् दृष्ट्वा कुरूनापततः समंतात् ये यांति यांत्वेव शिनिप्रवीर येपि स्थिताः
सात्वत तेपि यांतु ८२ भीष्मं रथात्पश्य निपात्यमानं द्रोणं च संख्ये सगणं मया त्वं नमे बले सात्वत कौरवाणां क्रुद्धस्य युद्धे न रणे प्रकश्चि
त ८३ तस्मादहं गृह्य रथांगमुग्रं प्राणं हनिष्यामि महाव्रतस्य निहत्य भीष्मं सगणं तथाजौ द्रोणं च शैनेय रथप्रवीर ८४ प्रीतिं करिष्यामि
धनंजयस्य राज्ञश्च भीमस्य तथाश्विनोश्च निहत्य सर्वान्धृतराष्ट्रपुत्रांस्तत्पक्षिकापेच ॥ ५९ ॥ ५ ॥

नेदं मुखं च ... राज्येन राज्ञा तनमज्ञातशत्रुं संपालयिष्यत्यहमग्रहृष्टः ततः सुनाभं वसुदेवपुत्रः सूर्यप्रभं वज्रसमं स्वतुल्यं ८६ सुरांतमुद्यम्य भुजेन चक्रं रथादवप्लुत्य विसृज्य वाहान् संकं-
पयन् गां चरणौ महात्मा वेगेन कृष्णः प्रससार भीष्मं ८७ मदांधमाजौ समुदीर्णदर्पं सिंहो जिघांसन्निव वारणेंद्रं सोभ्यद्रवद्भीष्ममनीकमध्ये क्रुद्धो महेंद्रावरजः प्रमाथी ८८ व्यालंबिपीतांत-
पटश्चकाशे घनो यथा खेचिविभा पिनद्धः सुदर्शनं चास्य रराज शौरेस्तच्चक्रपद्मं सुभुजोरुनालं ८९ यथादिपद्मं तरुणार्कवर्णं रराज नारायणनाभिजातं तं कृष्णकोपोदयसूर्यबुद्धं क्षु-
रांततीक्ष्णाग्रसुजातपत्रं ९० तस्यैव देहोरुसरः प्ररूढं रराज नारायणनाभिनालं तमात्तचक्रं प्रणदंतमुच्चैः क्रुद्धं महेंद्रावरजं समीक्ष्य ९१ सर्वाणि भूतानि भृशं विनेदुः क्षयं कु-
रूणामिति चिंतयित्वा स वासुदेवः प्रगृहीतचक्रः संवर्तयिष्यन्निव जीवलोकं ९२ अभ्युत्पतन् लोकगुरुर्बभासे भूतानि धक्ष्यन्निव धूमकेतुः तमापतंतं प्रगृहीतचक्रं समीक्ष्य देवं द्विपदां
वरिष्ठं ९३ असंभ्रमात्कार्मुकबाणपाणी रथे स्थितः शांतनवोभ्युवाच एह्येहि देवेश जगन्निवास नमोस्तु ते शार्ङ्गगदासिपाणे ९४ प्रसह्य मां पातय लोकनाथ रथोत्त-
माद्भूतशरण्य संख्ये त्वया हतस्येह ममाद्य कृष्ण श्रेयः परस्मिन्निह चैव लोके ९५ संभावितोस्म्यंधकवृष्णिनाथ लोकैस्त्रिभिस्त्वं प्रथितप्रभावः रथावप्लुत्य ततस्त्वरावान्
पार्थः पदानुद्रुत्य यदुप्रवीरं ९६ जग्राह पीनोत्तमलंबबाहुं बाह्वोर्हरिं व्यायतपीनबाहुः निगृह्यमाणस्तु तदादिदेवो भृशं सरोषः किल चात्मयोगी ९७ आदाय वेगेन जगाम वि-
ष्णुर्जिष्णुं महावात इवैकवृक्षं पार्थस्तु विष्टभ्य बलेन पादौ भीष्मांतिकं तूर्णमभिद्रवंतं ९८ ॥ बलान्निजग्राह शनैर्महात्मा पदे च राजं दशमे कथंचित् अवस्थितं च
प्रणिपत्य हृष्टः संप्रीतोर्जुनः कांचनचित्रमाली ९९ उवाच कोपं प्रतिसंहरेति गतिर्भवान्केशव पांडवानां न हास्यसे कर्म यथाप्रतिज्ञं पुत्रैः शपे केशव सोदरैश्च १०० अ-

भी० २२९

तं गमिष्यामि यथा कुरूणां त्वयाद्य भिंद्यात्तुजसंप्रयुक्ताः ततः प्रतिज्ञां समयं च तस्य जनार्दनः प्रीतमना निशम्य १ स्थितः प्रिये कौरवसत्तमस्य रथे स चक्रं भुजगारिकेतोः सताननीलात्तुना

र सान: प्रगृह्य शंखं हृदि यत्तो निहंता २ सिनादयामास दिशो नभश्च स पांचजन्यस्य रवेण गाढी विक्रियां ध निर्घोषा न्मृदंकुंडलं तेज रजोधिकीभ्या चितपत्र नेत्रं ३ विशुद्ध हेमप्रभ मिश्रितशोभं वि

उत्तस्थुः प्रेस्य कुरुप्रवीराः म हेंगभेरीपटह प्रणादा नेमिस्वना दुंदुभिनिस्वनाश्च ४ ससिंहनादाश्च बभूवुरुग्राः सर्वेषां नीकेषु ततः कुरूणां गोडीवघोषस्तनपित्लुकल्पो जगाम पार्थस्य

न भो दिशश्च ५ जग्मुश्च बाणा विमलाः प्रसन्नाः सर्वा दिशः पांडव चापमुक्ताः ते कौरवाणामधिपो बलेन भीष्मेण भूरिश्रवसा च सार्धं ६ प्रत्युद्ययावुद्यतबाणपाणिः कर्मविधस्त्विव धमकेतुः आया र्जुनाय प्रजहार भल्लान् भूरिश्रवाः सप्त सुवर्णपुंखान् ७ दुर्योधनस्तोमरमुग्रवेगं शल्यो गदां शांतनवश्च शक्तिं स सप्तभिः सप्तशरप्रवेगान्संवार्य भूरिश्रवसा प्रयुक्तान् ८ सितेन दुर्योधनबाहुमुक्तं क्षुरेण तत्तोमरमुन्ममाथ ततः शुभामापततीं च शक्तिं विद्युत्प्रभां शांतनवेन मुक्तां ९ गदां च मद्राधिपबाहुमुक्तां द्वाभ्यां शराभ्यां निचकर्त वीरः ततो भुजाभ्यां बलवद्विकृष्य चित्रं धनुर्गांडिवमप्रमेयं १० महेंद्रमस्त्रं विधिवत्सुघोरं प्रादुश्चकाराद्भुतमंतरिक्षे ततोत्तमास्त्रेण न

॥ तो महात्मा सवरि पनी का निमहाध ॥

रम० २२९

पी२

नुष्मान् ११ शरौघजालैर्विमलाग्निवर्णैर्निवारयामास किरीटमाली शिलीमुखाः पार्थधनुर्विमुक्ताः प्रमथ्य ध्वजाग्राणि धनूंषि वाहान् १२ निकृत्य देहान्विविशुः परेषां
नरेंद्रनागेंद्रतुरंगमाणां ततो दिशः सोनुदिशश्च पार्थः शरैः सुधारैर्निशितैर्वितत्य १३ गांडीवशब्देन मनांसि तेषां किरीटमाली व्यथयां चकार तस्मिंस्तथा घोरतमा सुयु
द्धे शंखस्वनो दुंदुभिनिस्वनाश्च १४ अंतर्हिता गांडीवनिस्वनेन बभूवुरुत्स्वरयप्रणादः गांडीवशब्दं तमथो विदित्वा विराटराजप्रमुखाः नीवीराः १५ पांचालराजो द्रु
पदश्च वीरस्तं देशमाजग्मुरदीनसत्त्वाः सर्वाणि सैन्यानि तु तावकानि यतो यतो गांडिवजः प्रणादः १६ ततस्ततः संनतिमेव जग्मुर्न तं प्रतीयोभिससार कश्चित् तस्मिन्सुघोरे नृ
पसंप्रहारे हताः प्रवीराः सरथाश्च सूताः १७ गजाश्च नाराचनिपातनप्ताः महापताकाः शुभरुक्मकक्षाः परीतसत्त्वाः सहसा निपेतुः किरीटिना तत्र विभिन्नकायाः १८ दृढाहताः
पत्रिभिरुत्तमैस्तैः पार्थेन भल्लैर्निशितैः शितास्त्रैः निकृत्तयंत्रा निहतेंद्रजालाः ध्वजा न्ययाराध्वजिनीमुखेषु १९ पदातिसंघाश्च रथाश्च संख्ये हयाश्च नागाश्च धनंजयेन
बाणाहतास्तूर्णमपेतसत्त्वा विमस्तगात्रा निपेतुरुर्व्यां २० ऐंद्रेणातेनास्त्रवरेण राजन् महाहवे भिन्नतनुत्रकायाः ततः शरौघैर्निशितैः किरीटिना नृदेहशस्त्रक्षतलो
हितोदा २१ नदी सुघोरा नरमेदफेना प्रवर्तिता तत्र रणाजिरे वै वेगेन साती वहशु प्रवाहा परेतनागाश्वशरीरतीरा २२ नरांत्रमज्जोद्धृतघोरपंका प्रभूतरक्षोगणभूतसेविता
॥ २३ ॥ शिरःकपालाकुलकेशशाद्वला ॥

गा ५

ना१ क्र२

लाशरीरसंघातसहस्रमालिनी विकीर्णनानाकवचोर्मिसंकुला नराश्वनागास्थिशरीरसंकुला विशालपर्यन्तमुखीभयावहा २४ गोमायुमालावृककंककाकैः क्रै
व्यादसंघैश्च तरक्षुभिश्च उपेतकूलां ददृशुर्मनुष्याः क्रूरां महावैतरणीप्रकाशां २५ प्रवर्त्तितामर्जुनबाणसंघैर्मेदोवसासृग्वहां सुभीमां हतप्रवीरां च तथैव दृष्ट्वा सेनां
कुरूणामथ फाल्गुनेन २६ ते चेदिपांचालकरूषमत्स्याः पार्थाश्च सर्वे सहिताः प्रणेदुः जयप्रगल्भाः पुरुषप्रवीराः संत्रासयंतः कुरुवीरयोधान् २७ हतप्रवीराणि बला
नि हत्वा किरीटिना शत्रुभयावहेन वित्रास्य सेनां ध्वजिनीपतीनां सिंहो मृगाणामिव यूथसंघान् २८ विनेदतुस्तावतिहर्षयुक्तौ गांडीवधन्वा च जनार्दनश्च ततो रविं संहृतरश्मि
जालं दृष्ट्वा भृशं शस्त्रपरिक्षतांगाः २९ तदैंद्रमस्त्रं विततं च घोरमसह्यमुद्वीक्ष्य युगांतकल्पं अथापयानं कुरवः सभीष्माः सद्रोणदुर्योधनबाल्हिकाश्च ३० चक्रुर्निशां
संधिगतां समीक्ष्य विभावसोर्लोहितराजियुक्तां अवाप्य कीर्तिं च यशश्च लोके विजित्य शत्रूंश्च धनंजयोपि ३१ ययौ नरेंद्रैः सह सोदरैश्च समाप्तकर्मा शिबिरं निशायां ततः
प्रजज्ञे तुमुलः कुरूणां निशामुखे घोरतरः प्रणादः रणे रथानामयुतं निहत्य हता गजाः सप्तशतार्जुनेन प्राच्याश्च सौवीरगणाश्च सर्वे निपातिताः क्षुद्रकमालवाश्च ३२
महत्कृतं कर्म धनंजयेन कर्तुं यथा नार्हति कश्चिदन्यः श्रुतायुरंबष्ठपतिश्च राजा तथैव दुर्मर्षणचित्रसेनौ ३३ द्रोणः कृपः सैंधवबाल्हिकौ च भूरिश्रवाः शल्यशलौ च राज
न॥ अन्ये च योधाः शतशः समेताः स्वेन पार्थेन रणस्य मध्ये ३४ स्वबाहुवीर्येण जिताः सभीष्माः किरीटिना लोकमहारथेन इति ब्रुवंतः शिबिराणि जग्मुः सर्वे गणा भारत
पार्थिवीयाः ३५ उल्कासहस्रैश्च सुसंप्रदीप्तैर्विभ्राजमानैश्च तथा प्रदीपैः किरीटिवित्रासितसर्वयोधा चक्रे निवेशं ॥ ॥ ॥ ॥

प३ हि२

नि ?

ध्वजिनी कुरूणां ३६ इति श्री भीष्मपर्वणि अध्यायः ५४ तृतीयदिवसयुद्धं संजय उवाच व्युष्टां निशां भारत भारतानामनीकिनीनां प्रमुखे महात्मा ययौ सपत्नान् प्र
ति जातकोपस्ततः समग्रेण बलेन भीष्मः १ तं द्रोणदुर्योधनबाह्लिकाश्च तथैव दुर्मर्षणचित्रसेनौ जयद्रथश्चाति बलो बलौघैर्नृपास्तथान्ये प्रययुः समंतात् २ स तैर्मह
द्भिश्च महारथैश्च तेजस्विभिर्वीर्यवद्भिश्च राजन् रराज राजोत्तम राजमध्ये मध्ये सुराणामिव देवराजः ३ तस्मिन्ननीकप्रमुखे विषक्ता दोधूयमानाश्च महापताकाः सुरक्त
पीतासुरपांडुराभा महागजस्कंधगता विरेजुः ४ सा वाहिनी शांतनवेन राज्ञा महारथैर्वारणवाजिभिश्च बभौ सविद्युत्स्तनयित्नुकल्पा जलागमे द्यौरिव जातमेघा ५
ततो रणायाभिमुखी प्रयाता प्रत्यर्जुनं शांतनवाभिगुप्ता सेना महोग्रा सहसा कुरूणां वेगो यथा भीम इवापगायाः ६ तं व्यालनानाविधगूढसारं गजाश्वपादातरथौघपक्षं
व्यूहं महामेघसमं महात्मा ददर्श दूरात् कपिराजकेतुः ७ स निर्ययौ केतुमता रथेन नरर्षभः श्वेतहयेन वीरः वरूथिनीनां प्रमुखे महात्मा बलेन युक्तः सह सपत्नसेनां ८ सोप
स्करं सोत्तरबंधनेषं यत्तं यदूनामृषभेण संख्ये कपिध्वजं प्रेक्ष्य विषेदुराजौ सहैव पुत्रैस्तव कौरवेयाः ९ प्रकर्षता गुप्तमुदायुधेन किरीटिना लोकमहारथेन तं व्यूहराजं
ददृशुस्त्वदीयाश्चतुश्चतुर्व्यालसहस्रकीर्णं १० यथा हि पूर्वेऽहनि धर्मराज्ञा व्यूहः कृतः कौरवसत्तमेन तथा न भूतो भुवि मानुषेषु न दृष्टपूर्वो न च विश्रुतश्च ११ ततो महा
वेगसमाहतानि भेरीसहस्राणि विनेदुराजौ शंखस्वनास्तूर्यरवाश्च जज्ञुः सर्वेष्वनीकेषु च सिंहनादाः १२ ॥ ॥ १२ ॥ ॥ १२ ॥ १२

ततः स बाणानि महास्वनानि विस्फार्यमाणानि धनूंषि वीरैः श्रवणेन भेरीपणवप्रणादानंतत्रेषुः शंखमहास्वनाश्च १३ तच्छंखशब्दाहतमंतरिक्षमुद्भूतभौमद्भुतरेणु
जालं महावितानाश्च ततः प्रकाशमालोक्य वीराः हसा निपेतुः १४ रथी रथेनाभिहतः समन्तात् पपात साश्वः सरथः सकेतुः गजो गजेनाभिहतः पपात पदातिना चाभिह
तः पदातिः १५ आवर्त्तमानान्यभिवर्त्तमानैर्घोराकृतीन्यद्भुतदर्शनानि प्रासैश्च खड्गैश्च समाहतानि सदश्ववृंदानि सदश्ववृंदैः १६ सुवर्णतारागणभूषितानि सपु
प्रभाणि शारदराशि विदीर्यमाणानि परश्वधैश्च प्रासैश्च खड्गैश्च निपेतुरुर्व्यां १७ गजे विषाणोर्वरहस्तरुग्णाः केचित् ससूता रथिनः प्रपेतुः गजर्षभाश्चापि र
थर्षभेणाप्रपेरिवाणाहताः पृथिव्यां १८ गजौघवेगोद्धतमर्दितानां श्रुत्वा विषेदुर्वहृक्षाममनुष्याः आर्त्तस्वरं सादिपदातिपत्नां विषाणगात्रावरताडितानां १९ सं
भीतनागाश्च रथेसुहर्षे महाक्षये सादिपदातिपत्नां महारथैः संपरिवार्यमाणो ददर्श भीष्मः कपिराजकेतु २० तं पंचतालोच्छ्रिततालकेतुः सदश्ववेगाद्भुतवीर्ययातं
महास्त्रवेगाशनिदीप्तमंतं किरीटिनं शांतनवोभ्यधावत् २१ तथैव शक्रप्रतिमानकल्पमिंद्रात्मजं द्रोणमुखाभिसस्रुः कृपश्च शल्यश्च विविंशतिश्च दुर्योधनः
सौमदत्तिश्च राजन् २२ ततो रथानीकमुखादुपेत्य सर्वास्त्रवित्कांचनचित्रवर्मा जवेन शूरोभिससार सर्वास्तानर्जुनस्यात्मसुतोभिमन्युः २३ तेषां महास्त्राभिम
महाबलानामसत्त्वकर्मा विनिहत्य कार्ष्णिः बभौ महामंत्रहुतार्चिमाली सदोगतः सभगवानिवाग्निः २४ ततः स ॥ २४ ॥ ॥ २४ ॥

सैंध१

तथाँसधिकेतोंश्च त्वानदीतांसमरेरिपूणां जगाम सौभद्रमतीत्य भीष्मो महारथं पार्थमहीनसत्वः २५ ततः प्रगृह्याद्भुतदर्शनेन गांडीवनिर्ह्रादमहास्वनेन विपाट
जालेन महास्त्रजालं विनाशयामास किरीटमाली २६ तमुत्तमं सर्वधनुर्धराणामसक्तकर्मा कपिराजकेतुः भीष्मं महात्मा ववृषे मयः शरैः स्तीक्ष्णैर्विमलैश्च भ
ल्लैः २७ तथैव भीष्मा हृतमंतरिक्षे महास्त्रजालं कपिराजकेतोः विशीर्यमाणं ददृशुस्त्वदीया दिवाकरेणेव तमोभिभूतं २८ एवं विधं कार्मुकभीमनादमदीन
वत्सत्पुरुषोत्तमाभ्यां ददर्श लोकः कुरुसृंजयाश्च तद्द्वैरथं भीष्मधनंजयाभ्यां २९ इति श्री भीष्मपर्वणि अध्यायः ५५ संजय उवाच द्रोणस्तु भोरिस्त्रवाः शल्यश्चित्र
सेनश्च मारिष पुत्रः सांयमनश्चैव सौभद्रं समयोधयन् १ संसक्तमतितेजोभिस्तमेकं ददृशुर्जनाः पंचभिर्मनुजव्याघ्रैर्गजैः सिंहशिशुं यथा २ नातिलक्ष्यतया क
श्चिन्न शौर्येन पराक्रमे बभूव सदृशः कार्ष्णेर्नास्त्रे नापि च लाघवे ३ तथा तमात्मजं युद्धे विक्रमंतमरिंदम दृष्ट्वा पार्थो रणे यत्तः सिंहनादमथानदत् ४ पीडयानं
च तैसैन्यं पौत्रं तव विशांपते दृष्ट्वा त्वदीया राजेंद्र समंतात्पर्यवारयन् ५ ध्वजिनीं धार्तराष्ट्राणां दीनशत्रुरदीनवत् प्रत्युद्ययौ स सौभद्रस्तेजसा च बलेन च ६
तस्य लाघवमार्गस्थमादित्यसदृशप्रभं प्राहश्यत महच्चापं समरे युध्यतः परैः ७ स द्रौणिमिषुणैकेन विध्वा शल्यं च पंचभिः ध्वजं सांयमनेश्चापि सोष्टाभिरपवर्जे
यत् ८ रुक्मदंडमहाशक्तिं प्रेषितां सौमदत्तिना शितेनोरगसंकाशां पत्रिणा भिजराहतां ९ शल्यस्य च महाघोरानस्यतः ॥ ॥ ॥

शतशः शरान् निवार्योर्जुनस्तायाद्रोजघ्नान चतुरो हयान् १० भूरिश्रवाश्च शल्यश्च द्रौणिः सांयमिनिः शलः नाभ्यवर्तन्त संरब्धा कार्ष्णिबाहुबलोद्धतं ११
ततस्त्रिगर्ता राजेंद्र मद्राश्च सह केकयैः पंचविंशतिसाहस्रास्तव पुत्रेणाचोदिताः १२ धनुर्वेदविदो मुख्या अजेयाः शत्रुभिर्युधि सहपुत्रं जिघांसंतं परिवव्रुः
किरीटिनं १३ तौ तु तत्र पितापुत्रौ परिक्षिप्तौ रथर्षभौ ददर्श राजपांचाल्यः सेनापतिरमित्रजित् १४ स वारणरथौघानां सहस्रैर्बहुभिर्वृतः वाजिभिः पत्तिभि
श्चैव ततः शतसहस्रशः १५ धनुर्विस्फार्य संक्रुद्धश्चोदयित्वा च वाहिनीं ययौ तन्मद्रकानीकं केकयांश्च परंतपः १६ तेन कीर्तिमता गुप्तमनीकं दृढधन्वना ॥
प्रयुक्तरथनागाश्वयोत्स्यमानमशोभयत् १७ सोर्जुनप्रमुखेयांतं पांचाल्यकुलवर्द्धनः त्रिभिः शारद्वतं बाणैर्जत्रुदेशे समर्पयत् १८ ततः स मद्रकान् हि
त्वा दशभिर्निशितैः शरैः एकस्तेजघाना शु भद्रेन कृतवर्मणः १९ दमनं चापि दायादं कौरवस्य महात्मनः जघान विपुलाग्रेण नाराचेन परंतपः २०
ततः सांयमनेः पुत्रः पांचाल्यं युद्धदुर्मदं अविध्यद्दशभिर्बाणैर्दशभिश्चास्य सारथिं २१ सोतिविद्धो महेष्वासः सृक्किणी परिलेलिहन् भल्लेन भृशतीक्ष्णेन
चकर्तास्य च कार्मुकं २२ तथैनं पंचविंशत्या क्षिप्रमेव समर्पयत् अश्वांश्चास्यावधीद्राजन्नुभौ तौ पार्ष्णिसारथी २३ हताश्वे स रथे तिष्ठन् ददर्श भरत
र्षभ पुत्रः सांयमनेः पुत्रं पांचाल्यस्य यशस्विनः २४ संप्रगृह्य महाघोरं निस्त्रिंशवरमायसं पदातिस्तूर्णमागच्छद्द्रथस्थं द्रुपदात्मजं २५ ॥

त्रा१ म

तंमहौघमिवायंतंखात्पतंतमिवोरगं भ्रां भ्राता निस्त्रिंशंकालोत्सृष्टमिवांतकं २६ दीप्यमानमिवादित्यंमत्तवारणविक्रमं अपश्यन्पांडवास्तत्र धृष्टद्युम्नश्चपा
र्षतः २७ तस्यपांचाल्यपुत्रस्तुप्रतीपमभिधावतः शितनिस्त्रिंशहस्तस्यशरावरणधारिणः २८ बाणवेगमतीतस्यतथाभ्याशमुपेयुषः त्वरन्सेनापतिःक्रुद्धोबिभे
दगदयाशिरः २९ तस्यराजन्सनिस्त्रिंशंसुप्रभंचशरावरं हतस्यपततिंतंहस्तात्तेसोत्तेसधमपतद्भुवि ३० तंनिहत्यगदाग्रेण लेभेसपरमंयशः पुत्रःपांचालराजस्यमहा
त्माभीमविक्रमः ३१ तस्मिन्हतेमहेष्वासेराजपुत्रेमहारथे हाहाकारोमहानासीत्तवसैन्यस्यमारिष ३२ ततःसोयमनिःक्रुद्धोदृष्ट्वानिहतमात्मजं अभिदुद्रा
ववेगेनपांचाल्यंयुद्धदुर्मदं ३३ तौतत्रसमरेवीरौसमेतौरथिनांवरौ ददृशुःसर्वराजानःकुरवःपांडवास्तथा ३४ ततःसांयमनिःक्रुद्धःपार्षतंपरवीरहा आ
जघानत्रिभिर्बाणैस्तोत्त्रैरिवमहाद्विपं ३५ तथैवपार्षतंभूरिःशल्यःसमितिशोभनः आजघानोरसिक्रुद्धस्ततोयुद्धमवर्तत ३६ इतिश्रीभीष्मपर्वणिअध्यायः
५६ धृतराष्ट्रउवाच दैवमेवपरंमन्येपौरुषादपिसंजय यत्सैन्यंममपुत्रस्यपांडुसैन्येनवध्यते १ नित्यंहिमामकांस्तातहतानेवहिशंससि अव्यग्रांश्चप्रहृ
ष्टांश्चनित्यंशंससिपांडवान् २ हीनान्पुरुषकारेणमामकानद्यसंजयः पतितान्पात्यमानांश्चहतानेवचशंससि युध्यमानान्यथाशक्तिघटमानान्जयंप्रति
पांडवाविजयंत्येवहीयंतेचैवमामकाः ४ सोहंतीव्राणिदुःखानिदुर्योधनकृतानिच अ ऽऽ २२ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ

श्री २

भि०
१३३

श्रोषंसततंतातद्दुः सहानिबद्दुनिव ५ तमुयायंनपश्यामिद्रौपेयस्येनपांडवाः मामकावाजयंयुद्धेप्रापुर्येनसंजय ६ संजयउवाच क्षयंमनुष्यदेहानां गजवा
जिरथक्षयं पश्यन्नुराजन्स्थिरोभत्वात्तवैवापनयोमहान् ७ धृष्टद्युम्नं शल्येनपीडितोनवभिःशरैः पीडयामाससंक्रुद्धोमद्राधिपतिमायसैः तत्राद्भुतमपश्या
मपार्षतस्यपराक्रमं न्यवारयतयत्तूर्णंशल्यंसमितिशोभनं ९ नांतरंददृशेकश्चित्तयोःसंरब्धयोरणे मुहूर्त्तमिवतद्युद्धंतयोःसमभवन्नृप ततःशल्योम
हाराजधृष्टद्युम्नस्यसंयुगे धनुश्चिच्छेदभल्लेनपीतेननिशितेनच ११ अथैनंशरवर्षेणछादयामासभारत गिरिंजलागमेयद्वज्जलदाजलधारिणः १२
अभिमन्युस्तुसंक्रुद्धोधृष्टद्युम्नेनपीडिते अभिदुद्राववेगेनमद्रराजरथंप्रति १३ ततोमद्राधिपरथंकार्ष्णिःसंप्राप्यकोपनः आर्त्तायनिममेयात्माविव्याधनि
शितैस्त्रिभिः १४ ततस्तुतावकाराजन्परीप्संतोर्जुनिंरणे मद्रराजरथंतूर्णंपरिवार्यावतस्थिरे १५ दुर्योधनोविकर्णश्चदुःशासनविविंशती दुर्मर्षणोदुःसहश्च
चित्रसेनःसदुर्मुखः १६ सत्यव्रतःपुरुमित्रोविकर्णश्चमहायशः एतेमद्राधिपरथंपालयंतस्थिताराणे १७ तान्भीमसेनःसंक्रुद्धोधृष्टद्युम्नश्चपार्षतः द्रौपदेया
भिमन्युश्चमाद्रीपुत्रौचपांडवौ १८ धार्त्तराष्ट्रान्दशरथानदृशेवप्रत्यवारयन् नानारूपाणिशस्त्राणिविसृजंतोविशांपते १९ अभ्यवर्त्तंतसंक्रुद्धाःपरस्पर
॥वधैषिणाः तेवैसमीयुःसंग्रामेराजन्दुर्मंत्रितेतव २० तस्मिन्दु ॥

राम०
१३३

शरव्येष्वस्तु हे वर्त्तमाने महाभये तावकानां परेषां च प्रेक्षका रथिनोऽभवन् २१ शस्त्राण्यनेकरूपाणि विसृजंतो महारथाः अन्योन्यमभिनर्दंत संप्रहारं प्रचक्रिरे तेन दा
ज्ञात संरंभाः सर्वे मोघां जिघांसवः अन्योन्यमभिनर्दंतस्पर्द्धमाना परस्परं अन्योन्यस्पर्द्धया राजन ज्ञातयः संगता मिथः २२ महास्त्राणि विमुंचंतः समापेतुरमर्षणाः
दुर्योधनस्तु संक्रुद्धो धृष्टद्युम्नं महारणे विव्याध समरे वाणैश्चतुर्भिः समरे द्रुतं दुर्मर्षणश्च विंशत्या चित्रसेनश्च सप्तभिः विविंशतिः पंचभिस्तु त्रिभिर्दुःशासनस्तथा २६
तान् प्रत्यविध्यद्राजेंद्र पार्षतः शत्रुतापनः एकैकं पंचविंशत्या दर्शयन् हस्तलाघवं २७ सत्यव्रतं च समरे पुरुमित्रं च भारत अभिमन्युरविध्यत्तु दशभिर्दशभिः शरैः
२८ माद्रीपुत्रौ तु समरे मातुलं मातृनंदनौ छादयेतां शरैस्तीक्ष्णैस्तदद्भुतमिवाभवत् २९ ततः शल्यो महाराज स्वस्त्रीयौ रथिनां वरौ शरैर्वेद्धुमिरानच्छत् कृतप्रति
कृतैषिणौ ३० छाद्यमानौ ततस्तौ तु माद्रीपुत्रौ न चेलतुः अथ दुर्योधनं दृष्ट्वा भीमसेनो महाबलः ३१ विधित्सुः कलहस्यांतं गदां जग्राह पांडवः तमुद्यतगदं दृ
ष्ट्वा कैलासमिव शृंगिणं ३२ भीमसेनं महाबाहुं पुत्रास्ते प्राद्रवन् भयात् दुर्योधनस्तु संक्रुद्धो मागधं समचोदयत् ३३ अनीकं दशसाहस्रं कुंजराणां तरस्वि
नां गजानीकेन सहितस्तेन राजा सुयोधनः ३४ मागधं पुरतः कृत्वा भीमसेनमथाभ्ययात् आपतंतं च तं दृष्ट्वा गजानीकं वृकोदरः ३५ गदापाणिरवारोहद्र
थात्सिंह इवोन्नदन् अद्रिसारमयीं गुर्वीं प्रगृह्य महतीं गदां ३६ अभ्यधावद्गजानीकं व्यादितास्य इवांतकः स गजान् गदया निघ्नन् समरे व्यचरद्बली ३७ भीमसेनो
महाबाहुर्वृत्रहा दानवेष्विव तस्य नादेन महता मनोहृदयकंपिना ३८ व्यत्रसंत संहत्य गजा भीमस्य नर्दतः ततस्तु द्रौप ऽ ऽ ऽ ऽ ऽऽः

न२

दीपुत्राः सौभद्रश्च महारथः ३९ नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः पृष्ठे भीमस्य रक्षन्तः शरवर्षेण वारणान् ४० अभ्यधावंत वर्षंतो मेघा इव गिरीन् यथा क्षुरैः क्षुरप्रैर्भल्लैश्च पीतैरंजलिकैः शितैः ४१ व्याहरन्नुत्तमांगानि पांडवा गजयोधिनां शिरोभिः प्रपतद्भिश्च बाहुभिश्च विभूषितैः ४२ अश्मवृष्टिरिवाभाति पाणिभिश्च सांकुशैः कृत्तोत्तमांगाः स्कंधेषु गजानां गजयोधिनः ४३ अदृश्यंताचलाग्रेषु द्रुमा भग्नाः शिखा इव धृष्टद्युम्नहतानन्यानपश्याम महागजान् ४४ पतितान् पात्यमानांश्च पार्षतेन महात्मना मागधोऽथ महीपालो गजमैरावतोपमं ४५ प्रेषयामास समरे सौभद्रस्य रथं प्रति तमापतंतं संप्रेक्ष्य मागधस्य महागजं ४६ निजघ्ने रोषुणा वीरः सौभद्रः परवीरहा तस्यावर्जितनागस्य काष्ठिः परपुरंजयः ४७ राज्ञो रजतपुंखेन भल्लेनापहरच्छिरः विगाह्य तद्गजानीकं भीमसेनोऽपि पांडवः ४८ व्यचरत् समरे मृद्नन् गजानिंद्रो गिरीनिव एकप्रहारनिहतान् भीमसेनेन दंतिनः ४९ अपश्याम रणे तस्मिन् गिरीन् वज्रहतानिव भग्नदंतान् भग्नकरान् भग्नसक्थांश्च वारणान् । भग्नपृष्ठत्रिकान् दंष्ट्रिन् निहतान् पर्वतोपमान् भयात् संसीदतश्चान्यान् क्षिप्तकान् समरे गजान् वित्रस्तान् भयसंविग्नान् भयात् विशकृतो महान् । भीमसेनस्य मार्गेषु गतासून् पर्वतोपमान् अपश्यन्निहतान्नागान् राजन् शिष्टीवतोऽपरान् ५० वमंतो रुधिरं चान्या भिन्नकुंभा महागजाः विह्वलंतो गता भूमिं शैला इव धरातले ५१ मेदोरुधिरदिग्धांगो वसामज्जासमुक्षितः व्यचरत् समरे भीमो दंडपाणिरिवांतकः ५२ गजानां रुधिराक्तां गदां बिभ्रद् वृकोदरः घोरः प्रतिभयश्चासीत् पिनाकीव पिनाकधृक् ॥ निर्मथ्यमानाः क्रुद्धेन भीमसेनेन दंतिनः सहसा प्राद्रवन् शिष्टा मृद्नंतस्तव वाहिनीं ५४ तं हि वीरं महेष्वासाः सौभद्रप्रमुखा रथाः पर्यरक्षंत युध्यंतं वज्रायुधमिवामराः ५५ शोणिताक्तां गदां बिभ्रदुक्षितो गजशोणितैः कृतांत इव रौद्रात्मा भीमसेनो व्यदृश्यत ५६ राम

॥ व्यायच्छमानं गदया दिक्षु सर्वासु भारत भीमसेनमपश्याम ॥

त्यंतमिवशंकरं ५७ यमदंडोपमांगुर्वी मिंद्राशनिसमस्वनां अपश्याममहाराजरौद्रींविशसनींगदां ५८ सुनिस्त्रिंकेशामज्जाभिःप्रदिग्धांरुधिरेणाच पिना
कमिवरुद्रस्यक्रुद्धस्याभिघ्नतःपशून् यथापशूनांसंघातंयष्ट्यापालःप्रकालयेत् तथाभीमोगजानीकंगदयापर्यकालयत् ६० गदयावध्यमानाश्चमार्गणैःस्ते
कमिवरुद्रस्यक्रुद्धस्याभिघ्नतःपशून् ... समंततः स्वान्स्यंदनान्विमृद्नंतःप्राद्रवन्कुंजरास्ततः ६१ महावातइवाभ्राणिविधमिल्लासवारणान् अतिष्ठत्समरेभीमःस्मशानइवशूलभृत् इतिश्री
भीष्मपर्वणिअध्यायः ५७ संजयउवाच हतेतस्मिन्गजानीकेपुत्रोदुर्योधनस्तव भीमसेनंघ्नतेत्येवंसर्वसैन्यान्यचोदयत् १ ततःसर्वाणिसैन्यानितवपुत्रस्यतव
शासनात् अभ्यद्रवंभीमसेनंनदंतंभैरवान्रवान् २ तंवलौघमपर्यंतंदेवैरपिसुदुःसहं आपतंतंसुदुष्पारंसमुद्रमिवपर्वणि ३ रथनागाश्वकालिलंशंख
दुंदुभिनादितं अनंतरथपादातंरजसासर्वतोवृतं ४ सभीमसेनःसमरेमहोदधिमिवापरं सेनासागरमक्षोभ्यंवेलेवसमवारयत् ५ तदाश्चर्यमपश्याम
पांडवस्यमहात्मनः भीमसे[illegible]नस्यसमरेराजन्कर्मातिमानुषं ६ उदीर्णान्पार्थिवान्सर्वान्साश्वान्सरथकुंजरान् असंभ्रमंभीमसेनोगदयासमवा
रयत् ७ ससंवार्यवलौघांस्तान्गदयावलिनांवरः अतिष्ठत्तुमुलेभीमोगिरिर्मे[illegible]रिवाचलः ८ तस्मिन्सुतुमुलेघोरेरणेपरमदारुणे भ्रातरश्चैवपु
त्राश्चधृष्टद्युम्नश्चपार्षतः ९ द्रौपदेयाभिमन्युश्चशिखंडीचापराजितः नप्राजहन्भीमसेनंभयेजातेमहावलं १० ततशैक्यायसींगुर्वीप्रगृह्यमहतींगदां अ
॥धावन्नावकान्योद्धान्दंडपाणिरिवांतकः ११ पोथयन्रथहं॥

नआग्नेनि दि३

ह्यानिवाजिवृंदानिवा विभुः व्यचरत्समरे भीमोयुगांतेपावकोयथा २२ विनिघ्नन्समरेयोधास्युगांतेकालवह्निभुः ऊरुवेगेनसंकर्षन्नथजालानिपांडवः २३ वलानिचममर्दाशुनद्वलानिवकुंजरः मृदून्नथेभ्योरथिनोगजेभ्योगजयोधिनः २४ सादिनश्चाश्वपृष्ठेभ्योभमोचापिपदातिनः गदयाव्यहनत्सर्वान्वातोवृक्षा निवौजसा २५ भीमसेनोमहावाहुस्तवपुत्रस्यवैवलेमांवैमज्जवसामांसैःप्र [illegible]धारुधिरेणच अदृश्यतमहारौद्रीगदानागाश्ववाधिनी तत्रतत्रहतैस्तैश्चपिमनु ष्यगजसादिभिः २७ रणांगणंतदभवन्मृत्योराघातसंनिभं पिनाकमिवरुद्रस्यक्रुद्धस्याभिघ्नतःपशून् २८ यमदंडोग्रमाभुग्नामिंद्राशनिसमप्रभां ददृशु भीमसेनस्यरौद्रीविशसनींगदां २९ आविध्यतोगदांतस्यकौंतेयस्यमहात्मनः बभौरूपंमहाघोरंकालस्येवयुगक्षये ३० तंतथामहतींसेनांद्रावयंतःपुनःपु नः दृष्ट्वामृत्युमिवायंतंसर्वेविमनसोभवन् ३१ यतोयतःप्रेक्षतेस्मगदामुद्यम्यपांडवः तेनतेनस्मदीर्यंतेसर्वसैन्यानिभारत ३२ नसमानमनीकानिव्यादि तास्यमिवांतकं तंतथाभीमकर्माणांप्रगृहीतमहागदं ३३ दृष्ट्वावृकोदरंभीष्मःसहसैवसमभ्ययात् महतारथघोषेणारथेनादित्यवर्चसा ३४ छादय न्शरवर्षेणापर्जन्यइववृष्टिमान् तमायांततथादृष्ट्वाव्यात्तावीनमिवांतकं ३५ भीमसेनोमहावाहुः प्रत्युदीयादमर्षितः तस्मिन्क्षणेसात्यकिःसत्यसं धःशिनिप्रवीरोभ्यपतत्पितामहं ३६ निघ्नन्नमित्रान्धनुषादृढेनसंकंपयंस्तवपुत्रस्यसेनां ३६ तंयांतमश्वैरजतप्रकाशैः शरान्वपंतंनि ग्र ग्र ॥ः

नर तर

शितान्सुपुंखान्नाशक्नुवं वारयितुं तान्दानी मर्वेगाणामात्तयेत्सदीयाः २७ अविध्यदेनं दशभिः पार्षतो रलंबुषो रणे समो सौ तदानी शरैश्चतुर्भिः प्रति विध्यतं
चनप्ता शिनेरभ्यपतद्रथेन २८ अन्वागतं हि मवीरं निशाम्य मध्ये रिपूणां परिवर्त्तमानं प्रावर्त्तयंतं कुरुपुंगवांश्च पुनः पुनश्च प्रणादं तमाजौ २९ योधास्त्वदी
याः शरवर्षैः स्ववर्षन्मेघा यथा भूधरमंबुवेगैः नाशक्नुवं वारयितुं वरिष्ठं मध्यंदिने सूर्यमिवातपंतं ३० न तत्र कश्चिन्नविषण्ण आसीद्धतेराजन्सोमदत्तस्य
पुत्रात् सत्वादहानो धनुरुग्रवेगं भूरिश्रवा भारत सोमदत्तिः ३१ हत्वा रथान्स्वपनीयमानान्प्रत्युद्ययौ सात्यकिं योद्धुमिच्छन् इति श्री भीष्मपर्वणि त्र
ध्यायः ५८ संजय उवाच ततो भूरिश्रवा राजन्सात्यकिं नवभिः शरैः अविध्यद्भृश संक्रुद्धस्तोत्रैरिव महाद्विपं १ कौरवं सात्यकिश्चापि शरैः सन्न
तपर्वभिः अवारयदमेयात्मा सर्वलोकस्य पश्यतः २ ततो दुर्योधनो राजा सोदर्यैः परिवारितः सौमदत्तिं रणे यत्तं समंतात्पर्यवारयन् ३ तथैव पां
डवाः सर्वे सात्यकिं तरसा रणे परिवार्यास्थिताः संख्ये समंतात्सुमहौजसः ४ भीमसेनस्तु संक्रुद्धो गदामुद्यम्य भारत दुर्योधनमुखान्सर्वान्पुत्रां
स्तिपर्यवारयन् ५ रथैरनेकसाहस्रैः क्रोधामर्षसमन्विताः नंदकस्तव पुत्रस्तु भीमसेनं महाबलं ६ विव्याध निशितैस्तीक्ष्णैः कंकपत्रैः शिलाशितैः दु
र्योधनस्तदा राजन्भीमसेनं महाहवे ७ आजघानोरसि क्रुद्धो मार्गणैर्नवभिः शरैः ततो भीमो महाबाहुः स्वरथं सुमहाबलः ८ अरुरोह रथं श्रेष्ठं वि

॥शोकं चेदमब्रवीत् एते महारथाः॥

शराघातैरिमे महाबलाः ९ मामेवमभिसंक्रुद्धा हन्तुमभ्युद्यता युधि एतानद्य हनिष्यामि पश्यतस्ते न संशयः १० तस्मान्न मा त्वं संग्रामे पन्तः संपश्च्य सार
थे एवमुक्त्वा ततः पार्थः पुत्रं तव विशांपते ११ विव्याध दशभिस्तीक्ष्णैः शरैः कनकभूषणैः नैरकं विव्यि भिर्वाणैः प्रत्यविध्यत्तदनन्तरे १२ तं तु दुर्योधनः
षष्ठ्या विव्याध भीमं महाबलं त्रिभिरन्यैः सुनिशितैर्विशोकं प्रत्यविध्यत १३ भीमस्य च रणे राजन् धनुश्चिच्छेद भास्वरं मुष्टिदेशे शरैस्तीक्ष्णैस्त्रिभिराजौ हसन्निव
१४ भीमस्तु प्रेक्ष्य यन्तारं विशोकं संयुगे तदा पीडितं विशिखैस्तीक्ष्णैस्तव पुत्रेणाधीमता १५ अमृष्यमाणः संक्रुद्धो धनुर्दिव्यं परामृशत् पुत्रस्य ते महारा
ज वधार्थं पुरुषर्षभः १६ समाधत्त च संरब्धः क्षुरप्रं लोमवाहिनं तेन चिच्छेद नृपतेर्भीमः कार्मुकमुत्तमं १७ अथापास्य तु धनुश्छिन्नं पुत्रस्ते क्रोधमूर्छितः अ
न्यत्कार्मुकमादाय सत्वरं वेगवत्तरं १८ संधाय विशिखं घोरं कालमृत्युसमप्रभं तेनाजघान संक्रुद्धो भीमसेनं स्तनान्तरे १९ स गाढविद्धो व्य[illegible]थितो
संस्रनोप[illegible]स्य रथे विशत् निषसाद रथोपस्थे मूर्छां चाभिजगाम ह २० तं दृष्ट्वा व्यथितं भीममभिमन्युपुरोगमाः नामृष्यन्त महाभागाः पाण्डवानां महा
रथाः २१ ततः सुतुमुलां वृष्टिं शराणामुग्रतेजसां पातयामासुरव्यग्राः पुत्रस्य तव मूर्धनि २२ प्रतिलभ्य ततः संज्ञां भीमसेनो महाबलः दुर्योधनं त्रिभि
र्विध्वा पुनर्विव्याध पंचभिः २३ शल्यं च पंचविंशत्या शरैर्विव्याध पाण्डवः रुक्मपुङ्खैर्महेष्वासः स विद्धो व्यपयाद्रणात् २४ प्रत्युद्ययुस्ततो भीमं तव पुत्रा
श्चतुर्दश सेनापतिः सुषेणश्च जलसंधः सुलोचनः २५ ।।भी

मसेनमभिद्रुत्य विव्यधुः सहिताभृशं पुत्रांस्तु तव संप्रेक्ष्य भीमसेनो महाबलः २६ सृक्किणी विलिहन्वीरः पशुमध्ये वृकोयथा अभिपत्य महाबाहु
र्गेहत्मानिव वेगितः २७ सेनापतेः क्षुरप्रेण शिरश्चिच्छेद पांडवः संप्रहृष्यंश्च हृष्टात्मा त्रिभिर्वीरो महाभुजः २८ जलसंधं विनिर्भिद्य सोनयद्यमसादनं
सुषेणं च ततो हत्वा प्रेषयामास मृत्यवे २९ उग्रस्य सशिरस्त्राणं शिरश्चंद्रोपमं भुवि पातयामास भल्लेन कुंडलाभ्यां विभूषितं ३० वीरबाहुं च सप्त
त्यासाश्व केतुं ससारथिं विनाय समरे भीमः परलोकाय पांडवः भीमं भीमरथौ चोभौ भीमसेनो हसन्निव भ्रातरौ रभसौ युद्धे त्वनयद्यमसादनं ३१
ततः सुलोचनं भीमः क्षुरप्रेण महामृधे मिषतां सर्वसैन्यानामनयद्यमसादनं ३३ पुत्रास्तु तव तं दृष्ट्वा भीमसेनपराक्रमं शेषा येन्ये भवंस्तत्र भी ते ५
मस्य भयपातनः ३४ विप्रद्रुता दिशो राजन् वध्यमाना महात्मना ततो ब्रवीच्छांतनवः सर्वानेव महारथान् ३५ यथाप्राग्म्यान्यथावीरान्यथाश
राष्ट्रसंगतान् निपातये धन्वा तं प्रगृह्णीत पांडवं ३६ एवमुक्तास्ततः सर्वे धार्तराष्ट्रस्य सैनिकाः अभ्यद्रवंत संक्रुद्धा भीमसेनं महाबलं ३७
भगदत्तः प्रभिन्नेन कुंजरेणा विशांपते अपतत्सहसा तत्र यत्र भीमो व्यवस्थित ३८ अपतन्नेव चरणो भीमसेनं शिलाशितैः अदृश्यं समरे चक्रे जीमू
तइव भास्करं ३९ अभिमन्युमुखास्तत्र नामृष्यंत महारथाः भीमस्याच्छादनं संख्ये स्ववाहुबलमा ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ

म३

श्रिताः ४० ततस्तं शरवर्षेण समंतात्पर्यवारयन् गजं च शरवृष्ट्या तु विभिदुस्ते समंततः ४१ स शरौघवृष्ट्याभिहतः समस्तैस्तैर्महारथैः प्राग्ज्योतिषग
जो राजन्नानालिंगैः सुतेजनैः ४२ संजातरुधिरोत्पीडः प्रेक्षणीयोभवद्रणे गभस्तिभिरिवार्कस्य संस्यूतो जलदो महान् ४३ स चोदितो मदस्रा
वी भगदत्तेन वारणः अभ्यधावत तान्सर्वान्कालोत्सृष्ट इवांतकः ४४ द्विगुणं जवमास्थाय कंपयंश्चरणैर्महीं तस्य तत्सुमहद्रूपं दृष्ट्वा सर्वे महारथाः
४५ असह्यं मन्यमानाश्च ते विप्रमनसोभवन् ततस्तु नृपतिः क्रुद्धो भीमसेनस्तनांतरे ४६ आजघान नरव्याघ्रः शरेणानतपर्वणा सोतिविद्धो
महेष्वासस्तेन राज्ञा महारथः ४७ मूर्छयाभिपरीतांगो ध्वजयष्टिमुपाश्रितः तांस्तु भीतान्समालक्ष्य भीमसेनं च मूर्छितं ४८ ननाद बलवन्नादं
भगदत्तः प्रतापवान् ततो घटोत्कचो राजन्दृष्ट्वा भीमं तथागतं ४९ संक्रुद्धो राक्षसो घोरस्तत्रैवांतरधीयत स कृत्वा दारुणां मायां भीरूणां भय
वर्द्धिनीं ५० अदृश्यत निमेषार्धे घोररूपं समाश्रितः ऐरावतं समारुह्य स्वयं मायामयं कृतं ५१ तस्य चान्येपि दिङ्नागा बभूवुरनुयायिनः अंज
नो वामनश्चैव महापद्मश्च सुप्रभः ५२ त्रय एते महानागा राक्षसैः समहाबलैः परिपेतुः ससंक्रुद्धाश्चतुर्दंताश्चतुर्दिशं ५३ भगदत्तस्य तेना

गं विषाणोरघ पीडयन् सर्वोमग्मानैस्तैर्नागैर्बद्धनार्त्तैः शराहतः ५४ अनदत्सुमहानादं भिंद्राशनिसमं ततः तस्य तं नदतो नादं सुघोरं भीमनिस्वनं ५५ श्रुत्वा
भीष्मोथ वीरो द्रोणो राजानं च सुयोधनं स पर्युध्यति संग्रामे हैडिंबेन दुरात्मना ५६ भगदत्तो महेष्वासः कृच्छ्रेषु परिवर्त्तते राक्षसश्च महाकायः सचराजातिको
पनः ५८ ध्रुवं समेतौ समरे कालमृत्यु समावुभौ श्रूयते व्यथलष्टानां पांडवानां महास्वनः ५९ हस्तिनश्चैव सुमहान् भीतस्य रुदितध्वनिः तत्र गच्छाम भ
द्रं वो राजानं परिरक्षितुं ६० अरक्ष्यमाणः समरे क्षिप्रं प्राणान्विमोक्ष्यति तत्त्वरध्वं महावीर्या मा चिरं कुरुतानघाः ६१ महान्हि वर्त्तते रौद्रः संग्रामो लोमहर्षणः
भक्तश्च कुलपुत्रश्च शूरश्च पृतनापतिः ६२ युक्तं तस्य परित्राणं कर्त्तुमस्माभिरच्युताः भीष्मस्य तद्वचः श्रुत्वा भारद्वाजपुरोगमाः ६३ सहिताः सर्वे राजानो भ
गदत्तपरीप्सया उत्तमं जवमास्थाय प्रययुर्यत्र सोभवत् ६४ तान्प्रयातान्समालोक्य युधिष्ठिरपुरोगमाः पांचालाः पांडवैः सार्द्धं पृष्ठतोनुपप्रयुः परान्
६५ तान्यनीकान्यथालोक्य राक्षसेंद्रः प्रतापवान् ननाद सुमहानादं विनादयानो नभस्तलं ६६ तस्यापि निनदं श्रुत्वा दृष्ट्वा नागांश्च युध्यतः भीष्मः शां
तनवो भूयो भारद्वाजमभाषत ६७ न रोचते मे संग्रामो हैडिंबेन दुरात्मना बलवीर्यसमाविष्टः ससहायश्च संप्रते ६८ नैष शक्यो युधा जेतुमपि वज्रभृता
॥ स्वयं लवुधलस ॥

प्रहारीचवयंचश्चोतवाहना: ६९ पांचालैःपांडवैश्चैवदिवसंहतविस्मिताः तन्मेनरोचतेयुद्धंपांडवैर्जितकाशिभिः ७० पुष्पतामवहारोद्यश्चोयो
त्स्यामःपरैःसह पितामहवचःश्रुत्वातथाचक्रुःप्रहर्षिताः ७१ उपायेनापयानास्ते घटोत्कचभयार्दिताः कौरवेषुनिवृत्तेषुपांडवाजितकाशिनः ७२
सिंहनादमकुर्वंतशंखवेणुस्वनैःसह: सर्वेतदभवद्युद्धंदिवसेभरतर्षभ ७३ पांडवानांकुरूणांचपुरस्कृत्यघटोत्कचं कौरवास्तुततस्तर्णंप्रययुः
शिविरंस्वकं ७३ व्रीडमाननानिशाकालेपांडवेयैःपराजिताः शरविक्षतगात्रास्तुपांडुपुत्रामहारथाः ७४ पुष्टेहमनसोराजन्जग्मुःस्वशिविरंप्रतिपु
रस्कृत्यमहाराजभीमसेनघटोत्कचौ पूजयंतोमहाराजमुदापरमयायुताः नदंतोविविधान्नादांस्तूर्यस्वनविमिश्रितान् ७६ सिंहनादांश्चकुर्वाणांवि
मिश्रांश्चस्वनिःस्वनैः ॥ ॥ ॥ ॥ निनदंतोमहात्मानःकंपयंतश्चमेदिनी ॥ ॥ ७७ ॥ ॥ घट्टयंतश्चमर्माणितवपुत्रस्य
मारिष॥ ॥ ॥ ॥ प्रयाताःशिविरायैवनिशाकालेपरंतपाः ॥ ततःकृत्वार्द्धिं सर्वेशिविरस्ययथाविधिपुत्रस्तेशोकसंतप्तोभ्रातृव्य
सनकर्शितः ॥ ॥ ॥ ८० ॥ ॥ ॥ इतिश्रीभीष्मपर्वणीचतुर्थदिवसयुद्धे ५९ ॥५९

१ X दुर्योधनस्तुनृपतिर्दीनोभ्रातृवधेनच मुहूर्तंपापयामास सर्वं भ्रातृशोकसमाकुलः ७९
भ्रात

धृतराष्ट्र उवाच भयं मे सुमहज्जातं विस्मयश्चैव संजय श्रुत्वा पांडुकुमाराणां कर्म दैवैः सुदुष्करं १ पुत्राणां च पराभावं श्रुत्वा संजय सर्वशः चिंता मे महती भू
ता भविष्यति कथं त्विति २ ध्रुवं विदुरवाक्यानि धक्ष्यंति हृदयं मम यथा हि दृश्यते सर्वं दैवयोगेन संजय ३ यत्र भीष्ममुखांछूरांस्तत्रान्योधसत्तमान् पांडवा
नामनीकेषु योधयंति प्रहारिणः ४ किं तेऽवध्या महात्मानः पांडुपुत्रा महाबलाः किं नैस्तु वरास्तात किं वा ज्ञानं वि[illegible]दंति ते ५ येन क्षयं न गच्छंति दिवि तारागणा इव पुनः
पुनर्न मृष्यामि हतं सैन्यं च पांडवैः ६ मय्येव दंडः पतति तीव्रो दैवात्सुदारुणः यथावध्याः पांडुसुता यथा वध्याश्च मे सुताः ७ तन्मे सर्वमाचक्ष्व यथातत्त्वेन संजय
नहि पारं प्रपश्यामि दुःखस्यास्य कथंचन ८ समुद्रस्येव महतो भुजाभ्यां प्रतरन्नरः पुत्राणां व्यसनं मन्ये ध्रुवं प्राप्तं सुदारुणं ९ घातयिष्यति मे पुत्रान्सर्वान्भी
मो न संशयः नहि पश्यामि तं वीरं यो मे रक्षेत्सुतान्रणे १० ध्रुवं विनाशः समरे पुत्राणां मम संजय तस्मान्मे कारणं सूत पृष्टो चेव विशेषतः ११ पृच्छतो वै यथा
तत्त्वं सर्वमाख्यातुमर्हसि दुर्योधनस्तु यच्चक्रे दृष्ट्वा स्वान्विमुखान्रणे १२ भीष्मद्रोणौ कृपश्चैव सौबलेयो जयद्रथः द्रौणिर्वापि महेष्वासो विकर्णो वा महाबलः
१३ निश्चयो वापि कस्तेषां तदा ह्यासीन्महात्मनां विमुखेषु महाप्राज्ञ मम पुत्रेषु संजय संजय उवाच शृणु राजन्नवहितः श्रुत्वा चैवावधारय नैव मंत्रकृतं
किंचिन्नैव मायां तथाविधां १५ नवै विभीषिकां कांचिद्राजन्कुर्वंति पांडवाः युद्धं ते तु यथान्यायं शक्तिमंतश्च संयुगे १६ धर्मेण सर्वकार्याणि जीवितादीनि भा
रत आरभंते सदा पार्थाः प्रार्थयाना महद्यशः १७ न ते युद्धान्निवर्तंते धर्मोपेता महाबलाः श्रिया परमया युक्ता यतो धर्मस्ततो जयः १८ तेनावध्या रणे पार्था
जययुक्ताश्च पार्थिव तव पुत्रा दुरात्मानः पापेष्वभिरताः सदा १९ निष्ठुरा हीनकर्मा ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ

भी० १०
२३९

गास्तेन हीयंति संयुगे स वहून् निन्घ्नं सानि पुत्रैस्तव जनेश्वर २० निहतानीह पांडूनां नीचैरिव यथा नरैः सर्वं च तत्सुनाहत्य पुत्राणां तव किल्बिषं २१ सापत्नवास्त
थैवाम्यां तवान्यां तु पूर्वज नचैव तान्वहूमन्यं ते पुत्रैस्तव विशीर्यते २२ तस्य पापस्य सततं क्रियमाणस्य कर्मणः संप्राप्तं सुमहत् घोरं फलं किंपाकसंनिभं २३
तत्त्वं भुंक्ष्व महाराज सपुत्रः ससुहृज्जनः नावबुध्यसि यद्राजन् वार्यमाणः सुहृज्जनैः २४ विदुरेणाथ भीष्मेण द्रोणेन च महात्मना तथा मोयाचाप्य सकृत् दृ। ३
र्यमाणो न गृह्णासि २५ वाक्यं हितं च पथ्यं च मर्त्यः पथ्यमिवौषधं पुत्राणां मतमास्थाय जितान्मन्यसि पांडवान् २६ श्रृणु भूयो यथा तत्त्वं यन्मां त्वमनुपृच्छसि कारणं म र
त श्रेष्ठ पांडवानां जयं प्रति २७ तत्तेऽहं कथयिष्यामि यथाश्रुतं मारिष दुर्योधनेन संपृष्टस्तत्त्वार्थं पितामहः २८ दृष्ट्वा भ्रातॄन्रणे सर्वान्निर्जितान्सुमहारथान् शोक
संमूढहृदयो निशाकाले स कौरव २९ पितामहं [illegible] प्राज्ञं विनयेनोपगम्य ह यदब्रवीत्सुत तत्ते शृणु जनेश्वर ३०
दुर्योधन उ० द्रोणश्च शल्यश्च कृपो द्रौणिस्तथैव च कृतवर्मा च हार्दिक्यः कांबो[illegible]जश्च सुदक्षिणः ३१ भूरिश्रवा विकर्णश्च भगदत्तश्च वीर्यवान् महा
रथाः समाख्याताः कुलपुत्रास्तनुत्यजः ३२ त्रयाणामपि लोकानां पर्याप्ता इति मे मतिः पांडवानां समस्ताश्च न तिष्ठंति पराक्रमे ३३ तत्र मे संशयो जातस्तन्म
माचक्ष्व पृच्छतः यं समाश्रित्य कौंतेया जयंत्यस्मान्पदे पदे ३४ भीष्म उवाच शृणु राजन्वचो मत्तो यत्त्वां वक्ष्यामि कौरव बहुशश्च मयोक्तोऽसि न च मे त्वं तत्त्व
या श्रुतं ३५ क्रियतां संधिर्वै सार्द्धं शमो भारतसत्तम एतत्क्षेमं महं मन्ये पृथिव्यास्तव वा विभो ३६ भुंक्ष्वेमां पृथिवीं राजन्भ्रातृभिः सहितः सुखी सुहृ
दस्तर्पयन्सर्वान्नंदयंश्चापि बांधवान् ३७ न च मे कोशतस्तात श्रुतवानसि वै पुरा तदिदं समनुप्राप्तं यत्पांडूनवमन्यसे ३८ यश्च हेतुरवध्य ॥ छ ॥ छ ॥ राम०
२३९

त्वेतेषां मल्लिष्टकर्मणां तंश्रृणुध्वमहाराज्ञममकीर्त्तयतःप्रभो ३९ नास्तिलोकेषुतद्भूतंभविता नो भविष्यति योजयत्यांस्त्वान्सर्वो न्यालिताच्छाद्वे धन्वना ४०
यन्तुमेकथितंतातमुनिभिर्भावितात्मभिः पुराणाग्नीतंधर्मज्ञतच्छृणुध्वयथात्तथं ४१ पुराकिलसुराःसर्वेऋषयश्चसमागताः पितामहमुपासेद्दुः पर्वतेगंधमाद
ने ४२ तेषांमध्येसमासीनः प्रजापतिरपश्यत विमानंजाज्वलद्भासास्थितंप्रवरमेवरे ४३ ध्यानेनावेद्यतद्दृष्ट्वा हृत्वा चनिपतौऽञ्जलिं नमस्कारस्तुष्टात्माप
रुषंपरमेश्वरं ४४ ऋषयस्त्वथदेवाश्चदृष्ट्वाब्रह्मेणानुछित्तं स्थिताःप्रांजलयःसर्वेपश्यंतोमहदद्भुतं ४५ यथावज्जनमभ्यर्च्यब्रह्मात्रह्मविदांवरः जगादजगतःस्र
ष्टापरंपरमधर्मवित् ४५ विश्वावसुर्विश्वमूर्त्तिर्विश्वेशोविष्वक्सेनोविश्वकर्मावशीच विश्वेश्वरोवासुदेवोसित्तसमाधौतमानंदेवतंत्वामुपैमि ४६ जयविश्व
महादेवजयलोकहितेरत जययोगीश्वरविभोजययोगपरावर ४७ पद्मगर्भविशालाक्षजयलोकेश्वरेश्वर भूत भव्यभवन्नाथजयसौम्यात्मजात्मज ४८
असंख्येयगुणाधारजयसर्वपरायण नारायणासुदुष्पारजयशार्ङ्गधनुर्धर ४९ जयसर्वगुणोपेतविश्वमूर्त्तेनिरामय विश्वेश्वरमहावाहोजयलोकार्थ
तत्पर ५० महोरगवराहाद्यहरिकेशविभोजयहरिवासदिशामीशविश्ववासमितात्ययः ५१ व्यक्ताव्यक्तामितस्थाननियतेंद्रियसत्क्रिय असंख्येयात्मभा
वज्ञजयगंभीरकामद अनंतविदितब्रह्मन्लोकजनप्रिय निसर्गसर्गनिरतकामेशपरमेश्वर ५४ अमृतोद्भवसद्भावमुक्तात्मन्विजयप्रद प्रजापतिपते
देवपद्मनाभमहावल ५५ आत्मभूतमहाभूतकर्मात्मन्जयसर्वद पादौतववधरादेवीदिशोवाहुर्दिवंशिरः ५६ मूर्त्तिस्तेहंसुराःकायश्चंद्रादित्यौचचक्षु
षी वलंतपश्चसत्यंचधर्मःकर्मात्मजंतव ५७ तेजोग्निःपवनश्वासआपस्तेस्वेदसंभव अश्विनौश्रवणौनित्यंदेवीजिह्वासरस्वती। ५८ वेदाः ॥ ॥ ॥

भक्तानां ३

3X

भी०
२५०

संस्कारनिष्ठाहित्वदीयंजगद्विश्वते नमस्यंत्वपरीमाणांनतेजोनपराक्रमं ५९ नवलंयोगयोगीशजानीमस्तेनसंभवं त्वद्भक्तिनिरतादेवनियमैस्त्वांसमाश्रिताः ६० अर्च
यामसदाविष्णोपरमेशंमहेश्वरं ऋषयोदेवगंधर्वायक्षराक्षसपन्नगाः ६१ पिशाचामानुषाश्चैवमृगपक्षिसरीसृपाः एवमादिमयासृष्टंपृथिव्यांत्वत्प्रसादजं ६२ पद्मनाभ
विशालाक्षकृष्णदुःस्वप्ननाशन त्वंगतिःसर्वभूतानांत्वंनेतात्वंजगन्मुखं त्वत्प्रसादेनदेवेशसुखिनोविबुधाःसदा पृथिवीनिर्भयादेवत्वत्प्रसादात्सदाभवत् ६३
तस्माद्भवविशालाक्षयदुवंशविवर्धनः धर्मसंस्थापनार्थायदैतेयानांवधायच जगतोधारणार्थायविज्ञाप्यंकुरुमेविभो यत्तत्परमकंगुह्यंत्वत्प्रसादादिदंप्रभो ६५
वासुदेवतदेतत्तेमयोद्गीतंयथातथं सृष्ट्वासंकर्षणंदेवंस्वयमात्मानमात्मना कृष्णत्वमात्मनास्राक्षीःप्रद्युम्नंचात्मसंभवं ६७ प्रद्युम्नाच्चानिरुद्धंत्वंयंविदुर्विष्णु
मव्ययं अनिरुद्धोसृजन्मांवैब्रह्माणंलोकधारिणं ६८ वासुदेवमयःसोहंत्वयैवास्मिविनिर्मितः विभज्यभागशोत्मानंव्रजमानुषतांविभो ६९ तत्रासुरवधंकृत्वासर्व
लोकसुखायवै धर्मंस्थाप्ययशःप्राप्ययोगंप्राप्स्यसितत्त्वतः ७० त्वांहिब्रह्मर्षयोलोकेदेवाश्चामितविक्रम तैस्तैश्चनामभिर्युक्तागायंतिपरमात्मकं ७१ स्थिताश्च
सर्वेत्वयिभूतसंघाःकृत्वाश्रयंत्वांवरदंसुबाहो अनादिमध्यांतमपारयोगंलोकस्यसेतुंप्रवदंतिविप्राः ७२ इतिभीष्मपर्वणि ६० भीष्मउवाच ततःसभगवान्दे
वोलोकानामीश्वरेश्वरः ब्रह्माणंप्रत्युवाचेदंस्निग्धगंभीरयागिरा १ विदितंतातयोगान्मेसर्वमेतत्तवेप्सितं तथातद्भवितेत्युक्त्वातत्रैवांतरधीयत २ ततोदेवर्षिगं
धर्वाविस्मयंपरमंगताः कौतूहलपराःसर्वेपितामहमथाब्रुवन् ३ कोन्वयंयोभगवताप्रणम्यविनयाद्विभो वाग्भिःस्तुतोवरिष्ठाभिःश्रोतुमिच्छामतंवयं ४ एवमुक्तस्तु
॥भगवान्प्रत्युवाचपितामहः देवब्रह्मर्षिगंधर्वान्सर्वान्मधुरयागिरा॥

राम०
२५०

यच्च तत्परमं विष्णुं च भविता यच्च यत्परं भूतात्मा यः प्रभुश्चैव ब्रह्म यच्च परं पदं ६ तेनास्मि कृतसंवादः प्रसन्नेन सुरर्षभाः जगतोनुग्रहार्थाय याचितो मे जगत्पतिः ७
मानुषं लोकमातिष्ठ वासुदेव इति श्रुतिः असुराणां वधार्थाय संभवस्व महीतले ८ संग्रामे निहता ये ते दैत्यदानवराक्षसाः त इमे नृषु संभूता घोररूपा महाबलाः
९ तेषां वधार्थं भगवान्नरेण सहितो वशी मानुषीं योनिमास्थाय चरिष्यति [illegible] महीतले १० नरनारायणौ यौ तौ पुराणावृषिसत्तमौ अजेयौ हि
रणे यत्तौ समेतावमरैरपि ११ सहितौ मानुषे लोके संभूतावमितद्युती मूढास्तौ न जानन्ति नरनारायणावुभौ १२ यस्याहमात्मजः पुत्रः सर्वस्य जगतः पतिः वासु
देवोनुनेयो वः सर्वलोकमहेश्वरः १३ तथा मनुष्योयमिति कदाचित्सुरसत्तमाः नावज्ञेयो महावीर्यः शंखचक्रगदाधरः १४ एतत्परमकं गुह्यमेतत्परमकं पदं
एतत्परमकं ब्रह्म एतत्परमकं यशः १५ एतदक्षरमव्यक्तमेतच्छाश्वतमेव च एतत्पुरुषसंज्ञो वै गीयते ज्ञायते न च १६ एतत्परमकं तेज एतत्परमकं सुखं एतत्पर
मकं सत्यं कीर्तितं विश्वकर्मणा १७ तस्मात्सुरासुरैः सर्वैः सेन्द्रैरमितविक्रमः नावज्ञेयो वासुदेवो मानुषोयमिति प्रभुः १८ यश्च मानुषमात्रोयमिति ब्रूयात्सुमं
दधीः हृषीकेशमवज्ञानात्तमाहुः पुरुषाधमं १९ योगिनं तं महात्मानं प्रविष्टं मानुषीं तनुं अवमन्येद्वासुदेवं तमाहुस्तामसं जनाः २० देवं चराचरात्मानं श्रीव
त्साङ्कं सुवर्चसं पद्मनाभं न जानाति तमाहुस्तामसं जनाः २१ किरीटकौस्तुभधरं मित्राणामभयंकरं अवजानन्महात्मानं घोरे तमसि मज्जति २२ एवं वि
दित्वा तत्त्वार्थं लोकानामीश्वरेश्वरः वासुदेवो नमस्कार्यः सर्वलोकैः सुरोत्तमाः २३ एवमुक्त्वा स भगवान्सर्वैर्षिगणैर्गुरुः विसृज्य सर्वभूतानि जगाम भव
नं स्वकं २४ ततो देवाः सगंधर्वा मुनयोप्सरसोपि च कथां तां ब्रह्मणा गीतां श्रुत्वा प्रीता दिवं ययुः २५ एवं श्रुतं मया तात ऋषी॥ ॥ ॥

वर ८२

गांभावितात्मनां वासुदेवं कथयतां समवाये पुरातनं २६ जामदग्न्यस्य रामस्य मार्कंडेयस्य धीमतः व्यासनारदयोश्चापि श्रुतं श्रुतविशारद २७ एतमर्थं च विज्ञाय
श्रुत्वा च प्रभुमव्ययं वासुदेवं महात्मानं लोकानामीश्वरं प्रभुं २८ यस्यासौ दात्मजो ब्रह्मा सर्वस्य जगतः पिता कथं न वासुदेवोयमर्च्यश्चेज्यश्च मानवैः २९ वारितोसि पुरा
तात मुनिभिर्भावितात्मभिः मागच्छ संयुगं तेन वासुदेवेन धन्विना ३० पांडवैः सार्द्धमिति यत्तत्त्वं मोहान्न बुध्यसे मन्ये त्वां राक्षसं क्रूरं तथा चासि तमोवृतः ३१ तस्माद्द्विष
सि गोविंदं पांडवं च धनंजयं नरनारायणौ देवौ कोन्यो द्विष्यान्मानवः ३२ तस्माद्ब्रवीमि ते राजन्नेष वै शाश्वतोव्ययः सर्वलोकमयो नित्यः शास्ता धाता धरो ध्रुवः ३३
लोकान्धारयते यस्त्रींश्चराचरगुरुः प्रभुः योद्धा जयश्च जेता च सर्वप्रकृतिरीश्वरः ३४ राजन्सत्वमयो ह्येष तमोरजोविवर्जितः यतः कृष्णस्ततो धर्मो यतो धर्मस्ततो जयः
३५ तस्य माहात्म्ययोगेन योगेनात्मन एव च धृताः पांडुसुता राजन्जयश्चैषां भविष्यति ३६ श्रेयोयुक्तां सदा बुद्धिं पांडवानां दधाति यः बलं चैव रणे नित्यं भये
भ्यश्चैव रक्षति ३७ स एष शाश्वतो दिव्यः सर्वभूतमयः शिवः वासुदेव इति प्रोक्तो यन्मां पृच्छसि भारत ३८ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः सोर्च्यते भ्य
र्चितैश्चैव नित्ययुक्तैः स्वकर्मभिः ३९ द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च सात्वतं विधिमास्थाय गीतः संकर्षणेन यः ४० स एष सर्वं सुरमर्त्यलोकं समुद्रकक्षान्त
रिताः पुरीश्च युगे युगे मानुषं चैव वासं पुनः पुनः सृजते विश्वकर्मा ४१ इति श्रीभीष्मपर्वणि ६९ दुर्योधन उवाच वासुदेवो महाभूतः सर्वलोकेषु कथ्यते तस्यागमं प्रति
ष्ठां च ज्ञातुमिच्छे पितामह १ भीष्म उवाच वासुदेवो महद्भूतं सर्वदैवतदैवतं न परं पुंडरीकाक्षाद्दृश्यते भरतर्षभ २ मार्कंडेयश्च गोविंदं कथयत्यद्भुतं मह
त् सर्वभूतानि भूतात्मा महात्मा पुरुषोत्तमः आपो वायुश्च तेजश्च त्रयमेतदकल्पयत् ष्ट्वा पृथिवीं देवः सर्वलोकेश्वरः प्रभुः ॥ ॥ ॥ ॥
सस

४ अप्सुवैशायनंचक्रेमहात्मापुरुषोत्तमः सर्वतेजोमयोदेवोयोगात्सुष्वापतत्रह मुखतःसोग्निमसृजत्प्राणाद्वायुमथासृजत् सरस्वतींचवेदांश्चवासुदेवोमहा मतेः ६ स
र्वल्लोकान्ससर्जादौदेवांश्चर्षिगणैःसह निधनंचैवमृत्युंचप्रजानांप्रभवोव्ययः ७ एषधर्मश्चधर्मात्मावरदःसर्वकामदः एषकर्त्ताचकार्यंचपूर्वदेवःस्वयंप्रभुः ८ भूतंभव्यंभ
विष्यंचपूर्वमेतदकल्पयत् उभेसंध्येदिशःखंचनियमंचजनार्दनः ९ ऋषींश्चैवचगोविंदस्तपश्चैवाथकल्पयत् प्रजापतिश्चजगतोवरदःप्रभुरव्ययः १० अजन्यंसर्वभूता
नांसंकर्षणमकल्पयत् शेषंचाकल्पयद्देवमनंतमितियंविदुः ११ योधारयतिभूतानिधरांचेमांसपर्वतां ध्यानयोगेनविप्राश्चतंवदंतिमहौजसः कर्णस्रोतोद्भवंचापिमधुंनाम
महौजसं १२ तमुग्रमुग्रकर्माणमुग्रांबुद्धिंसमाश्रितंब्रह्मणोपचितिंयांतंजघानपुरुषोत्तमः १३ तस्यतातवधाद्देवाऋषिदानवमानवाः मधुसूदनमित्याहुर्वृषभंचजना
र्दनं १४ वराहश्चैवसिंहश्चत्रिविक्रमगतिःप्रभुः एषमातापिताचैवसर्वेषांप्राणिनांहरिः १५ परंहिपुंडरीकाक्षान्नभूतंनभविष्यति मुखतोजनयद्विप्रान्बाहुभ्यांक्षत्रियां
स्तथा १६ वैश्यांश्चाप्युरुतोराजंछूद्रान्पाद्भ्यांतथैवच तपसानियतोदेवोनिधानंसर्वदेहिनां १७ ब्रह्मभूतममावास्यांपौर्णमास्यांतथैवचयोगभूतंपरिचरन् केशवो
यस्यप्रसीदेत्तलोकास्तेनास्यपाजिताः यश्चैवैनंभयस्थानेकेशवंशरणंव्रजेत् सदानरःपठंश्चेदंस्वस्तिमान्ससुखीभवेत् २१ येचकृष्णंप्रपद्यंतेतेनमुह्यंतिमानवाः
भयेमहतिमग्नांश्चत्रातिनित्यंजनार्दनः २२ एवंयुधिष्ठिरोज्ञात्वायाथातथ्येनभारत सर्वात्मनामहात्मानंकेशवंजगदीश्वरं २३ प्रपन्नःशरणंराजन्योगाना
मीश्वरंप्रभुं २४ इतिभीष्मपर्वणि ६२ भीष्मउवाच शृणुचेदंमहाराजब्रह्मभूतस्तवंमम ब्रह्मर्षिभिश्चदेवैश्च ऽ ऽ ऽ ऽ ऽ ऽ ऽ

८५

४X

यः पुरा कथितो मुने १ साध्यानामपि देवानां देवदेवेश्वरः प्रभुः लोकभावनभावज्ञ इति त्वां नारदोऽब्रवीत् २ भूतं भव्यं भविष्यं च मार्कंडेयो स्म वाह यज्ञं त्वां चैव यज्ञानां तपश्च तपसामपि ३ देवानामपि देवं च त्वामाह भगवान् भृगुः पुराणं चैव परमं विष्णो रूपं तवेति च ४ वासुदेवो वसूनां त्वं शक्रं स्थापयिता तथा देवो हि देवानामिति द्वैपायनोऽब्रवीत् ५ पूर्वे प्रजापतेः सर्गे दक्षमाहुः प्रजापतिं स्रष्टारं सर्वभूतानामंगिरास्त्वां तथाब्रवीत् ६ अव्यक्तं ते शरीरोत्थं व्यक्तं ते मनसि स्थितं देवा वाक्संभवश्चेति देवलस्त्वसितोऽब्रवीत् ७ शिरसा ते दिवं व्याप्तं बाहुभ्यां पृथिवी कृता जठरं ते त्रयो लोकाः पुरुषोऽसि सनातनः ८ एवं त्वामभिजानंति तपसा भाविता नराः आत्मदर्शनतृप्तानामृषीणामसि सत्तमः राजर्षीणामुदाराणामाहवेष्वनिवर्तिनां सर्वधर्मप्रधानानां त्वं गतिर्मधुसूदन १० इति नित्यं योगविद्भिर्भगवान्पुरुषोत्तमः सनत्कुमारप्रमुखैः स्तूयते भ्यर्च्यते हरिः ११ एष ते विस्तरस्तात संक्षेपश्च प्रकीर्तितः केशवस्य यथातत्त्वं सुप्रीतो भव केशवे १२ संजय उवाच पुण्यं श्रुत्वैतदाख्यानं महाराज सुतस्तव केशवं बहु मेने स पांडवांश्च महारथान् १३ तमब्रवीन्महाराज भीष्मः शांतनवः पुनः माहात्म्यं ते श्रुतं राजन्केशवस्य महात्मनः १४ नरस्य च यथातत्त्वं यन्मां त्वं परिपृच्छसि यदर्थं नृषु संभूतौ नरनारायणावुभौ १५ अवध्यौ च महावीरौ सर्वयुद्धेष्वपराजितौ यथा च पांडवा राजन्नवध्या युधि कस्यचित् १६ प्रीतिमान्हि दृढं कृष्णः पांडवेषु यशस्विषु तस्माद्ब्रवीमि राजेंद्र शमो भवतु पांडवैः १७ पृथिवीं भुंक्ष्व राजेंद्र सहितो भ्रातृभिर्बली नरनारायणौ देवाववज्ञाय विनंक्ष्यसि १८ एवमुक्त्वा तव पिता तूष्णीमासीद्विशांपते व्यसर्जयच्च राजानं शयनं च विवेश ह १९ राजा च शिबिरं प्रायात्प्रणिपत्य महात्मने शिश्ये च शयने शुभ्रे तां रात्रिं भरतर्षभ २० इति भीष्मपर्वणि संजय उवाच व्युषितायां च शर्वर्यामुदिते च दिवाकरे उभे सेने महाराज युद्धायैव समीयतुः १ अभ्यधावंश्च संक्रुद्धाः परस्परजिगीषवः ते सर्वे सहिता युद्धे समा

॥लोकपरस्परं २॥

२५

पांडवाधार्तराष्ट्राश्च राजन्दुर्मंत्रितेतव यत्नैश्चयुस्यसन्नद्धाः संप्रहृष्टाः प्रहारिणः ३ अरक्षन्मकरव्यूहं भीष्मो राजन्समंततः तथैव पांडवा राजन्नरक्षन्व्यूहमात्मनः ४
स निर्ययौ महाराज पिता देवव्रतस्तव महता रथवंशेन संहतो रथिनांवरः ५ इतरेतरमन्वयुः सर्वे यथास्थानमवस्थिताः रथिनः पत्तिनश्चैव वरेंद्रैरिनः सादिनस्तथा ६
तान्दृष्ट्वोद्यतान्संख्ये पांडवाश्च यशस्विनः श्येनेन व्यूहराजेन तेनाजय्येन संयुगे ७ अशोभत मुखे तस्य भीमसेनो महाबलः नेत्रे शिखंडी दुर्द्धर्षो धृष्टद्युम्नश्च पार्ष
तः ८ शीर्षे तस्याभवद्वीरः सात्यकिः सत्यविक्रमः विधुन्वन्गांडीवं पार्थो ग्रीवायामभवत्तदा ९ अक्षौहिण्यां समग्रायां वामपक्षोभवत्तदा महात्मा द्रुपदः श्रीमा
न्सह पुत्रेण संयुगे १० दक्षिणश्चाभवत्पक्षः कैकेयोक्षौहिणीपतिः ११ ततो द्रौपदेयाश्च सौभद्रश्चापि वीर्यवान् ११ पृष्ठे समभवच्छ्रीमान्स्वयं राजा युधिष्ठिरः
भ्रातृभ्यां सहितो वीरो यमाभ्यां चारुविक्रमः १२ प्रविश्य तु रणे भीमो मकरं मुखतस्तदा भीष्ममासाद्य संग्रामे छादयामास सायकैः १३ ततो भीष्मो महास्त्राणि
पातयामास वीर्यवान मोहयन्पांडुपुत्राणां व्यूढं सैन्यं महाहवे १४ संमुह्यति तदा सैन्ये त्वरमाणो धनंजयः भीष्मं शरसहस्रेण विव्याध रणमूर्द्धनि १५ प्र
तिसंधाय चास्त्राणि भीष्ममुक्तानि संयुगे स्वेनानीकेन हृष्टेन युद्धाय समवस्थितः १६ ततो दुर्योधनो राजा भारद्वाजमभाषत पूर्वं दृष्ट्वा वधं घोरं बलस्य
बलिनांवरः १७ भ्रातॄणां च वधं संख्ये स्मरमाणो महारथः आचार्य सततं त्वं हि हितकामो ममानघ १८ वयं हि त्वां समाश्रित्य भीष्मं चैव पितामहं देवानपि
रणे जेतुं प्रार्थयामो न संशयः १९ किमु पांडुसुतान्युद्धे हीनवीर्यपराक्रमान् तत्तथा कुरु भद्रं ते यथा वध्यंति पांडवाः २० एवमुक्तस्ततो द्रोणस्तव पुत्रेण

७२ ॥ संयुगे अभिनत्पांडवानीकं प्रेक्ष्यता ॥

ना

रम:

णस्य सात्यकेः सात्यकिश्च ततो द्रोणं वारयामास भारत ततः प्रववृते युद्धं घोररूपं भयानकं २२ शैनेयं तु रणे क्रुद्धो भारद्वाजः प्रतापवान् अविध्यद्दशभि
र्बाणैर्जत्रुदेशे स्मयन्निव भीमसेनस्ततः क्रुद्धो भारद्वाजमविध्यत २३ संरक्षन् सात्यकिं राजन् द्रोणान्नृशस्त्रभृतां वरात् ततो द्रोणश्च भीष्मश्च तथा शल्यश्च मारिष
२४ भीमसेनं रणे क्रुद्धाश्छादयांचक्रिरे शरैः अथाभिमन्युः संक्रुद्धो द्रौपदेयाश्च मारिष २५ विव्यधुर्निशितैर्बाणैः सर्वांस्तानुद्यतायुधान् भीष्मद्रोणौ तु संक्रु
द्धावापतंतौ महाबलौ २६ प्रत्युद्ययौ शिखंडी च महेष्वासो महाहवे प्रगृह्य बलवद्वीरो धनुर्जलदनिःस्वनं २७ अभ्यवर्षच्छरैस्तूर्णं छादयानो दिवाकरं शि
खंडिनं तथासाद्य भरतानां पितामहः २८ अवर्जयत संग्रामे स्त्रीत्वं तस्यानुसंस्मरन् ततो द्रोणो महाराज अभ्यद्रवत तं रणे २९ रक्षमाणस्तदा भीष्मं त
त्पुत्रेणाचोदितः शिखंडी तु समासाद्य द्रोणं शस्त्रभृतां वरं ३० अवर्जयत संत्रस्तो युगांताग्निमिवोज्ज्वलं ततो बलेन महता पुत्रस्तव विशांपते ३१
[illegible]गोप भीष्ममासाद्य पार्थयानो मधं तदा तथैव पांडवा राजन् पुरस्कृत्य धनंजयं ३२ भीष्ममेवाभ्यवर्तंत जये कृत्वा दृढां मतिं तद्युद्धमभवद्घोरं देवा
नां दानवैरिव ३३ जयमाशंसतां संख्ये परस्परमहाद्भुतं इति भीष्मपर्वणि संजय उवाच अकरोत्तुमुलं युद्धं भीष्मः शांतनवस्तदा १ भीम
सेनभयादिच्छन् पुत्रांस्तारयितुं तव पूर्वाह्णे तन्महारौद्रं राज्ञां युद्धमवर्तत २ कुरूणां पांडवानां च मुख्यक्षयविनाशने तस्मिन्नाकुलसंग्रामे वर्तमा
ने महाभये ३ अभवत्तुमुलः शब्दः संस्पृशन् गगनं महान् नदद्भिश्च महानागैर्हेषमाणैश्च वाजिभिः ४ भेरीशंखनिनादैश्च तुमुलः समपद्यत युयुत्सव
स्ते विक्रांता विजयाय महाबलाः ५ अन्योन्यमभिगर्जंतो गोष्ठेष्विव महर्षभाः शिरसां पात्यमानानां समरे निशितैः शरैः ६ अश्मवृष्टिरिवाकाशे बभूव भरतर्ष
भ कुंडलोष्णीषधारीणि जातरूपोज्ज्वलानि च ७ पतितानि स्म दृश्यंते शिरांसि भरतर्षभ विशिखोन्मथितैर्गात्रैः शिरोभिश्च सकुंडलैः ८ सहस्ताभरणैश्चान्यैरभव

च्छादिता ॥

महीकवचोपहितैर्गात्रैर्भुजैश्च समलंकृतैः ९ सुरैश्चचंद्रसंकाशैः शरकांतनयनैस्तथा गजवाजिमनुष्याणां सर्वगात्रैश्च भूपते १० आसीत्सर्वो समाकीर्णा मुहूर्तेन वसुंधरा रजो
मेघैश्च तुमुलैः शस्त्रविद्युत्प्रकाशिभिः ११ आयुधानां च निर्घोषः स्तनयित्नुसमो ऽभवत् स संप्रहारस्तुमुलः कटुकः शोणितोदकः प्रावर्तत कुरूणां च पांडवानां च भारत
तस्मिन्महाभये घोरे तुमुले लोमहर्षणे १३ ववृषुः शरजालानि क्षत्रियास्तु युद्धदुर्मदाः क्रोशंति कुंजरास्तत्र शरवर्षप्रतापिताः १४ तावकानां परेषां च संयुगे भरतोत्तम
संरब्धानां च वीराणां [illegible] वीराणाममिततेजसां १५ धनुषां तलघोषेण न प्राज्ञायत किंचन उत्थितेषु कबंधेषु सर्वतः शोणितोदके १६ अपरे पर्यधावंत नरपा रि
पुसमुद्यताः शरशक्तिगदाभिश्च खड्गैश्चामिततेजसः १७ विजघ्नुः समरे ऽन्योन्यं शूराः परिघबाहवः वभ्रमुः कुंजरास्तत्र शरैर्मुक्ता निरंकुशाः १८ अश्वाश्च पर्यधा
वंत हतारोहा दिशो दिश उत्पत्य निपतंत्यन्ये शरघातप्रपीडिताः १९ तावकानां परेषां च पर्यधावन् समुद्यताः शरजालितिगदाभिश्च खड्गैश्चापतितैर्भुवि २०
गदानां परिघाणां च हस्तानां चोरुभिः सह पादानां भूषणानां च केयूराणां च सर्वशः २१ राशयस्तत्र दृश्यंते भीमभीष्मसमागमे अश्वानां धावमानानां कुंजरा
णां निवर्त्तता २२ संघाताः संप्रदृश्यंते तत्र तत्र विशांपते गदाभिरसिभिः प्रासैर्बाणैश्चानतपर्वभिः २३ जघ्नुः परस्परं तत्र क्षत्रियाः कालचोदिताः अपरे बा
हुभिर्वीरा नियुद्धकुशला युधि २४ बहुधा समसज्जंत आयसैः परिघैरिव मुष्टिभिर्जानुभिश्चैव तलैः कीलैर्विशांपते २५ अन्योन्यं जघ्निरे वीरास्तावकाः
पांडवैः सह पतितैः पत्यमानैश्च विचेष्टद्भिश्च भूतले २६ घोरमायोधनं जज्ञे तत्र तत्र नरेश्वर विरथा रथिनश्चात्र निस्त्रिंशवरधारिणः २७ अन्योन्यमभ्यधावं
त परस्परवधैषिणः ततो दुर्योधनो राजा कलिंगैर्बहुभिर्वृतः २८ पुरस्कृत्य रणे भीष्मं पांडवानभ्यवर्त्तत तथैव पांडवाः सर्वे परिवार्य वृकोदरं २९ भीष्ममभ्यद्रवन्
क्रुद्धा रणे रभसवाहनाः इति भीष्मपर्वणि संजय उवाच दृष्ट्वा भीष्मेण संसक्तान्भ्रातॄनन्यांश्च बांधवान् समभ्यधावद्रां ॥ ॥ ॥ ॥॥

विर्त्रय तेसह १

गेयमुघतास्त्रो धनंजयः १ पांचजन्यस्य निर्घोषं धनुषो गांडिवस्य च ध्वजं च दृष्ट्वा पार्थस्य सर्वान्नो भयमाविशत् २ सिंहलांगूलमाकाशे ज्वलंतमिव पर्वते अस
ज्जमानं ध्वजेषु धूमराशिमिवोच्छ्रितं ३ बहुवर्णं च चित्रं च दिव्यं वानरलक्षणं अपश्याम महाराज गांडीवधन्वनः ४ विद्युतं मेघमध्यस्थं भ्राजमानामिवांबरे ददृ शु
गांडिवं योधास्तं रुक्मपृष्ठं महारथे ५ अशुश्रुम भृशं चास्य शक्रस्येवाभिगर्जतः सुघोरं तलयोः शब्दं निघ्नतस्तव वाहिनीं ६ चंडवातांबुदसमं स विद्युत्स्तनयित्नुमान्
दिशः संप्लावयामास शरवर्षैः समंततः ७ अभ्यधावत गांगेयं भैरवास्त्रो धनंजयः दिशं प्राचीं प्रतीचीं च न जानीमोऽस्त्रमोहिताः ८ कांदिशीकाः श्रांतपत्रा हताश्वा हृ
तचेतसः अन्योन्यमभिसंश्लिष्य योधास्ते भरतर्षभ ९ भीष्ममेवाभिलीयंत सह सर्वैस्तवात्मजैः तेषामार्तायनमभूद्भीष्मः शांतनवो रणे १० समुत्पतंति वित्रस्ता रथे
भ्यो रथिनस्तथा सादिनश्चाश्वपृष्ठेभ्यो भूमौ चापि पदातयः ११ श्रुत्वा गांडीवनिर्घोषं विस्फूर्जितमिवाशनेः सर्वसैन्यानि भीतानि व्यवलीयंत भारत १२ अथ कांबो
जैरश्वैर्महद्भिः शीघ्रगामिभिः गोपानां बहुसाहस्रैर्बलैर्गोपायनैर्वृतः १३ मद्रसौवीरगांधारैस्त्रैगर्तैश्च विशांपते सर्वकालिंगमुख्यैश्च कलिंगाधिपतिः सह १४ नानां गो नरग
घेन दुःशासनपुरःसरः जयद्रथश्च नृपतिः सहितैः सर्वराजभिः १५ हयारोहवराश्चैव तव पुत्रेण चोदिताः चतुर्दश सहस्राणि सौबलं पर्यवारयन् १६ ततस्ते सहिताः
सर्वे विभक्तरथवाहनाः पांडवाः समरे जघ्नुस्तावकान्भरतर्षभ १७ रथिभिर्वारणैरश्वैः पादातैश्च समीरितं घोरमायोधनं जज्ञे महाभ्रसदृशं रजः १८ तोमरप्रासनाराच
गजाश्वरथयोधिनां बलेन महता भीष्मः समसज्जत्किरीटिना १९ आवंत्यः काशिराजेन भीमसेनेन सैंधवः अजातशत्रुर्मद्राणामृषभेण यशस्विना सहपुत्रः सहामात्यः श
ल्येन समसज्जत विकर्णः सहदेवेन चित्रसेनः शिखंडिना मत्स्या दुर्योधनं जग्मुः शकुनिं च विशांपते २० द्रुपदश्चेकितानश्च सात्यकिश्च महारथः द्रोणेन समसज्जंत सपुत्रेण
महात्मना २१ कृपश्च कृतवर्मा च धृष्टद्युम्नमभिद्रुतौ एवं प्रव्र जितास्त्वानि धांतनागरथानि च २२ समसज्जंत युद्धानि तत्र समंततः ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ
तत्र १

शि ३ ६१ ष्वं

निरस्त्रे विघातस्तीव्रा दिशश्च रजसावृताः २३ प्रादुरासन्महोल्काश्च सनिर्घाता विशांपते प्रादुर्बभौ महावातः पांसुवर्षं पपात च २४ नभे तरे धेस्तर्यः सैन्येन रजसावृतः प्र
मोहः सर्वभूतानामस्त्रजालैश्च पद्धतां २५ वीरबाहुविसृष्टानां सर्वावरणभेदिनां संह्रादः शरजालानामतीव समपद्यत २६ प्रकाशं चक्रुराकाशमुद्यतानि भुजोत्तमैः
नक्षत्रविमलाभानि शस्त्राणि भरतर्षभ २७ आर्षभाणि विचित्राणि रुक्मजालावृतानि च संपेतुर्दिक्षु सर्वासु चर्माणि भरतर्षभ २८ सूर्यवर्णैश्च निस्त्रिंशैः पात्यमाना
नि सर्वशः दिक्षु सर्वास्वदृश्यन्त शरीराणि शिरांसि च भग्नचक्राक्षनीडाश्च निपातितमहाध्वजाः २९ हताश्वाः पृथिवीं जग्मुस्तत्र तत्र महारथाः परिपेतुर्हयाश्चात्र के
चिच्छस्त्रकृतव्रणाः २९ रथाश्च परिवर्तन्ते हतेषु रथयोधिषु शराहता भिन्नदेहा बद्धयोक्त्रा हयोत्तमाः ३० युगानि पर्यकर्षन्त तत्र तत्र हि भारत अदृश्यन्त सतास्त्र सा श्वाः
सारथयोधिनः ३१ एकेन बलिना राजन्वारणेन हता रणे गंधहस्तिमदस्रावमाघ्राय बहवो रणे सन्निपतन्ते बलौघानां वातमाहरिरे गजाः सतोरणमहामात्रैः पत
द्भिश्च गतासुभिः ३३ बभूवायोधनं छन्नं नाराचाभिहतैर्गजैः संनिपाते बलौघानां चोदितैर्वरवारणैः ३४ निपेतुर्युधि संभग्नाः सयोधाः सर्वतो गजाः नागराजो
पमैर्हस्तैर्नागैराक्षिप्य संयुगे ३५ व्यदृश्यन्त महाराज संलग्ना रथकूबराः विशीर्णा रथजालाश्च केशेष्वाक्षिप्य दन्तिभिः ३६ द्रुमशाखा इवाविध्य निष्पिष्टा रथिनो
रणे रथेषु च रथान्युद्धे संसक्तान्वरवारणाः ३७ विकर्षन्तो दिशः सर्वाः संपेतुः सर्वशब्दगाः तेषां तथा कर्षतां च गजानां रूपमाबभौ ३८ सरःसु नलिनीजालं विषक्तमिव
कर्षतां एवं संछादितं तत्र बभूवायोधनं महत् ३९ सादिभिश्च पदातैश्च सध्वजैश्च महारथैः इति भीष्मपर्वणि संजय उवाच शिखंडिसहमत्स्येन विराटेन वि
शांपते १ भीष्ममाशु महेष्वासं माससाद सुदुर्जयं द्रोणं कृपं च कर्णं च महेष्वासान्महाबलान् २ राज्ञ ꣵ ꣵ ꣵ ꣵ ꣵ ꣵꣵ
द्वि

प ७

सर ३

श्व्रं

श्चान्याचरोऽभ्यरात्स्कृताश्छित्वंजयः सैंधवं च महेष्वासं सामात्यं सहबंधुभिः ३ प्राच्यांश्च सलाक्षिगणांश्चैव भिमपराक्रम पुत्रं च ते महेष्वासं दुर्योधनममर्षणं ४ समव
दुःसहं चैव समरे भीमसेनो न्यवर्तयत् सहदेवं च शकुनिमुलूकं च महारथं ५ पितापुत्रौ महेष्वासावभ्यवर्तत दुर्जयौ युधिष्ठिरो महाराज गजानीकं महारथः ६ समव
तेत संक्रुद्धो नकुलः शूरः संक्रंदनो युधि ७ त्रिगर्तानां रथोदारैः समसज्जत पांडवाः अभ्यवर्तत दुर्धर्षाः समरे शाल्वकैकयान् ८
सात्यकिश्चेकितानश्च सौभद्रश्च महाबलः धृष्टकेतुश्च समरे राक्षसश्च घटोत्कचः ९ पुत्राणां ते रथानीकं प्रत्युद्ययुस्तथाहवे सेनापतिरमेयात्मा धृष्टद्युम्नो महा
रथः १० द्रोणेन समरे राजन्समियायोग्रकर्मणा एवमेते महेष्वासास्तावकाः पांडवैः सह समेत्य समरे शूराः संप्रहारं प्रचक्रिरे मध्यंदिनगते सूर्ये नभस्याकुली
भूते ११ कुरवः पांडवेयाश्च निजघ्नुरितरेतरं ध्वजिनो हेमचित्रांगा विचरंतो रणाजिरे १३ सपताका रथा रेजुर्वैयाघ्रपरिवारणाः समेतानां च समरे जिगीषू
णां परस्परं १४ बभूव तुमुलः शब्दः सिंहानामिव गर्जतां तत्राद्भुतमपश्याम संप्रहारं सुदारुणं १५ यत्स कुर्वंत्ररणे वीराः संजयाः कुरुभिः सह नैव खं न दिशो राजन्न
सूर्यं शत्रुतापनः १६ विदिशो वाप्यपश्याम शरैर्मुक्तैः समंततः शक्तीनां विमलाग्राणां तोमराणां तथा स्यतां १७ निस्त्रिंशानां च पीतानां नीलोत्पलनिभाः
प्रभाः कवचानां विचित्राणां भूषणानां प्रभास्तथा १८ खं दिशः प्रदिशश्चैव भासयामास तेजसा वपुर्भिश्च नरेंद्राणां चंद्रसूर्यसमप्रभैः १९ विरराज तदा
राजंस्तत्र तत्र रणाजिरं रथसिंहा नरव्याघ्राः समयांतश्च संयुगे २० विरेजुः समरे राजन्ग्रहा इव नभस्तले भीष्मस्तु रथिनां श्रेष्ठो भीमसेनं महाबलं
२१ अवारयत संक्रुद्धः सर्वसैन्यस्य पश्यतः ततो भीष्मविनिर्मुक्ताः रुक्मपुंखाः शिलाशिताः २२ अभ्यघ्नन्समरे भीमं तैलधौताः सुतेजनाः तस्य शक्तिं म
॥हावेगां भीमसेनो महाबलः २३ क्रुद्धाशीविषसंकाशां प्रे॥

षयामास भीष्मं तं तामापतन्तीं सहसा स्वक्षं दुरासदां २४ चिच्छेद समरे भीष्मः शरैः सन्नतपर्वभिः ततोपरेण भल्लेन पीतेन निशितेन च २५ कार्मुकं भीमसेनस्य द्वि
धा चिच्छेद भारत सात्यकिस्तु ततस्तूर्णं भीष्ममासाद्य संयुगे २६ शरैर्बहुभिरानर्छ्छ मितरं ते जनेश्वर ततः संधाय वै तीक्ष्णं शरं परमदारुणं २७ वार्ष्णेयस्य रथाद्भी
ष्मः पातयामास सारथिं तस्याश्वाः प्रद्रुता राजन्निहते रथसारथौ २८ तेन तेनैव धावन्ति मनोमारुतरंहसः ततः सैन्यस्य सर्वस्य निस्वनस्तुमुलो भवत् २९
हाहाकारश्च संजज्ञे पांडवानां महात्मनां अभिद्रवत गृह्णीत हयान्यच्छत धावत ३० इत्यासीत्तुमुलः शब्दो युयुधानरथं प्रति एतस्मिन्नेव काले तु भीष्मः शांत
नवस्तदा ३१ अवधीत्पांडवीं सेनामासुरीमिव वृत्रहा ते वध्यमाना भीष्मेण पांचालाः सोमकैः सह ३२ आर्यां युद्धे मतिं कृत्वा भीष्ममेवाभिदुद्रुवुः धृष्टद्युम्नमु
खाश्चापि पार्थाः शांतनवं रणे ३३ अभ्यधावन्जिघांसन्तस्तव पुत्रस्य वाहिनीं तथैव तावकाराजन्भीष्मद्रोणमुखाः परान् ३४ अभ्यधावन्त वेगेन ततो युद्धमवर्त्त
त इति भीष्मपर्वणि संजय उवाच विराटोथ त्रिभिर्वाणैर्भीष्ममार्छन्महारथः विव्याध तुरगांश्चास्य त्रिभिर्बाणैर्महारथः १ तं प्रत्यविध्यद्दशभिर्भीष्मः
शांतनवः शरैः रुक्मपुंखैर्महेष्वासः कृतहस्तो महाबलः २ द्रोणिर्गांडीवधन्वानं भीमधन्वा महारथः अविध्यदिषुभिः षड्भिर्दृढहस्तस्तनांतरे ३ कार्मु
कं तस्य चिच्छेद फाल्गुनः परवीरहा अविध्यच्च भृशं तीक्ष्णैः पत्रिभिः शत्रुकर्शनः ४ सोन्यत्कार्मुकमादाय वेगवत्क्रोधमूर्छितः अमृष्यमाणः
पार्थेन कार्मुकच्छेदमाहवे ५ अविध्यत्फाल्गुनं राजन्नवत्या निशितैः शरैः वासुदेवं च सप्तत्या विव्याध परमेषुभिः ६ ततः क्रोधपरीतात्मा सहकृष्णेन फाल्गु
नः दीर्घमुष्णं च निःश्वस्य चिंतयित्वा मुहुर्मुहुः ७ धनुः संपीड्य वामेन करेण अमित्रकर्शनः गांडीवधन्वा संक्रुद्धः शितान्सन्नतपर्वणः ८ जीवितांतकरान्घो
रान्समादत्त शिलीमुखान् तैस्तूर्णं समरे विव्याध द्रौणिं बलवतां वरः ९ तस्य ते कवचं भित्त्वा ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽऽ

ते

न

सु२

पत्युः शोणितमाहवे न विव्यथे विनिर्भिन्नो द्रोणिर्गाण्डीवधन्वना १० तथैव च शरान्पार्थे प्रतिमुञ्चन्नविह्वलः तस्थौ स समरे राजंस्त्रातुमिच्छन्महाव्रते ११ तस्य तत्सुम
हत्कर्म शशंसुः कुरुसत्तमाः यत्कृष्णाभ्यां समेताभ्यामभ्यायत्त संयुगे १२ स हि नित्यमनीकेषु युध्यतेऽभयमास्थितः अस्त्रग्रामं ससंहारं द्रोणात्प्राप्य सुदुर्लभं १३
ममाचार्यसुतोऽत्यर्थं द्रोणस्यातिप्रियः सुतः ब्राह्मणश्च विशेषेण माननीयो मम मेति च १४ समास्थाय मतिं वीरो बीभत्सुः शत्रुतापन कृपां चक्रे रथश्रेष्ठो भारद्वाज
सुतं प्रति १५ द्रौणिं त्यक्त्वा ततो युद्धे कौन्तेयः श्वेतवाहनः युयुधे तावकान्निघ्नंस्त्वरमाणः पराक्रमी १६ दुर्योधनस्तु दशभिर्गार्ध्रपत्रैः शिलाशितैः भीमसेनं म
हेष्वासं रुक्मपुंखैः समर्पयत् १७ भीमसेनस्तु संक्रुद्धः परासुकरणं दृढं चित्रं कार्मुकमादत्त शरांश्च निशितान्दश १८ आकर्णप्रहितैस्तीक्ष्णैर्वेगितैस्तिग्म
तेजितैः अविध्यत्तूर्णमव्यग्रः कुरुराजं महोरसि १९ तस्य काञ्चन[illegible]सूत्रस्थः शरैः परिवृतो मणिः रराजोरसि वै सूर्यो ग्रहैरिव समावृतः २० पुत्रस्तु त
व तेजस्वी भीमसेनेन ताडितः नामृष्यत यथा नागस्तलशब्दं समीरितं २१ ततः शरैर्महाराज रुक्मपुंखैः शिलाशितैः भीमं विव्याध संक्रुद्धस्त्रासयानो वरू
थिनीं २२ तौ युध्यमानौ समरे भृशमन्योन्यविक्षतौ पुत्रौ ते देवसंकाशौ व्यरोचेतां महाबलौ २३ चित्रसेनं नरव्याघ्रः सौभद्रः परवीरहा अविध्यन्निशि
तैर्बाणैः पुरुमित्रं च सप्तभिः २४ सत्यव्रतं च सप्तत्या विद्ध्वा शक्रसमो युधि नृत्यन्निव रणे वीर आर्त्तिं नः समजीजनत् २५ तं प्रत्यविध्यद्दशभिश्चित्रसेनः
शिलीमुखैः सत्यव्रतश्च नवभिः पुरुमित्रश्च सप्तभिः २६ स विद्धो विक्षरन्रक्तं शत्रुसंवारणं महत् चिच्छेद चित्रसेनस्य चित्रं कार्मुकमार्जुनिः २७ भित्त्वा
चास्य तनुत्राणं शरेणोरस्यताडयत् ततस्ते तावका वीरा राजपुत्रा महारथाः २८ समेत्य युधि संरब्धा विव्यधुर्निशितैः शरैः तांश्च सर्वाञ्छरैस्तीक्ष्णै
र्जघान परमास्त्रवित् २९ तस्य दृष्ट्वा तु तत्कर्म परिवव्रुः सुतास्तव दहन्तं समरे योधान्वने कक्षं यथोल्बणं ३० अपेतशिशिरे काले समिद्धमिव पावकं

॥श्रीमद्॥ ११

१२५७

रोचत्तसौभद्रस्तवसैन्यानिशातयत् ३१ तत्तस्यचरितंदृष्ट्वापौत्रस्तवविशांपते लक्ष्मणोऽभ्यपतत्तूर्णं सात्वतीपुत्रमाहवे ३२ अभिमन्युस्ततःक्रुद्धोलक्ष्मणंशुभल
क्षणं विव्याधविशिखैःषड्भिःसारथिंचत्रिभिःशरैः ३३ तथैवलक्ष्मणोराजन्सौभद्रंनिशितैःशरैः अविध्यत्तमहाराजतदद्भुतमिवाभवत् ३४ तस्याश्वांश्चतुरोहत्वासारथिंच
महारथः अभ्यद्रवत्तसौभद्रोलक्ष्मणंनिशितैःशरैः ३५ हताश्वेतुरथेतिष्ठन्लक्ष्मणःपरवीरहा शक्तिंचिक्षेपसंक्रुद्धःसौभद्रस्यरथंप्रति ३६ तामापतंतींसहसाघो
ररूपांदुरासदां अभिमन्युःशरैस्तीक्ष्णैश्चिच्छेदभुजगोपमां ३७ ततःस्वरथमारोप्यलक्ष्मणंगौतमस्ततः अपोवाहरथेनाजौसर्वसैन्यस्यपश्यतः ३८ ततःसमाकु
लेतस्मिन्वर्तमानेमहाभये अभ्यद्रवंजिघांसंतःपरस्परवधैषिणः ३९ तावकाश्चमहेष्वासाःपांडवाश्चमहारथाः जुह्वंतःसमरेप्राणान्निजघ्नुरितरेतरं ४० मुक्त
केशाविकवचाविरथाश्छिन्नकार्मुकाः वाहुभिःसमयुध्यंतसृंजयाःकुरुभिःसह ४१ ततोभीष्मोमहावाहुःपांडवानांमहात्मनां सेनांजघानसंक्रुद्धोदिव्यैरस्त्रै
र्महाबलः ४२ हतेश्वरैर्गजैस्तत्रनरैरश्वैश्चपातितैः रथिभिःसादिभिश्चैवसमास्तीर्यतमेदिनी ४३ इतिभीष्मपर्वणि॥ ॥ संजयउवाच अथराजन्महा
वाहुःसात्यकिर्युद्धदुर्मदः विकृष्यसमरेचापंभारसाधनमुत्तमं १ प्रामुंचत्पुंखसंयुक्तांश्छरान्नागविषोपमान् प्रगाढंलघुचित्रंचदर्शयन्हस्तलाघवं २ तस्य
विक्षिपतश्चापंशरानन्यांश्चमुंचतः आददानस्यभूयश्चसंदधानस्यचापरान् ३ क्षिपतश्चपरांस्तस्यरणेशत्रून्विनिघ्नतः ददृशेरूपमत्यर्थंमेघस्येववर्षतः ४
तमुदीर्यंतमालोक्यराजादुर्योधनस्तदा रथानामयुतंतस्यप्रेषयामासभारत ५ तांस्तुसर्वान्महेष्वासान्सात्यकिःसत्यविक्रमः जघानपरमेष्वासोदिव्येनास्त्रेणवी
॥र्यवान् ६ सकृत्वादारुणंकर्मप्रगृहीतशरासनः भीसमा॥

दृत्ततोवीरोमभूरिश्रवसमाहवे ७ सहिसंदृश्यसेनांतांयुयुधानेनपीडितां अभ्यधावतसंक्रुद्धःकुरूणांकीर्तिवर्द्धनः ८ इंद्रायुधसवर्णंतुसविस्फार्यमहद्धनुः व्यसृजन्वज्रसंकाशांछरानाशीविषोपमान् ९ सहस्रसोमहाराजशेषयन्पाणिलाघवं शरांस्तान्मृत्युसंस्पर्शान्सात्यकेस्तपदानुगाः १० नवि घेहुस्तदाराजन्तुद्रुवुस्तेसमंततः विहायसमरेराजन्सात्यकिंयुद्धदुर्मदं ११ तंदृष्ट्वायुयुधानस्यसुतादशमहाबलाः महारथाःसमाख्याताश्चित्रवर्मायुधध्वजाः १२ समासाद्यमहेष्वासंभूरिश्रवसमाहवे ऊचुःसर्वेसुसंरब्धायूपकेतुंमहाहवे १३ भोभोःकौरवदायादसहास्माभिर्महाबल एहियुध्यस्वसंग्रामेसहतैःपृथगेववा १४ अस्मान्वात्वंपराजित्ययशःप्राप्नुहिसंयुगे वयंत्वांवापराजित्यप्रीतिंदास्यामहेपितुः १५ एवमुक्तस्तदाशूरैस्तानुवाचमहाबलः वीर्यश्लाघीनरश्रेष्ठस्तान्दृष्ट्वासमवस्थितान् १६ साधिदंकथ्यतेवीरायद्येवंमतिरद्यवः युध्यध्वंसहितायत्ताविहनिष्यामिवोरणे १७ एवमुक्तामहेष्वासास्तेवीराःक्षिप्रकारिणः महताशरवर्षेणअभ्यवर्षन्नरिंदमाः १८ अपराह्णेमहाराजसंग्रामस्तुमुलोभवत् एकस्यचबहूनांचसमेतानांरणाजिरे १९ तमेकंरथिनांश्रेष्ठंशरैस्तेसमवाकिरन् प्रावृषीचयथामेघाःसिषिचुर्जलदानृप २० तैस्तुमुक्तांछरौघांस्तान्यमदंडाशनिप्रभान् असंप्राप्तानसंभ्रांतश्चिच्छेदाशुमहारथः २१ तत्राद्भुतमपश्याम सौमदत्तेःपराक्रमं यदेकोबहुभिर्युद्धेसमसज्जदभीतवत् २२ विसृज्यशरवृष्टिंतांदशराजन्महारथाः परिवार्यमहात्मानंनिहंतुमुपचक्रमुः २३ सौमदत्तिस्ततःक्रुद्धस्तेषांचापानिभारत चिच्छेददशभिर्वीरोनिमेषे ॥ ॥ ॥

म हार

रणमहारथः २४ अथैषांछिन्नधनुषांभल्लैः सन्नतपर्वभिः चिच्छेदसमरेराजंछिरांसिभरतर्षभ २५ तेहतान्यपतन्भूमौवज्रभग्नाइवद्रुमाः तान्दृष्ट्वानिहता न्वीरान्रणेपुत्रान्महाबलान् २६ वार्ष्णेयोविनदन्राजन्भूरिश्रवसमभ्यगात् रथंरथेनसमरेपीडयित्वाबलौ २७ तावन्योन्यस्यसमरेनिहत्यरथिवाजिनः विरथाव भिवल्गन्तौसमेयातांमहारथौ २८ प्रगृहीतमहाखड्गौतौचर्मवरधारिणौ शुशुभातेनरव्याघ्रौयुद्धायसमवस्थितौ २९ ततःसात्यकिमभ्येत्यनिस्त्रिंशवरधारिणं भीमसेनस्त्वरन्राजन्रथमारोपयत्तदा ३० तवापितनयोराजन्भूरिश्रवसमाहवे आरोपयद्रथंतूर्णंपश्यतांसर्वधन्विनां ३१ तस्मिंस्तथावर्तमानेरणेभीष्मंमहारथं अ योधयंतसंरब्धाः पांडवाभरतर्षभ ३२ लोहितायतिचादित्येत्वरमाणोधनंजयः पंचविंशतिसाहस्रान्निजघानमहारथान् ३३ तेहिदुर्योधनादिष्टास्तदापार्थनिबर्ह णे अप्राप्यैवगतानाशंशलभाइवपावके ३४ ततोमत्स्याः केकयाश्चधनुर्वेदविशारदाः परिवव्रुरणेपार्थंसहपुत्रंमहारथं ३५ अगामास्तमथादित्योसर्वमेघैः समुत्थितैः सर्वेषामेवसैन्यानांप्रमोहः समपद्यत ३६ अवहारंततश्चक्रेपितादेवव्रतस्तव संध्याकालेमहाराजसैन्यानांश्रांतवाहनः ३७ पांडवानांकुरूणांचपरस्परसमागमे तेसेने भृशसंविग्नेययतुः स्वंनिवेशनं ३८ ततः स्वशिबिरंगत्वान्यविशंस्तत्रभारत पांडवाः सृंजयैः सार्द्धंकुरवश्चयथाविधि ३९ इतिभीष्मपर्वणिपंचमदिवसयुद्धंसमाप्तं ॥ ॥संजयउ० विहृत्यचततोराजन्सहिताः कुरुपांडवाः व्यतीतायांतुशर्वर्यांपुनर्युद्धायनिर्ययुः १ ततः शब्दोमहानासीत्तवतेषांचभारत युज्यतांरथमुख्यानांक ल्पतांचापिदंतिनां २ संनह्यतांपदातीनांहया ॥ ॥

न१

नांचैवभारत शंखदुंदुभिनिर्घोषास्तुमुलाः सर्वतोभवन् ३ ततोयुधिष्ठिरोराजाधृष्टद्युम्नमभाषत व्यूहंव्यूहमहाबाहोमकरंशत्रुतापनं ४ एवमुक्तस्तुपार्थेन
धृष्टद्युम्नोमहारथः तुंडमासीन्महाराजभीमसेनोमहाबलः ५ सौभद्रोद्रौपदेयाश्चराक्षसश्चघटोत्कचः सात्यकिर्धर्मराजश्चव्यूहग्रीवांसमास्थिताः ६ पृष्ठमा
सीन्महाराजविराटोवाहिनीपतिः धृष्टद्युम्नेनसहितोमहत्यासेनयावृतः ७ केकयाभ्रातरःपंचवामंपक्षंसमाश्रिताः धृष्टकेतुर्नरव्याघ्रश्चेकितानश्चवीर्य
वान् ८ दक्षिणंपक्षमाश्रित्यस्थिताव्यूहस्यरक्षिणो पादयोस्तुमहाराजस्थितःश्रीमान्महारथः ९ कुंतिभोजःशतानीकोमहत्यासेनयावृतः शिखंडीतुम
हेषासः सोमकैःसंवृतोवली १० इरावांश्चनृपः पुच्छेमकरस्यव्यवस्थितौ एवमेतंमहाव्यूहंव्यूह्यभारतपांडवाः ११ सूर्योदयेमहाराजपुनर्युद्धायदंशिताः कौ
रवानभ्ययुरास्तीहस्त्यश्वरथपत्तिभिः १२ समुच्छ्रितैर्ध्वजैश्छत्रैः शस्त्रैश्चविमलैःशितैः व्यूहंदृष्ट्वाततस्सैन्यंपितादेवव्रतस्तव १३ क्रौंचेनमहताराजन्प्रत्यव्यूहत
वाहिनीं तस्यतुंडेमहेष्वासोभारद्वाजोव्यवर्तत १४ अश्वत्थामाकृपश्चैवचक्षुरास्तांनरेश्वर कृतवर्मातुसहितः कांबोजवाह्लिकैः १५ शिरस्यासीन्नर
श्रेष्ठश्रेष्ठः सर्वधनुष्मतां ग्रीवायांशूरसेनस्तुतवपुत्रश्चभारत १६ दुर्योधनोमहाराजराजभिर्बहुभिर्वृतः प्राग्ज्योतिषस्तुसहितोमद्रसौवीरकेकयैः १७
उरस्यभून्नरश्रेष्ठमहत्यासेनयावृतः स्वसेनयाचसहितः सुशर्माप्रस्थलाधिपः १८ वामंपक्षंसमाश्रित्यदंशितःसमवस्थितः तुषारायवनाश्चैवशकेश्चसह
चूलिकैः १९ दक्षिणंपक्षमाश्रित्यस्थिताव्यूहस्यभारत श्रुतायुश्चशतायुश्चसोमदत्तिश्चमारिष २० व्यूहस्यजघनेतस्थूरक्षमाणाःपरस्परं ततोयुद्धायसंज
ग्मुः पांडवाःकौरवैःसह २१ सूर्योदयेमहाराजततोयुद्धमवर्तत प्रतीयूरथिनोनागानागाश्चरथिनोययुः २२ हयारोहाहयारोहान्नाधि॥ ॥ ॥

नश्चापिसादिनः सादिनश्चस्यात्राजन्कुंजरांश्चमहारणे २३ हस्त्यारोहान्रथ्यात्राजनरथिनश्चापिसादिनः रथिनःपत्तिभिःसार्द्धंसादिन
श्चापिपत्तिभिः २४ अन्योन्यंसमरेराजन्प्रत्यधावन्नमर्षिताः भीमसेनार्जुनयमैर्गुप्तान्यन्यैर्महारथैः २५ शोभते पांडवीसेनानक्षत्रै
रिवशर्वरी तथाभीष्मकृपद्रोणशल्यदुर्योधनादिभिः २६ तवापिविबभौसेनाग्रहैर्द्यौरिवसंवृता भीमसेनस्तुकौंतेयो द्रोणंदृष्ट्वापराक्रमी
२७ अभ्ययाज्जवनैरश्वैर्भीमसेनस्यवाहिनी द्रोणस्तुसमरेक्रुद्धोभीमंनवभिरायसैः २८ विव्याधसमरेराजन्मर्माण्युद्दिश्यवीर्यवा
न् दृढहस्तस्ततोभीमोभारद्वाजेनसंयुगे २९ सारथिंप्रेषयामासयमस्यसदनंप्रति संगृह्यचस्वयंवाहान्भारद्वाजःप्रतापवान् ३० व्यधमत्
पांडवींसेनांतूलराशिमिवानलः तेवध्यमानाद्रोणेनभीष्मेणचनरोत्तम ३१ संजयाःकेकयैःसार्द्धंपलायनपराभवन् तथैवतावकंसैन्यंभी
मार्जुनपरिक्षतं ३२ मुमुहेतत्रतत्रैवसमरेष्ववराङ्गना अभिद्येतांततोव्यूहौतस्मिन्वीरवरक्षये ३३ आसीद्व्यतिकरोघोरस्तवतेषांचभा
रत तदद्भुतमपश्यामतावकानांपरैःसह ३४ एकायनगताःसर्वेयदयुध्यंतभारत प्रतिसंवार्यचास्त्राणितेन्योन्यस्यविशांपते ३५
युयुधुःपांडवाश्चैवकौरवाश्चमहामृधे इतिभीष्मपर्वणि धृतराष्ट्र उ० एवंबहुगुणंसैन्यमेवंबहुविधंपरं एवमेतद्यथाशास्त्रममोघंचै
वसंजय १ तुष्टमस्माकमत्यंतमभिकामंचनःसदा प्रह्वमव्यसनोपेतंपुरस्ताद्दृष्टविक्रमं २ नातिवृद्धमबालंचनकृशंनचपीवरं
लघुवृत्तायतप्रायंसारगात्रमनामयं ३ आत्तसन्नाहशस्त्रंचबहुशस्त्रपरिग्रहं असियुद्धेनियुद्धेचगदायुद्धेचकोविदं ४ प्रास
र्ष्टितोमरेष्वाजौपरिघेष्वायसेषुच भिंदिपालेषुशक्तिषुमुसलेषुचसर्वशः ५ कंपनेषुचचापेषुकणपेषुचसर्वशः क्षेपणेषुचचित्रेषु
मुष्टियुद्धेषुचक्षमं ६ अपरोक्षंचविद्यासुव्यायामेसुकृतश्रमं शस्त्रग्रहणविद्यासुसर्वासुपरिनिष्ठितं ७ आरो ७ ॥ ७ ॥

हेपर्यस्कृ रेसारणोसांतरस्नुते सम्यक्प्रहरणोयाने व्यपयाने च कोविदं ८ नागाश्वरथयानेषु बहुशः सुपरीक्षितं परीक्ष्य च यथान्यायं वेत
नेनोपपादितं ९ नगोष्ठ्यानोपकारेण न संबंधनिमित्ततः नसौहृदबलेनापि नकुलीन परिग्रहैः १० समृद्धजनमार्यं च तुष्टसत्कृतबांधवं कृ
तोपकारभूयिष्ठं यशस्वि च मनस्वि च ११ सजयैश्च नरैर्मुख्यैर्बहुशो मुख्यकर्मभिः लोकपालो[illegible]पमैस्तात पालितं लोकविश्रुतैः १२ बहुभि
क्षत्रियैर्गुप्तं पृथिव्यां लोकसंमतैः अस्मानभिगतैः कामात्सबलैः सपदानुगैः १३ महोदधिमिवापूर्णमापगाभिः समंततः अपक्षैः पक्षि
संकाशैरथैर्नागैश्च संवृतं १४ नानायोध[illegible]जलं भीमं वाहनोर्मितरंगिणं क्षेपण्यसिगदाशक्तिशरप्रासझषैः समाकुलं १५ ध्वजभूषणसं
बाधं रत्नपट्टसुसंचितं वाहनैः परिधावद्भिर्वायुवेगविकंपितं १६ अपारमिव गर्जंतं सागरप्रतिमं महत् द्रोणभीष्माभिसंगुप्तं गुप्तं च कृतवर्म
णा १७ कृप[illegible]दुःशासनाभ्यां च जयद्रथमुखैस्तथा भगदत्तविकर्णाभ्यां द्रौणिसौबलबाह्लिकैः १८ गुप्तं प्रवीरैर्लोकस्य सारवद्भि
र्महात्मभिः यदहन्यत संग्रामे दिष्टमत्र पुरातनं १९ नैतादृशं समुद्योगं दृष्टवंतोथ मानुषाः ऋषयो वा महाभागाः पुराणा भुवि संजय २०
ईदृशो हि बलौघस्तु युक्तः शस्त्रास्त्रसंपदा वध्यते यत्र संग्रामे किमन्यद्भागधेयतः २१ विपरीतमिदं सर्वं प्रतिभाति स्म संजय यत्रेदृशं बल
घोरं नातरद्युधि पांडवान् २२ अथवा पांडवार्थाय देवास्तत्र [illegible]मागताः युध्यंते मामकं सैन्यं यच्च वध्य
ति संजय २३ उक्तं हि विदुरेणेह हितं पथ्यं च नित्यशः न च गृह्णाति तन्मंदः पुत्रो दुर्योधनो मम २४ तस्य मन्ये मतिः पूर्वं सर्वज्ञस्य महात्मनः
आसीद्यथागतं तात येन दृष्टमिदं पुरा २५ अथवा भाव्यमेवं हि संजयैतेन सर्वथा पुरा धात्रा यथा सृष्टं तथा न तदन्यथा २६ इति भीष्म
पर्वणि संजय उ० आत्मदोषात्त्वया राजन्प्राप्तं व्यसनमीदृशं न हि दुर्योधनस्तानि पश्यते भरतर्षभ १ यानि त्वं दृष्टवान्राजन्धर्मसंकर
काणि ते तव दोषा ॥ ॥

त्पुरावृत्तंद्यूतमेतद्विशांपते तवदोषेणयुद्धंचप्रवृत्तंसहपांडवैः त्वमेवाद्यफलंभुंक्ष्वकृत्वाकिल्बिषमात्मनः ३ आत्मनैवकृतंकर्मआत्मनैवोपभुज्य
ते इहवाप्रेत्यवाराजंस्त्वयाप्राप्तंयथातथं ४ तस्माद्राजन्स्थिरोभूत्वाप्राप्येदंव्यसनंमहत् शृणुयुद्धंयथावृत्तंशंसतोममभारिष ५ भीमसेनःसुनि
शितैर्वाणैर्भित्वामहाचमूं आससादततोवीरःसर्वान्दुर्योधनानुजान् ६ दुःशासनंदुर्विषहंदुर्मरंदुःसहंदुर्मदंजयं जयसेनंविकर्णंचचित्रसेनंसुदर्श
नं ७ चारुचित्रंसुवर्माणंदुःकर्णंकर्णमेवच एतानन्यांश्चसुबहून्समीपस्थान्महारथान् ८ धार्तराष्ट्रान्सुसंक्रुद्धान्दृष्ट्वाभीमोमहावलः भीष्मेण
समरेगुप्तांप्रविवेशमहाचमूं ९ अथालोक्यप्रविष्टंतमब्रुवन्सर्वएवतु १० जीवग्राहंनिगृह्णीमोवयमेनंनराधिपाः सतैःपरिवृतःपार्थोभ्रातृभिःकृ
तनिश्चयैः ११ प्रजासंहरणेसूर्यःक्रूरैरिवमहाग्रहैः संप्राप्यमध्यंव्यूहस्यनभीःपांडवमाविशत् १२ यथादेवासुरेयुद्धेमहेंद्रःप्राप्यदानवान् ततः
शतसहस्राणिरथिनांसर्वशस्त्रिणां १३ उद्यतानिशरैर्घोरैस्तमेकमनुवव्रिरे सतेषांप्रवरान्योधान्हस्त्यश्वरथसादिनः १४ जघानसमरेशूरोधार्तराष्ट्रा
नचिंतयत् तेषांव्यवसितंज्ञात्वाभीमसेनोजिघृक्षतां १५ समस्तानांवधेराजन्मतिंचक्रेमहावलः ततोरथंसमुत्सृज्यगदामादायपांडवः १६ जघा
नधार्तराष्ट्राणांतंवलौघमहार्णवं भीमसेनेप्रविष्टेतुधृष्टद्युम्नोपिपार्षतः १७ द्रोणमुत्सृज्यतरसाप्रययौयत्रसौवलः निवार्यमहतींसेनांता
वकानांनरर्षभ १८ आससादरथंतूर्णंभीमसेनस्यसंयुगे दृष्ट्वाविशोकंसमरेभीमसेनस्यसारथिं १९ धृष्टद्युम्नोमहाराजदुर्मनागत
चेतनः आपृच्छद्वाष्पसंरुद्धोनिश्वसन्वाचमीरयन् २० ममप्राणैःप्राणैःप्रीयतमःक्वभीमइतिदुःखितः विशोकस्तमुवाचेदंधृष्टद्युम्नंकृतांजलिः
२१ संस्थाप्यमामिहवलीपांडवःसमहावलः प्रविष्टोधार्तराष्ट्राणामेकोवलमहार्णवं २२ मामुक्त्वापुरुषव्याघ्रप्रीतियुक्तमिदंवचः प्रतिपा
लयमांसूतनियम्याश्वान्मुहूर्तकं यावदेतान्निहन्म्यद्ययइमेमद्वधोद्यताः ततोदृष्ट्वागदाहस्तंप्रधावंतंमहावलं २४ सर्वेषामेवसैन्यानांसंहर्षःसमजाय

मे.क.१

भी०
२५०

मध्ये २

त तस्मिन्सुतुमले युद्धे वर्तमाने महाभये २५ भित्वा राजन्महाव्यूहं प्रविवेश सखा तव विशोकस्य वचः श्रुत्वा धृष्टद्युम्नोपि पार्षतः २६ प्रत्युवाच त
तः सूतं रणे महाबलः नहि मे जीवितेनापि विद्यतेद्य प्रयोजनं २७ भीमसेने रणे हित्वा स्नेहमुत्सृज्य पांडवैः यदि यामि विना भीमं किं मां क्षत्रं वदिष्यति २८
एकायनगते भीमे मयि चावस्थिते युधि अस्वस्ति तस्य कुर्वंति देवाः शक्रपुरोगमाः २९ यः सहायान्परित्यज्य स्वस्तिमानाव्रजेद्गृहान् स मे भीमः
सखा चैव संबंधी च महाबलः ३० भक्तोस्मान्भक्तिमांश्चाहं तमप्यरिनिसूदनं सोहं तत्र गमिष्यामि यत्र यातो वृकोदरः ३१ निघ्नंतं मामरीन्पश्य दानवा
निव वासवः एवमुक्त्वा ततो वीरो ययौ मध्येन भारत ३२ भीमसेनस्य मार्गेषु गदाप्रमथितैर्गजैः स ददर्श ततो भीमं दहंतं रिपुवाहिनीं ३३ वा
तो वृक्षानिव वहन्भंजंतं रणे नृपान् ते हन्यमानाः समरे रथिनः सादिनस्तथा ३४ पादाता दंतिनश्चैव चक्रुरार्तस्वरं महत् हाहाकारश्च संज
ज्ञे तव सैन्यस्य मारिष ३५ वध्यते भीमसेनेन कृतिना चित्रयोधिना ततः कृतास्त्रास्ते सर्वे परिवार्य वृकोदरं ३६ अभीताः समवर्षंत शस्त्र
वृष्टिं समंततः अभिद्रुतं शस्त्रभृतां वरिष्ठं समंततः पांडवं लोकवीरैः सैन्येन घोरेण सुसंहतेन दृष्ट्वा बली पार्षतो भीमसेनं ३७ अथोप[illegible]गाछछरविक्ष
तांगं पदातिनं क्रोधविषं वमंतं आश्वासयन्पार्षतो भीमसेनं गदाहस्तं कालमिवांतकाले ३८ निःशल्यमेनं च चकार तूर्णमारोपयच्चात्मरथं महा
त्मा भृशं परिष्वज्य च भीमसेनमाश्वासयामास च शत्रुमध्ये ३९ भ्रातॄनथोपेत्य तवापि पुत्रस्तस्मिन्विमर्दे महसाभ्युवाच अयं दुरात्मा द्रुपदस्य पु
त्रः समागतो भीमसेनेन सार्धं ४० तं यात सर्वे सहिता निहंतुं मा वो रिपुः प्रार्थयतामनीकं श्रुत्वार्थवाक्यं तममृष्यमाणा ज्येष्ठाज्ञया चोदिता धार्तराष्ट्राः
४१ वधाय निष्पेतुरुदायुधास्ते युगक्षये केतवो यद्वदुग्राः प्रगृह्य चित्राणि धनूंषि वीरा ज्यानेमिघोषैः प्रविकंपयंतः ४२ सोरैरवर्षन्द्रुपदस्य पुत्रं पर्यां
बुदा भूधरं वारिजालैः निहत्य तांश्चापि शरैः सुतीक्ष्णैर्न विव्यथे समरे चित्रयोधी ४३ समभ्युदीर्णांश्च तवात्मजांस्तथा निशाम्य वीरानभितः स्थितान्र

एम०
२५०

गोजिघांसुस्त्वं द्रुपदात्मजो युवा प्रमोहनास्त्रं युयुजे महारथः ४४ क्रुद्धो भृशं तव पुत्रेषु राजन्दैत्येषु यद्वत्समरे महेन्द्रः ततो व्यमुह्यंत रणे नृवीराः
प्रमोहनास्त्राहतबुद्धिसत्वाः ४५ प्रदुद्रुवुः कुरवश्चैव सर्वे सवाजिनागाः सरथाः समंतात् परीतकालानिव नष्टसंज्ञान्मोहोपेतांस्तव पुत्रान्निशम्य ४६
एतस्मिन्नेव काले तु द्रोणः शस्त्रभृतां वरः द्रुपदं त्रिभिरासाद्य शरैर्विव्याध दारुणैः ४७ सोतिविद्धस्तदा राजन्रणे द्रोणेन पार्थिवः अपयाद्द्रुपदो रा
जन्पूर्ववैरमनुस्मरन् ४८ जित्वा द्रोणस्तु द्रुपदं शंखं दध्मौ प्रतापवान् तस्य शंखस्वनं श्रुत्वा वित्रेसुः सर्वसोमकाः ४९ अथ शुश्राव तेजस्वी
द्रोणः शस्त्रभृतां वरः प्रमोहनास्त्रेण रणे मोहितानात्मजांस्तव ५० ततो द्रोणो राजगृद्धी त्वरितोभ्याययौ रणात् तत्रापश्यन्महेष्वासो भारद्वा
जः प्रतापवान् ५१ धृष्टद्युम्नं च भीमं च विचरंतौ महारणे मोहाविष्टांश्च ते पुत्रानपश्यत्स महारथः ५२ ततः प्रज्ञास्त्रमादाय मोहनास्त्रं व्य
शातयत् अथ प्रत्यागतप्राणास्तव पुत्रा महारथाः ५३ पुनर्युद्धाय समरे प्रययुर्भीमपार्षतौ ततो युधिष्ठिरः प्राह समाहूय स्वसैनिकान्
५४ गच्छंतु पदवीं शक्त्या भीमपार्षतयोर्युधि सौभद्रप्रमुखा वीरा रथा द्वादश दंशिताः ५५ प्रवृत्तिमधिगच्छंतु नहि शुध्यति मे मनः त एवं समनु
ज्ञाताः शूरा विक्रांतयोधिनः ५६ बाढमित्येवमुक्त्वा तु सर्वे पुरुषमानिनः मध्यंदिनगते सूर्ये प्रययुः सर्व एव हि ५७ कैकेया द्रौपदेयाश्च धृष्टके
तुश्च वीर्यवान् अभिमन्युं पुरस्कृत्य महत्या सेनया वृताः ५८ ते कृत्वा समरे व्यूहं सूचीमुखमरिंदमाः विभिदुर्धार्तराष्ट्राणां तद्रथानीकमाहवे ५९
तान्प्रयातान्महेष्वासानभिमन्युपुरोगमान् भीमसेनभयाविष्टा धृष्टद्युम्नविमोहिताः ६० न संधारयितुं शक्ता तव सेना नराधिप मदमूर्छा
न्वितात्मा हि प्रमदेवाध्वनि स्थिता ६१ तेभियाय महेष्वासाः स्वर्णचित्रध्वजाः परीप्संतोभ्यधावंत धृष्टद्युम्नवृकोदरौ ६२ तौ च दृष्ट्वा महे
ष्वासानभिमन्युपुरोगमान् बभूवतुर्मुदा युक्तौ निघ्नंतौ तव वाहिनीं ६३ दृष्ट्वा च सहसा यांतं पांचाल्यो गुरुमात्मनः नाशंसत वधं वीरः पुत्राणां

भी०
२५१

तव पार्थतः ६४ ततो रथं समारोप्य कैकेयस्य वृकोदरः अभ्यधावत्सुसंक्रुद्धो द्रोणमिषस्त्रपाणां ६५ तस्यापि पततस्तूर्णं भारद्वाजः प्रतापवान् कु
ऊचिच्छेद भल्लेन धनुः शत्रुनिषूदनः ६६ अन्यांश्च शतशो बाणान्प्रेषयामास पार्षते दुर्योधनहितार्थाय भर्तुः पिंडमनुस्मरन् ६७ अथान्यद्धनु
रादाय पार्षतः परवीरहा द्रोणं विव्याध सप्तत्या रुक्मपुंखैः शिलाशितैः ६८ तस्य द्रोणः पुनश्चापं चिच्छेदामित्रकर्षणः हयांश्च चतुरस्तस्य चतुर्भिः
सायकोत्तमैः ६९ वैवस्वतक्षयं घोरं प्रेषयामास भारत सारथिं चास्य भल्लेन प्रेषयामास मृत्यवे ७० हताश्वात्स रथात्तूर्णमवप्लुत्य महारथः आ
रुरोह महाबाहुरभिमन्योर्महारथं ७१ ततः सरथनागाश्वा समकंपत वाहिनी पश्यतो भीमसेनस्य पार्षतस्य च पश्यतः ७२ तत्प्रभग्नं ब
लं दृष्ट्वा द्रोणेनामिततेजसा नाशक्नुवन्वारयितुं समस्तास्ते महारथाः ७३ वध्यमानं तु तत्सैन्यं द्रोणेन निशितैः शरैः व्यभ्रमत्तत्र तत्रैव क्षु
भ्यमान इवार्णवः ७४ तथा दृष्ट्वा च तत्सैन्यं जहृषे च बलं तव दृष्ट्वाचार्यं च संक्रुद्धं तपंतं रिपुवाहिनीं ७५ चुक्रुशुः सर्वतो योधाः साधु साध्विति
भारत इति भीष्मपर्वणि संजय उवाच ततो दुर्योधनो राजा मोहात्प्रत्यागतस्तदा शरवर्षैः पुनर्भीमं प्रत्यवारयदच्युतं १ एकीभूताः पुनश्चैव
तव पुत्रा महारथाः समेत्य समरे भीमं योधयामासुरुद्यताः २ भीमसेनोपि समरे संप्राप्य स्वरथं पुनः समारुह्य महाबाहुर्ययौ येन तवात्मजः ३
प्रगृह्य च महावेगं परासुकरणं दृढं चित्रं शरासनं संख्ये शरैर्विव्याध ते सुतं ४ ततो दुर्योधनो राजन्भीमसेनं महाबलं नाराचेन सुतीक्ष्णेन भृशं
मर्मण्यताडयत् ५ सोतिविद्धो महेष्वासस्तव पुत्रेण धन्विना संरक्तनयनः क्रोधाद्वेगेनोत्क्षिप्य कार्मुकं ६ दुर्योधनं त्रिभिर्बाणैर्बाह्वोरुरसि
चार्पयत् स तथाभिहतो राजन्नाचलद्गिरिराडिव ७ तौ दृष्ट्वा समरे क्रुद्धौ विनिघ्नंतौ परस्परं दुर्योधनानुजाः सर्वे शूराः संत्यक्तजीविताः ८ संस्म
त्य मंत्रितं पूर्वं निग्रहे भीमकर्मणः निश्चयं परमं कृत्वा निग्रहीतुं प्रचक्रमुः ९ तानापतत एवाजौ भीमसेनो महाबलः अभ्युपेयो महाराज ग

भा०
२५२

जं प्रतिगर्ज्जिव १० स शंकुंश्चतेजस्वी नाराचेन समर्पयत चित्रसेनं महाराज तव पुत्रं महायशाः ११ तथेतरांस्तव सुतांस्ताडयामास भारत शरैर्बहुविधैः
संख्ये रुक्मपुंखैः सुवेगितैः १२ ततः संख्याम समरे स्वान्यनीकानि सर्वशः अभिमन्युप्रमुखस्ते घादशमहारथाः १३ प्रेषिता धर्मराजेन भीमसेनपदा
नुगाः प्रत्युद्ययुर्महाराज पुत्रान्महारथान १४ दृष्ट्वा रथस्थांस्ताञ्छूरान्सूर्याग्निसमतेजसः सर्वानेव महेष्वासान्भ्राजमानान्श्रियावृतान् १५ महाहवे
दीप्यमानान्सुवर्णविकचोज्वलान् तत्यजुः समरे भीमं तव पुत्रा महाबलाः १६ तान्नामृष्यत कौंतेयो जीवमानान्गतानिति इति भीष्मपर्वणि सं० ३
वाच अवीपद्युनः सर्वास्तव पुत्रानपीडयत अभिमन्युश्च समरे भीमसेनेन संवृतः १ पार्षतेन च संप्रेक्ष्य तव सैन्ये महारथाः दुर्योधनप्रभृती तिश्रा
शसनाः २ भश शम श्रवेः प्रजविनैः प्रययुस्ते रथाः अपराह्णे ततो राजन्प्रावर्त्तत महान्रणः ३ तावकानां च बलिनां परेषां चैव भारत अभिमन्युर्वि
कर्णस्य हयान्हत्वा महाहवे ४ अथैनं पंचविंशत्या क्षुद्रकानां समार्पयत हता[illegible]श्वं रथमुत्सृज्य विकर्णस्तु महारथः ५ आरुरोह रथं राजंश्चि
त्रसेनस्य भास्वरं स्थितावेकरथे तौ तु भ्रातरौ कुरुवर्द्धनौ ६ आर्ज्जुनिः शरवर्षेणाच्छादयामास भारत दुर्ज्जयोथ विकर्णश्च कार्ष्णिं पंचभिरायसैः ७ विव्य
धते न चाकंपत्कार्ष्णिर्मेरुरिव स्थितः दुःशासनस्तु समरे केकेयान्पंच मारिष ८ योधयामास राजेंद्र तदद्भुतमिवाभवत द्रौपदेया रणे क्रुद्धा दुर्योधनमवार
यन ९ एकैकं त्रिभिरानर्छत्पुत्रं तव विशांपते पुत्रोपि तव दुर्धर्षो द्रौपद्यास्तनयान्रणे १० सायकैर्निशितै राजन्नाजघान पृथक् पृथक् तैश्चापि नि
र्भिन्नदेहस्तु रुधिरेण समुक्षितः ११ गिरिः प्रस्रवणैर्यद्वद्गैरिकादिविमिश्रितैः भीष्मोपि समरे राजन्पांडवानां वरूथिनीम् १२ कालयामास बल
वान्पालः पशुगणानिव ततो गांडीवनिर्घोषः प्रादुरासीद्विशांपते १३ दक्षिणेन वरूथिन्याः पार्थस्यारीन्निनिघ्नतः उत्तस्थुः समरे तत्र कबंधानि स
हस्रशः १४ कुरूणां चापि सैन्येषु पांडवानां च भारत शोणितोदं शिरावर्त्तं गजद्वीपं हयोर्मिणं १५ रथनौभिर्नरव्याघ्राः प्रतेरुः सैन्यसागरं छित्त्वाहस्ता

विकवचाविरेजुस्तु नरोत्तमाः १६ पतितास्तत्र दृश्यंते शतशोथसहस्रशः निहतैर्मत्तमातंगैः शोणितौघपरिप्लुतैः १७ भूमिर्भरतश्रेष्ठ पर्वतैरा
चिता यथा तत्राद्भुतमपश्याम तव तेषां च भारत १८ न तत्रासीत्पुमान्कश्चिद्यो योद्धुं नाभिकांक्षते एवं युयुधिरे वीराः प्रार्थयाना महद्यशः १९ तावकाः पांडवैः सा
र्द्धं कांक्षमाणा जयं युधि इति भीष्मपर्वणि । संजय उवाच ततो दुर्योधनो राजा लोहितायति भास्करे संग्रामरभसो भीमं हंतुकामोभ्यधावत १ तमायांत
मभिप्रेक्ष्य नृवीरं दृढवैरिणं भीमसेनः सुसंक्रुद्ध इदं वचनमब्रवीत् २ अयं स कालः संप्राप्तो वर्षपूगाभिकांक्षितः अद्य त्वां निहनिष्यामि य
दि नोत्सृजसे रणं ३ अद्य कुंत्याः परिक्लेशं वनवासं च कृत्स्नशः द्रौपद्याश्च परिक्लेशं प्रणोत्स्यामि हते त्वयि ४ यत्त्वया मत्सरो भूत्वा पांडवानवमन्य
से तस्य पापस्य गांधारे पश्य व्यसनमागतं ५ कर्णस्य मतमास्थाय सौबलस्य च यत्पुरा अचिंत्य पांडवान्कामाद्यथेष्टं कृतवानसि ६ याच
मानं च यन्मोहाद्दाशार्हमवमन्यसे उलूकस्य समादेशं यद्ददासि च हृष्टवत् ७ तेन त्वां निहनिष्यामि सानुबंधं सबांधवं शमीकरिष्ये तत्पापं य
त्पुरा कृतवानसि ८ एवमुक्त्वा धनुर्घोरं विकृष्योद्भ्राम्य चासकृत् समादाय शरान्घोरान्महाशनिसमप्रभान् ९ षड्विंशत्तरसा क्रुद्धो मुमो
चाशु सुयोधने ज्वलिताग्निशिखाकारान्वज्रकल्पानजिह्मगान् १० ततोस्य कार्मुकं द्वाभ्यां सूतं द्वाभ्यां च विव्यधे चतुर्भिर्जवनानश्वानन
यद्यमसादनं ११ द्वाभ्यां च सुविकृष्टाभ्यां [illegible] शराभ्यामरिमर्दनः चिच्छेद समरे छत्रं राज्ञस्तस्य रथोत्तमात् १२ त्रिभिश्च तस्य चिच्छेद ज्वलंतं ध्व
जमुत्तमं छित्वा तच्च ननादोच्चैस्तव पुत्रस्य पश्यतः १३ रथाच्च स ध्वजः श्रीमान्नानारत्नविभूषितः पपात सहसा भूमौ विद्युज्जलधरादिव १४
ज्वलंतं सूर्यसंकाशं नागं मणिमयं शुभं ध्वजं कुरुपतेश्छिन्नं ददृशुः सर्वपार्थिवाः १५ अथैनं दशभिर्बाणैस्तोत्त्रैरिव महागजं आजघान रणे
भीमः स्मयन्निव महारथः १६ ततस्तु राजा सिंधूनां रथश्रेष्ठो महाबलः दुर्योधनस्य [illegible] जग्राह पार्ष्णिं सत्पुरुषैः सह १७ कृपश्च र

थिनांश्रेष्ठःकौरव्यममितौजसंआरोपयद्रथंराजन्दुर्योधनममर्षणं १८ समग्रंविद्धोव्यथितोभीमसेनेनसंयुगे निषसादरथोपस्थेराजन्दुर्योधन
स्तदा १९ परिवार्यरणेभीमंहस्तिकाम्बोजयष्टयः रथैरनेकसाहस्रैर्भीमस्यावारयद्दिशः २० धृष्टकेतुस्ततोराजन्नभिमन्युश्चवीर्यवान् कैकेया
द्रौपदेयाश्चतवपुत्रानयोधयन् २१ चित्रसेनःसुचित्रश्चचित्राङ्गश्चित्रदर्शनः सुचारुश्चारुचित्रश्चतथानंदोपनंदकौ २२ अष्टावेतेमहे
ष्वासाःसुकुमारायशस्विनः अभिमन्युरथंराजन्समंतात्पर्यवारयन् २३ आजघानततस्तूर्णमभिमन्युर्महात्मना एकैकंपंचभिर्विध्याशरैः
सन्नतपर्वभिः २४ वज्रमृत्युप्रतीकाशैर्विचित्रायुधनिःसृतैः अमृष्यमाणास्तेसर्वेसौभद्रंरथसत्तमं २५ ववर्षुर्मार्गणैस्तीक्ष्णैर्गिरिंमेरु
मिवांबुदाः सपीड्यमानःसमरेकृतास्त्रोयुद्धदुर्मदः २६ अभिमन्युर्महाराजतावकान्समकंपयत् यथादेवासुरेयुद्धेवज्रपाणिर्महासुरा
न् २७ विकर्णायततोभल्लान्प्रेषयामासभारत चतुर्दशरथश्रेष्ठोघोरानाशीविषोपमान् २८ सतैर्विकर्णस्यरथात्पातयामासवीर्यवा
न् ध्वजंसूतं [illegible] हयांश्चापंनृत्यमानइवाहवे २९ ततश्चान्यांश्छरान्पीतानकुंठाग्रानजिह्मगान् प्रेषयामाससौभद्रोविकर्णायमहाबलः ३०
तेविकर्णंसमासाद्यकंकबर्हिणवाससः भित्वादेहंगताभूमिंज्वलंतइवपन्नगाः ३१ तेशराहेमपुंखाग्राव्यदृश्यंतमहीतले विकर्णरुधि
राक्लिन्नावमंतइवशोणितं ३२ विकर्णंवीक्ष्यनिर्भिन्नंतस्यैवान्येसहोदराः अभ्यद्रवंतसमरेसौभद्रप्रमुखान्रथान् ३३ अभिलायतथैवा
[illegible]स्रस्थांस्तान्सूर्यवर्चसः अविध्यन्तसमरेन्योन्यंसंरब्धायुद्धदुर्मदाः ३४ दुर्मुखःश्रुतकर्माणंविध्वासप्तभिराशुगैः ध्वजमेकेनचिच्छेदसा
रथिंचास्यसप्तभिः ३५ अश्वाञ्जांबूनदैर्जालैःप्रच्छन्नान्वातरंहसः जघानषड्भिरासाद्यसारथिंचाभ्यपातयत् ३६ सहताश्वेरथेतिष्ठ
न्श्रुतकर्मामहाबलः शक्तिंचिक्षेपसंक्रुद्धो [illegible] महोल्कांज्वलितामिव ३७ सादुर्मुखस्यविपुलंवर्मभित्वायशस्विनः विदार्यप्रावि

श्रुतसोमो भीमसेनसुतः

भी० २५३

शार्दूलेनेव मातङ्गस्तेजसा ३८ तं दृष्ट्वा विरथं तत्र सुतसोमो महाबलः पश्यतां सर्वसैन्यानां रथमारोपयत्स्वकं ३९ श्रुतकीर्तिर्महावीरो जयसेनं
सुतं तव अभ्ययात्समरे राजन्हन्तुकामो यशस्विनं ४० तस्य विक्षिपतश्चापं श्रुतकीर्तेर्महात्मनः चिच्छेद समरे राजन् जयसेनः सुतस्तव ४१ क्षु
रप्रेण सुतीक्ष्णेन प्रहसन्निव भारत तं दृष्ट्वा छिन्नधन्वानं शतानीकः सहोदरं ४२ अभ्यपद्यत तेजस्वी सिंहवद्विनदन्मुहुः शतानीकस्य समरे
दृढं विस्फार्य कार्मुकं ४३ विव्याध दशभिस्तूर्णं जयसेनं शिलीमुखैः अथान्येन सुतीक्ष्णेन सर्वावरणभेदिना ४४ जयसेनं शतानीको
विव्याध समरे भृशं तथा तस्मिन्वर्तमाने दुष्कर्णो भ्रातुरन्तिके ४५ चिच्छेद समरे चापं नाकुलेः क्रोधमूर्छितः अथान्यद्धनुरादाय भार
साहनमुत्तमं ४६ समादत्त शरान्घोराञ्छतानीको महाबलः तिष्ठ तिष्ठेति चामन्त्र्य दुष्कर्णं भ्रातुरग्रतः ४७ मुमोच निशितान्बाणान्ज्व
लितान्पन्नगानिव ततोऽस्य धनुरेकेन द्वाभ्यां सूतं च मारिष ४८ चिच्छेद समरे तूर्णं तं च विव्याध सप्तभिः अश्वान्मनोजवांश्चास्य कल्माषा
न्वीतकल्मषः ४९ जघान निशितैस्तूर्णं सर्वान्द्वादशभिः शरैः अथापरेण भल्लेन सुमुक्तेनाशुपातिना ५० दुष्कर्णं समरे राजन्हृदि वि
व्याध पत्रिणा स पपात ततो भूमौ वज्ररुग्ण इव द्रुमः ५१ दुष्कर्णं निहतं दृष्ट्वा पञ्च राजन्महारथाः जिघांसन्तः शतानीकं सर्वतः पर्य
वारयन् ५२ छाद्यमानं शरव्रातैः शतानीकं यशस्विनं अभ्यधावन्त संक्रुद्धाः केकयाः पञ्च सोदराः ५३ तानभ्यापततः प्रेक्ष्य त
व पुत्रा महारथान् प्रत्युद्ययुर्महाराज गजा इव महागजान् ५४ दुर्मुखो दुर्जयश्चैव तथा दुर्धर्षणो युवा शत्रुंजयः शत्रुसहः सर्वे क्रुद्धा
यशस्विनः ५५ प्रत्युद्याता महाराज केकयान्भ्रातरः समं रथैर्नगराकारैर्हयैर्युक्तैर्मनोजवैः ५६ नानावर्णविचित्राभिः
पताकाभिरलंकृतैः वरचापधरा वीरा विचित्रकवचध्वजाः ५७ विविशुस्ते परं सैन्यं सिंहा इव वनाद्वनं तेषां सुतुमुलं युद्धमतिष

श्व

उ दुष्कर्णो दुःशासनपुत्रः

कारपहृपं ५८ अवर्त्तत महारौद्रं निघ्नताममितरेतरं अन्योन्यागस्कृतां राजन्यमराष्ट्रविवर्द्धनं ५९ मुहूर्त्तोस्तमिते सूर्ये चक्रुर्यु
द्धं सुदारुणं रथिनः सादिनश्चात्रव्यकीर्यंत सहस्रशः ६० ततः शांतनवः क्रुद्धः शरैः सन्नतपर्वभिः नाशयामास तां सेनां भीष्मस्ते
षां महात्मनां ६१ पांचालानां च सैन्यानि शरैर्निन्ये यमक्षयं एवं भित्वा महेष्वासः पांडवानामनीकिनीं ६२ कृत्वावहारं सैन्या
नां ययौ स्वशिबिरं प्रति धर्मराजोपि संप्रेक्ष्य धृष्टद्युम्नवृकोदरौ ६३ मूर्द्धि चैतावुपाघ्राय प्रविष्टः शिबिरं ययौ इति श्री भीष्मप
र्वणि षष्ठदिवसयुद्धं समाप्तं ॥ ॥ संजय उवाच ॥ ॥ अथ ते तु महाराज परस्परकृतागसः जग्मुः स्वशिबिराण्येव रुधि
रेण समुक्षिताः १ विश्रम्य च यथान्यायं पूजयित्वा परस्परं सन्नद्धाः समदृश्यंत भूयो युद्धचिकीर्षया २ ततस्तव सुतो राजंश्चिं
तयाभिपरिप्लुतः विस्रवच्छोणितांगः पप्रच्छेदं पितामहं ३ सैन्यानि घोराणि भयानकानि व्यूढानि सम्यग्बहुलध्वजानि विद्रा
र्य हत्वा च निपीड्य शूरास्ते पांडवानां त्वरिता महारथाः ४ संमोह्य सर्वान्युधि कीर्त्तिमंतो व्यूहं च तं मकरं वज्रकल्पं प्रविश्य भीमेन
निबर्हितोस्मि घोरैः शरैर्मृत्युदंडप्रकाशैः ५ क्रुद्धं समुद्वीक्ष्य भयेन राजन्संमूर्छितो नालभं शांतिमद्य इच्छे प्रसादात्तव सत्य
संध प्राप्तुं जयं पांडवेयांश्च हंतुं ६ तेनैवमुक्तः प्रहसन्महात्मा दुर्योधनं ज्ञातमन्युं विदित्वा तं प्रत्युवाचाविमना मनस्वी गंगासु
तः शस्त्रभृतां वरिष्ठः ७ परेण यत्नेन विगाह्य सेनां सर्वात्मनाहं तव राजपुत्र इच्छामि दातुं विजयं सुखं च न चात्मानं छादये
यं त्वदर्थे ८ एते तु रौद्रा बहवो महारथा यशस्विनः शूरतमाः कृतास्त्राः ये पांडवानां समरे सहाया जितक्लमाः क्रोधविषं वमं

ततः ९ नेनेहशक्याः सहसाविजेतुंवीर्योन्नताः कृतवैराश्चपाच अहंह्येतान्प्रतियोत्स्यामिराजन्सर्वान्मनाजौविजितंत्वज्ज्यवी
रः १० रणेतवार्घ्यायमहानुभावंजीवितंरक्षितव्यंमयाद्य सर्वास्तवार्घ्योपमदेवदेत्यांल्लोकान्देहियंकिमुशत्रूंस्तवेह तान्पांडु
वान्योधयिष्यामिराजन्प्रियंचतेसर्वमहंकरिष्ये श्रुत्वैवचैतत्परमप्रतीतोदुर्योधनःशांतनवेबभूव ११ सर्वाणिसैन्यानि
ततःप्रहृष्टोमिर्गीच्छतेसाहन्पांश्चसर्वान् तदाजपातातविनिर्ययुर्द्रुतंरथास्वपादातगजाभुतानि १२ प्रहर्षयुक्तानितुता
निराजन्महांतिनानाविधशस्त्रवंति स्थितानिनागाश्वपदातिमंतिविरेजुराजन्बलानि १४ वृंदैः स्थिताश्चापिसुसंप्रयुक्ता
श्चकाशिरेदंतिगणाःसमंतात् शस्त्रास्त्रविद्भिर्नरदेवयोधैरधिष्ठिताःसैन्यगणास्त्वदीयाः १५ तथाश्वपादातगजाश्चस
घैः प्रयास्तिराजौविधिवत्प्रणुन्नैः समुद्धतेवैतरुणार्कवर्णरजोबभौछादयदर्करश्मीन् १६ रेजुःपताकारथदंतिसंस्था
वातेरिताभ्राम्यमाणाःसमंतात् नानारंगाःसमरेतत्रराजन्मेघैर्युक्ताविद्युतःखेयथैव १७ धनूंषिविस्फारयतांनृपाणांबभू
वशब्दस्तुमुलोतिघोरः विमथ्यतोदेवमहासुराघैर्यथार्णवस्यादियुगेतदानीं १८ तदुग्रनादंबहुवर्णरूपंतवात्मजानांस
मुदीर्णवर्णंबभूवसैन्यंरिपुसैन्यहंतृयुगांतमेघौघनिभंतदानीं १९ इतिभीष्मपर्वणि संजयउवाच तथात्मजंतववपु
र्नगोपोध्यानमास्थितं अब्रवीद्भरतश्रेष्ठसंप्रहर्षकरंवचः अहंद्रोणश्चशल्यश्चकृतवर्माचसात्वतः अश्वत्थामाविकर्णश्च
श्चभगदत्तश्चसौबलः २ विंदानुविंदावावंत्यौबाह्लीकःसहबाह्लीकैः त्रिगर्तराजश्चबलीमागधश्चसुदुर्जयः ३ बृहद्बल

द

श्चकौशल्यश्चित्रसेनोविविंशतिः रथाश्चबहुसाहस्राः शोभमानामहाध्वजाः ४ नानादेशसमुत्पन्नास्त्वदर्थेयोद्धुमुद्यताः
एतेचान्येचबहवस्त्वदर्थेत्यक्तजीविताः ५ देवानपिरणेजेतुंसमर्थाइतिमेमतिः अवश्यंतुमयाराजंस्तववाच्यंहितंसदा ६
अशक्याःपांडवाजेतुंदेवैरपिसवासवैः । वासुदेवसहायाश्चमहेंद्रसमविक्रमाः ७ सर्वथाहंतुराजेंद्रकरिष्येवचनंतव पांडवा
न्वारणेजेष्यामिमांवाजेष्यंतिपांडवाः ८ एवमुक्त्वाददौचास्मैविशल्यकरणींशुभां ओषधींवीर्यसंपन्नांविशल्यश्चाभवत्तदा ९
ततःप्रभातेविमलेस्वेनानीकेनवीर्यवान् अव्यूहतस्वयंवीरोव्यूहंव्यूहविशारदः १० मंडलंभरतश्रेष्ठनानाशस्त्रसमाकुलं सं
पूर्णंयोधमुख्यैश्चतथादंतिपदातिभिः ११ रथैरनेकसाहस्रैः समंतात्परिवारितं अश्ववृंदैर्महद्भिश्चप्रासतोमरधारिभिः १२
नागेनागेरथाःसप्तसप्तचाश्वारथेरथे अन्वश्वेश्वेचर्मिणः सप्तधानुष्काःसप्तचर्मिणः १३ एवंव्यूहंमहाराजतवसैन्यंमहारथैः
स्थितंरणायमहतेभीष्मेणपरिवारितं १४ दशाश्वानांसहस्राणिदंतिनांचतथैवच रथानामयुतंचापिपुत्राश्चतवदंशिताः
१५ चित्रसेनादयःशूराअभ्यरक्षन्पितामहं रक्षमाणाश्चतेःशूरैर्गोप्यमानाश्चतेनते १६ सन्नद्धाःसमदृश्यंतराजानश्चमहा
बलाः दुर्योधनस्तुसमरेदंशितोरथमास्थितः १७ व्यराजतश्रियायुक्तोयथाशक्रस्त्रिविष्टपे ततःशब्दोमहानासीत्पुत्राणांतव
भारत १८ रथघोषश्चविपुलोवादित्राणांचनिःस्वनः भीष्मेणधार्तराष्ट्राणांव्यूढःप्रत्यङ्मुखोययौ १९ मंडलःसुमहाना
सीद्दुर्भेद्योऽमित्रघातिना सर्वतःशुशुभेराजन्रणेऽरीणांदुरासदः २० मंडलंतुसमालोक्यव्यूहंपरमदारुणं स्वयंयुधिष्ठिरोरा

जायहं वज्रमथाकरोत्तदा २१ तथा क्रुद्धेष्वनीकेषु यथास्थानमवस्थिताः रथिनः सादिनश्चैव सिंहनादमथानदन् २२ विभिन्न
तो व्यूहं निर्ययुर्युद्धकाङ्क्षिणः इतरेतरतः शूराः सहसेनाः प्रहारिणः २३ भारद्वाजो ययौ मत्स्यं द्रौणिश्चापि शिखण्डिनं स्वयं दुर्योध
नो राजा पार्षतं समुपाद्रवत् २४ नकुलं सहदेवश्च राजन्मद्रेशमीयतुः विन्दानुविन्दावावन्त्यो युधामन्युमभिद्रुतौ २५ सर्वे नृपास्तु स
मरे धनंजयमयोधयन् भीमसेनं रणे यत्तो हार्दिक्यः समवारयत् २६ चित्रसेनं विकर्णं च तथा दुर्मर्षणं विभो आर्जुनिः समरे राज
न्नतव पुत्रानयोधयत् २७ प्राग्ज्योतिषं तु राजानं हैडिम्बो राक्षसोत्तमः अभिदुद्राव वेगेन मत्तो मत्तमिव द्विपं २८ अलम्बुषस्ततो राजन्
सात्यकिं युद्धदुर्मदं ससैन्यं समरे क्रुद्धो राक्षसः समभिद्रवत् २९ भूरिश्रवा रणे यत्तो धृष्टकेतुमयोधयत् श्रुतायुषं तु राजानं
धर्मपुत्रो युधिष्ठिरः ३० चेकितानस्तु समरे कृपमेवान्वयोधयत् शेषाः प्रतियुयुर्यत्ता भीमसेनं महारथं ३१ ततो राजसहस्राणि
परिवव्रुर्धनंजयं शक्तितोमरनाराचगदापरिघपाणयः ३२ अर्जुनस्तु भृशं क्रुद्धो वार्ष्णेयमिदमब्रवीत् पश्य माधव सैन्यानि धार्त
राष्ट्रस्य संयुगे ३३ व्यूढानि व्यूहविदुषा गाङ्गेयेन महात्मना युद्धाभिकामान् शूरांश्च पश्य माधव दंशितान् ३४ त्रिगर्त्तराजसहितं
भ्रातृभिः पश्य केशव अद्यैतान् घातयिष्यामि पश्यतस्ते जनार्दन ३५ य इमे मां यदुश्रेष्ठ योद्धुकामा रणाजिरे एतावदुक्त्वा कौन्तेयो
धनुर्ज्यामवमृज्य च ३६ ववर्ष शरवर्षाणि नराधिपगणान् प्रति तेऽपि तं परमेष्वासाः शरवर्षैरपूरयन् ३७ तडागमिव धाराभिर्य
था प्रावृषि तोयदाः हाहाकारो महानासीत्तव सैन्ये विशांपते ३८ छाद्यमानौ भृशं कृष्णौ शरैर्दृष्ट्वा महारणे देवा देवर्षयश्चैव गं
धर्वाश्च महोरगाः ३९ विस्मयं परमं जग्मुर्दृष्ट्वा कृष्णौ तथाचितौ ततः क्रुद्धोऽर्जुनो राजन्नैन्द्रमस्त्रमुदीरयत् ४० तत्राद्भुतमप

रणामिविजयस्यपराक्रमं शस्त्रवृष्टिपरैर्मुक्ताशरौघैर्यदवारयत ३१ नचशस्त्रैरनिर्भिन्नंकश्चिदासीद्विशांपते एषांराजसहस्राणांहयानांदन्तिनां
तथा ३२ ह्यभ्यांशरौस्त्रिभिन्नास्तानात्यर्थाविव्याधमारिष तेहन्यमानाः पार्थेनभीष्मंशान्तनवंययुः ३३ अगाधेमज्जमानानांभीष्मस्त्राता
ह्यभवत् आपतन्स्त्रिस्थैतेसत्त्वप्रभग्नंतावकंबलं ३४ संचुक्षुभेमहाराजवातैरिवमहार्णवः इतिश्रीमहाभारतेभीष्मपर्वणि ॥ ॥

संजयउवाच तथाप्रवृत्तेसंग्रामेनिवृत्तेचसुशर्मणि प्रभग्नेषुचवीरेषुपाण्डवेनमहात्मना १ क्षुभ्यमाणेबलेतूर्णंसागरप्रतिमेनव प्रत्युद्या
तेचगांगेयेत्वरितंविजयंप्रति २ दृष्ट्वातुदुर्योधनोराजन्रणेपार्थस्यविक्रमं त्वरमाणाः समभ्येत्यसर्वांस्तानब्रवीन्नृपान् ३ तेषांचप्र
मुखेशूरंसुशर्माणंमहाबलः मध्येसर्वस्यसैन्यस्यभृशंसंहर्षयन्वचः ४ एषभीष्मःशान्तनवोयोद्धुकामोधनंजयं सर्वात्मनाकुरु
श्रेष्ठस्त्यक्त्वाजीवितमात्मनः ५ तंप्रयान्तंपरानीकंसर्वसैन्येनभारत संयत्ताः समरेसर्वेपालयध्वंपितामहं ६ बाढमित्येवमु
क्त्वातुतान्यनीकानिसर्वशः नरेन्द्राणांमहाराजसमाजग्मुःपितामहं ७ ततःप्रयातःसहसाभीष्मःशान्तनवोर्जुनं रणेभारतमा
यान्तमाससादमहाबलं ८ महाश्वेताश्वयुक्तेनभीमवानरकेतुना महतामेघनादेनरथेनातिविराजता ९ समरेसर्वसैन्यानां
मुपयान्तंधनंजयं अभवत्तुमुलोनादोभयाद्दृष्ट्वाकिरीटिनं १० अभीषुहस्तंकृष्णंचदृष्ट्वादित्यमिवापरं मध्यंदिनगतंसंख्येनशेकुः
रभिवीक्षितुं ११ तथाशान्तनवंभीष्मंश्वेताश्वंश्वेतकार्मुकं नशेकुःपाण्डवाद्रष्टुंश्वेतंग्रहमिवोदितम् १२ ससर्वतःपरिवृतस्त्रिगर्तैः
सुमहात्मभिः भ्रातृभिस्तवपुत्रैश्चतथान्यैश्चमहारथैः १३ भारद्वाजस्तुसमरेमत्स्यंविव्याधपत्रिणा ध्वजंचास्यशरेणाजौधनु
श्चैकेनचिच्छिदे तदपास्यधनुश्छिन्नंविराटोवाहिनीपतिः अन्यदादत्तवेगेनधनुर्भारसहंदृढं १४ शरांश्चाशीविषाकारान्ज्व

स्य ४

लितान्पन्नगानिव द्रोणं त्रिभिः प्रविव्याध चतुर्भिश्चास्य वाजिनः १६ ध्वजमेकेन विव्याध सारथिं चास्य पंचभिः धनुश्चैकेषुणा विध्य ननादाक्रुद्धा द्विजर्ष
भः १७ तस्य द्रोणोवधीदश्वांश्छरैः सन्नतपर्वभिः अष्टाभिर्भरतश्रेष्ठ सूतमेकेन पत्रिणा १८ सहताश्वाद्रवप्लुत्य स्यंदनाद्धतसारथिः आ
रुरोह रथं तूर्णं [illegible] पुत्रस्यापि नांवरः १९ ततः स्तनौपिता पुत्रौ भारद्वाजं रथस्थितौ महता शरवर्षेण वारयामासतुर्बलात् २० भर
द्वाजस्ततः क्रुद्धः शरमाशीविषोपमं चिक्षेप समरे तूर्णं शंखं प्रति जनेश्वर २१ स तस्य हृदयं भित्त्वा पीत्वा शोणितमाहवे जगाम धरणीं बाणो लोहिता
र्द्रः कृतच्छविः २२ स पपात रथात्तूर्णं भारद्वाजशराहतः हित्वा धनुः शरांश्चैव पितुरेव समीपतः २३ हतं स्वमात्मजं दृष्ट्वा विराटः प्राद्रवद्भयात्
उत्सृज्य समरे द्रोणं व्यात्ताननमिवांतकं २४ भारद्वाजस्ततस्तूर्णं पांडवानां महाचमूं वारयामास समरे शतशोथ सहस्रशः २५ शिखंड्यपि
महाराज द्रोणिमासाद्य संयुगे आजघान भ्रुवोर्मध्ये नाराचैस्त्रिभिराशुगैः २६ स बभौ नरशार्दूलो ललाटे संस्थितैस्त्रिभिः शिखरैः कांचनमयै
र्मेरुस्त्रिभिरिवोच्छ्रितैः २७ अश्वत्थामा ततः क्रुद्धो निमेषार्धाच्छिखंडिनः सूतं रथमथो राजंस्तुरगानायुधं ध्वजं २८ शरैर्बहुभिरुद्दिश्य पात
यामास संयुगे स हताश्वाद्रथात्तूर्णमवप्लुत्य रथिनां वरः २९ खड्गमादाय निशितं विमलं च शरावरं श्येनवद्व्यचरत्क्रुद्धः शिखंडी शत्रुतापनः
३० सखड्गस्य महाराज चरतस्तस्य संयुगे नांतरं ददृशे द्रोणिस्तदद्भुतमिवाभवत् ३१ ततः शरसहस्राणि बहूनि भरतर्षभ प्रेषयामास समरे द्रौ
णिः परमकोपनः ३२ तामापततीं समरे शरवृष्टिं सुदारुणां असिना तीक्ष्णधारेण चिच्छेद बलिनां वरः ३३ ततोस्य विमलं द्रौणिः
[illegible] शतचंद्रं मनोरमं चर्म चिच्छेद निस्त्रिंशं चास्य खंडयामास संयुगे ३४ शरैश्च बहुशो राजंस्तं च विव्या
ध पत्रिभिः शिखंडी तु ततः खड्गं खंडितं तेन सायकैः ३५ आविध्य व्यसृजत्तूर्णं ज्वलंतमिव पन्नगं तमापतंतं सहसा वज्राशनिसमं

त्वनं ३६ चिच्छेद समरे द्रौणिर्दर्शयन्पाणिलाघवं शिखंडिनं च विव्याध शरैर्बहुभिरायसैः ३७ शिखंडी तु भृशं राजंस्ताड्यमानः शितैः शरैः
आरोहयंतरंगी माधवस्य महात्मनः ३८ सात्यकिश्चापि संक्रुद्धो राक्षसं तं महाहवे अलंबुषं शरैर्घोरैर्विव्याध बलिनं बली ३९ राक्षसेंद्र
स्ततस्तस्य धनुश्चिच्छेद भारत अर्धचंद्रेण समरे तं च विव्याध सायकैः ४० मायां च राक्षसीं कृत्वा शरवर्षैरवाकिरत् तत्राद्भुतमपश्याम शैनेयस्य प
राक्रमं ४१ नासंभ्रमद्यत्समरे वध्यमानः शितैः शरैः ऐंद्रमस्त्रं च वार्ष्णेयो योजयामास भारत ४२ विजयाद्यदनुप्राप्तं माधवेन महात्मना तदस्त्र
भस्मसात्कृत्वा मायां तां राक्षसीं तदा ४३ अलंबुषं शरैर्घोरैरभ्याकिरत सर्वशः पर्वतं वारिधाराभिः प्रावृषीव बलाहकः ४४ तत्तथा पीडितं तेन माध
वेन यशस्विना प्रदुद्राव भयाद्रक्षो हित्वा सात्यकिमाहवे ४५ तमजेयं राक्षसेंद्रं संख्ये मघवतापि च शैनेयः प्राणदज्जित्वा योधानां तव पश्यतां
४६ अवधीत्तावकांश्चापि सात्यकिः सत्यविक्रमः निशितैर्बहुभिर्बाणैस्तेऽद्रवंत भयार्दिताः ४७ एतस्मिन्नेव काले तु द्रुपदस्यात्मजो बली धृ
ष्टद्युम्नं च समरे तरंगी विव्याध पत्रिणा ५० षष्ट्या च त्रिंशता चैव तत्र द्रुतमिवाभवत् तस्य सेनापतिः क्रुद्धो धनुश्चिच्छेद मारिष ५१ हयांश्च
तुरः शीघ्रं निजघान महाबलः शरैश्चैनं सुनिशितैः क्षिप्रं विव्याध सप्तभिः ५२ स हताश्वान्महाबाहुरवप्लुत्य रथाद्बली पदातिरसिमुद्यम्य प्राधा
वत्पार्षतं प्रति ५३ शकुनिस्तमभ्येत्य राजगृध्री महाबलः राजानं सर्वलोकस्य रथमारोपयत्स्वकं ५४ ततो नृपं पराजित्य पार्षतः परवीर
हा निजघ्ने तावकं सैन्यं वज्रपाणिरिवासुरान् ५५ कृतवर्मा रणे भीमं शरैराच्छन्महारथं प्रच्छादयामास च तं महामेघो रविं यथा ५६ त
तः प्रहस्य समरे भीमसेनः परंतपः प्रेषयामास संक्रुद्धः सायकान्कृतवर्मणे ५७ तैर्हन्यमानो विप्रः सात्वतः शस्त्रकोविदः नाकंपत म
हाराज भीममार्छच्छितैः शरैः ५८ तस्याश्वांश्चतुरो हत्वा भीमसेनो महाबलः सारथिं पातयामास ध्वजं च सुपरिष्कृतं ५९ शरैर्बहुविधै

एनेदुर्योधनस्य ५

४१ दुर्योधनधृष्टद्युम्नयोर्युद्धं

श्चैवमाचिनोत्परवीरहा शकलीकृतसर्वांगः न्यपतद्विहृत्समदृश्यत ३० हताश्वाच्चरथात्तूर्णं वृषकस्परथंययौ शृगालस्यतेमहाराजतव
पुत्रस्यपश्यतः ३१ भीमसेनोपिसंक्रुद्धः स्तवसैन्यंसमाद्रवत् निजघानचसंक्रुद्धो दंडपाणिरिवांतकः इतिभीष्मपर्वणि धृतराष्ट्र उवा
सुबहूनिविचित्राणिद्वैरथानिचसंजय पांडूनाममकैः सार्द्धमश्रौषंततजल्पतः १ नचैवमामकंकिंचिद्हृष्टंशंससिसंजय नित्यंपां
डुसुतान्हृष्टानभग्नांश्चैवशंससि २ जीयमानान्विमनसोमामकान्विगतौजसः वदसेसंयुगेसूतदिष्टमेवनसंशयः ३ संजयउवाच
यथाशक्तियथोत्साहंयुद्धेचेष्टंतितावकाः दर्शयंतःपरंशक्त्यापौरुषंपुरुषर्षभाः ४ गंगायाःसुरनद्यावैस्वादुभूतंयथोदकं महोदधिगुणा
भ्याशाल्लवणत्वंनियच्छति ५ तथातत्पौरुषंराजंस्तावकानांमहात्मनां प्राप्यपांडुसुतान्वीरान्व्यर्थीभवतिसंयुगे ६ घटमानान्यथाश
क्तिकुर्वाणान्कर्मदुष्करं नदोषेणकुरुश्रेष्ठतान्योधानांतुमर्हसि ७ तवापराधात्सुमहान्सपुत्रस्यविशांपते पृथिव्याःप्रक्षयोघोरो
यमराष्ट्रविवर्द्धनः ८ आत्मदोषसमुत्पन्नंशोचितुंनार्हसेनृप नहिरक्षंतिराजानःसर्वथात्रापिजीवितं ९ युद्धेनसुकृतान्लो
कानिच्छंतिवसुधाधिपाः चमूंविगाह्ययुध्यंतेनित्यंस्वर्गपरायणाः १० पूर्वाह्णेतुमहाराजप्रावर्त्ततजनक्षयः तन्ममैकमनाभूत्वा
शृणुदेवासुरोपमं ११ आवंत्यौतुमहेष्वासौमहात्मानौमहाद्युती इरावंतमभिप्रेक्ष्यसमेयातांरणोत्कटौ १२ तेषांप्रववृतेयुद्धंतु
मुलंलोमहर्षणं इरावांस्तुसंक्रुद्धोभ्रातरौदेवरूपिणौ १३ विव्याधनिशितैस्तूर्णंशरैःसन्नतपर्वभिः तावेनंप्रत्यविध्येतांसमरेचित्रयो
धिनौ १४ युध्यतांहितयोराजन्विशेषोनस्मदृश्यते यततांशत्रुनाशायकृतप्रतिकृतैषिणां १५ इरावांस्तुततोराजन्ननुविंदस्यसायकैः
चतुर्भिश्चतुरोवाहाननयद्यमसादनं १६ भल्लाभ्यांसुतीक्ष्णाभ्यांधनुःकेतुंचमारिष चिच्छेदसमरेराजंस्तदद्भुतमिवाभवत् १७ त्यक्त्वानुविंदो

७१ ६१

थरथंविंदस्यरथमास्थितः धनुर्गृहीत्वासुदृढंभारसाहमनुत्तमं १८ तावेकस्थौरणेवीरावावंत्यौबलिनांवरौ शरान्मुमुचतुस्तूर्णंगिरावतिमहा
त्मनि १९ ताभ्यांमुक्तामहावेगाः शराः कनकभूषणाः दिवाकररथंप्राप्यछादयामासुरंबरं २० इरावांस्तुरणेक्रुद्धोभ्रातरौतौमहारथौ
ववर्षशरवर्षेणसारथिंचाभ्यपातयत् २१ तस्मिन्निपतितेराजन्नानमत्वेथसारथौ रथः प्रदुद्रावदिशः समुद्भ्रांतहयस्ततः २२ तौसजित्वा
महाराजनागराजसुतासुतः पौरुषंख्यापयंस्तूर्णंव्यधमत्तववाहिनीं २३ साबध्यमानासमरेधार्तराष्ट्रीमहाचमूः वेगान्बहुविधां
श्चक्रेविषंपीत्वेवमानवः २४ हैडिंबोराक्षसेंद्रस्तुभगदत्तंसमाद्रवत् रथेनादित्यवर्णेनसध्वजेनमहाबलः २५ ततः प्राग्ज्योतिषो
राजानागराजंसमास्थितः यथावज्रधरः पूर्वंसंग्रामेतारकामये २६ तत्रदेवाः सगंधर्वाऋषयश्चसमागताः विशेषंनस्मविविदुर्है
डिंबभगदत्तयोः २७ यथासुरपतिः शक्रस्त्रासयामासदानवान् तथैवसमरेराजन्द्रावयामासपांडवान् २८ तेनविद्राव्यमाणा
स्तेपांडवाः सर्वतोदिशं त्रातारंनाभ्यविंदंतस्वेष्वनीकेषुभारत २९ भैमसेनिंरथस्थंतुतत्रापश्याममभारत शेषाविमनसोभूत्वाप्राद्रवंत
तमहारथाः ३० निवृत्तेषुतुपांडूनांपुनः सैन्येषुभारत आसीन्निष्टानकोघोरस्तवसैन्यस्यसंयुगे ३१ घटोत्कचस्ततोराजन्भगदत्तंमहा
रणे शरैः प्रछादयामाससमेरुंगिरिमिवांबुदः ३२ निहत्यतांछरान्राजाराक्षसस्यधनुश्च्युतान् भैमसेनिंरणेतूर्णंसर्वमर्मस्वताडय
त ३३ सताड्यमानोबहुभिः शरैः सन्नतपर्वभिः नविव्यथेराक्षसेंद्रोभिद्यमानइवाचलः ३४ तस्यप्राग्ज्योतिषः क्रुद्धस्तोमरान्सच
तुर्दश प्रेषयामाससमरेतांश्चचिछेदराक्षसः ३५ सतांछित्वामहाबाहुस्तोमरान्निशितैः शरैः भगदत्तंचविव्याधसप्तत्याकंकपत्रि
भिः ३६ ततः प्राग्ज्योतिषोराजाप्रहसन्निवभारत तस्याश्वांश्चतुरोराजन्पातयामाससायकैः ३७ सहताश्वेरथेतिष्ठन्राक्षसेंद्रः प्रतापवान्

शक्तिंचिक्षेपवेगेनप्राग्ज्योतिषगजंप्रति ३८ तामापतंतींसहसाशरैस्तांप्रवेगितां त्रिधाचिच्छेदरनपतिः सात्वकीर्पत्तमेदिनी ३९ श
क्तिंविनिहतांदृष्ट्वाहैडिंवःमाद्रवमत्पात यथेंद्रेणरणेषवंनमुचिर्देवसत्तमः ४० तंविजित्यरणेशत्रुंविक्रांतंख्यातपौरुषं अजे
यंसमरेराजन्यमेनवरुणेनच ४१ पांडवीसमरेसेनांसममर्दससकुंजरः यथावनगजोराजन्मृद्नन्रतिपद्मिनीं ४२ मद्रेश्वरश्च
समरेयमाभ्यांसहसंगतः स्वस्त्रीयौछादयांचक्रेशरौघैःपांडुनंदनौ ४३ सहदेवस्तुसमरेमातुलंदृश्यसंगतं अवारयच्छरौघेण
मेघोयद्वद्दिवाकरं ४४ छाद्यमानःशरौघेणहृष्टरूपतरोभवत् तयोश्चाप्यभवत्प्रीतिरतुलामातृकारणात् ४५ ततःप्रहस्यसमरेन
कुलस्यमहारथः अश्वान्वैचतुरोराजंश्चतुर्भिःसायकोत्तमैः ४६ मेषयामाससमद्रेशोयमस्यसदनंप्रति हताश्वात्तुरथात्तूर्णमवप्लुत्य
महारथः ४७ आरुरोहततोयानंभ्रातुरेवयशस्विनः एकस्थौतुरणोशूरौदृढेविक्षिप्यकार्मुके ४८ मद्रराजरथंक्रुद्धौछादयामास
तुःक्षणात् सछाद्यमानोवहुभिःशरैःसन्नतपर्वभिः ४९ स्वस्त्रीयाभ्यांनरव्याघ्रोनाकंपतयथाचलः प्रहसन्निवतांचापिश
रवृष्टिंजघानह ५० सहदेवस्ततःक्रुद्धःशरमुद्यम्यवीर्यवान् मद्रराजमभिप्रेक्ष्यप्रेषयामासभारत ५१ सशरःप्रेषितस्तेनगरुत्मा
निववेगवान् मद्रराजंविनिर्भिद्यनिपपातमहीतले ५२ सगाढविद्धोव्यथितोरथोपस्थेमहारथः निषसादमहाराजकश्मलंच
जगामह ५३ तंविसंज्ञंनिपतितंसूतः संप्रेक्ष्यसंयुगे अपोवाहरथेनाजौयमाभ्यामभिपीडितं ५४ दृष्ट्वामद्रेश्वररथंधार्तराष्ट्राःपरा
ङ्मुखं सर्वेविमनसोभूत्वानेदमस्तीत्यचिंतयन् ५५ निर्जित्यमातुलंसंख्येमाद्रीपुत्रौमहारथौ दध्मतुर्मुदितौशंखौसिंहनादंविनेदतुः
५६ अभ्यद्रवेतांसंहृष्टौतवसैन्यंविशांपते यथादैत्यचमूंराजन्निंद्रोपेंद्राविवामरौ ५७ इतिश्रीमहाभारतेभीष्मपर्वणि ॥ ॥

नू५ ना

संजयउ० ततोयुधिष्ठिरोराजामध्यंप्राप्तेदिवाकरे श्रुतायुधमभिप्रेक्ष्य चोदयामासवाजिनः १ अभ्यधावत्ततोराजाश्रुतायुधमरिंदमं विनि
घ्नन्सायकैस्तीक्ष्णैर्नवभिर्नतपर्वभिः २ ससंवार्यरणोराजन्प्रेषितोधर्मसूनुना शरान्सप्तमहेष्वासः कौंतेयायसमार्पयत् ३ ततस्सकवचं
भित्वापपुःशोणितमाहवे असूनिवविचिन्वंतोदेहेतस्यमहात्मनः ४ पांडवस्तुभृशंविद्धस्तेनराज्ञामहात्मना रणेवराहकर्णेनराजानंहृदिविव्याधे
५ अथापरेणभल्लेनकेतुंतस्यमहात्मनः रथश्रेष्ठोरथात्तूर्णंभूमौपार्थोन्यपातयत् ६ केतुंनिपतितंदृष्ट्वाश्रुतायुःसतुपार्थिवः पांडवंनिशितै
स्तीक्ष्णैराजन्विव्याधसप्तभिः ७ ततःक्रोधात्प्रजज्वालधर्मराजोयुधिष्ठिरः यथायुगांतेभूतानिधक्ष्यन्निव हुताशनः ८ क्रुद्धंतुपांडवं
दृष्ट्वादेवगंधर्वराक्षसाः प्रविव्यथुर्महाराजव्याकुलंचाप्यभूज्जगत् ९ सर्वेषांचैवभूतानामिदमासीन्मनोगतं त्रींल्लोकानद्यसंक्रुद्धोनृपो
यंधक्ष्यतीतिवै १० ऋषयश्चैवदेवाश्चचक्रुःस्वस्त्ययनंमहत् लोकानांन्नपशांत्यर्थंक्रोधितेपांडवेतदा ११ सचक्रोधसमाविष्टः
सृक्किणीपरिसंलिहन् दधारात्मवपुर्घोरंयुगांतादित्यसंनिभं १२ ततस्सर्वाणिसैन्यानितावकानिविशांपते निराशान्यभवंस्तत्रजीवि
तंप्रतिभारत १३ सतुधैर्येणतंकोपंसन्निवार्यविशांपते श्रुतायुषःप्रचिच्छेदमुष्टिदेशेमहद्धनुः १४ अथैनंछिन्नधन्वानंनाराचे
नस्तनांतरे निर्बिभेदरणेराजासर्वसैन्यस्यपश्यतः १५ सत्वरंचरणेराजंस्तस्यवाहनमात्मनः निजघानशरैःक्षिप्रंसूतंचसुमहा
बलः १६ हताश्वंतुरथंत्यक्त्वादृष्ट्वाराज्ञश्चपौरुषं विप्रदुद्रावबेगेनश्रुतायुःसमरेतदा १७ तस्मिन्जितेमहेष्वासेधर्मपुत्रेणा
संयुगे दुर्योधनबलंराजन्सर्वमासीत्पराङ्मुखं १८ एतत्कृत्वामहाराजधर्मराजोयुधिष्ठिरः व्यात्ताननोयथाकालस्तवसैन्यंजघा
नह १९ चेकितानस्तुवार्ष्णेयोगौतमंरथिनांवरं प्रेक्षतांसर्वसैन्यानांछादयामाससायकैः २० सन्निवार्यशरांस्तांस्तुकृपःशारद्वतोयुधि चे

कितानं रणे यत्तं राजन्विव्याध पत्रिभिः २१ अथापरेण भल्लेन धनुश्छित्वा मारिष सारथिं चास्य समरे छित्वा प्रहसन्नभ्यपातयत् २२ हृ
योश्वान्सावधीद्राजन्नुभौ तौ पार्ष्णिसारथी सोवप्लुत्य रथात्तूर्णं गदां जग्राह सात्वतः २३ स तया वीरघातिन्या गदया गदिनां वरः गौतमस्य
हयान्हत्वा सारथिं चाप्यपातयत् २४ भूमिष्ठो गौतमस्तस्य शरांश्चिक्षेप षोडश ते शराः सात्वतं भित्वा प्राविशंत धरातले २५ चेकितानस्ततः क्रु
द्धः पुनश्चिक्षेप तां गदां गौतमस्य वधाकांक्षी वृत्रस्येव पुरंदरः २६ तमापतंतीं विपुलामश्मगर्भां महागदां शरैरनेकसाहस्रैर्वारयामास गौ
तमः २७ चेकितानस्ततः खड्गं कोषादुद्धृत्य भारत लाघवं परमास्थाय गौतमं समुपाद्रवत् २८ गौतमोपि धनुस्त्यक्त्वा प्रगृह्यासिं सुसंयतः
वेगेन सुमहाराज चेकितानमुपाद्रवत् २९ तावुभौ वलसंपन्नौ निस्त्रिंशवरधारिणौ निस्त्रिंशाभ्यां सुतीक्ष्णाभ्यामन्योन्यं संततक्षतुः ३० नि
स्त्रिंशवेगाभिहतौ ततस्तौ पुरुषर्षभौ धरणीमनुसंप्राप्तौ सर्वभूतनिषेवितौ ३१ मूर्छयाभिपरीतांगौ व्यायामेन विमोहितौ ततोभ्यधावद्वे
गेन करकर्षः सुहृत्तया ३२ चेकितानं तथाभूतं दृष्ट्वा समरदुर्जयं रथमारोपयच्चैनं सर्वसैन्यस्य पश्यतः ३३ तथैव शकुनिः शूरः श्याल
स्तव विशांपते आरोपयद्रथं तूर्णं गौतमं रथिनां वरं ३४ सौमदत्तिं तथा क्रुद्धो धृष्टकेतुर्महावलः नवत्या निशितैर्वीरो राजन्विव्या
ध वक्षसि ३५ सौमदत्तिरुरस्थैस्तैः रथं सायकोत्तमैः विरथं चैनमालोक्य हताश्वं हतसारथिः ३६ महता सरवर्षेण छादयामास सं
युगे स च तं रथमुत्सृज्य धृष्टकेतुर्महात्मनाः ३७ आरुरोह ततो यानं शतानीकस्य मारिष चित्रसेनो विकर्णश्च राजन्दुर्मर्षणस्तथा ३८
रथिनो हेमसन्नाहाः सौभद्रमभिदुद्रुवुः अभिमन्योस्ततस्तैस्तु घोरं युद्धमवर्तत ३९ शरीरस्य यथा राजन्वातपित्तकफैस्त्रिभिः विरथां
स्तव पुत्रांस्तु कृत्वा राजन्महाहवे ४० न जघान नरव्याघ्रः स्मरन्भीमवचस्तदा ततो राज्ञां बहुशतैर्गजाश्वरथयायिभिः ४१ संवृतं समरे भीष्मं

दैवेपि दुरासदं प्रायांतं शीघ्रमुद्वीक्ष्य परिवातुं सुतांस्तव ४२ अभिमन्युं समुद्दिश्य बालमेकं महारथं वासुदेवमुवाचेदं कौंतेयः श्वे
तवाहनः ४३ चोदयाश्वान् हृषीकेश यत्रैते बहुला रथाः एते हि बहुलैः सं कृता युद्धदुर्मदाः ४४ यथा हन्युर्न नः सेनां तथा माधव चोदय ए
वमुक्तः स वार्ष्णेयः कौंतेयेनामितौजसा ४५ रथं श्वेतहयैर्युक्तं प्रेषयामास संयुगे निष्टानको महानासीत्तव सैन्यस्य मारिष ४६ यद
र्जुनो रणे क्रुद्धः संयातस्तावकान्प्रति समासाद्य तु कौंतेयो राजंस्तान्भीष्मरक्षिणः ४७ सुशर्माणं महाराज इदं वचनमब्रवीत् जाना
मि त्वां युधि श्रेष्ठमत्यंतं पूर्ववैरिणं ४८ अनयस्याद्य संप्राप्तं फलं पश्य सुदारुणं अद्य त्वां दर्शयिष्यामि पूर्वप्रेतान्पितामहान् ४९ एवं प्रजल्प
तस्तस्य बीभत्सोः शत्रुतापन श्रुत्वापि परुषं वाक्यं सुशर्मा रथयूथपः ५० न चैनमब्रवीत्किंचिच्छुभं वा यदि वाशुभं अभिगत्यार्जुनं वीरं राजभि
र्बहुभिर्वृतः ५१ पुरस्तात्पृष्ठतश्चैव पार्श्वतश्चैव सर्वतः परिवार्यार्जुनं संख्ये तव पुत्रा महारथाः ५२ शरैः संछादयामासुर्मेघा इव दिवा
करं ततः प्रववृते घोरः संग्रामः शोणितोदकः ५३ तावकानां च समरे पांडवानां च भारत ५४ इति श्रीमहाभारते भीष्मपर्वाणि संजय उ०
स तुद्यमानस्तु शरैर्धनंजयः पदाहतो नागर इव श्वसन्बली बाणेन बाणेन महारथानां चिच्छेद चापानि रणे प्रसह्य १ चिच्छेद चापा
नि च तानि राज्ञां तेषां रणे वीर्यवतां क्षणेन विव्याध बाणैर्युगपन्महात्मा निःशेषतां तेष्वथ मन्यमानः २ निपेतुराजौ रुधिरप्रदिग्धास्ते
ताडिताः शक्रसुतेन राजन् विभिन्नगात्राः पतितोत्तमांगा गतासवश्छिन्नतनुत्रकायाः ३ महीं गताः पार्थबलाभिभूता विचित्ररू
पा युगपद्विनेशुः दृष्ट्वा हतांस्तान्युधि राजपुत्रांस्त्रिगर्तराजः प्रययौ रथेन ४ तेषां रथानामथ पृष्ठगोपा द्वात्रिंशदन्येऽभ्यपतंत पा
र्थं तथैव ते तं परिवार्य पार्थं विकृष्य चापानि महारवाणि ५ अवीवृषन्बाणमहौघवृष्ट्या यथा गिरिं तोयधरा जलौघैः संपीड्यमानस्तु

भा २

शरौघवृष्ट्याधनंजयस्तांयुधिजातरोषः ६ षष्ट्याशरैःसंयतितैलधौतैर्जघानतानप्यथपृष्ठगोपान् युधिष्ठिरस्यार्जुनमभिजित्यसंख्येधनंजयः
प्रीतिमानायशस्वी ७ अथात्तरम्भीष्मवधायजिष्णुर्वलानिराज्ञांसमरेनिहत्य त्रिगर्त्तराज्ञोनिहतौभीष्मसमहात्मनातानथवंधुवर्गान् ८ रणेषु
रक्तस्तनराधिपांस्तान्जगामपार्थस्त्वरितोवधाय अभिद्रुतंचास्त्रविदांवरिष्ठंधनंजयंवीक्ष्यशिखंडिमुख्याः ९ अभ्युद्ययुस्तेशितशस्त्रहस्तारिर
क्षिषंतोरथमर्जुनस्य पार्थोपितानापततःसमीक्ष्यत्रिगर्तराज्ञासहितान्नवीरान् १० विध्वंसयित्वासमहाधनुष्मान्गांडीवमुक्तैर्निशितैः
पृषत्कैः भीष्मायियासुर्युधिसंददर्शदुर्योधनंसैंधवराजीश्वराज्ञः ११ आवारयिष्यन्नथसंप्रयायमुहूर्त्तमायोध्यरथेनवीरः उत्सृज्यराजा
नमनंतवीर्योजयद्रथादींश्चनृपान्महौजाः १२ ययौततोभीमबलोमनस्वीगांगेयमाजौशरचापपाणिः युधिष्ठिरश्चोग्रबलोमहात्मासमा
ययौत्वरितोजातकोपः १३ मद्राधिपंसमभिसृज्यसंख्येस्वभागमाप्तंतमनंतकीर्तिः सार्द्धंसमाद्रीसुतभीमसेनैर्भीष्मंययौशांतनवंरणा
य १४ तैःसंप्रयुक्तःसमहारथाग्र्यैर्गंगासुतःसमरेचित्रयोधी नविव्यथेशांतनवोमहात्मासमागतैःपांडुसुतैःसमस्तैः १५ अथैत्य
राजायुधिसत्यसंधोजयद्रथोत्युग्रबलोमनस्वी चिच्छेदचापानिमहारथानांप्रसह्यतेषांधनुषावरेण १६ युधिष्ठिरंभीमसेनंयमौचकृ
ष्णंचपार्थंयुधिजातकोपः दुर्योधनोवैरविषोमहात्माजघानवाणैरनलप्रकाशैः १७ कृपेनशल्येनशलेनचैवतथाविभोचित्रसेनेनचा
जौ विद्धःशरैरभिविवृद्धकोपैर्देवायथादैत्यगणैःसमेतैः १८ छिन्नायुधंशांतनवेनराजाशिखंडिनंप्रेक्ष्यचजातकोपः अजातशत्रुः
समरेमहात्माशिखंडिनंक्रुद्धमुवाचवाक्यं १९ उक्त्वातथात्वंपितुरग्रतोमामहंहनिष्यामिमहाव्रतंतंभीष्मंशरौघैर्विमलार्कवर्णैः सत्यंव
दामीतिकृताप्रतिज्ञा २० त्वयानचैनांसफलांकरोषिदेवव्रतंयन्ननिहंसियुद्धे मिथ्याप्रतिज्ञोभवमानवीररक्षस्वधर्मयशःकुलंच २१

नंद्यपि ४

प्रेक्ष्य त्वमीक्षं युधि भीमवेगं सर्वान्निपंतं मम सेन्यसंघान् शरौघजालैरिव तिग्मतेजाः कालो यथा कालकृतः क्रमेण २२ निकृत्तचापः स
मरेऽन्येः स पराजितः शान्तनवेन राज्ञा विहाय वध्वं धनयश्च मेरो रणांश्च कृपास्य सेनानुमुखं तेवर्षं २३ दृष्ट्वा हि भीष्मं तमनन्तवीर्यं भग्नं च सैन्यं द्रवमा
णमेतत् भीतोऽसि नूनं द्रुपदस्य पुत्र तत्याहि ते मुखवर्णो प्रहृष्टः २४ अज्ञायमानेन धनंजयेन महाहवे पश्य युक्तेन वीर कथं हि भीष्मा
दपि यां भयं त्वमद्य प्रकरोषि वीर २५ स धर्मराजस्य वचो निशम्य रूक्षाक्षरं विप्रलापपविद्धं प्रत्यादेशं मन्यमानो महात्मा प्रतत्वरे भीष्म
वधाय राजन् २६ तमापतंतं महता जवेन शिखण्डिनं भीष्ममभिद्रवन्तं आवारयामास हि शल्य एनं शस्त्रेण घोरेण सुदुर्जयेन २७
स चापि दृष्ट्वा समुदीर्यमाणमस्त्रं युगान्ताग्निसमप्रकाशं नासंभ्रमुह्यद् द्रुपदस्य पुत्रो राजन्महेन्द्रप्रतिमप्रभावः २८ तस्थौ च तत्रै
व महाधनुष्मान् शरैः स तदस्त्रं प्रतिबाधमानः अथाददे वारुणमन्यदस्त्रमुग्रं शिखण्डी प्रतिघातमस्य तदस्त्रमस्त्रेण निवार्य
माणं खस्थाः सुराद्ददृशुः पार्थिवाश्च भीष्मस्तु राजन् समरे महात्मा धनुः सचित्रं ध्वजमेव चापि छित्वानदत्पाण्डुसुतस्य वीरो
युधिष्ठिरस्याजमीढस्य राज्ञः ३० ततः समुत्सृज्य धनुः सबाणं युधिष्ठिरं वीक्ष्य भयाभिभूतं ३१ गदां प्रगृह्याभ्यपतत्संख्ये जय
द्रथं भीमसेनः पदातिः तमापतंतं महता जवेन जयद्रथः सगदं भीमसेनं ३२ विव्याध घोरैर्यमदण्डकल्पैः शितैः शरैर्नवभिः
समन्तात् अचिन्तयित्वा स शरांस्तरस्वी वृकोदरः क्रोधपरीतचेताः ३३ जघान वाहान् समरे समस्तान् पराशजान् सिन्धुराजस्य संख्ये ततो
भिवीक्ष्याप्रतिमप्रभावस्तवात्मजस्त्वरमाणो रथेन ३४ अभ्याययौ भीमसेनं निहन्तुं समुद्यतास्त्रः सुरराजकल्पः भीमोऽप्यथैनं सहसा
विनद्य प्रत्युद्ययौ गदयाऽतर्जमानः ३५ समुद्यतां तां यमदण्डकल्पां दृष्ट्वा गदां ते कुरवः समन्तात् विहाय सर्वे तव पुत्रमुग्रं भे मीग सं

तांपरिहर्त्तुकामाः ३६ अपक्रांतास्तु मुले संविमर्दे सुदारुणेभारतमोहनीये अमृष्टचेतास्त्वथ चित्रसेनोमहागदामापततींनिरीक्ष्य ३७
रथंसमुत्सृज्यपदातिराजौ प्रगृह्यखड्गंविपुलंचचर्म अवप्लुतः सिंहइवाचलाग्रात्जगामतंभूमिपभूमिदेशं ३८ गदापिसा प्राप्यरथंसुचि
त्रंसाश्वंससूतंविनिहत्यसंख्ये जगामभूमिंज्वलितामहोल्काभ्रष्टांबराद्गामिवसंचरंती आश्चर्यरूपंसुमहत्त्वदीयादृष्ट्वैवतद्भारतरः
संप्रहृष्टाः ३९ सर्वेविनेदुःसहिताःसमंतात्सपूजिरेतवपुत्रंससैन्यं। इतिभीष्मपर्वणि संजयउ० विरथंतुसमासाद्यचित्रसेनंमनस्विनं
रथमारोपयामासविकर्णस्तनयस्तव १ तस्मिंस्तथावर्तमानेतुमुलेशंकुलेभृशं भीष्मंशांतनवस्तूर्णंयुधिष्ठिरमुपाद्रवत् २ ततःसर
थनागाश्वाःसमकंपंतसृंजयाः मृत्योरास्यमनुप्राप्तंमेनिरेचयुधिष्ठिरं ३ युधिष्ठिरोपिकौरव्योयमाभ्यांसहितःप्रभुः महेष्वासंनरव्या
घ्रंभीष्मंशांतनवंययौ ४ ततःशरसहस्राणिप्रमुंचन्पांडवोयुधि भीष्मंसंछादयामासयथामे[illegible]दिवाकरं ५ तेनसम्यक्प्रणीतानि
शरजालानिभागशः प्रतिजग्राहगांगेयःशतशोथसहस्रशः ६ तथैवशरजालानिभीष्मेणास्तानिमारिष आकाशेसमदृश्यं
तखगमानांव्रजाइव ७ निमेषार्द्धाच्चकौंतेयंभीष्मःशांतनवोयुधि अदृश्यंसमरेचक्रेशरजालानिभागशः ८ ततोयुधिष्ठिरोराजा
कौरव्यस्यमहात्मनः नाराचंप्रेषयामासक्रुद्धआशीविषोपमं ९ असंप्राप्तंतुतंतत्रक्षुरप्रेणमहारथः चिच्छेदसमरेराजन्भीष्मस्तस्य
धनुश्च्युतं १० तंतुछित्वारणेभीष्मोनाराचंकालसंमितं निजघ्नेकौरवेंद्रस्यहयान्कांचनभूषणान् ११ हताश्वंतुरथंत्यक्त्वाधर्मपुत्रो
युधिष्ठिरः आरोहरथंतूर्णंनकुलस्यमहात्मनः १२ यमावपिचसंक्रुद्धःसमासाद्यरणेतदा शरैःसंछादयामासभीष्मःपरपुरंजयः १३
तौतुदृष्ट्वामहाराजभीष्मबाणप्रपीडितौ जगामाथपरांचिंतांभीष्मस्यवधकांक्षया ततोयुधिष्ठिरोवश्यान्राज्ञस्तान्समचोदयत् भीष्मं

शांतनवंसंरब्धेनिहितेतिसुहृद्गणान् १५ ततस्तेपार्थिवाः सर्वेश्रुत्वापार्थिवभाषितं। महतारथवंशेनपरिवव्रुःपितामहं १६
ससमंतात्परिवृतः पितादेवव्रतस्तव चिक्रीडधनुषाराजन्पातयानोमहारथान् १७ तंचरंतंरणेपार्थादद्दृशुःकौरवंयुधि मृग
मध्यंप्रविश्यैवयथासिंहंमहावने १८ तर्जयानंनरव्याघ्रान्स्त्रासयानंचसायकैः दृष्ट्वावित्रेसुर्महाराजसिंहंमृगगणाइव १९
रणेभरतसिंहस्यरदृशुः क्षत्रियागतिं अग्नेर्वायुसहायस्ययथाकक्षंदिधक्षतः २० शिरांशिरथिनांभीष्मःपातयामाससंयु
गे तालेभ्यइवपक्कानिफलानिकुशलोनरः २१ पतद्भिश्चमहाराजशिरोभिर्धरणीतले बभूवतुमुलःशब्दःपततामश्मनामि
व २२ तस्मिन्सुतुमुलेयुद्धेवर्तमानेभयानके सर्वेषामेवसैन्यानामासीद्व्यतिकरोमहान् २३ भिन्नेषुतेषुव्यूहेषुक्षत्रियास्तेरतरंएक
मेकंसमाहूययुद्धायैवोपतस्थिरे २४ शिखंडीतुसमासाद्यभरतानांपितामहं अभिदुद्राववेगेनतिष्ठतिष्ठेतिचाब्रवीत् २५ अ
नादृत्यततोभीष्मस्तंशिखंडिनमाहवे प्रययौसंजयान्क्रुद्धः स्त्रीत्वंचिंत्यशिखंडिनः २६ संजयास्ततोहृष्टाभीष्मंमहारथं
सिंहनादान्बहुविधांश्चक्रुः शंखविमिश्रितान् २७ ततः प्रववृतेयुद्धंव्यतिषिक्तरथद्विपं अपरांदिशमास्थायस्थितेसवितरिप्र
भो २८ धृष्टद्युम्नोथपांचाल्यः सात्यकिश्चमहारथः पीडयंतौभृशंसैन्यंशक्तितोमरवृष्टिभिः २९ शरैर्बहुविधैराजन्याजघ्नु
स्तावकान्रणे तेहन्यमानाः समरेतावकाःपुरुषर्षभ ३० आर्यांयुद्धेमतिंकृत्वानत्यजंतिस्मसंयुगं यथोत्साहंचसमरेजघ्नुर्लो
कंमहारथाः ३१ तत्राक्रंदोमहानासीत्तावकानांमहात्मनां वध्यतांसमरेराजन्पार्षतेनमहात्मना ३२ तंश्रुत्वाविनदंघोरंता
वकानांमहारथौ विंदानुविंदावावंत्यौपार्षतंप्रत्युपस्थितौ ३३ तौतस्यतुरगान्हत्वात्वरमाणौमहारथौ छादयामासतुरुभौशरव

षेणपार्षतं ३४ अवप्लुत्यायपांत्योरथात्तरंगमहावलः आरोहरथंतत्तरांसात्यकेःसुमहात्मनः ३५ ततोयुधिष्ठिरोराजाप्रमह
त्या सेनयावृत्त आवंत्यौसमरेक्रुद्धावधावत्तपरंतपौ ३६ तथैवतत्वयुत्त्रोपि सर्वोद्योगेनमारिष विंदानुविंदौसमरेपरिवार्याव
तस्थिरे ३७ अर्जुनश्चापिसंक्रुद्धः क्षत्रियान्क्षत्रियर्षभ अयोधयतसंग्राममेव [illegible] पाणिरिवासुरान् ३८ द्रोणश्चसमरेक्रुद्धः पुत्रस्य
प्रियकृत्तव व्यधमत्सर्वपांचालांस्तूलराशिमिवानलः ३९ दुर्योधनपुरोगास्तु पुत्रास्तवविशांपते परिवार्यरणेभीष्मंयुयुधुःपांड
वैःसह ४० ततोदुर्योधनोराजालोहितायतिभास्करे अब्रवीत्तावकान्सर्वान्त्वरध्वमितिभारत ४१ युध्यतांतुतथातेषांकुर्वतांकर्मदुष्करं
अस्तंगिरिमथारूढेनप्रकाशतिभास्करे ४२ प्रावर्ततनदीघोराशोणितौघतरंगिणी गोमायुशतसंकीर्णाद्रशोनत्तरंगदामुखे ४३
शिवाभिरशिवाभिश्चश्रूयंतीभिःसमंततः घोरमायोधनंजज्ञेभत[illegible]संकुसुमाकुलं ४४ राक्षसाश्चपिशाचाश्चतथान्येपिशिता
शनाःसमंततोव्यदृश्यंतशतशोथसहस्रशः ४५ अर्जुनोथसुशर्मादीन्राज्ञस्सहपदानुगान् विजित्यपृतनामध्येययौस्वशिविरं
प्रति ४६ युधिष्ठिरोपिकौरव्योभ्रातृभ्यांसहितस्तदा ययौस्वशिविरंराजन्निशायां [illegible] सेनयावृतः ४७ भीमसेनोपिराजेंद्रदु
र्योधनमुखान्रथान् अवजित्यततःसंख्येययौस्वशिविरंप्रति ४८ दुर्योधनोपिनृपतिःपरिवार्यनिवारणे भीष्मंशांतनवंतूर्णंप्र
यातःशिविरंप्रति ४९ द्रोणोद्रौणिःकृपःशल्यःकृतवर्माचसात्वतः परिवार्यचमूंसर्वेप्रययुःशिविरंप्रति ५० तथैवसात्यकी
राजे[illegible] धृष्टद्युम्नश्चपार्षतः परिवार्यरणेयोधान्ययुःशिविरंप्रति ५१ एवमेतेमहाराजतावकाःपांडवैःसह पर्यवर्त्तंतसहिता
निशाकालेपरंतप ५२ ततःस्वशिविरंगत्वापांडवाःकुरुभिःसह अविशंतमहाराजपूजयंतःपरस्परं ५३ रक्षांकृत्वात्मनःशूराः

हृष्टाः गुल्मान्यथाविधि अपनीयत शल्यांस्ते स्नात्वा च विविधैर्जलैः २४ कृतस्वस्त्ययनाः सर्वे संस्तूयमाना बन्दिभिः गीतवादि
त्रशब्देन च क्रीडुस्ते यशस्विनः २५ मुहूर्तादिव तत्सर्वमभवत्स्वर्गसंमितं नहि युद्धकथां काचित्तत्र चक्रुर्महारथाः २६ ते प्रसु
प्तेबले तत्र परिश्रान्तजने नृप हस्त्यश्वबहुले राजन्प्रेक्षणीये बभूवतुः २७ इति भीष्मपर्वणि सप्तमदिवसयुद्धसमाप्तं ॥ ॥
सञ्जय उवाच परिणाम्य निशां तां तु सुखं सुप्त्वा जनेश्वराः कुरवः पाण्डवाश्चैव पुनर्युद्धाय निर्ययुः १ ततः शब्दो महानासीत्सैन्ययोरुभयो
रपि निर्गच्छमानयोः संख्ये सागरप्रतिमो महान् २ ततो दुर्योधनो राजा चित्रसेनो विविंशतिः भीष्मश्च रथिनां श्रेष्ठो भारद्वाजश्च वै द्विजः
३ एकीभूताः सुसंयत्ताः कौरवाणां महारथाः व्यूहाय निर्दध्र राजन्पाण्डवान्प्रति दंशिताः ४ भीष्मः कृत्वा महाव्यूहं पितातव विशां
पते सागरप्रतिमं घोरं वानोर्मिहतरङ्गिणं ५ अग्रतः सर्वसैन्यानां भीष्मः शान्तनवो ययौ मालवैर्दाक्षिणात्यैश्च आवन्त्यैश्च समन्वितः
६ ततोऽनन्तरमेवासीद्भारद्वाजः प्रतापवान् पुलिन्दैः पारदैश्चापि तथा क्षुद्रकमालवैः ७ द्रोणादनन्तरो यत्तो भगदत्तः प्रतापवा
न् मागधैश्च कलिङ्गैश्च पिशाचैश्च विशांपते ८ प्राग्ज्योतिषादनु नृपः कौशल्योऽथ बृहद्बलः मेकलैस्त्रैपुरैश्चैव चिचुकैश्च
समन्वितः ९ बृहद्बलात्ततः शूरस्त्रैगर्तः प्रस्थलाधिपः काम्बोजैर्बहुभिः सार्द्धं यवनैश्च सहस्रशः १० द्रौणिस्तु रभसः शू
रः त्रिगर्तादनु भारत प्रययौ सिंहनादेन नादयानो धरातलं ११ तथा सर्वेण सैन्येन राजा दुर्योधनस्तदा द्रौणेरनन्तरं प्रा
यात्सोदरैः परिवारितः १२ दुर्योधनादनु ततः कृपः शारद्वतो ययौ एवमेष महाव्यूहः प्रययौ सागरोपमः १३ रेजुस्तत्र पता
काश्च श्वेतच्छत्राणि चाविभो अङ्गदान्यथ चित्राणि तोमराणि धनूंषि च १४ तं तु दृष्ट्वा महाव्यूहं तावकानां महारथः युधिष्ठि

भ

भैं वाणोर्मि
हयतरंगिणी
५

१२

रोऽब्रवीत्तूर्णं पार्षतं पृतनापतिं १५ पश्य व्यूहं महेष्वासं निर्मितं सागरोपमं प्रतिव्यूहं त्वमपि हि कुरु पार्षत मा चिरं १६ [illegible]
[illegible] ततः स पार्षतः क्रूरं व्यूहं चक्रे सुदारुणं शृंगाटकं महाराज परव्यूहविनाशकं १७ शृंगाभ्यां भीम
सेनश्च सात्यकिश्च महारथः रथैरनेकसाहस्रैस्तथा हयपदातिभिः १८ नाभ्यामभून्नरश्रेष्ठः श्वेताश्वः कृष्णसारथिः मध्ये यु
धिष्ठिरो राजा माद्रीपुत्रौ च पाण्डवौ १९ तथेतरे महेष्वासाः सहसेना महा[illegible] रथाः व्यूहं तं पूरयामासुर्व्यूहशास्त्र
विशारदाः २० अभिमन्युस्ततः पश्चाद्विराटश्च महारथः द्रौपदेयाश्च संहृष्टा राक्षसश्च घटोत्कचः २१ एवमेतं महाव्यूहं व्यूह्य भार
त पाण्डवाः अतिष्ठन्समरे शूरा योद्धुकामा जयैषिणः २२ भेरीशब्दाश्च तुमुला विमिश्राः शंखनिस्वनैः क्ष्वेडितास्फोटितोत्क्रुष्टैः सुभी
माः सर्वतो दिशः २३ ततः शूराः समासाद्य समरे ते परस्परं नेत्रैरनिमिषै राजन्नवैक्षन्त परस्परं २४ नामभिस्ते मनुष्येन्द्राः पूर्वं योधाः प
रस्परं युद्धाय समवर्तन्त समाहूयेतरेतरं २५ ततः प्रववृते युद्धं घोररूपं भयानकं तावकानां परेषां च निघ्नतामितरेतरं २६ नारा
चा निशिताः संख्ये संपतन्ति स्म भारत व्यात्ताननाभयकरा उरगा इव सर्वशः २७ निष्पेतुर्विमलाः शक्त्यस्तैलधौताः समंततः अंबुदे
भ्यो यथा राजन्भ्राजमानाः शतह्रदाः २८ गदाश्च विमलैः पट्टैः हेमवद्भिर्विभूषिताः पतन्त्यस्तत्र दृश्यन्ते गिरिशृंगोपमाः शुभाः
२९ निस्त्रिंशाश्च व्यराजन्त विमलांबरसन्निभाः आर्षभाणि च चर्माणि शतचंद्राणि भारत ३० अशोभन्त रणे राजन्पतमानानि
सर्वशः तेनोभं [illegible] समरे सैन्ये युध्यमाने नराधिप ३१ अशोभेतां यथा दैवे सैन्ये समुद्यते अभ्यद्रवन्त समरे ते अन्योन्यं सम
ततः ३२ रथास्तु रथिभिस्तूर्णं प्रेषिताः परमाहवे युगैर्युगानि संश्लिष्य युयुधुः पार्थिवर्षभाः ३३ दंतिनां युध्यमानानां संघर्षा

क्वचिदुद्ययोधाः समन्ततः १४

तावकोभवत् दंतेषु भरतश्रेष्ठ सधूमः सर्वतोदिशः ३४ प्रासैरभिहताः पतमानाः स्मदृश्यंते गिरिशृंगाणि नागाश्च ३५ पादाताश्चा
प्यदृश्यंत निघ्नंतो हि परस्परं चित्ररूपधराः शूराः नखरप्रासयोधिनः ३६ अन्योन्यंते समासाद्य कुरुपांडवसेनकाः शरैर्नानाविधैर्घो
रैरणे निन्युर्यमक्षयं ३७ ततः शांतनवो भीष्मो रथघोषेण नादयन् अभ्यागमद्रणे पांडून्धनुःशब्देन मोहयन् ३८ पांडवानां रथाश्चा
पि नदंतो भैरवं रवं अभ्यद्रवंत संयत्ता धृष्टद्युम्नपुरोगमाः ३९ ततः प्रववृते युद्धं तव तेषां च भारत नराश्वरथनागानां व्यतिषक्तं परस्परं ४०
इति भीष्मपर्वणि [illegible] संजय उवाच भीष्मं तु समरे क्रुद्धं तपंतं समंततः न शेकुः पांडवा द्रष्टुं तपंतमिव भास्करं १ ततः सर्वाणि सैन्यानि धर्म
पुत्रस्य शासनात् अभ्यधावंत गांगेयं मर्दयंतं शितैः शरैः २ स तु भीष्मो रणश्लाघी सोमकान्सहसृंजयान् पांचालांश्च महेष्वासान्पा
तयामास सायकैः ३ ते वध्यमाना भीष्मेण पांचालाः सोमकैः सह भीष्ममेवाभ्ययुस्तूर्णं त्यक्त्वा मृत्युकृतं भयं ४ स तेषां रथिनां वीरो भीष्मः
शांतनवो बली चिच्छेद समरे राजन्बाहूनथ शिरांसि च ५ विरथान्रथिनश्चक्रे पिता देवव्रतस्तव तत्रासीत्सुमहान्कश्चित्सादिनां च विशां
पते अन्येत्र रथिनां श्रेष्ठ दृष्ट्वा भीमसेनान्महाबलात् ८ स हि भीष्मं समासाद्य घातयामास संयुगे ततो निष्टानको घोरो भीष्मभीमसमागमे
बभूव सर्वसैन्यानां घोररूपो भयानकः तथैव पांडवा हृष्टाः सिंहनादमथानदन् १० ततो दुर्योधनो राजा सोदर्यैः प परिवारितः भीष्मं जुगो
प समरे वर्तमाने महाक्षये ११ भीमस्तु सारथिं हत्वा भीष्मस्य रथिनां वरः प्रद्रुताश्वे रथे तस्मिन्द्रवमाणे समंततः १२ सुनाभस्य शरे
णाशु शिरश्चिच्छेद भारत क्षुरेणापतद्विसृष्टेन महता न्यपतद्भुवि १३ हते तस्मिन्महाराज तव पुत्रे महारथे नामृष्यंत रणे शूराः सोदराः

भी०

२६४

मसमंयुगे १४ आदित्यकेतुर्बहुकाशी रथोमहोदरः अपराजितः पंडितको विशालाक्षश्च दुर्जयः १५ यांस्त्वं चित्रसन्नाहा विचित्रक
वचायुधाः अभ्यद्रवंतसंग्रामे योद्धुकामा अरिंदमं १६ महोदरस्तु समरे भीमं विव्याध पत्रिभिः नवभिर्वज्रसंकाशैर्नमुचिं वृत्रहा यथा १७
आदित्यकेतुः सप्तत्या बह्वाशी चापि पंचभिः नवत्या कुंडधारस्तु विशालाक्षश्च सप्तभिः १८ अपराजितो महाराज पराजिष्णुर्महारथः
शरैर्बहुभिरानर्छद्भीमसेनं महाबलं १९ रणे पंडितकश्चैनं त्रिभिर्बाणैः समार्पयत् स तन्न ममृषे वीरः शत्रुभिर्वधमाहवे २० धनुः प्र
पीड्य वामेन करेणामित्रकर्शनः शिरश्चिच्छेद समरे शरेणानतपर्वणा २१ अपराजितस्य सुनसं तव पुत्रस्य संयुगे पराजितस्य
भीमेन निपपात शिरो महीं २२ अथापरेण भल्लेन कुंडधारं महारथं प्राहिणोन्मृत्युलोकाय सर्वलोकस्य पश्यतः २३ ततः पुनरमे
यात्मा संधाय विशिखं मृधे प्रेषयामास समरे पंडितं प्रति भारत २४ स शरः पंडितं हत्वा विवेश धरणीतलं यथा नरं निहत्य भुज
गः कालचोदितः २५ विशालाक्षशिरश्छित्वा पातयामास भूतले त्रिभिः शरैरदीनात्मा स्मरन्क्लेशं पुरातनं २६ महोदरं महेष्वासं
नाराचेन स्तनांतरे भीमः शरेणानतपर्वणा विव्याधामास समरे क्रुद्धो यमसदनं प्रति २७ प्रहृष्टः पुत्रास्तव विशांपते समस्मान्
हितस्तं संप्रभायां तस्य भाषितं ३० ततो दुर्योधनो राजा भ्रातृव्यसनकर्शितः अब्रवीत्तावकान्सर्वान्भीमो यं युधि वध्यतां ३१ एवमेते महेष्वासाः पु
त्रास्तव विशांपते भ्रातॄन्संदृश्य निहतान्स्मरंतो हितं वचः ३२ युद्धकवान्महाप्राज्ञः क्षत्ता हितमनामयं तदिदं समनुप्राप्तं वचनं सत्यवादि
नः ३३ लोभमोहसमाविष्टः पुत्रप्रीत्या जनाधिप न बुध्यसे पुरा यत्तत्तथ्यमुक्तं हितं वचः ३४ तथैव च वधार्थाय पुत्राणां पांडवो बली नू

नानारे विव्याध समरे एजन सहतो न्यपतद्भुवि ३२ आदित्यकेतोः प्रच्छुरं वाच्छित्वा बाणेन संयुगे भल्लेन भृशतीक्ष्णेन शिरश्चिच्छेद भारत २८ बह्वाशि

राम०

४ X २६४

नेजातोसिमहाबाहुर्यथाहंभीष्मकौरवान ३५ ततोदुर्योधनोराजाभीष्ममासाद्यमारिष द्रोणे नमहताविष्टोविललापातुरः स्थितः ३६ निह
ताश्चातरः शूराभीष्मद्रोणेनमेयुधि येयतमानास्तथा सेपिहताः सर्वेसैनिकाः ३७ भवान्मम्प्रस्थितस्तयानिघ्नन्नस्मान्नोपेक्षते सोहंकापथमारूढः
पश्यदैवमिदंमम ३८ राज्ञस्तुतद्वचः क्रूरंपितास्तेवत्रनन्दत दुर्योधनमिदंवाक्यमब्रवीत्साश्रुलोचनं ३९ उक्तोमेतन्मयापूर्वंद्रोणेनविदुरे
णच गांधार्याचयशस्विन्यातत्वंतातनबुद्धवान ४० समयश्चमयापूर्वंकृतेयं शत्रुसूदन नाहंयुधिविमोक्तव्योनाप्याचार्यः कथंचन ४१
पंर्यहिधार्त्तराष्ट्राणांभीमोद्रक्ष्यतिसंयुगे हनिष्यतिरणेतंतंसत्यमेतद्ब्रवीमिते ४२ सत्वराजन्स्थिरोभूत्वादृढांकृत्वारणेमतिं योधयस्वरणे
पार्थान्स्वर्गंकृत्वापरायणं ४३ नशक्याः पांडवाजेतुंदेवैरपिसवासवैः तस्माद्युद्धेस्थिरांकृत्वामतिंयुद्धस्वभारत ४४ इतिभीष्मपर्वणि
धृतराष्ट्रउवाच दृष्ट्वाममहतान्पुत्रान्बहूनेकेनसंजय भीष्मद्रोणाः कृपश्चैवकिमकुर्वतसंयुगे १ अहन्यहनिमेपुत्राः क्षयंगच्छंति
संयुगे मन्येहंसर्वथासूतदैवेनोपहतोभृशं २ यत्रमेतनयाः सर्वेहीयंतेनजयंत्युत यत्रभीष्मस्यद्रोणस्यकृपस्यचमहात्मनः ३ सौ
मदत्तेश्चवीरस्यभागदत्तस्यचोभयोः अश्वत्थाम्नस्तथाताततथाशूराणांसुमहात्मनां ४ अन्येषांचैवशूराणांमध्यगास्तनयामम यदहन्य
न्तसंग्रामेकिमन्यद्भागधेयतः ५ नहिदुर्योधनोमंदः पुराप्रोक्तमबुध्यत वार्यमाणोमयातातभीष्मेणविदुरेणच ६ गांधार्याचैवदुर्मेधाः
सततंहितकाम्यया नावबुध्यत्पुरामोहात्तस्यप्राप्तमिदंफलं ७ यद्भीमसेनः समरेपुत्रान्ममविशेषतः अहन्यहनिसंक्रुद्धोनयतेयमसा
दनं ८ संजयउवाच इदंतत्समनुप्राप्तंक्षत्तुर्वचनमुत्तमं नबुद्धवानसिविभोप्रोच्यमानंहितंतदा ९ निवारयसुतान्द्यूतात्पांडवा
न्माद्रुहेतिच सुहृदांहितकामानांब्रुवतांतत्तदेवच १० नशुश्रूषसित्वद्वाक्यमार्त्तः पथ्यमिवौषधं तदेवत्वामनुप्राप्तंवचनंसाधुभाषि

ख

भी०

३६५

२१

तं ११ विद्रुद्रुवुर्भीष्मं बाणांस्तथा मेघांशितैः ... विशदां अकृत्वा वचनं पथ्यं क्षयं गच्छंति कौरवाः १२ तेषां स्वसमनुप्राप्तं पूर्वमेव विशांपते त
स्मान्मध्यरात्तलेन पथा युद्धमवर्त्तत १३ मध्याह्ने सुमहारौद्रः संग्रामः समपद्यत लोकक्षयकरो राजंस्तन्मे निगदतः शृणु १४ ततः सर्वा
णि सैन्यानि धर्मपुत्रस्य शासनात् संरब्धान्यभ्यधावंत भीष्ममेव जिघांसया १५ धृष्टद्युम्नः शिखंडी च सात्यकिश्च महारथः युक्तानीका
महाराज भीष्ममेव समभ्ययुः १६ विराटो द्रुपदश्चैव सहितौ सर्वसोमकैः अभ्यद्रवंत संग्रामे भीष्ममेव महारथाः १७ कैकेया धृष्टकेतुश्च
कुंतिभोजश्च दंशितः युक्तानीका महाराज भीष्ममेव समभ्ययुः १८ अर्जुनो द्रौपदेयाश्च चेकितानश्च वीर्यवान् दुर्योधनसमादिष्टान्राज्ञः
सर्वान्समभ्ययुः १९ अभिमन्युस्तथा वीरो हैडिंबश्च महारथः भीमसेनश्च संक्रुद्धस्त्वभ्यधावंत कौरवान् २० त्रिधाभूतैरवध्यंत पांडवैः
कौरवा युधि तथैव कौरवै राजन्नवध्यंत परे रणे २१ द्रोणस्तु रथिनां श्रेष्ठः सोमकान्संजयैः सह अभ्यद्रवत संक्रुद्धः प्रेषयिष्यन्यमक्षयं
२२ तत्राक्रंदो महानासीत्संजयानां महात्मनां वध्यतां समरे राजन्भारद्वाजेन धन्विना २३ द्रोणेनाभिहतास्तत्र क्षत्रिया बहवो रणे वि
चेष्टंतो व्यदृश्यंत व्याधिक्लिष्टा नरा इव २४ कूजतां क्रंदतां चैव स्तनतां चैव संयुगे अभिसंश्रूयते शब्दः क्षुत्क्लिष्टानां नृणामिव २५ तथैव
कौरवेयाणां भीमसेनो महाबलः चकार कदनं घोरं क्रुद्धः काल इवापरः २६ वध्यतां समरे सैन्यानामन्योन्येन महाहवे प्रावर्त्तत नदी
घोरा रुधिरौघतरंगिणी २७ स संग्रामो महाराज घोररूपोऽभवन्महान् कुरूणां पांडवानां च यमराष्ट्रविवर्द्धनः २८ ततो भीमो रणे क्रु
द्धो रभसश्च विशेषतः गजानीकं समासाद्य प्रेषयामास मृत्यवे २९ तत्र भारत भीमेन नाराचाभिहता गजाः पेतुः सेदुश्च नेदुश्च दिशः संपरि
बभ्रमुः ३० छिन्नहस्ता महानागाः छिन्नगात्राश्च मारिष क्रौंचवद्व्यनदंस्तत्र पृथिवीमधिशिश्यिरे ३१ नकुलः सहदेवश्च हयानीकमभि

रा०

३६५

[illegible] इत्येते हयाः कांचनापीडा रुक्मभांडपरिच्छदाः ३२ वध्यमानाश्च दृश्यंत शत
शोथ सहस्रशः पतद्भिस्तैर्हयै राजन्समाकीर्यत मेदिनी ३३ निस्तनद्भिश्च श्वसद्भिश्च कूजद्भिश्च गतासुभिः हयैर्बभौ नरश्रेष्ठ नानारूपधरैः क्षिता
३४ अर्जुनेन हतैः संख्ये तथा भारत राजभिः प्रबभौ वसुधा घोरा तत्र तत्र विशांपते ३५ रथैर्भग्नैर्ध्वजैश्छिन्नैर्निकृत्तैश्च महायुधैः हारैर्निष्कैः
सकेयूरैः शिरोभिश्च सकुंडलैः ३६ उष्णीषैरपविद्धैश्च पताकाभिश्च सर्वशः अनुकर्षैः शुभै राजन्योक्त्रैश्च सहरश्मिभिः ३७ संछन्ना व
सुधा भाति वसंते कुसुमैरिव एवमेष क्षयो वृत्तः पांडवानामभिभारत ३८ क्रुद्धे शांतनवे भीष्मे द्रोणे च रथसत्तमे अश्वत्थाम्नि कृपे चैव तथै
व कृतवर्मणि ३९ तथेतरेषु क्रुद्धेषु तावकानामपि क्षयः इति भीष्मपर्वणि संजय उ० वर्तमाने तथा रौद्रे राजन्वीरवरक्षये शकुनिः
सौबलः श्रीमान्पांडवान्समुपाद्रवत् १ तथैव सात्वतो राजन्हार्दिक्यः परवीरहा अभ्यद्रवत संग्रामे पांडवानां वरूथिनीं २ ततः कां
बोजमुख्यानां नदीजानां च वाजिनां आरट्टानां महीजानां सिंधुजानां च सर्वशः ३ वनायुजानां शुभ्राणां तथा पर्वतवासिनां वाजिनां ब
हुभिः संख्ये समंतात्पर्यवारयन् ४ तथापरैस्तित्तिरजैर्जवनैर्वातरंहसैः सुवर्णालंकृतैरेतैर्वर्मवद्भिः सुकल्पितैः हयैर्वातजवैर्मुख्यैः
पांडवस्य सुतो बली अभ्यवर्तत तत्सैन्यं हृष्टरूपः परंतप ६ अर्जुनस्य सुतः श्रीमानिरावान्नाम वीर्यवान् सुतायां नागराजस्य जातः पार्थेन
धीमता ७ ऐरावतेन सा दत्ता ह्यनपत्या महात्मना पत्यौ हते सुपर्णेन कृपणा दीनचेतना ८ भार्यार्थं तां च जग्राह पार्थः कामवशानुगां
एवमेष समुत्पन्नः परक्षेत्रेर्जुनात्मजः ९ स नागलोके संवृद्धो मात्रा च परिरक्षितः पितृव्येण परित्यक्तः पार्थद्वेषाद्दुरात्मना १० रूपवान्

भी० २६६ वै ५

त्समं पूर्णेन गुणवान्सत्यविक्रमः इंद्रलोकं जगामाशु श्रुत्वा तत्रार्जुनं गतं ११ सोभिगम्य महाबाहुः पितरं सत्यविक्रमः अभ्यवादयदव्यग्रो विनये
न कृतांजलिः १२ सोवेदयत चात्मानमर्जुनस्य महात्मनः इरावानस्मि भद्रं ते पुत्रश्चाहं तव प्रभो १३ मातुः समागमो यश्च तत्सर्वं प्रत्यवेदयत त
च्च सर्वं यथावृत्तमनुसस्मार पांडवः १४ परिष्वज्य सुतं चापि सोत्मनः सदृशं गुणैः प्रीतिमानभवत्पार्थो देवराजनिवेशने १५ सोर्जुनेन समा
दिष्टो देवलोके तदा नृप प्रीतिपूर्वं महाबाहुः स्वकार्यं प्रति भारत १६ युद्धकाले त्वयास्माकं साह्यं देयमिति प्रभो बाढमित्येवमुक्त्वा च युद्ध
काल उपागतः १७ कामवर्णजवैरश्वैः संवृतो बहुभिर्नृप ते हयाः कांचनापीडा नानावर्णा मनोजवाः १८ उत्पेतुः सहसा राजन्हंसा इ
व महोदधौ ते त्वदीयान्समासाद्य हयसंघान्महाजवान् १९ क्रोडैः क्रोडानभिघ्नंतो घोणाभिश्च परस्परं निपेतुः सहसा राजन्सुवेगाभि
हता भुवि २० निपतद्भिस्तथा तैश्च हयसंघैः परस्परं शुशुभे दारुणः शब्दः सुपर्णपतने यथा २१ तथैव च महाराज समेत्यान्योन्यमाहवे परस्प
रवधं घोरं चक्रुस्ते हयसादिनः २२ तस्मिंस्तथा महाघोरे संकुले तुमुले भृशं उभयोरपि संभ्रांता हयसंघाः समंततः २३ प्रक्षीणसायकाः
शूरा निहताश्वाः समाहताः विलयं समनुप्राप्तास्तक्ष्यमाणाः परस्परं २४ ततः क्षीणे ह [illegible]
[illegible] यानीके किंचिच्छिष्टे च संयुगे सौबलस्यानुजाः शूरा निर्गता रणमूर्धनि २५ वायु
वेगसमस्पर्शा जवे वायुसमास्तथा आरुह्य शीलसंपन्नान्वयस्थांस्तुरगोत्तमान् २६ गजो गवाक्षो वृषभश्चर्मवानार्जवः शुकः षडेते
बलसंपन्ना निर्ययुर्महतो बलात् २७ वार्यमाणाः शकुनिना स्वैश्च योधैर्महाबलैः सन्नद्धा युद्धकुशला रौद्ररूपा महाबलाः २८
तदनीकं महाबाहो भित्त्वा परमदुर्जयं बलेन महता युक्ताः स्वर्गाय विजयैषिणः २९ विविशुस्ते तदा हृष्टा गांधारा युद्धदुर्मदाः तान्

मे १

पै १

राम० २६६

विशंस्तरान्दृष्ट्वा इरावानपि वीर्यवान् ३० अब्रवीत्समरे योधान्विचित्राभरणायुधान् यथैते धार्तराष्ट्रस्य योधाः सानुगवाहनाः ३१
हन्यंते समरे सर्वे तथा नीतिर्विधीयतां बाढमित्येवमुक्त्वा ते सैन्या योधा इरावतः ३२ जघ्नुस्तेषां बलानीकं दुर्जयं समरे परैः तदनीकमनीकेन
समरे वीक्ष्य पातितं ३३ अमृष्यमाणास्ते सर्वे सुबलस्यात्मजास्तदा इरावंतमभिद्रुत्य सर्वतः पर्यवारयन् ३४ ताडयंतः शितैः प्रासैश्चोदयंतः
परस्परं ते शूराः पर्यधावंत कुर्वंतो महदाकुलं ३५ इरावानपि निर्विद्धः प्रासैस्तीक्ष्णैर्महात्मभिः स्रवता रुधिरेणाक्तस्तोत्रैर्विद्ध इव द्विपः
३६ उरस्यपि च पृष्ठे च पार्श्वयोश्च भृशाहतः एको बहुभिरत्यर्थं धैर्याद्राजन्न विव्यथे ३७ इरावानथ संक्रुद्धः सर्वांस्तान्निशितैः शरैः
मोहयामास समरे विद्ध्वा परपुरंजयः ३८ प्रासानुद्धृत्य सर्वांश्च स्वशरीरादरिंदमः तैरेव ताडयामास सुबलस्यात्मजान्रणे ३९ निकृष्य च
शितं खड्गं गृहीत्वा च शरावरं पदातिस्तूर्णमागच्छज्जिघांसुः सौबलान्युधि ४० ततः प्रत्यागतप्राणाः सर्वे ते सुबलात्मजाः भूयः क्रोध
समाविष्टा इरावंतमथाद्रवन् ४१ इरावानथ खड्गेन दर्शयन्पाणिलाघवं अभ्यधावत तान्सर्वान्सौबलान्बलदर्पितः ४२ लाघवेनाथ चरतः
सर्वे ते सुबलात्मजाः अंतरं नाभ्यगच्छंत चरंतः शीघ्रगामिनः ४३ भूमिष्ठमथ तं संख्ये संप्रदृश्य ततः पुनः परिवार्य भृशं सर्वे ग्रहीतुमुपच
क्रमुः ४४ अथाभ्याशगतानां स खड्गेनामित्रकर्शनः असिहस्तापहस्ताभ्यां तेषां गात्राण्यकृन्तत ४५ आयुधानि च सर्वेषां बाहूनपि
विभूषितान् अपतंत निकृत्तांगा गता भूमिं गतासवः ४६ वृषभस्तु महाराज बहुधा परिविक्षतः अमुच्यत महारौद्रात्तस्माद्वीरावकर्तनात्

 श

मो० २६७

नात ४७ तान्सर्वोन्मतितान्दृष्ट्वा सुतो दुर्योधनस्तव अभ्यभाषत संक्रुद्धो राक्षसं घोरदर्शनं ४८ आर्ष्यशृंगिं महेष्वासं मायाविनम
रिंदमं वैरिणां भीमसेनस्य पूर्वं बककृतं प्रति ४९ पश्य वीर यथा ह्येष फाल्गुनस्य सुतो बली मायावी विप्रियं घोरमस्माकं कार्यान्वल
स्थ्यं ५० त्वं च कामगमस्तात मायास्त्रे च विशारदः कृतवैरश्च पार्थेन तस्मादेनं रणे जहि ५१ बाढमि सेवमुक्त्वा तु राक्षसो घो
रदर्शनः प्रययौ सिंहनादेन यत्रार्जुनसुतो युवा ५२ सादिभिर्युद्धकुशलैर्विमलप्रासयोधिभिः वीरैः प्रहारिभिर्युक्तैः स्वैरनीकैः
समावृतः ५३ हतशेषैर्महाराज हि साहस्रैर्हयोत्तमैः निहंतुकामः सम [illegible] रेरा
वतं महाबलं ५४ इरावानपि संक्रुद्धस्त्वरमाणः पराक्रमी हंतुकाममभित्रघ्नो राक्षसं प्रत्यवारयत ५५ तमापतंतं संप्रेक्ष्य रा
क्षसः सुमहाबलः त्वरमाणस्ततो मायां प्रयोक्तुमुपचक्रमे ५६ तेन मायामयाः सृष्टा हयास्तावंत एव हि स्वारूढा राक्षसैर्घोरैः
शूलपट्टिशपाणिभिः ५७ ते संरब्धाः समागम्य द्विशाहस्राः प्रहारिणः अचिराद्गमयामासुः प्रेतलोकं परस्परं ५८ तस्मिंस्तु
निहते सैन्ये तावुभौ युद्धदुर्मदौ संग्रामे समतिष्ठेतां यथा वै वृत्रवासवौ ५९ आद्रवंतमभि [illegible] दुर्मदं इरावान्क्रो
धसंरब्धः प्रत्यधावन्महाबलः ६० समभ्याशगतस्याजौ तस्य खड्गेन दुर्मदः चिच्छेद कार्मुकं दीप्तं शरावापं च पंचधा ६१ स निकृत्तं ध
नुर्दृष्ट्वा खं जवेन समाविशत इरावंतमभिक्रुद्धं मोहयन्मायया तदा ६२ ततोऽन्तरिक्षमुत्पत्य इरावानपि राक्षसं विमोहयित्वा मायाभि

प्रेस्याद्दसं पृ ६३ पं २

रा० २६७

पुनः ३

स्तस्यगात्राणिसंयुगे ६३ चिच्छेदसर्वमर्मज्ञः कामरूपोदुरासदः तथासंराक्षसः अच्छेद्यः च्छेद्योपुनःपुनः ६४ संबभूवमहाराजसमयुगपत्पु
योऽभवं मायाहिसहजातेषांवैयोरूपंचकाममं ६५ एवंतद्राक्षसस्यांगछिन्नंभिन्नमजायत रावणोपिराजेंद्रराक्षसंतंमहाबलं ६६ परस्परधनंतौ
ज्ञानविच्छेदस्य पुनः सेतेनवलिनावीक्षिद्यमानस्वयुद्धमः ६७ राक्षसोप्यनरघोरंसहशब्दस्तमुलोभवत परस्परवधकांक्षौ सुसावदृधि
रंवहु ६८ ततस्तुक्रोधसंलवौत्वेकेअंगेचसंयुगे स्वार्थमर्गिततोदृष्टाममरेशत्रुमूर्च्छितः ६९ कृत्वाघोरंमहद्रूपंविश्वरीतुमचक्रमे अर्जुन
समस्तेवीरमिरावंतेयशस्विनं ७० संग्रामशिरसोमध्येसर्वेषांतत्रपश्यतां तांदृष्ट्वातादृशींमायांराक्षसस्यदुरात्मनः ७१ इरावानपिसंक्रुद्धो
मायांस्रष्टुंप्रचक्रमे तस्यक्रोधाभिभूतस्यसंयुगेष्वनिवर्तिनः ७२ योऽन्वयोमातृकस्तस्यसएनमभिपेदिवान सनागैर्बहुभिर्गोरराजन्सर्वतः संवृ
तोरणे ७३ दधाररूपमहद्रूपमनंतस्वभोगवान ततोबहुविधैर्नागैः छादयामासराक्षसं ७४ छाद्यमानेस्तुनागैः सध्यात्वाराक्षसपुंगवः
सौपर्णरूपमास्थायभक्षयामासपन्नगान ७५ माययाभक्षितेतस्मिन्नन्वयेतस्यमातृके विमोहितमिरावंतंमरन्स्राक्षसोऽसिना
७६ सकुंडलंसमुकुटंपद्मेंदुसदृशप्रभं इरावतः शिरोरक्षः पातयामासभूतले ७७ तस्मिंस्तुनिहतेवीरेराक्षसेनार्जुनात्मजे वि
शोकाः समपद्यंतधार्तराष्ट्राः सराजकाः ७८ तस्मिन्महतिसंग्रामेतादृशेभैरवेपुनः महानव्यतिकरोघोरः सेनयोः समपद्यत ७९
गजाह्वयापरातास्यविमिर्हताः रथाश्चाश्वैतिनैश्चैवपत्तिभिस्तत्रसूदिताः ८० तथापदातिसंघाश्चहयाश्चबहवोरणे रथिभिर्निहतौरा
स्तवैतेषांचसंकुले ८१ अजानन्वार्जुनश्चापिनिहतंपुत्रमौरसं जघानसमरेशूरान्राज्ञस्तान्भीष्मरक्षिणः ८१ तथैवतावकाराजन्संजया

लना १ पन २

ए

मिश्रादन्ति २

भी०

२६८

श्वमहस्रशः संकृतः समरे मारणां त्रिसृष्टिरैरतरं २३ मुक्तकेशा विकवचा विरथाश्छिन्नकार्मुकाः बाहुभिः समयुध्यंत समवेताः प्रस्प
रं २४ तथा मम तिगैर्भीष्मो निजघान महारथान कंपयन्समरे सेनां पांडवानां परंतपः २५ तेन ये धिष्ठिरे सैन्ये हन्यमाना वाहताः इति
नः सादिनश्चैव रथिनो हयास्तथा २६ तत्र भारत भीष्मस्य रणे दृष्ट्वा पराक्रमं अस्महतम पश्याम शक्रस्येव पराक्रमं २७ तथैव
व भीमसेनस्य पार्षतस्य च भारत रौद्रमासीद्रणे पातेः सात्वकस्य च धन्विनः २८ दृष्ट्वा द्रोणस्य विक्रांतं पांडवान्भयमाविशत् एक एव रणो
मेको निहंतुं सर्वे समनिकान २९ किं पुनः पृथिवी शूरैर्योधव्रातैः समावृतः इत्यब्रुवन्महाराज रणे द्रोणेन पीडिताः ३० वर्तमाने
तथा रौद्रे संग्रामे भरतर्षभ उभयोः सेनयोः शूरा नामर्षितं परस्परं ३१ आविष्टा इव युध्यंते रक्षोभूता महाबलाः तावकाः पांडवेयाश्च
संरब्धास्तात धन्विनः ३२ न स्म पश्यामहे कंचिद्यः प्राणान्परिरक्षति संग्रामे दैत्यसंकाशे तस्मिन्वीरवरक्षये ३३ इति भीष्मपर्व
णि रात्रिवधः धृतराष्ट्र उवाच एवं तं तु निहतं दृष्ट्वा पार्थेन महारथाः संग्रामे किमकुर्वंत मम मामाचक्ष्व संजय [illegible] संजय उवाच एवं तं
तु निहते संग्रामे वीरे भीमपराक्रमे मनदंस्तु महानादं भीमसेनो निर्घोषोत्कचः २ नरसिंहस्य शब्देन पृथिवी सागरा [illegible] सपर्वतवना राजंश्चचा
लमुमुशं तदा ३ अंतरिक्षं दिशश्चैव सर्वाश्च प्रदिशस्तथा तं श्रुत्वा सुमहानादं तवैवमभवद्भारत ४ ततस्तेभ्यः समभवद्विपुलः स्वर
एव च सर्व एव महात्मानस्तावकाः स्रस्तचेतसः ५ सर्वतः समवेक्षंतः सिंहभीता गजा इव विदित्वा सुमहानादं निर्घोषमिव राक्षसैः ६
ज्वलितं शूलमुद्यम्य रूपं कृत्वा विभीषणं नानारूपमहाघोरैर्वृतो राक्षसपुंगवैः ७ आजगाम सुसंक्रुद्धः कालांतकयमोपमः तेषा

२६५

एक०

६१

पतंतं भीमसेनस्य संक्रुद्धं भीमदर्शनं ८ स्वबलं च भयात्त्रस्तमायशो विमुखीकृतं ततो दुर्योधनो राजा घटोत्कचमुपाद्रवत् ९ प्रगृह्य विपु-
लं चापं सिंहवद्विनदन्मुहुः पृष्ठतोनुययौ चैनं स्रवद्भिः पर्वतोपमैः १० कुंजरैर्दशसाहस्रैर्वंगानामधिपः स्वयं तमापतंतं संप्रेक्ष्य गजानी-
केन संवृतः ११ पुत्रं तव महाराज चुकोप स निशाचरः ततः प्रववृते युद्धं तुमुलं लोमहर्षणं १२ राक्षसानां च राजेन्द्र दुर्योधनबलस्य च
गजानीकं च संप्रेक्ष्य मेघवृन्दमिवोद्यतं १३ अभ्यधावंत संक्रुद्धा राक्षसा [illegible] शस्त्रपाणयः नदंतो विविधान्ना-
दान्मेघा इव सविद्युतः १४ शरशक्त्यृष्टिनाराचैर्निघ्नंतो गजयोधिभिः भिंदिपालैस्तथा शूलैर्मुद्गरैः सपरश्वधैः १५ पर्वताग्रैश्च वृक्षै-
श्च निजघ्नुस्ते महागजान् भिन्नकुंभान्विरुधिरान्निर्भिन्नांश्च वारणान् १६ अपश्याम महाराज वध्यमानान्निशाचरैः तेषु प्रक्षी-
यमाणेषु भग्नेषु गजयोधिषु १७ दुर्योधनो महाराज राक्षसान्समुपाद्रवत् अमर्षवशमापन्नस्त्यक्त्वा जीवितमात्मनः १८ मुमो-
च निशितान्बाणान्राक्षसेषु परंतपः जघान च महेष्वासः प्रधानांस्तत्र राक्षसान् १९ संक्रुद्धो भरतश्रेष्ठ पुत्रो दुर्योधनस्तव वेगवंतं
महारौद्रं विद्युज्जिह्वं प्रमाथिनं २० शरैश्चतुर्भिश्चतुरो निर्जघान महाबलः ततः पुनरमेयात्मा शरवर्षं दुरासदं २१ मुमोच भर-
तश्रेष्ठ निशाचरबलं प्रति तद्दृष्ट्वा महत्कर्म पुत्रस्य तव मारिष २२ क्रोधेनाभिप्रजज्वाल भैमसेनिर्महाबलः स विस्फार्य महच्चापमिं-
द्राशनिसमस्वनं २३ अभिदुद्राव वेगेन दुर्योधनमरिंदमं तमापतंतं संप्रेक्ष्य कालसृष्टमिवांतकं २४ न विव्यथे महाराज पुत्रो
दुर्योधनस्तव अथैनमब्रवीत्क्रुद्धः क्रूरः संरक्तलोचनः २५ अद्यानृण्यं गमिष्यामि पितॄणां मातुरेव च ये त्वया सुनृशंसेन दी-

भी०

२६९

८ जै

घेकालंमवाशिताः २६ यच्चैतेपांस्काराजंश्छलघृतेपराजिताः याचैवद्रौपदीक्लिष्टाएकवस्त्रारजस्वला २७ समामध्येनीयपुत्रैस्तैर्बहुधाक्षे
शिता त्वया तच्चाप्रियकामेन साश्रमस्याद्गुरात्मना २८ गंधर्वैनपरामृष्टापरिभूयपितृन्मम एतेषामपमानानाममेषांचकुलाधम २९
अंतमद्यगमिष्यामियस्तिष्ठेस्त्वंजमेरणे एवमुक्त्वातुहैडिंबाम हर्षेस्फार्यकार्मुकं ३० संदृश्यदशनैरोष्ठंसृक्किणीपरिसंलिहन् शरवर्षे
णमहतादुर्योधनमवाकिरत् ३१ पर्वतंवारिधाराभिःप्रावृषीवबलाहकः इतिभीष्मपर्वणि संजयउवाच ततस्तद्बाणवर्षंतु दुःसहं दानवै
रपि दृष्ट्वायुधिरोद्रोपथावर्षंमहीपः १ ततःक्रोधसमाविष्टोनिःश्वसन्निवपन्नगः संशयंपरमंप्राप्तः पुनस्तेभरतर्षभ २ मुमोचनि
शितांस्तीक्ष्णान्नाराचान्पंचविंशति तेपतन्सहसाराजंस्तस्मिन्राक्षसपुंगवे ३ आशीविषाइवक्रुद्धाः पर्वतंगंधमादने सतैर्विद्धः स्रव
न्रक्तंप्रभिन्नइवकुंजरः ४ दध्रेमतिंविनाशायराज्ञः सुपिशिताशनः जग्राहचमहाशक्तिंगिरीणामपिदारणीं ५ संप्रदीप्तांमहो
ल्काभामशनिंज्वलितामिव समुद्यच्छन्महाबाहुर्जिघांसुस्तनयंतव ६ तामुद्यतामभिप्रेक्ष्यनागानामधिपस्त्वरन् कुंजरंगिरिसंका
शंराक्षसंप्रत्यचोदयत् ७ सनागप्रवरेणाजौवलिना शीघ्रगामिना ततोदुर्योधनरथस्तंमार्गंप्रत्यपद्यत ८ रथंचवारयामासकुंजरेणा
सुतस्यते मार्गमावारितंदृष्ट्वाराज्ञावंगेनधीमता ९ घटोत्कचोमहाराजक्रोधसंरक्तलोचनः उद्यतांतांमहाशक्तिंतस्मिंश्चिक्षेपवारणे
१० सतयाभिहतोराजंस्तेनबाहुप्रमुक्तया संजातरुधिरोत्पीडः पपातचममारच [illegible] ११ पतत्यथगजेचापिवंगानामीश्वरोबलीज
वेनसमभिद्रुत्यजगामधरणीतलं १२ दुर्योधनोपिसंप्रेक्ष्यपतितंवरवारणं प्रभग्नंचबलंदृष्ट्वाजगामपरमांव्यथां १३ क्षत्रधर्मंपुरस्कृत्य

रम०

२६९

स्मनुग्राभिमानितं मामेयक्रमयोगेराजातस्थो गिरिरिवाचलः १४ संधायचाशितं बाणं कालाग्निसमतेजसं मुमोच परम क्रुद्धस्तस्मिन्घोरेनि
शाचरे १५ तमापतंतं संप्रेक्ष्य बाणमिन्द्राशनिप्रभं लाघवान्मोचयामास महास्त्रविद्घटोत्कचः १६ भूयश्चाविनकारोषं क्रोधसंरक्तलोचनः
त्रासयामास सैन्यानि युगांते जलदो यथा १७ तं श्रुत्वा नीनिदं घोरं तस्य भीमस्य रक्षसः आचार्यमुपसंगम्य भीष्मः शांतनवोऽब्रवीत १८ यत्रैष
निनदो घोरः श्रूयते राक्षसेरितः हिडिंबो युध्यते नूनं नराजाहृद्योधनेन हः १९ नेष शक्यो हि संग्रामे विजेतुं भूतले न केनचित् तं गच्छत भद्रं वो राजानं परिर
क्षत २० अभिद्रुतो महाभागो राक्षसेन महात्मना एतद्धियः परं ह्य संमेवे घोनः परंतपाः २१ पितामहवचः श्रुत्वा त्वरमाणा महीपाः ततो मं
[illegible]स्त्वमाच्छायमभ्युपेत्यैको रवः २२ द्रोणाश्च सोमदत्तश्च बाल्हीकोथ जयद्रथः २४ अभिद्रुतं परीप्संतः पुत्रं दुर्योधनं तदा तस्थीकमना
धर्म्यं पालितं तु महारथैः २५ आगतानपि तान्दृष्ट्वा राक्षसेन्द्रोऽसंभ्रमः नाकंपत महाबाहुर्मैनाक इव पर्वतः २६ प्रगृह्य विपुलं चापं ज्ञा
तिभिः परिवारितः शूलमुद्गरहस्तैश्च नानाप्रहरणैरपि २७ ततः समभवद्युद्धं तुमुलं लोमहर्षणं राक्षसानां च मुख्यस्य दुर्योधनबलस्य च
२८ धनुषां कूजतां शब्दः सर्वतस्तुमुलोऽभवत् अश्रूयत महाराज वंशानां दह्यतामिव २९ अस्त्राणां पात्यमानानां कवचेषु शरीरिणां श
ब्दः समभवद्राजन्गिरीणामिव भिद्यतां ३० वीरबाहुविसृष्टानां तोमराणां विशांपते रूपमासीद्वियत्स्थानां सर्पाणामिव सर्पतां ३१
ततः परमसंक्रुद्धो विस्फार्य सुमहद्धनुः राक्षसेन्द्रो महाबाहुर्विनदन्भैरवं रवं ३२ आचार्यस्यार्धचन्द्रेण क्रुद्धश्चिच्छेद कार्मुकं सोमदत्त
स्य भल्लेन ध्वजं चोन्मथ्य चानदत् ३३ बाल्हीकं च त्रिभिर्बाणैः प्रत्यविध्यत्स्तनांतरे कृपमेकेन विव्याध चित्रसेनं त्रिभिः शरैः ३४ पूर्णायत

विसृष्टेन सुमहता कूर्मरागोहितेन च जत्रुदेशे समासाद्य विकर्णोऽस्य ताड्यत ३५ ततो यतं तूरयोधस्ते रश्मीन्कुरुस्य वाजिनां सिंधुराजोर्द्दयंश्चैव गात्रा
गाहंसवरांभूषितं ३६ अन्यमाथ्यमहाराज द्वितीयेनाच्छिनद्धनुः चतुर्भिरश्वेनाशैश्च रावेतस्य महात्मनः ३७ अथानन्यतुरोवाक्को ध्वसंगर्क
लोचनः भूयापतन्विसृष्टेन पीतेन निशितेन च ३८ निर्बिभेद महाराज राजपुत्रं बृहद्बलं सगाढविद्धो व्यथितो भूत्थोपस्थ उपाविशत ३९ म
शं क्रोधेन चाविष्टो रथस्थो राक्षसाधिपः चिक्षेप निशितांस्तीक्ष्णाँस्तुराना शीविषोपमान् ४० विभिदुस्ते महाराज शल्यं युद्धविशारदं
इति भीष्मपर्वणि संजय उवाच विमुखीकृत्य सर्वांस्तु तावकान्युधि राक्षसः जिघांसुर्भरतश्रेष्ठ दुर्योधनमुपाद्रवत् १ तमापतंतं संप्रेक्ष्य रा
जानं प्रति वेगितं अभ्यधावन्जिघांसंतस्तावका युद्धदुर्मदाः २ तालमात्राणि चापानि विकर्षंतो महारथाः तमेकमभ्यधावंत नदंतः
सिंहसंघवत् ३ अथैनं शरवर्षेण समंतात्पर्यवाकिरन् पर्वतं वारिधाराभिः शरदीव बलाहकाः ४ सगाढविद्धो व्यथितस्तोत्रा
र्दित इव द्विपः उत्पपात तदाकाशं समंताद्वैनतेयवत् ५ व्यनदत्सुमहानादं जीमूत इव शारदः दिशः खं विदिशश्चैव नादयन्नै
रवस्वनः ६ राक्षसस्य तु तं शब्दं श्रुत्वा राजा युधिष्ठिरः उवाच भरतश्रेष्ठ भीमसेनमरिंदम ७ युध्यते राक्षसो नूनं धार्तराष्ट्रैर्महारथैः
यथास्य श्रूयते शब्दो नदतो भैरवस्वनं ८ अतिभारं च पश्यामि तत्र तात समाहितं पितामहश्च संक्रुद्धः पांचालान्हंतुमुद्यतः ९ तेषां
च रक्षणार्थाय युध्यते फाल्गुनः परैः एतच्छ्रुत्वा महाबाहो कार्यद्वयमुपस्थितं १० गच्छ रक्षस्व हैडिंबं संशयं परमं गतं भ्रातुर्वचनमा
ज्ञाय तरसा भीमो वृकोदरः ११ प्रययौ सिंहनादेन त्रासयन्सर्वपार्थिवान् वेगेन महता राजन्पर्वकाले यथोदधिः १२ तमन्वगात्सत्यधृतिः सौ

विनिर्युद्धर्मरः श्रीरीमान्नस्नुरानश्रापुत्रः काश्यमभवाविभुः १३ अभिमन्युसुतश्चैवचैद्योपरथामहारथाः कृतेरेवस्थविक्रांतः कृत
धर्मातथैवच १४ अनूपाधिपतिश्चैवनीलः स्वबलमाश्रितः महतारथवंशेनहैडिंबंपर्यवारयन् १५ कुंतीश्चमत्तमत्तैः षट्सहस्रैः महा
रिभिः आमसंनसहितारात्रौमेहंघटोत्कचं १६ सिंहनादेनमहतानेमिघोषेणचैवह क्रूरशब्दनिघोषैश्चकंपयंतोवसुंधरां १७ तेषा
मापततांश्रुत्वाशब्दंतंतावकेबले भीमसेनमपोह्यद्रोणिर्बाणैरभ्यवर्ततया १८ परिवृत्तेमहाराजपरिसजघटोत्कचं ततः प्रववृतेयुद्धंतत्र
तेषांमहात्मनां १९ तावकानांपरेषांचसंग्रामेषुनिवर्तिनां नानारूपाणिशस्त्राणिविसृजंतोमहारथाः २० अन्योन्यमभिधावंतः
संप्रहारंप्रचक्रिरे व्यतिषिक्तंमहारौद्रंयुद्धंभीरुभयावहं २१ हयागजैः समाजग्मुः पादातारथिभिः सह अन्योन्यंसमरेराजन्प्रार्थ
यानाः समभ्ययुः २२ सहसाचाभवत्तीव्रंसन्निपातान्महद्रजः गजाश्वरथपत्तीनांपदनेमिसमुद्धतं २३ धूम्रारुणंरजस्तीव्रंर
णभूमिंसमावृणोत् नैवस्वेनपरेराजन्समजानन्परस्परं २४ पितापुत्रंनजानीतेपुत्रोवापितरंतथा निर्मर्यादेतथाभूतेवैशसेलोम
हर्षणे २५ शस्त्राणांभरतश्रेष्ठमनुष्याणांचगर्जतां सुमहानभवच्छब्दः प्रेतानामिवभारत २६ गजवाजिमनुष्याणांशोणितांबुतरं
गिणी प्रावर्ततनदीतत्रकेशशैवलशाद्वला २७ नराणांचैवकायेभ्यः शिरसांपततांरणे सुमहानभवच्छब्दः पततामश्मनामिव
२८ विशिरस्कैर्मनुष्यैश्चछिन्नगात्रैश्चवारणैः अश्वैः संभिन्नदेहैश्चसंकीर्णाभूद्वसुंधरा २९ नानाविधानिशस्त्राणिविसृजंतो
महारथाः अन्योन्यमभिधावंतः संप्रहारार्थमुद्यताः ३० हयाहयान्समासाद्यप्रेषिताहयसादिभिः समाहत्यरणेऽन्योन्यंनिपेतुर्गतजी

प्या४ म५ मा ६१

दिनास्य

भी०
२७१

विताः ३१ नरान्नरान्समासाद्य क्रोधरक्तेक्षणा भृशं उरांस्युरोभिरन्योन्यं समाश्लिष्य निपिष्पिरे ३२ प्रेषिताश्च महामात्रैर्वारणाः परवारणाः
अभ्यघ्नंत विषाणाग्रैर्वारणानेव संयुगे ३३ ते जातरुधिरोत्पीडाः पताकाभिरलंकृताः संसक्ताः प्रत्यदृश्यंत मेघा इव सविद्युतः ३४ केचि
द्भिन्ना विषाणाग्रैर्भिन्नकुंभाश्च तोमरैः विनदंतोभ्यधावंत गर्जंतो जलदा इव ३५ केचिद्धस्तैर्द्विधाच्छिन्नैश्छिन्नगात्रास्तथापरे निपेतुस्तुमुले
तस्मिंश्छिन्नपक्षा इवाद्रयः ३६ पार्श्वैस्तु दारितैरन्ये वारणैर्वरवारणाः मुमुचुः शोणितं भूरि धातूनिव महीधराः ३७ नाराचनिहतास्त्वन्ये त
था विद्धाश्च तोमरैः विनदंतोभ्यधावंत विशृंगा इव पर्वताः ३८ केचित्क्रोधसमाविष्टा मदांधा निरवग्रहाः रथान्हयान्पदातींश्च ममृदुः शतशो
रणे ३९ तथा हया हयारोहैः प्रासैस्तोमरैः तेनैव तेनाभ्यवर्तंत कुर्वंतो व्याकुला दिशः ४० रथिनो रथिभिः सार्द्धं कुलपुत्रास्तनुत्यजः
परां शक्तिं समास्थाय चक्रुः कर्माण्यभीतवत् ४१ स्वयंवर इवामर्दे प्रजह्रुरितरेतरं प्रार्थयाना यशो राजन्स्वर्गं वा युद्धशालिनः ४२ तस्मिं
स्तथा वर्तमाने संग्रामे लोमहर्षणे धार्तराष्ट्रं महत्सैन्यं प्रायशो विमुखीकृतं ४३ इति भीष्मपर्वणि संजय उ० स्वसैन्यं निहतं दृष्ट्वा
राजा दुर्योधनः स्वयं अभ्यधावत संक्रुद्धो भीमसेनमरिंदमं १ प्रगृह्य सुमहच्चापमिंद्राशनिसमस्वनं महता शरवर्षेण पांडवं समवा
किरत् २ अर्द्धचंद्रं च संधाय सुतीक्ष्णं लोमवाहिनं भीमसेनस्य चिच्छेद चापं क्रोधसमन्वितः ३ तदंतरं च संप्रेक्ष्य त्वरमाणो महारथः संद
धे निशितं बाणं गिरीणामपि दारणं ४ तेनोरसि महाबाहुं भीमसेनमताडयत् स गाढविद्धो व्यथितः सृक्किणी परिसंलिहन् ५ समाल
लंबे ततस्तेजो ध्वजं हेमपरिष्कृतं तथा विमनसं दृष्ट्वा भीमसेनं घटोत्कचः ६ क्रोधेनाभिप्रजज्वाल दिधक्षन्निव पावकः अभिमन्युमुखा

भी०
२७१

भ१

अभिपाण्डवानां महारथाः ७ समभ्यधावन् क्रोशन्तो राजानं जातसंभ्रमाः संप्रेक्ष्यैतानापततः संक्रुद्धान् जातसंभ्रमान् ८ भारद्वाजस्ततस्तांस्ता
वकानां महारथाः क्षिप्रं गच्छत भद्रं वो राजानं परिरक्षत ९ संशयं परमं प्राप्तं मज्जन्तं व्यसनार्णवे एते क्रुद्धा महेष्वासाः पाण्डवानां महा
रथाः १० भीमसेनं पुरस्कृत्य दुर्योधनमुपाद्रवन् नानाविधानि शस्त्राणि विसृजन्तो जयैषिणः ११ नदन्तो भैरवान्नादांस्त्रासयन्तश्च भू
मिपान् तदाचार्यवचः श्रुत्वा सोमदत्तपुरोगमाः १२ तावकाः समवर्तन्त पाण्डवानामनीकिनीं कृपो भूरिश्रवाः शल्यो द्रोणपुत्रो
विविंशतिः १३ चित्रसेनो विकर्णश्च सैन्धवो बाह्लिकस्तथा आवन्त्यौ च महेष्वासौ कौरवं पर्यवारयन् १४ ते विंशतिपदं गत्वा संप्रहारं प्र
चक्रिरे पाण्डवा धार्तराष्ट्राश्च परस्परजिघांसवः १५ एवमुक्त्वा महाबाहुर्महद्विस्फार्य कार्मुकं भारद्वाजस्ततो भीमं षड्विंश
[illegible] सा समर्पयत् १६ भूयश्चैनं महाबाहुः शरैः शीघ्रमवाकिरत् पर्वतं वारिधाराभिः शरदीव बलाहकः १७ तं
प्रत्यविध्यद्दशभिर्भीमसेनः शिलीमुखैः त्वरमाणो महेष्वासः सव्ये पार्श्वे महाबलः १८ स गाढविद्धो व्यथितो वयोवृद्धश्च भारत प्रन
ष्टसंज्ञः सहसा रथोपस्थ उपाविशत् १९ गुरुं व्यथितं दृष्ट्वा राजा दुर्योधनः स्वयं द्रौणायनिश्च संक्रुद्धौ भीमसेनमभिद्रुतौ २० तावा
पतन्तौ संप्रेक्ष्य कालान्तकयमोपमौ भीमसेनो महाबाहुर्गदामादाय सत्वरं २१ अवप्लुत्य रथात्तूर्णं तस्थौ गिरिरिवाचलः समुद्यम्य गदां गुर्वीं
यमदण्डोपमां रणे २२ तमुद्यतगदं दृष्ट्वा कैलासमिव शृङ्गिणं कौरवो द्रोणपुत्रश्च सहितावभ्यधावतां २३ तावापतन्तौ सहितौ त्वरि

मादा

तौवलिनां वरैः अभ्यधावत वेगेन त्वरमाणो वृकोदरः २४ तमापतन्तं संप्रेक्ष्य संक्रुद्धं भीमदर्शनं समभ्यधावत्संरब्धाः कौरवाणां महारथाः
:२५ भारद्वाजमुखाः सर्वे भीमसेनं जिघांसया नानाविधानि शस्त्राणि भीमसेनरथे पातयन् २६ सहिताः पाण्डवं सर्वे पीडयन्तः समन्ततः तं दृ
ष्ट्वा संशयं प्राप्तं पीड्यमानं महारथं २७ अभिमन्युप्रभृतयः पाण्डवानां महारथाः अभ्यधावन्परीप्सन्तः प्राणान्स्त्यक्त्वा सुदुस्त्यजान् २८ अ
नूपाधिपतिः शूरो भीमस्य दयितः सखा नीलो नीलाम्बुदप्रख्यः संक्रुद्धो द्रौणिमभ्ययात् २९ स्पर्धते हि महेष्वासो नित्यं द्रोणसुतेन सः स
[illegible] स विस्फार्य महच्चापं द्रौणिं विव्याध पत्रिणा
३० यथा शक्रो महाराज पुरा विव्याध दानवं विप्रचित्तिं दुराधर्षं देवतानां भयंकरं ३१ येन लोकत्रयं क्रोधात्त्रासितं स्वेन तेजसा तथा नीले
न निर्भिन्नः सुमुक्तेन पतत्रिणा ३२ संजातरुधिरोत्पीडो द्रौणिः क्रोधसमन्वितः स विस्फार्य धनुश्चित्रमिन्द्राशनिसमस्वनं ३३ दध्रे
नीलविनाशाय मतिं मतिमतां वरः ततः संधाय विमलान्भल्लान्कर्मारधावितान् ३४ जघान चतुरो वाहान्पातयामास च ध्वजं सप्तमेन च
भल्लेन नीलं विव्याध वक्षसि ३५ स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् मोहितं वीक्ष्य राजानं नीलमभ्रचयोपमं ३६ घटोत्कचोऽभिसंक्रुद्धो
भ्रातृभिः परिवारितः अभिदुद्राव वेगेन द्रौणिमाहवशोभिनं ३७ तथेतरे चाभ्यधावन्राक्षसा युद्धदुर्मदाः तमापतन्तं संप्रेक्ष्य राक्षसं घोरदर्शनं ३८
अभ्यधावत तेजस्वी भारद्वाजात्मजस्त्वरन् निजघान च संक्रुद्धो राक्षसान्भीमदर्शनान् ३९ येऽभवन्नग्रतः क्रुद्धा राक्षसस्य पुरःसराः विमु राम०

स्वांश्चैव तान्दृष्ट्वा द्रौणिश्चापच्युतं शरैः ४० अक्रुध्यत महाकायो भीमसेनिर्घटोत्कचः प्रादुश्चक्रे ततो मायां घोररूपां सुदारुणां ४१
मोहयन्समरे द्रौणिं मायया वीरराट्स्म साधिपः ततस्ते तावकाः सर्वे मायया विमुखीकृताः ४२ अन्योन्यं समपश्यंत निकृत्तान्मेदिनी
तले विचेष्टमानाः कृपणाः शोणितेन परिप्लुताः ४३ द्रोणं दुर्योधनं शल्यमश्वत्थामानमेव च प्रायशश्च महेष्वासा ये प्रधानाः स
कौरवाः ४४ विध्वस्ता रथिनः सर्वे राजानश्च निपातिताः हयाश्च व हयारोहाः सन्निकृत्ताः सहस्रशः ४५ तद्दृष्ट्वा तावकं सैन्यं
विद्रुतं शिबिरं प्रति मम प्राक्रोशतो राजंस्तथा देवव्रतस्य च ४६ युध्यध्वं मा पलायध्वं मायेषा राक्षसी रणे घटोत्कचप्रयुक्तेति नाति
ष्ठंत विमोहिताः ४७ नैव ते श्रद्दधुर्भीता वदतोरावयोर्वचः तांश्च प्रद्रवतो दृष्ट्वा जयं प्राप्तास्त्र पाण्डवाः ४८ घटोत्कचेन सहिताः सिं
हनादान्प्रचक्रिरे शंखदुन्दुभिनिर्घोषैः समंतान्नेदिरे भृशं ४९ एवं तव बलं सर्वं हैडिम्बेन दुरात्मना सूर्यास्तमनवेलायां प्रभग्नं विद्रुतं दि
शः ५० इति भीष्मपर्वणि संजय उ० तस्मिन्महति संक्रंदे राजा दुर्योधनस्तदा गांगेयमुपसंगम्य विनयेनाभिवाद्य च १ तस्य सर्वं
यथावृत्तमाख्यातुमुपचक्रमे घटोत्कचस्य विजयमात्मनश्च पराजयं २ कथयामास दुर्धर्षो विनिःश्वस्य पुनः पुनः अब्रवीच्च तदा राजन्भी
ष्मं कुरुपितामहं ३ भवंतं समुपाश्रित्य वासुदेवं यथा परैः पाण्डवैर्विग्रहो घोरः समारब्धो मया प्रभो ४ एकादश समाख्याता अक्षौहि
[illegible] एयस्त्रयाणाम निदेश
तवतिष्ठंति मया सार्धं परंतप ५ सोऽहं भरतशार्दूल भीमसेनपुरोगमैः घटोत्कचं समाश्रित्य पाण्डवैर्युधि निर्जितः ६ तन्मे दहति गा

पुनः २

मो०

२७३

त म ४ कृपो द्रौणिः ४

त्रासितः शुष्ककक्षमिवानलः तदिच्छामि महाभाग त्वत्तस्तात परंतप ७ राक्षसापसदं हंतुं स्वयमेव पितामह त्वमेमाश्रित्य दुर्द्धर्षं त
न्मे कर्तुं त्वमर्हसि ८ एतच्छ्रुत्वा तु वचनं राज्ञो भरतसत्तमः दुर्योधनमिदं वाक्यं भीष्मः शांतनवोऽब्रवीत ९ शृणु राजन्मम वचो यत्त्वां वक्ष्यामि कौ
रव यथा त्वया महाराज वर्तितव्यं परंतप १० आत्मा रक्ष्यो रणे तात सर्वावस्थास्वरिंदम धर्मराजेन संग्रामस्त्वया कार्यः सदानघ ११
अर्जुनेन यमाभ्यां वा भीमसेनेन वा पुनः धर्मराजं पुरस्कृत्य राजा राजानमृच्छति १२ अहं द्रोणः कृतवर्मा च सात्वतः शल्यश्च सौमदत्तिश्च
विकर्णश्च महारथः १३ तव च भ्रातरः शूराः दुःशासनपुरोगमाः त्वदर्थं प्रतियोत्स्यामो राक्षसं तं महाबलं १४ रौद्रे तस्मिन्राक्षसेंद्रे
द्रयस्थिते संशयो महान् अयं वा गच्छतु रणे तस्य युद्धाय दुर्मतेः १५ भगदत्तो महीपालः पुरंदरसमो युधि एतावदुक्त्वा राजानं
भगदत्तमथाब्रवीत १६ समक्षं पार्थिवेंद्रस्य वाक्यं वाक्यविशारदः गच्छ शीघ्रं महाराज हैडिंबं युद्धदुर्मदं १७ वारयस्व रणे यत्तो मि
षतां सर्वधन्विनां राक्षसं क्रूरकर्माणं यथेंद्रस्तारकं पुरा १८ तव दिव्यानि चास्त्राणि विक्रमश्च परंतप समागमश्च बहुभिः पुराभूदरि
भिः सह १९ त्वं तस्य नृपशार्दूल प्रतियोद्धा महाहवे स्वबलेनाश्रितो राजन् जहि रक्षः पुंगवं २० एतच्छ्रुत्वा तु वचनं भीष्मस्य पृतनापतेः
प्रययौ सिंहनादेन परानभिमुखो द्रुतं २१ तमाद्रवंतं संप्रेक्ष्य गर्जंतमिव तोयदं अभ्यवर्तंत संक्रुद्धाः पांडवानां महारथाः २२ भीम
सेनोऽभिमन्युश्च राक्षसश्च घटोत्कचः द्रौपदेयाः सत्यधृतिः क्षत्रदेवश्च मारिष २३ चेदिपो वसुदानश्च दशार्णाधिपतिस्तथा सुप्र
तीकेन तांश्चापि भगदत्तोऽप्युपाद्रवत २४ ततः समभवद्युद्धं घोररूपं भयानकं पांडूनां भगदत्तेन यमराष्ट्रविवर्धनं २५ प्रयुक्ता रथिभि

ले१

२७३

राम०

तेजना: १४ ६५३

वीराणामीभिवारणाः सं[illegible]
ते निपेतुर्महाराज नागा भुवि सवैष्णवः २६ प्रभिन्नाश्च महानागा विनीता हस्तिसादिभिः परस्परं समासाद्य संनिपेतुरभीतवत् २७ म
रीचारोष संरब्धा विषाणाग्रैर्महाहवे बिभिदुर्[illegible] मुसलैः समसाद्य परस्परं २८ हयाश्च चामरापीडाः प्रासपाणिभिरास्थिताः
चोदिताः सादिभिः क्षिप्रं निपेतुरितरेतरं २९ पादाताश्च पदातीसैर्घे स्ताडिताः शक्तितोमरैः [illegible]
[illegible] न्यपतंस्तत्र भूमौ शतशोऽथ सह
स्रशः ३० रथिनश्च रथैस्तत्र कर्णिनालीकसायकैः निहत्य समरे वीरान् सिंहनादान्विनेदिरे ३१ तस्मिंस्तथा वर्त्तमाने संग्रामे लो
महर्षणे भगदत्तो महेष्वासो भीमसेनमथाब्रवीत् ३२ कुंजरेणाप्रभिन्नेन सप्तधा स्रवता मदं पर्वतेन यथा तोयं स्रवमाणेन सर्वशः ३३
किरन्शरसहस्राणि स्थितोऽक्षि ऐरावतस्थो मघवान् वारिधारा इवानघ ३४ स भीमं शरधाराभिस्ताडयामास पार्थिवः पर्वतं वा
रिधाराभिर्जलदो यथा ३५ भीमसेनस्तु संक्रुद्धः पादरक्षान् परः शतान् निजघान महेष्वासः संरब्धः शरवृष्टिभिः ३६ ता
न्दृष्ट्वा निहतान्क्रुद्धो भगदत्तः प्रतापवान् चोदयामास नागेन्द्रं भीमसेन रथं प्रति ३७ स नागः प्रेषितस्तेन बाणो ज्याचोदितो यथा अ
भ्यधावत वेगेन भीमसेनमरिन्दमं ३८ तमापतन्तं संप्रेक्ष्य पाण्डवानां महारथाः अभ्यवर्त्तन्त वेगेन भीमसेनपुरोगमाः ३९ केकयाश्चा
भिमन्युश्च द्रौ[illegible]पदेयाश्च सर्वशः दशार्णाधिपतिः शूरः क्षत्रदेवश्च मारिष ४० चेदिपश्चित्रकेतुश्च संरब्धाः सर्व एव ते उत्तमास्त्रा

६२

सै ६

गिरिस्था निरशयंतो महाबलाः ४१ ते मेकं कुंजरं संक्रुद्धाः समंतात्पर्यवारयन् स विद्धो बहुभिर्बाणैर्गजेंद्रस्तैर्महाद्विपः ४२ संग्रा
तस्य विरेसी ते धातुचित्र इवाद्रिराट् दशग्रीवाधिपतिश्चापि गजं भूमिधरोपमं ४३ समा तो भिद्रावयन् गरुत्मान्वारणं तमापते
ते समरे गजेंद्रपतिः सम ४४ रथा रसमती कोपि विपेलेन मकरालयं धारितैस्तु नागेंद्रैर्दशग्रीवस्य महात्मनः ४५ साधु साधुरिति
सेनानिपांरवेया [illegible] मप्तजयन् ततः प्राग्ज्योतिषः कु
द्धस्तो मरान्वितर्दशः ४६ प्राहिणोत्तस्य नागस्य प्रमुखे क्लपेसत्तमः उपाहृत्य मधः क्षिप्रमप्रवल्गत वेगितः ४७ स प्रद्रुद्राव वेगेन प्रा
स्थैर्य रवं संप्रहृष्यातः स बलं वायुपृष्ठेस्थैर्निघोरस्ता ४८ तस्मिन्पतति तेनागो पांडवानां मृहारयाः सिंहनादं विनेदोच्चैर्यद्वापेवा
पतत्क्षितेः ४९ ततोभीमं पुरस्कृत्य सम देतमुपाद्रवन् किंरतो विविधान्नाराणां छत्राणि विविधानि च ५० ते घामापततां गजेन संक्रु
द्धानाममर्षिणां श्रुत्वामनिनदं घोरम मप्रोद्धामा द्रुमः ५१ मगस्तोमहे धासः स्वनागं समचोदयत् अंकुशांगुष्ठनुन्नेः स मगरके
रेयुधि ५२ तस्मिन्नकुरोसमभवत्संवर्तकरवानलः रथसंघांस्तथा नागान्हयांश्च हयसादिभिः ५३ पादातांश्च ससंक्रुद्धः
शतशोथ सहस्रशः समतु नंतर्मे रेनागः संप्रधावन्ततस्ततः ५४ तेन संक्षोभ्यमाने तु पांडवानां बले महत् संचुकोच महाप
जनवं भी सेना समाहितं ५५ भग्नं तु स्वबलं दृष्ट्वा भास्करेन धीमता घटोत्कचो थ संक्रुद्धो भगदत्तमुपाद्रवत् ५६ विकट पुरुषोत्
दीप्तास्यो दीप्तलोचनः रूपं विभीषणं कृत्वा रोषेण प्रज्वलन्निव ५७ जग्राह विमलं शूलं गिरीणामपि दारुणं नागांतिकं वधं समुः स ह

साचित्रसेनस्य महाबलः पर सविस्फुलिंगमालाभिः समंतात्परिवेष्टितः तमापतंतं सहसा दृष्ट्वा प्राग्ज्योतिषोत्तमः पार्थ चित्रसेनप
चिरंतो ह्यस्य महेंद्रं सुसंरब्धः चिच्छेद तं महच्छूलं तेन बाणेन वीर्यवान् ६० स पपात द्विधा छिन्नं शूलं हेमपरिष्कृतं महाशनिर्यथा प्र
द्योतयंती नभोगता ६१ शूलं निपतितं दृष्ट्वा द्विधा कृत्तं च पार्थिव रुक्मदंडां महाशक्तिं जग्राह ज्वलितशिखोपमां ६२ चित्रसेनस्तां
रुक्मसंकाशां तिष्ठ तिष्ठेति चाब्रवीत् तमापतंतीं सहसा वियत्स्थामशनीमिव ६३ उत्ससर्ज स राजेंद्रो जग्राह हननाय च बभंज चैनां लघितो जान
मोऽप्यभवत् ६४ पश्यतः पार्थिवेंद्रस्य तदद्भुतमिवाभवत् तस्यैव संक्रांतकर्मराज्ञे सेनबलीयसा ६५ द्विविदर्वा मगधवामनयश्चापि
विस्मिताः पांडवाश्च महाराज भीमसेनपुरोगमाः ६६ साधु साध्विति ते नादं पृथिवीमनुनादयन् तं तु श्रुत्वा महानादं समर्हष्टानां म
हात्मनां ६७ नामृष्यत महेष्वासो भगदत्तः प्रतापवान् सविस्फार्य महच्चापं मिंद्राशनिसमप्रभं ६८ तेनैव पार्थमेवाजौ पांडवानां
महारथान् विससर्ज विमलान् शरांस्ततो नाराचान्वह्निसमप्रभान् ६९ भीमसेनं केकयानां विद्याधराणां सेनबलिभिः शरैः अभिमन्युं त्रिभिश्चैव चे
केयान् पंचभिस्तथा ७० पूरयित्वा विसृष्टेन शरेणानतपर्वणा बिभेद दक्षिणं बाहुं क्षत्रदेवस्य चाहवे ७१ पपात सहसा तस्य
सशरं धनुरुत्तमं द्रौपदेयांस्ततः पंचपंचभिः समताडयत् भीमसेनस्य च क्रोधान्निजघान तुरंगमान् ध्वजं केसरिणं चास्य चिच्छेद
विशिखैस्त्रिभिः ७३ निर्बिभेद त्रिभिश्चान्यैः सारथिं चास्य पत्रिभिः स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् ७४ विशोको

भगदत्तश्च समरे तेन नागेन भारत ताभ्यां द्रुतः पांडवपक्षसंयुधि छिन्नमुपाद्रवत तदासीत् सुमहद्युद्धं भगदत्तस्य मारिष पांचालैः पांडवैः सह ५

क्ष१ ध१

भी॰ २८५

भरतश्रेष्ठ मार्गणैस्तेन संयुगे ततो भीष्मो महाबाहुर्विरथो रथिनां वरः ७५ गदां प्रगृह्य वेगेन प्रचस्कंद रथोत्तमात् तमॅ तं गदं दृष्ट्वा समग्रांग
मिव पर्वतं ७६ तावकानां भयं घोरं समपद्यत भारत एतस्मिन्नेव काले तु पांडवः कृष्णसारथिः ७७ अर्जुनो महाराज निघ्नं छत्रून् समंततः
पुत्रैस्तौ पुरुषव्याघ्रौ पितापुत्रौ महाबलौ ७८ आस्मातिषेणसंयुक्तौ भीमसेनघटोत्कचौ दृष्ट्वा च पांडवो भ्रातस्तु ध्मानानान्महारथं ७ एवं
रितो भरतश्रेष्ठ तत्रापु धनिकिंरस्थरान ततो दुर्योधनो राजा लक्ष्मणो महारथः ८ सेनामध्ये स्थितस्त्रिसंरथनागाश्वसंकुलां तामापतंतीं
सहसा कौरवाणां महाचमूं ८१ अभिदुद्राव वेगेन पांडवः श्वेतवाहनः केकयैश्चाधतायुधैः भीमसेनोपि समरे त्याधु मोकेशवार्जुनौ
८४ आघ्राव प्रयधयास्तेमिराव ऋषमुत्तमं इति भीष्मपर्वणि संजय ३० नैविष्टे हृष्ट्वामुरा २ कुरूणां पांडवानां च रूपं घोरं महा
मतिः सततो निवारितवान् धृतराष्ट्रं जनेश्वरं ३ अमे चैव हवो वीराः संग्रामे मधुसूदन निहताः कौरवैः संख्ये तथास्माभिश्च कौरवाः
४ अर्थहेतोर्नरश्रेष्ठ कियं तेत कर्म कुत्सितं ५ धिगर्थान् मत्कृते ह्येवं क्रियते ज्ञातिसंक्षयः अधनस्य मृतं श्रेयो न तु ज्ञातिवधाद्धनं ७
किं नु प्राप्स्यामहे कृष्ण हत्वा ज्ञातीन् समागतान् दुर्योधनापराधेन शकुनेः सौबलस्य च क्षत्रियाणि धनं यांति कर्णदुर्मंत्रितेन च ३
राजानं च विजानामि सम्यक्कृतं मधुसूदन ए कृतं राज्ञा महाबाहो याचमानं सुयोधनं राज्यार्धं पंच वा ग्रामान्नाकार्षीत्स दुर्मतिः १०
दृष्ट्वा हि क्षत्रियांछूरान् शयानान्धरणीतले निंदामि भृशमात्मानं धिगस्तु क्षत्रजीविकां ११ अशक्तमिति मामेते ज्ञास्यंते क्षत्रिया रणे यु

राम॰ २८५

पत्रं विनितं श्रुत्वा इत्यावं धनंजय दुःखेन महता विष्टो निःश्वसन् पन्नगो यथा १ अब्रवीत् समये राजन् बाहुदेवमिदं वचः ४ इदं नूनं महाप्रा

न१

२८

हंतुमेनरुचितंज्ञातिभिर्मधुसूदन १२ सोवरुह्यरथात्तूर्णंधार्तराष्ट्रचमूपतिं प्रतिष्ठेमहापार्श्वमुद्यम्यमहतींगदां १३ नायंयापयितुंका
लोविधिसेमाधवचिंतित एवमुक्तस्तुपार्थेनकेशवःपरवीरहा १४ चोदयामासतानश्वान्दुरान्वाजिरहसः अथशब्दोमहानासीत्तवसै
न्यस्यभारत १५ मारुतोद्धूतवेगस्यसागरस्येवपर्वणि अपराह्णेमहाराजसंग्रामःसमपद्यत १६ पर्जन्यसमनिर्घोषोभीष्मस्यसहपांडवैः
ततोराजंस्तवसुताभीमसेनमुपाद्रवन् १७ परिवार्यरणेद्रोणंवसवोवासवंयथा ततःशांतनवोभीष्मःकृपश्चरथिनांवरः १८ भगद
त्तःसुशर्माचधनंजयमुपाद्रवन् हार्दिक्योबाह्लिकश्चैवसात्यकिंसमभिद्रुतौ १९ अंबष्ठकस्तुनृपतिरभिमन्युमवस्थितः शेषास्त्वन्ये
महाराजशेषानेवमहारथान् २० ततःप्रववृतेयुद्धंघोररूपंभयावहं भीमसेनस्तुसंप्रेक्ष्यपुत्रांस्तवजनेश्वर २१ प्रजज्वालरणेक्रु
द्धोहविषाहव्यवाडिव पुत्रास्तुतवकौंतेयंछादयांचक्रिरेशरैः २२ प्रावृषीवमहाराजजलदाःपर्वतंतं छाद्यमानोबहुधापुत्रैस्तवविः
शांपते २३ सृक्किणीसंलिहन्वीरःशार्दूलइवदर्पितः क्षुरेणस्कंधंततोभीमःपातयामासभारत २४ अपरेणसुतोद्योनःसोभवद्गत
जीवितः अपरेणतुभल्लेनपीतेननिशितेनतु २५ अपातयत्कुंडलिनंसिंहःक्षुद्रमृगंयथा ततःसुनिशितान्बाणान्समादत्तशिलीमु
खान् २६ ससंक्रुद्धस्त्वरायुक्तःपुत्रांस्तेप्राप्यमारिष प्रेषिताभीमसेनेनशरास्तेदृढधन्विना २७ अपातयंतपुत्रांस्तेरथेभ्यःसुमहारथा
न् अनाधृष्टिंकुंडभेदिंविराटंदीर्घलोचनं २८ दीर्घबाहुंसुबाहुंचतथैवकनकध्वजं प्रपेततंस्मवीरास्तेविरेजुर्भरतर्षभ २९ वसंतेपुष्पशव

का ८२ ५५

लाश्च्युताः संपतितास्तत्र ततः प्रसुसुवुः शेषास्तत्रपुत्रामहाहवे ३० तं कालमिव संप्रेक्ष्य भीमसेनं महाबलं द्रोणस्तु समरे वीरं निर्दहंतं सुतांस्तव
३१ यथाद्रिं वारिधाराभिः समंताद्व्याकिरं छरैः तत्राद्भुतमपश्याम कुंतीपुत्रस्य पौरुषं ३२ द्रोणेन वार्यमाणोपि निजघ्ने पसृतान्ता
स्तव यथा गोवृषभो वर्षं संधारयति खात्पतत् ३३ भीमस्तथा द्रोणमुक्तं शरवर्षमधारयत् अद्भुतं च महाराज तत्र चक्रे वृकोदरः
३४ यत्पुत्रांस्तव धीमान्सो द्रोणं चैव न्यवारयत् पुत्रेषु तव वीरेषु चिक्रीडार्जुनपूर्वजः ३५ मृगेष्विव महाराज चरन्व्याघ्रो महाबलः यथा
हि पशुमध्यस्थो द्रावयेत पशून्वृकः ३६ वृकोदरस्तव सुतांस्तथा व्यद्रावयद्रणे गांगेयो भागदत्तश्च गौतमश्च महारथाः ३७ पांडवं स
मं युद्धे वारयामासुरर्जुनं अस्त्रैरस्त्राणि संवार्य तेषां सोतिरथो रणे ३८ प्रवीरांस्तव सैन्येषु प्रेषयामास मृत्यवे अभिमन्युस्तु राजानम
म्बष्ठं लोकविश्रुतं ३९ विरथं रथिनां श्रेष्ठं कारयामास सायकैः विरथो वध्यमानस्तु सौभद्रेण यशस्विना ४० अवप्लुत्य रथात्तूर्ण
मंबष्ठो वसुधाधिपः असिं चिक्षेप समरे सौभद्रस्य महात्मनः ४१ आरुरोह रथं चैव हार्दिक्यस्य महाबलः आपतंतं तु निस्त्रिंशं यु
द्धमार्गविशारदः ४२ लाघवाद्व्यंसयामास सौभद्रः परवीरहा व्यंसितं वीक्ष्य निस्त्रिंशं सौभद्रेण रणे सदा ४३ साधु साध्विति सै
न्यानां प्रणादो भूदिशांपते धृष्टद्युम्नमुखास्त्वन्ये तव सैन्यमयोधयन् ४४ तथैव तावकाः सर्वे पांडुसैन्यमयोधयन् तत्राक्रंदो महा
नासीत्तव तेषां च भारत ४५ निघ्नतां दृढमन्योन्यं कुर्वतां कर्म दुष्करं अन्योन्यं हि रणे शूराः केशेष्वाक्षिप्य मारिषः ४६ नखैर्दंतैरयुध्यंत मु
ष्टिभिर्जानुभिस्तथा तलैश्चैवाथ निस्त्रिंशैर्बाहुभिश्च सुसंस्थितैः ४७ विवरं प्राप्य चान्योन्यमनयन्यमसादनं न्यहनच्च पिता पुत्रं पुत्रश्च पितरं तथा
४८ व्याकुलीकृतसर्वांगा युयुधुस्तत्र मानवाः रणे चारूणि चापानि हेमपृष्ठानि मारिष ४९ हतानामपविद्धानि कलापाश्च महाधनाः
जातरूपमयैः पुंखै राजतैर्निशिताः शराः ५० तैलधौतान्व्यराजंत निर्मुक्तभुजगोपमाः हस्तिदंतत्सरून्खड्गान्जातरूपपरिष्कृतान् ५१ चर्मा

विधांश्चापाश्चित्रहेमपरिष्कृतान् ५४ कृपाश्च बहुविधाकाराश्चमरान्व्यजनानि च नानाविधानि शस्त्राणि प्रगृह्यपतितान्नरः ५५ जीवंतश्च बहवः पेते गजमत्ताम
हारथाः गदाविमथितैर्गात्रैर्मुसलैर्भिन्नमस्तकाः ५६ गजवाजिरथक्षुण्णाः शेरते नृपते क्षितौ तथैवाश्वनृनागानां शरीरैर्विबभौ तदा ५७ संछन्ना वसुधा
राजन्पर्वतैरिव सर्वशः समरे पतितैश्चैव शक्त्यृष्टिशरतोमरैः ५८ निस्त्रिंशैः पट्टिशैः प्रासैरयस्कुंतैः परश्वधैः परिघैर्भिंडिपालैश्च शतघ्नीभिश्च मारिष ५९
शरीरैः शस्त्रनिर्भिन्नैः समास्तीर्यत मेदिनी विशब्दैरल्पशब्दैश्च शोणितौघपरिप्लुतैः ६० गतासुभिरमित्रघ्न विबभौ निचिता मही सतलत्रैः सकेयूरैर्बाहु
भिश्चंदनोक्षितैः ६१ हस्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनां बद्धचूडामणिवरैः शिरोभिश्च सकुंडलैः ६२ पातितैरृषभाक्षाणां बभौ भारत मेदिनी क
वचैः शोणितादिग्धैर्विप्रकीर्णैश्च कांचनैः ६३ रराज सुभृशं भूमिः शांतार्चिभिरिवानलैः विप्रविद्धैः कलापैश्च पतितैश्च शरासनैः ६४ विप्रकीर्णैः शरै
श्चैव रुक्मपुंखैः समंततः रथैश्च सर्वतो भग्नैः किंकिणीजालभूषितैः ६५ वाजिभिश्च हतैर्वीरैः स्रस्तजिह्वैः सशोणितैः अनुकर्षैः पताकाभिरुपासं
गैर्ध्वजैरपि ६६ प्रवीराणां महाशंखैर्विप्रकीर्णैश्च पांडुरैः स्रस्तहस्तैश्च मातंगैः शयानैर्विबभौ मही ६७ नानारूपैरलंकारैः प्रमदेवाभ्यलंकृता दंतिभिश्चाप
रैस्तत्र सप्रासैर्गाढवेदनैः ६८ करैः शब्दं विमुंचद्भिः शीकरं च मुहुर्मुहुः विबभौ नरशार्दूल स्पंदमानैरिवाचलैः ६९ नानारागैः कंबलैश्च परिस्तोमैश्च दं
तिनां वैदूर्यमणिदंडैश्च पतितैरंकुशैः शुभैः ७० घंटाभिश्च गजेंद्राणां पतिताभिः समंततः विपाटितविचित्राभिः [illegible] कुथाभिरंकुशैस्तथा ७१ ग्रैवे
वेयैश्चित्ररूपैश्च रुक्मकक्षाभिरेव च यंत्रैश्चैव बहुधा छिन्नैस्तोमरैश्चापि कांचनैः ७२ अश्वानां रेणुकपिलै रुक्मच्छन्नैरुरश्छदैः सादिनां भुजगैश्छिन्नैः

श्रीराम

२

भी०
२२६

गैष्किलैःपतितैःसांगदैस्तथा ७३ प्रासैश्चविमलैःस्तीक्ष्णैर्विमलाभिस्तथर्ष्टिभिः उष्णीषैश्चतथाचित्रैर्विप्रविद्धैस्ततस्ततः ७४ विचित्रैर्वाणवर्षैश्चजातरूपप
रिष्कृतैः अश्वास्तरपरिस्तोमैरांकवैर्मृदितैस्तथा ७५ नरेंद्रचूडामणिभिर्विचित्रैश्चमहाधनैः छत्रैस्तथापविद्धैश्चचामरैर्व्यजनैरपि ७६ पद्मेंदुद्युतिभिश्चैववद
नैश्चारुकुंडलैः क्लृप्तश्मश्रुभिरत्यर्थंवीराणांसमलंकृतैः ७७ अपविद्धैर्महाराजसुवर्णोज्ज्वलकुंडलैः ग्रहनक्षत्रशवलाद्यौरिवासीद्वसुंधरा ७८ एवमे
तेमहासेनेमृदितेतत्रभारत परस्परंसमासाद्यतवतेषांचसंयुगे ७९ तेषुश्रांतेषुभग्नेषुमृदितेषुचभारत रात्रिः समभवत्तत्रनापश्यामततोनुगान् ८०
ततोवहारंसैन्यानांप्रचक्रुःकुरुपांडवाः रजनीमुखेसुरौद्रेतुवर्तमानेमहाभये ८१ अवहारंततःकृत्वासहिताःकुरुपांडवाः न्यविशंतयथाकालंगत्वा
स्वशिविरंतदा ८२ इतिभीष्मपर्वणिअष्टमदिवसंयुद्धंसमाप्तं॥ ॥संजयउवाच ततोदुर्योधनोराजाशकुनिश्चापिसौवलः दुःशासनश्चपुत्रस्तेसू
तपुत्रश्चदुर्जयः १ समागम्यमहाराजमंत्रंचक्रुर्विवक्षितं कथंपांडुसुताःसंख्येजेतव्याःसगणाइति २ ततोदुर्योधनोराजासर्वांस्तानाहमंत्रिणः सूत
पुत्रंसमाभाष्यसौवलंचमहावलं ३ द्रोणोभीष्मःकृपःशल्यःसौमदत्तिश्चसंयुगे नपार्थान्प्रतिबाधंतेनजानेतच्चकारणं ४ अवध्यमानास्तेचापिक्ष
पयंतिवलंमम सोस्मिक्षीणवलःकर्णक्षीणशस्त्रश्चसंयुगे ५ निकृतःपांडवैःशूरैरवध्यैर्दैवतैरपि सोहंसंशयमापन्नःप्रहरिष्येकथंरणे ६ कर्ण
उवाच माशोचभरतश्रेष्ठकरिष्येहंप्रियंतव भीष्मःशांतनवस्तूर्णमपयातुमहारणात् ७ निवृत्तेयुधिगांगेयेन्यस्तशस्त्रेचभारत अहंपार्थान्हनिष्या
मिसहितान्सर्वसोमकैः ८ पश्यतोयुधिभीष्मस्यशपेसत्येनतेनघ पांडवेषुदयांनित्यंसहिभीष्मःकरोतिवै ९ अशक्तश्चरणेभीष्मोजेतुमेतान्महा

रा

राम०
२२६

न् अभिमानीरणेभीष्मोनित्यंचापिरणप्रियः १० सकथंपांडवान्युद्धेजेष्यतेतातसंगतान् सत्वंशीघ्रमितोगत्वाभीष्मस्यशि
विरंप्रति ११ अनुमान्यगुरुंवृद्धंशस्त्रंन्यासायभारत नस्तशस्त्रेततोभीष्मेनिहतान्पश्यपांडवान् १२ मयैकेनरणेराजन्सबं ८२
धुगणबांधवान् एवमुक्तस्तुकर्णेनपुत्रोदुर्योधनस्तव १३ अब्रवीद्भ्रातरं तत्रदुःशासनमिदंवचः अनुमान्यरणे भीष्म
मेषोहंद्विपदांवरं १४ आगमिष्यततःक्षिप्रंत्वंसकाशमरिंदम अपयातेततोभीष्मेप्रहरिष्यामिसंयुगे १५ निष्पपाततततस्तू
र्णंपुत्रस्तवविशांपते सहितोभ्रातृभिःसर्वैर्देवैरिवशतक्रतुः ततस्तंनृपशार्दूलंशार्दूलसमविक्रमं आरोहयद्रथंतूर्णंभ्रा
तादुःशासनस्तव १७ अंगदीबद्धमुकुटोहस्ताभरणवान्नृप धार्तराष्ट्रोमहाराजविबभौसपथिव्रजन् १८ भंडीपुष्पनिकाशे
नपतनीयनिभेनच अनुलिप्तःपरार्ध्येनचंदनेनसुगंधिना १९ अरजोंबरसंवीतःसिंहखेलगतिर्नृप शुशुभेविमलार्चि
ष्मान्नभसीवदिवाकरः २० तंप्रयांतंनरव्याघ्रंभीष्मस्यशिविरंप्रति अनुजग्मुःमहेष्वासाःसर्वलोकस्यधन्विनः २१ भ्रात

रथश्चमहेष्वासास्त्रिदशाइववासवं हयानन्येसमारूढागजानन्येचभारत २२ रथैरन्येनरश्रेष्ठंपरिवव्रुः समंततः आत्तशस्त्रास्त्रसंन्
द्धारक्षणार्थंमहीपतेः२३ प्रादुर्बभूवुः सहिताः शक्रस्येवामरादिवि सपूज्यमानः कुरुभिः कौरवाणांमहाबलः २४ प्रययौसद
नंराजागांगेयस्ययशस्विनः आनीयमानः सततंसोदरैः परिवारितः २५ दक्षिणादक्षिणाः कालेसंहृत्यस्वभुजेनतदा हस्तिह
स्तोपमंशैक्यंसर्वशत्रुनिबर्हणं २६ प्रगृह्यांजलीन्नृणामुद्यतान्सर्वतोदिशः शुश्राववमधुरावाचोनानादेशनिवासिनां २७
संस्तूयमानः सूतैश्चमागधैश्चमहायशाः पूजयानश्चतान्सर्वान्सर्वलोकेश्वरेश्वरः २८ प्रदीपैः कांचनैस्तत्रगंधतैलावसेचितैः
परिवव्रुर्महात्मनः प्रज्वलद्भिः समंततः २९ सतैः परिवृतोराजाप्रदीपैः कांचनैर्ज्वलन् सुशुभेचंद्रमायुक्तोदीप्तैरिवमहाग्र
हैः३० कांचनोष्णीषिणस्तत्रवेत्रझर्झरपाणयः प्रोत्सारयंतः शनकैस्तंजनंसर्वतोदिशं ३१ संप्राप्यततोराजाभीष्मस्य
सदनंशुभं अवतीर्यहयाच्चापिभीष्मंप्राप्यजनेश्वरः ३२ अभिवाद्यततोभीष्मंनिषण्णः परमासने कांचनेसर्वतोभद्रेस्पर्ध्या

भ्र

स्तरणसंहते ३३ उवाचप्रांजलिर्भीष्मंबाष्पकंठोश्रुलोचनः त्वांवयंहिसमाश्रित्यसंयुगेशत्रुसूदन ३४ उत्सहेमरणेजेतुंसेंद्रानपिसु
रासुरान् किमुपांडुसुतान्वीरान्ससुहृद्गणबांधवान् ३५ तस्मादर्हसिगांगेयकृपांकर्तुंमयिप्रभो जहिपांडुसुतान्वीरान्महेंद्र ६
वदानवान् ३६ अहंसर्वान्महाराजनिहनिष्यामिसोमकान् पांचालान्कैकयैःसार्धंकरूषांश्चेतिभारत ३७ त्वद्वचःसत्यमेवा
स्तुजहिपार्थान्समागतान् सोमकांश्चमहेष्वासान्सत्यवाग्भवभारत ३८ दययायदिवाराजन्द्वेष्यभावान्ममप्रभो मंदभाग्य
तयावापिममरक्षसिपांडवान् ३९ अनुजानीहिसमरेकर्णमाहवशोभिनं सजेष्यतिरणेपार्थान्ससुहृद्गणबांधवान् ४०
सएवमुक्त्वानृपतिःपुत्रोदुर्योधनस्तव नोवाचवचनंकिंचिद्भीष्मंसत्यपराक्रमं ४१ इतिभीष्मपर्वणि॥ ॥संजयउ० वाक्
शल्यैस्तवपुत्रेणासोत्तविद्धोमहात्मनाः दुःखेनमहताविष्टोनोवाचप्रियमण्वपि १ सध्यात्वासुचिरंकालंदुःखरोषसमन्वि
तः श्वासमानोयथानागः प्रणुन्नोवाक्शलाकया २ उद्वृत्यचक्षुषीकोपान्निर्दहन्निवभारत सदेवासुरगंधर्वंलोकंलोक
विदांवरः ३ अब्रवीत्तवपुत्रंससामपूर्वमिदंवचः किंत्वंदुर्योधनैवंमांवाक्शल्यैरपकृंतसि ४ घटमानंयथाशक्तिकुर्वाणंच
तवप्रियं जुह्वानंसमरेप्राणांस्तवैवप्रियकाम्यया ५ यदातुपांडवःशूरःखांडवेग्निमतर्पयत् पराजित्यरणेशक्रंपर्याप्तंतन्नि

पदस्वत्यांमताभ्याहोगन्धर्वैर्हतमोजसा अमोघयत्वाराकृतःपर्याप्तंतन्निदर्शनम् ६ ।१७

सर्वेषु१ स२

दर्शनं ७ इवमाराोषुं सोदरेषुतवप्रभो सूतपुत्रेचराधेयेपर्यासंतन्निदर्शनं ८ यच्चनंसहितान्सर्वान्विराटनगरेतदा एकएवसमुद्यातःप
र्यासंतन्निदर्शनं ९ द्रोणंचपृथिवींरङ्गंमाद्यनिर्जित्यसंयुगे वासांसिसमादत्तपर्यासंतन्निदर्शनं १० यथाद्रौणिंमहेष्वासंशारद्व
तमथापिच गोग्रहेजितवान्पूर्वंपर्यासंतन्निदर्शनं ११ विजित्यचपराकर्णंसदापुरुषमानिनं उत्तरायैददौवस्त्रंपर्यासंतन्निदर्शनं
१२ निवातकवचान्युद्धेवासवेनापिदुर्जयान् जितवान्समरेपार्थःपर्यासंतन्निदर्शनं १३ कोहिशक्तोरणेजेतुंपांडवंरभसंतदा त्वंतुमोहा
न्नजानीषेवाच्यावाच्यंसुयोधन १४ मुमूर्षुर्हिनरःसर्वान्वृक्षान्पश्यतिकांचनान् तथात्वमपिगांधारेविपरीतानिपश्यसि १५ स्व
यंवैरंमहत्कृत्वापांडवैःसहसृंजयैः युध्यस्वतानद्यरणेपश्यामःपुरुषोभव १६ अहंतुसोमकान्सर्वान्पांचालांश्चसमागतान् निहनि
ष्येनरव्याघ्रवर्जयित्वाशिखंडिनं १७ तैर्वाहंनिहतःसंख्येगमिष्येयमसादनं तान्वानिहत्यसमरेप्रीतिंदास्याम्यहंतव १८ पूर्वंहि
स्त्रीसमुत्पन्नाशिखंडीराजवेश्मनि वरदानात्पुमान्जातःसैषावैस्त्रीशिखंडिनी १९ तमहंनहनिष्यामिप्राणत्यागेपिभारत यो
सौप्राङ्निर्मिताधात्रासैषावैस्त्रीशिखंडिनी २० सुखंस्वपिहिगांधारेश्वोस्मिकर्तामहारणं यंजनाःकथयिष्यंतियावत्स्थास्यति
मेदिनी २१ एवमुक्तस्तवसुतोनिर्जगामजनेश्वरः अभिवाद्यगुरुंमूर्ध्नाप्रययौस्वंनिवेशनं २२ आगम्यतुततोराजाविसृज्यचमहाज

सर्वध्यानु १

ने। प्रविवेश ततस्तूर्णं क्रूपंकरः २३ प्रविष्टः स निशां तां च गमयामास पार्थिवः प्रभातायां च शर्वर्यां प्रातरुत्थाय तान्नृपः २४ राज्ञः समाज्ञापयत सेनां योजयतेति ह अद्य भीष्मो रणे क्रुद्धो निहनिष्यति सोमकान् २५ दुर्योधनस्ततः श्रुत्वा रात्रौ विलपितं बहु मन्यमानः स तं राजन्प्रत्यादेशमिवात्मना २६ निर्वेदं परमं गत्वा विनिंद्य परवाच्यतां दीर्घं दध्यौ शांतनवो योद्धुकामोऽर्जुनं रणे २७ इंगितेन तु तज्ज्ञात्वा गांगेयेन विचिंतितं दुर्योधनमहाराजदुःशासनमचोदयत् दुःशासन रथास्तूर्णं युज्यंतां भीष्मरक्षिणः द्वाविंशतिमनीकानि सर्वाण्येवाभिचोदय २९ इदं हि समनुप्राप्तं वर्षपूगाभिचिंतितं पांडवानां ससैन्यानां वधो राज्यस्य चागमः ३० तत्र कार्यतमं मन्ये भीष्मस्यैवाभिरक्षणं स नो गुप्तः सहायः स्याद्धन्यात्पार्थांश्च संयुगे ३१ अब्रवीद्धि विशुद्धात्मा नाहं हन्यां शिखंडिनं स्त्रीपूर्वको ह्यसौ राजंस्तस्माद्वर्ज्यो मया रणे ३२ लोकस्तद्वेद यदहं पितुः प्रियचिकीर्षया राज्यं स्फीतं महाबाहो स्त्रियश्च त्यक्तवान्पुरा ३३ नैव चाहं स्त्रियं जातु न स्त्रीपूर्वं कथंचन हन्यां युधि नरश्रेष्ठ सत्यमेतद्ब्रवीमि ते ३४ अयं स्त्रीपूर्वको राजन्शिखंडी यदि ते श्रुतः उद्योगे कथितं यत्तत्तथा जाता शिखंडिनी ३५ कन्या भूत्वा पुमाञ्जातः स च मां योधयिष्यति तस्याहं प्रमुखे बाणान्न मुंचेयं कथंचन ३६ युद्धे हि क्षत्रियांस्तात पांडवानां जयैषिणः सर्वानन्यान्हनिष्यामि संप्राप्तान्रणमूर्धनि ३७ एवं मां भरतश्रेष्ठ गांगेयः प्राह शास्त्रवित् तत्र सर्वात्मना मन्ये गांगेयस्यैव पालनं ३८ अरक्ष्यमाणं हि वृको हन्यात्सिंहं महाहवे मा वृकेणेव गांगेयं घातयेम शिखंडिना ३९

मात्तलः शकुनिः शल्यः कृपो द्रोणो विविंशतिः यत्तारक्षंतु गांगेयं तस्मिन् गुप्ते ध्रुवो जयः ४० एतच्छ्रुत्वा ततः सर्वे दुर्योधनवचस्तदा सर्वतो
रथवंशेन गांगेयं पर्यवारयन् प्रमुदा ४१ कंपयंतो भुवं द्यां च क्षोभयंतश्च पांडवान् तै रथैः सुसंयुक्तैर्दंतिभिश्च महारथाः ४२ परिवार्य रणे
यो भीष्मं दंशिताः समवस्थिताः यथा देवासुरे युद्धे त्रिदशा वज्रधारिणं ४३ सर्वे ते स्म व्यतिष्ठंत रक्षंतस्तं महारथं सव्यं चक्रं युधामन्यु
रुत्तमौजाश्च दक्षिणं ४४ गोप्तारावर्जुनस्यैतावर्जुनोऽपि शिखंडिनः रक्ष्यमाणः स पार्थेन तथास्माभिर्विवर्जितः ४५ यथा भीष्मं न नो
हन्याद्दुःशासन तथा कुरु भ्रातुस्तद्वचनं श्रुत्वा पुत्रो दुःशासनस्तव ४६ भीष्मं प्रमुखतः कृत्वा प्रययौ सह सेनया भीष्मं तु रथवंशेन
न दृष्ट्वा समभिसंवृतं ४७ अर्जुनो रथिनां श्रेष्ठो धृष्टद्युम्नमुवाच ह शिखंडिनं नरव्याघ्रं भीष्मस्य प्रमुखे नृप ४८ स्थापयस्वाद्य पांचाल्य
तस्य गोप्ताहमित्युत इति भीष्मपर्वणि॥ ॥ संजय उ० ततः शांतनवो भीष्मो निर्ययौ सह सेनया व्यूहं चाव्यूहत महत्सर्वतोभद्रमात्म
ना १ कृपश्च कृतवर्मा च शैब्यश्चैव महारथः शकुनिः सैंधवश्चैव कांबोजश्च सुदक्षिणः २ भीष्मेण सहिताः सर्वे पुत्रैश्च तव भारत
अग्रतः सर्वसैन्यानां व्यूहस्य प्रमुखे स्थिताः ३ द्रोणो भूरिश्रवाः शल्यो भगदत्तश्च मारिष दक्षिणं पक्षमाश्रित्य स्थिता व्यूह
स्य दंशिताः ४ अश्वत्थामा सोमदत्तश्चावंत्यौ च महारथौ महत्या सेनया युक्ता वामं पक्षमपालयन् ५ दुर्योधनो महाराज त्रिगर्तैः
सर्वतो वृतः व्यूहमध्ये स्थितो राजन् पांडवान्प्रति भारत ६ अलंबुषो रथश्रेष्ठः श्रुतायुश्च महारथः पृष्ठतः सर्वसैन्यानां स्थितौ व्यूहस्य ते

शितो ७ एवंचैतेतदाराजन्व्यूहंकृत्वाभारततावकाः सन्नद्धाः समदृश्यंतप्रतपंतस्वाग्नयः ८ ततोयुधिष्ठिरोराजाभीमसेनश्चपांडवः नकुलः सहदेवश्चमा
द्रीपुत्रावुभावपि ९ अग्रतः सर्वसैन्यानांस्थिताव्यूहस्यदंशिताः १० धृष्टद्युम्नोविराटश्चसात्यकिश्चमहारथः स्थिताः सैन्येनमहतापरानीकविनाश
नाः ११ शिखंडीविजयश्चैवराक्षसश्चघटोत्कचः चेकितानोमहाबाहुःकुंतीभोजश्चवीर्यवान् १२ स्थितारणेमहाराजमहत्यासेनयावृताः अभिम
न्युर्महेष्वासोद्रुपदश्चमहाबलः १३ केकयाभ्रातरश्चैवस्थितायुद्धायदंशिताः एवंतेपिमहाव्यूहंप्रतिव्यूह्यसुदुर्जयं १४ पांडवाः समरेशूराः स्थितायुद्धायदं
शिताः तावकास्तुरणोयत्ताः सहसेनानराधिपाः १५ अभ्ययुःपुरतोपार्थान्भीष्मंकृत्वाग्रतोनृपः तथैवपांडवाराजन्भीमसेनपुरोगमाः १६ भीष्मंयोद्धुम
भिप्रेक्ष्य संग्रामेविजयैषिणः क्ष्वेडाः किलकिलाशब्दाः क्रकचागोविषाणिकाः १७ भेरीमृदंगपणवान्नादयंतश्चकुंजरान् पांडवास्त्वभ्यवर्ततनदंतो
भैरवान्रवान् १८ भेरीमृदंगशंखानांदुंदुभीनांचनिःस्वनैः उत्कृष्टसिंहनादैश्चवल्गितैश्चपृथग्विधैः १९ वयंप्रतिनदंतस्तानगच्छामसमन्विताः सह
सैवाभिसंक्रुद्धास्तदासीत्तुमुलंमहत् २० ततोन्योन्यंप्रधावंतः संप्रहारंप्रचक्रिरे ततः शब्देनमहताप्रचकंपेववसुंधरा २१ पक्षिणश्चमहाघोरंव्याहरंतोवि
बभ्रमुः सप्रभश्चोदितः सूर्योनिष्प्रभः समपद्यत ववुश्चवातास्तुमुलाः शंसंतः सुमहद्भयम् घोराश्चघोरनिर्ह्रादाः शिवास्तत्रववाशिरे २३ वेदयंतो
महाराजमहद्वैशसमागतं दिशः प्रज्वलिताराजन्पांसुवर्षंपपातच २४ रुधिरेणसमुन्मिश्रमस्थिवर्षंतथैवच रुदतांवाहनानांचनेत्रेभ्यः प्रापतज्ज
लं २५ सस्रुवुश्चासकृन्मूत्रंपुरीषंचविशांपते अंतर्हितामहानादाः श्रूयंतेभरतर्षभ २६ रक्षसांपुरुषादानांनदतांभैरवान्रवान् संपतंतश्चदृश्यं
तेगोमायुबलवायसाः २७ श्वानश्चविविधैर्नादैर्वाशंतस्तत्रमारिष ज्वलिताश्चमहोल्कावैसमाहत्यदिवाकरं २८ निपेतुः सहसाभूमौवेदयंतोमहद्भयं
महत्सनीकानिमहासमुत्क्षुब्धानितत्रयोः पांडवधार्तराष्ट्रयोः २९ प्रकंपिरेशंखमृदंगनिःस्वनैः प्रकंपितानीववनानिवायुना नरेंद्रनागाश्वसमाकुला
नामभ्यायतीनामशिवेमुहूर्ते ३० बभूवघोषस्तुमुलश्चमूनांवातोद्धुतानामिवसागराणां इतिभीष्मपर्वणि संजयउवाच अभिमन्युरथोदारःपिशं

धै ३

म३

मी० द्रो०

२०

गैस्तरगीन्नैमैः अभिदुद्रावतेनानीकं पौरवंबलंमहत् १ विकिरंछरवर्षाणिवारिधाराइवांबुदः नशेकुः समरेक्रुद्धंसौभद्रमरिसूदनं २ शस्त्रौघिणंगाहमानंसेनासा
गरमक्षयं निवारयितुमप्याजौत्वदीयाः कुरुनंदन ३ तेनमुक्तारणेराजंछराः शत्रुनिवर्हणाः कृत्वाविपानयंछूरान्प्रेतराजनिवेशनं ४ यमदंडोपमान्घोरान्ज्व
लिताशीविषोपमान् सौभद्रः समरेक्रुद्धः प्रेषयामासपावकान् ५ सरथान्रथिनस्तूर्णंहयांश्चैवससादिनः गजारोहांश्चसगजान्दारयामासफाल्गुनिः ६
तस्यतत्कुर्वतः कर्ममहत्संख्येमहीभृतः पूजयांचक्रिरेहृष्टाः प्रशशंसुश्चफाल्गुनिं ७ तान्यनीकानिसौभद्रोद्रावयामासभारत तूलराशीनिवाकाशेमारु
तः सर्वतोदिशं ८ तेनविद्राव्यमाणानितवसैन्यानिभारत त्रातारंनाध्यगच्छंतपंकेमग्नाइवद्विपाः ९ विद्राव्यसर्वसैन्यानितावकानिनरोत्तम अभिमन्युः
स्थितोराजन्विधूमोग्निरिवज्वलन् १० नचैनंतावकाराजन्विषेहुररिघातिनं प्रदीप्तंपावकंयद्वत्पतंगाः कालचोदिताः ११ प्रहरन्सर्वशत्रुभ्यः पांडवानां
महारथः अदृश्यतमहेष्वासः सवज्रइववासवः १२ हेमपृष्ठंधनुश्चास्यददृशेविचरद्दिशः तोयदेषुयथाराजन्भ्राजमानाशतह्रदा १३ शराश्चनिशिताः पी
तानिश्चरंतिस्मसंयुगे वनात्फुल्लद्रुमाद्राजन्भ्रमराणामिवव्रजाः १४ तथैवचरतस्तस्यसौभद्रस्यमहात्मनः रथेनकांचनांगेनददृशुर्नांतरंजनाः १५ मो
हयित्वाकृपंद्रोणंद्रौणिंचसबृहद्बलं सैंधवंचमहेष्वासंव्यचरल्लघुसुष्ठुच १६ मंडलीकृतमेवास्यधनुः पश्यामभारत सूर्यमंडलसंकाशंदहतस्तववा
हिनीं १७ तंदृष्ट्वाक्षत्रियाः शूराः प्रतपंतंशरार्चिभिः द्विफाल्गुनमिमंलोकंमेनिरेतस्यकर्मभिः १८ तेनार्दितामहाराजभारतीसामहाचमूः बभ्रामतत्र
तत्रैवयोषिन्मदवशादिव १९ द्रावयित्वामहासैन्यंकंपयित्वामहारथान् नंदयामाससुहृदोमयंजित्वेववासवः २० तेनविद्राव्यमाणानितवसैन्या
निसंयुगे चक्रुरार्तस्वनंघोरंपर्जन्यनिनदोपमं २१ तंश्रुत्वानिनदंघोरंतवसैन्यस्यभारत मारुतोद्धूतवेगस्यसमुद्रस्येवपर्वणि २२ दुर्योधनस्तदाराजन्ना
र्ष्यश्रृंगमभाषत एषकार्ष्णिर्महाबाहोद्वितीयइवफाल्गुनः २३ चमूंद्रावयतेक्रोधाद्वृत्रोदेवचमूमिव तस्यचान्यंनपश्यामिसंयुगेभेषजंमहत् २४
ऋतेत्वांराक्षसश्रेष्ठसर्वविद्यासुपारगं सगत्वाजहितंवीरंसौभद्रमाहवे २५ वयंपार्थंहनिष्यामोभीष्मद्रोणपुरोगमाः सएवमुक्तोबलवान्राक्षसें

राम०

२८०

भि: ४

रुः प्रतापवान् २६ उभयोः समरे तस्मिन्तत्पुत्रस्य शासनात् नर्दमानो महानादं प्रावृषीव बलाहकः २७ तस्य शब्देन महता पांडवानां बलं महत् प्रचचाल सर्वतो राजन्वा
तोद्धूत इवार्णवः २८ बहवश्च महाराज तस्य नादेन भीषिताः प्रियान्प्राणान्परित्यज्य निपेतुर्धरणीतले २९ कार्ष्णिश्चापि मुदायुक्तः प्रगृह्य सशरं धनुः नृत्य
न्निव रथोपस्थे तद्रक्षः समुपाद्रवत् ३० ततः स राक्षसः क्रुद्धः संप्राप्यैवार्जुनिं रणे नातिदूरे स्थितां तस्य द्रावयामास वै चमूं ३१ तां वध्यमानां च तथा पां
डवानां महाचमूं प्रत्युद्ययौ रणे रक्षो देवसेनां यथा बलः ३२ विमर्दः सुमहानासीत्तस्य सैन्यस्य मारिष रक्षसा घोररूपेण वध्यमानस्य संयुगे ३३ ततः शरसह
स्रैस्तां पांडवानां महाचमूं अद्रावयद्घोरो रक्षो दर्शयन्स्वपराक्रमं ३४ सा वध्यमाना च तथा पांडवानामनीकिनी रक्षसा घोररूपेण प्रदुद्राव रणे भयात् ३५ प्र
मृद्य च रणे तां पद्मिनीं वारणो यथा ततोऽभिदुद्राव रणे द्रौपदेयान्महाबलान् ३६ ते तु क्रुद्धा महेष्वासा द्रौपदेयाः प्रहारिणः राक्षसं दुद्रुवुः संख्ये ग्रहाः
पंच रविं यथा ३७ वीर्यवद्भिस्ततस्तैस्तु पीडितो राक्षसोत्तमः यथा युगक्षये घोरे चंद्रमाः पंचभिर्ग्रहैः ३८ प्रतिविंध्यस्ततो रक्षो विभेद निशितैः शरैः सर्व
पारशवैस्तूर्णमकुंठाग्रैर्महाबलैः ३९ स तैर्भिन्नतनुत्राणः शुशुभे राक्षसोत्तमः मरीचिभिरिवार्कस्य संस्यूतो जलदो महान् ४० विशक्तैः स शरैश्चापि तप
नीयपरिच्छदैः आर्श्यशृंगिर्बभौ राजन्दीप्तशृंग इवाचलः ४१ ततस्ते भ्रातरः पंच राक्षसेंद्रं महाहवे विव्यधुर्निशितैर्बाणैस्तपनीयविभूषितैः ४२ स निर्भि
न्नः शरैर्घोरैर्भुजगैः कोपितैरिव अलंबुषो भृशं राजन्नागेंद्र इव चुक्रुधे ४३ सोऽतिविद्धो महाराज मुहूर्तमथ मारिष प्रविवेश तमो दीर्घं पीडितस्तैर्महारथैः ४४
प्रतिलभ्य ततः संज्ञां क्रोधेन द्विगुणीकृतः चिच्छेद सायकांस्तेषां ध्वजांश्चैव धनूंषि च ४५ एकैकं पंचभिर्बाणैराजघान स्मयन्निव अलंबुषो रथोपस्थे नृ
त्यन्निव महारथः ४६ त्वरमाणः सुसंरब्धो हयांस्तेषां महात्मनां जघान राक्षसः क्रुद्धः सारथींश्च महाबलः ४७ बिभेद च सुसंरब्धः पुनश्चैनान्सुसंशितैः श
रैर्बहुविधाकारैः शतशोऽथ सहस्रशः ४८ विरथांश्च महेष्वासान्कृत्वा तत्र स राक्षसः अभिदुद्राव वेगेन हंतुकामो निशाचरः ४९ तानर्दितान्रणे ते
न राक्षसेन दुरात्मना दृष्ट्वार्जुनसुतः संख्ये राक्षसं समुपाद्रवत् ५० तयोः समभवद्युद्धं वृत्रवासवयोरिव ददृशुस्तावकाः सर्वे पांडवाश्च महारथाः

५ सोभद्रस्य

ष १ के

५१ तौ समेतौ महायुद्धे क्रोधदीप्तौ परस्परं महाबलौ महाराज क्रोधसंरक्तलोचनौ ५२ परस्परमवेक्षेतां कालानलसमौ युधि तयोः समागमो घोरो बभूव कटुकोदयः ५३
यथा देवासुरे युद्धे शक्रशंबरयोः पुरा इति भीष्मपर्वणि ॥ ॥धृतराष्ट्र उ० आर्जुनिं समरे शूरं विनिघ्नंतं महारथान् अलंबुषः कथं युद्धे प्रत्ययुध्यत भारत १
आर्ष्यशृंगिं कथं चैव सौभद्रः परवीरहा तन्ममाचक्ष्व तत्वेन यथा वृत्तं स्म संयुगे २ धनंजयश्च किं चक्रे मम सैन्येषु संयुगे भीमो वा रथिनां श्रेष्ठो राक्षसो वा घ
टोत्कचः ३ नकुलः सहदेवो वा सात्यकिर्वा महारथः एतदाचक्ष्व मे सत्यं कुशलो ह्यसि संजय ४ संजय उवाच हंत तेहं प्रवक्ष्यामि संग्रामं लोमहर्षणं यथा
[illegible]भूद्राक्षसेंद्रस्य च मारिष ५ अर्जुनश्च यथा संख्ये भीमसेनश्च पांडवः नकुलः सहदेवश्च रणे चक्रुः पराक्रमं ६ तथैव तावकाः सर्वे भीष्मद्रोणपुरः सराः अ
द्भुतानि विचित्राणि चक्रुः कर्माण्यभीतवत् ७ अलंबुषस्तु समरे ह्यभिमन्युं महारथं विनद्य सुमहानादं तर्जयित्वा मुहुर्मुहुः ८ अभिदुद्राव वेगेन तिष्ठ
तिष्ठेति चाब्रवीत् अभिमन्युश्च वेगेन सिंहवद्विनदन्मुहुः ९ आर्ष्यशृंगिं महेष्वासं पितुरत्यंतवैरिणं ततः समीयतुः संख्ये त्वरितौ नरराक्षसौ १० रथाभ्यां र
थिनौ श्रेष्ठौ यथा वै देवदानवौ मायावी राक्षसश्रेष्ठो दिव्यास्त्रज्ञश्च फाल्गुनिः ११ ततः कार्ष्णिर्महाराज निशितैः सायकैस्त्रिभिः आर्ष्यशृंगिं रणे विध्वा पु
विव्याध पंचभिः १२ अलंबुषोपि संक्रुद्धः कार्ष्णिं नवभिराशुगैः हृदि विव्याध वेगेन तोत्रैरिव महाद्विपं १३ ततः शरसहस्रेण क्षिप्रकारी निशाचरः अ
र्जुनस्य सुतं संख्ये पीडयामास भारत १४ अभिमन्युस्ततः क्रुद्धो नवभिर्नतपर्वभिः बिभेद निशितैर्बाणै राक्षसेंद्रं महोरसि १५ ते तस्य विविशुस्तूर्णं
कायं निर्भिद्य मर्माणि स तैर्विभिन्नसर्वांगः शुशुभे राक्षसोत्तमः १६ पुष्पितैः किंशुकै राजन्संस्तीर्ण इव पर्वतः संधारयानश्च शरान्हेमपुंखान्महाबलः
१७ विबभौ राक्षसः श्रेष्ठः सज्वाल इव पर्वतः ततः क्रुद्धो महाराज आर्ष्यशृंगिरमर्षणः १८ महेंद्रप्रतिमं कार्ष्णिं छादयामास पत्रिभिः तेन ते विशिखा मुक्ता
यमदंडोपमाः शिताः १९ अभिमन्युं विनिर्भिद्य प्रविशंत धरातलं तथैवार्जुनिना मुक्ताः शराः कनकभूषणाः २० अलंबुषं विनिर्भिद्य प्रविशंत धरातलं
सौभद्रस्तु रणे रक्षः शरैः सन्नतपर्वभिः २१ चक्रे विमुखमासाद्य मयं शक्र इवाहवे विमुखं च रणे रक्षो वध्यमानं रणेरिणा २२ प्रादुश्चक्रे महामायां ताम

तिष्ठ २

न

सीपरतापनः ततस्तेतमसासर्वैहतााश्वासन्महीपते २४ नाभिमन्युमपश्यंतनैवस्वान्नपरान्रणे अभिमन्युस्तुतदृष्ट्वाघोररूपंमहत्तमः २४ प्रादुश्चक्रेस्त्रम
स्त्रमुग्रंभास्करंकुरुनंदनः ततः प्रकाशमभवज्जगत्सर्वंमहीपते २५ तांचाभिजघ्निवान्मायांराक्षसस्यदुरात्मनः संक्रुद्धश्चमहावीर्योराक्षसेंद्रंनरोत्तमः
२६ छादयामाससमरेशरैः सन्नतपर्वभिः बह्वीस्तथान्यामायाश्चप्रयुक्तास्तेनरक्षसा २७ सर्वास्त्रविदमेयात्मावारयामासफाल्गुनिः हतमायंततोर
क्षोवध्यमानंचसायकैः २८ रथंतत्रैवसंत्यज्यप्राद्रवन्महतोभयात् तस्मिन्विनिर्जितेतूर्णंकूटयोधिनिराक्षसे २९ आर्जुनिः समरेसैन्यंतावकंसमम
र्दह मदांधं गंधनागेंद्रः सपद्मांपद्मिनीमिव ३० ततः शांतनवोभीष्मःसैन्यंदृष्ट्वाभिविद्रुतं महताशरवर्षेणसौभद्रंपर्यवारयत् ३१ कोष्ठीकृत्यचतंवीरं
धार्तराष्ट्रामहारथाः एकंसुबहवोयुद्धेततक्षुः सायकैर्दृढं ३२ सतैस्तथारथिनांवीरः पितुस्तुल्यपराक्रमः सदृशोवासुदेवस्यविक्रमेणबलेनच ३३ उभयोः स
दृशंकर्मसपितुर्मातुलस्यच रणेबहुविधंचक्रेसर्वशस्त्रभृतांवरः ३४ ततोधनंजयोविरोविनिघ्नंस्तवसैनिकान् आससादरणेभीष्मंपुत्रप्रेप्सुरमर्षणः ३५ त
थैवसमरेवीरास्पितादेवव्रतस्तव आससादरणेपार्थंस्वर्भानुरिवभास्करं ३६ ततः सरथनागाश्वाः पुत्रास्तवजनेश्वर परिवव्रूरणेभीष्मंजुगुपुश्चसमंततः ३७ तथैव
पांडवाराजन्परिवार्यधनंजयं रणायमहतेयुक्तादंशिताभरतर्षभ ३८ शारद्वतस्ततोराजन्भीष्मस्यप्रमुखेस्थितं अर्जुनं पंचविंशत्यासायकानांसमाचि
नोत् ३९ प्रत्युद्गम्याथविव्याधसात्यकिस्तंशितैः शरैः पांडवप्रियकामार्थंशार्दूलइवकुंजरं ४० गौतमोपित्वरायुक्तोमाधवंनवभिः शरैः हृदिविव्याधसं
क्रुद्धः कंकपत्रपरिच्छदैः ४१ शैनेयोपिततः क्रुद्धश्चापमानम्यवेगवान् गौतमांतकरंतूर्णंसमाधत्तशिलीमुखं ४२ तमापतंतंवेगेनशक्राशनिसमद्युतिं द्वि
धाचिच्छेदसंक्रुद्धोद्रौणिः परमकोपनः ४३ समुत्सृज्याथशैनेयोगौतमंरथिनांवरः अभ्यद्रवद्रणेद्रौणिंराहुःखेशशिनंयथा ४४ तस्यद्रोणसुतश्चापंद्विधाचिच्छे
दभारत अथैनंछिन्नधन्वानंताडयामाससायकैः ४५ सोन्यत्कार्मुकमादायशत्रुघ्नंभारसाधनं द्रौणिंषष्ट्यामहाराजबाह्वोरुरसिचार्पयत् ४६ सविद्धोव्य
थितश्चैवमुहूर्तंकश्मलायुतः निषसादरथोपस्थेध्वजयष्टिंसमाश्रितः ४७ प्रतिलभ्यततः संज्ञांद्रोणपुत्रः प्रतापवान् वार्ष्णेयंसमर्पयत् ४८ शैनेयंसतु

समरेक्रुद्धोनाराचेन

ने३

भि०
९८

निमिषप्रविश्यद्रुरणीतलं वसंतकाले बलवान्बिलं सर्प्पं शिशुर्यथा ४९ अथापरेणभल्लेनमाधवस्याग्रजो नमं चिच्छेद समरे द्रौणिः सिंहनादं मुमोचह ५० पुनश्चैनं शरैः
घोरैश्छादयामास भारत निदाघांते महाराज यथा मेघो दिवाकरं ५१ सात्यकोपि महाराज शरजालं निहत्य तत् द्रौणिमभ्यकिरत्तूर्णं शरजालैरनेकधा ५२ ता
पयामास च द्रौणिं शैनेयः परवीरहा विमुक्तो मेघजालेन यथैव तपनस्तथा ५३ शराणां च सहस्रेण पुनरेव समुद्यतः सात्यकिश्छादयामास ननाद च महाबलः ५४
दृष्ट्वा पुत्रं च तं ग्रस्तं राहुणेव निशाकरं अभ्यद्रवत शैनेयं भारद्वाजः प्रतापवान् ५५ विव्याध च सुतीक्ष्णेन पृषत्केन महामृधे परीप्सन्स्वसुतं राजन्वार्ष्णेयेनाभिपीडि
तं ५६ सात्यकिस्तु रणे हित्वा गुरुपुत्रं महारथं द्रोणं विव्याध विंशत्या सर्वपारशवैः शरैः ५७ तदंतरममेयात्मा कौंतेयः शत्रुतापनः अभ्यद्रवद्रणे क्रुद्धो द्रोणं प्रति
महारथः ५८ ततो द्रोणश्च पार्थश्च समेयातां महामृधे यथा बुधश्च शुक्रश्च महाराज नभस्तले ५९ इति भीष्मपर्वणि ॥ ॥धृतराष्ट्र उ० कथं द्रोणो महेष्वासः
पांडवश्च धनंजयः समीयतू रणे यत्तौ तावुभौ पुरुषर्षभौ १ प्रियो हि पांडवो नित्यं भारद्वाजस्य धीमतः आचार्यश्च रणे नित्यं प्रियः पार्थस्य संजय २ तावुभौ र
थिनौ संख्ये दृप्तौ सिंहाविवोत्कटौ कथं समीयतुर्यत्तौ भारद्वाजधनंजयौ ३ संजय उवाच न द्रोणः समरे पार्थं जानीते प्रियमात्मनः क्षत्रधर्मं पुरस्कृत्य पार्थो
वा गुरुमाहवे ४ न क्षत्रिया रणे राजन्वर्जयंति परस्परं निर्मर्यादं हि युध्यंते पितृभिर्भ्रातृभिः सह ५ रणे भारत पार्थेन द्रोणो विद्धस्त्रिभिः शरैः नाचिंतयच्च तान्बा
णान्पार्थचापच्युतान्मृधे ६ शरवृष्ट्या पुनः पार्थश्छादयामास तं रणे प्रजज्वाल च रोषेण गहनेऽग्निरिवोर्जितः ७ ततोर्जुनं रणे द्रोणः शरैः सन्नतपर्वभिः
छादयामास राजेंद्र नचिरादेव भारत ८ ततो दुर्योधनो राजा सुशर्माणमचोदयत् द्रोणस्य समरे राजन्पार्ष्णिग्रहणकारणात् ९ त्रिगर्तराडपि क्रुद्धो भृशमा
[illegible]यम्य कार्मुकं छादयामास समरे पार्थं वाणैरयोमुखैः १० ताभ्यां मुक्ताः शरा राजन्नंतरिक्षे विरेजिरे हंसा इव महाराज शरत्काले
नभस्तले ११ ते शराः प्राप्य कौंतेयं समंताद्विविशुः प्रभो फलभारनतं यद्वत्स्वादुवृक्षं विहंगमाः १२ अर्जुनस्तु रणे नादं विनद्य रथिनां वरः त्रिगर्तराजं समरे

सौ २ रि

सपत्रैर्विशिखैर्घोरैः १३ ते वध्यमानाः पार्थेन कालेनेव युगक्षये पार्थमेवाभ्यवर्त्तन्त मरणे कृतनिश्चयाः ४ मुमुचुः शरवृष्टिं च पांडवस्य रथं प्रति स वृष्टिं
ततस्तां तु शरौघैः समंततः १५ प्रतिजग्राह राजेंद्र तोयवृष्टिमिवाचलः तत्राद्भुतमपश्याम बिभत्सोर्हस्तलाघवं १६ विमुक्तां बहुभिर्योधैः शस्त्रवृष्टिं
दुरासदं यदेको वारयामास मारुतोभ्रगणानिव १७ कर्मणा तेन पार्थस्य तुतुषुर्देवदानवाः अथ क्रुद्धो रणे पार्थस्त्रिगर्त्तान्प्रति भारत १८ मुमो
चास्त्रं महाराज वायव्यं पृतनामुखे प्रादुरासीत्ततो वायुः क्षोभयानो नभस्तलं १९ पातयन्वै तरुगणान्विनिघ्नंश्चैव सैनिकान् ततो द्रोणोभिवीक्ष्यै
व वायव्यास्त्रं सुदारुणं २० शैलमन्यन्महाराज घोरमस्त्रं मुमोच ह द्रोणेन युधि निर्मुक्ते तस्मिन्नस्त्रे नराधिप २१ प्रशशाम ततो वायुः प्रसन्नाश्च दिशोद
श ततः पांडुसुतो वीरस्त्रिगर्त्तस्य रथव्रजान् २२ निरुत्साहान्रणे चक्रे विमुखान्विपराक्रमान् ततो दुर्योधनश्चैव कृपश्च रथिनां वरः २३ अश्वत्थामा
तथा शल्यः कांबोजश्च सुदक्षिणः विंदानुविंदावावंत्यौ बाह्लिकैः २४ महता रथवंशेन पार्थस्यावारयद्दिशः तथैव भगदत्तश्च श्रुतायुश्च महाबलः
२५ गजानीकेन भीमस्य ताववारयतां दिशः भूरिश्रवाः शलश्चैव सौबलश्च विशांपते २६ शरौघैर्विमलैस्तीक्ष्णैर्माद्रीपुत्राववारयत् भीष्म
स्तु संहतः संख्ये धार्तराष्ट्रैः ससैनिकैः २७ युधिष्ठिरं समासाद्य सर्वतः पर्यवारयत् आपतंतं गजानीकं दृष्ट्वा पार्थो वृकोदरः २८ लेलिहन्सृक्किणी
वीरो मृगराडिव कानने भीमस्तु रथिनां श्रेष्ठो गदां गृह्य महाहवे २९ अवप्लुत्य रथात्तूर्णं तव सैन्यान्यभीषयत् तमुद्वीक्ष्य गदाहस्तं ततस्ते गज
सादिनः ३० परिवव्रू रणे यत्ता भीमसेनं समंततः गजमध्यमनुप्राप्तः पांडवः स व्यराजत ३१ मेघजालस्य महतो यथा मध्यगतो रविः व्यधमत्स
गजानीकं गदया पांडवर्षभः ३२ महाभ्रजालमतुलं मातरिश्वेव संततं ते वध्यमाना बलिना भीमसेनेन दंतिनः ३३ आर्त्तनादं रणे चक्रुर्गर्जं

८१

तोजलदाइव वृक्षधारितश्चैव विषाणोस्तत्र दंतिभिः ३४ फुल्लाशोकनिभः पार्थः शुशुभे रणमूर्द्धनि विषाणे दंतिनं गत्वा निर्विषाणमथाकरोत् ३५
विषाणेन च तेनैव कुंभेभ्याहत्य दंतिनं पातयामास समरे दंडहस्त इवांतकः ३६ शोणिताक्तां गदां बिभ्रन्मेदोमज्जाकृतच्छविः कृतांगदः शोणितेन रुद्र
वत्स्म दृश्यत ३७ एवं ते वध्यमानास्तु हतशेषा महागजाः प्राद्रवंत दिशो राजन्विमृद्नंतः स्वकं बलं ३८ द्रवद्भिस्तैर्महानागैः समंताद्भरतर्षभ दुर्योधन
बलं सर्वं पुनरासीत्पराङ्मुखं ३९ इति भीष्मपर्वणि संजय उ० मध्यंदिने महाराज संग्रामः समपद्यत लोकक्षयकरो रौद्रो भीष्मस्य सह सोमकैः १
गांगेयो रथिनां श्रेष्ठः पांडवानामनीकिनीं व्यधमन्निशितैर्बाणैः शतशोथ सहस्रशः २ सममर्दच्च तत्सैन्यं पिता देवव्रतस्तव धान्यानामिव लूनानां प्रका
रं गोगणा इव ३ धृष्टद्युम्नः शिखंडी च विराटो द्रुपदस्तथा भीष्ममासाद्य समरे शरैर्जघ्नुर्महारथं ४ धृष्टद्युम्नं ततो विद्ध्वा विराटं च शरैस्त्रिभिः द्रुपदस्य
च नाराचं प्रेषयामास भारत ५ तेन विद्धा महेष्वासा भीष्मेणामित्रकर्षिणा चक्रुधुः समरे राजन्पादस्पृष्टा इवोरगाः ६ शिखंडी तं च विव्याध भर
तानां पितामहं स्त्रीमयं मनसा ध्यात्वा नास्मै प्राहरदच्युतः ७ धृष्टद्युम्नस्तु समरे क्रोधेनाग्निरिव ज्वलन् पितामहं त्रिभिर्बाणैर्बाह्वोरुरसि चार्पयत्
८ द्रुपदः पंचविंशत्या विराटो दशभिः शरैः शिखंडी पंचविंशत्या भीष्मं विव्याध सायकैः ९ सोतिविद्धो महाराज शोणितौघपरिप्लुतः वसंते पुष्पशबलो
रक्ताशोक इवाबभौ १० तान्प्रत्यविध्यद्गांगेयस्त्रिभिस्त्रिभिरजिह्मगैः द्रुपदस्य च भल्लेन धनुश्चिच्छेद मारिष ११ सोन्यत्कार्मुकमादाय भीष्मं विव्याध पंचभिः
सारथिं च त्रिभिर्बाणैः सुशितै रणमूर्द्धनि १२ तथा भीमो महाराज द्रौपद्याः पंच चात्मजाः कैकेया भ्रातरः पंच सात्यकिश्चैव सात्वतः १३
अभ्यद्रवंत गांगेयं युधिष्ठिरपुरोगमाः रिरक्षिषंतः पांचाल्यं धृष्टद्युम्नपुरोगमाः १४ तथैव तावकाः सर्वे भीष्मरक्षार्थमुद्यताः प्रत्यु

द्युभि

ग्रा ५ ५३

धुपुः पांडुसेनां सह सैन्या नराधिप २५ तत्रासीत्सुमहद्युद्धं तव तेषां च संकुलं नराश्वरथनागानां यमराष्ट्रविवर्द्धनं २६ रथी रथिनमासा
द्य प्राहिणोद्यमसादनं तथैव तान्समासाद्य नरनागाश्वसादिनः २७ अनयन्मरतो काय शरैः सन्नतपर्वभिः शरैश्च विविधैर्घोरैस्तत्र तत्र वि
शांपते २८ रथाश्च रथिभिर्हीना हतसारथयस्तथा विद्रुताश्च समरे दिक्षो जग्मुः समंततः २९ मृद्यमाना महाराज हयांश्च सुबहून्रणे वाता
यमानान्दृश्यंते गंधर्वनगरोपमाः २० रथिनश्चापरे हीना वीर्यवंतो जसायुताः कुंडलोष्णीषिणः सर्वे निष्कांगदविभूषणाः २१ देवपुत्रसमाः
सर्वे शौर्ये शक्रसमा युधि कुबेरतो वरुणो वाधिनतेय नववाहनस्थानि २२ सर्वलोकेश्वराः शूरास्तत्र तत्र विशांपते विमदद्रावद्दृश्यंते मोहनास्वभा
नवाः २३ रतिनश्च नरश्रेष्ठ हीनपरमसारथिः मृदुना स्वामनी कानि निपेतुः सर्वशात्रवाः २४ चर्मभिश्चामरैश्चापि पताकाभिश्च मारिष छ
त्रैश्चैव हेमदंडैश्चापरैश्च समंततः २५ विप्रकीर्णा विमधावंतो दृश्यंते स्म हि मारिष नवमेघसमानीकाशा जलदोपमनिस्वनाः २६ तथैव
रजिहीना गजारोहा विशांपते प्रधावंतोन्वदृश्यंत तव तेषां च संकुले २७ नानारंगसमुत्सांश्च तुरगान्हेमभूषितान् वातायमनान
श्च शतशो यस हस्वशः २८ अश्वारोहान्नरश्रेष्ठ हीनान्सीमंततः ध्रुवमाणानपश्याम द्रावमाणांश्च संयुगे २९ गजो गजं समासा
द्य द्रवमाणं महाहवे ... समद्यन्तरसा पारातान् वाजिनस्तथा ३० तथैव च रथान्राजन्सममर्दरणे गजाः रथाश्चैव समासाद्य ...
... पातितो स्म रणाद्भुवि ३१ व्यमर्दन्समरे राजन्नस्करगाश्च नराभुवे एवं तदा महाराजन्नासमयुद्धं परस्परं ३२ तस्मिन्नौद्रे तथा युद्धे वर्तमा
ने महाभये प्रावर्तत नदी घोरा शोणितौघतरंगिणी ३३ अस्थिसंघातसंबाधा केशशैवलशाद्वला रथह्रदा शरावर्ता हयमीनादुरा
सदा ३४ शीर्षोपलसमाकीर्णा हस्तिग्राहसमाकुला केयूरा रूपीकवैपल्का धनुर्वेगासिकच्छपा ३५ पताकाध्वजवृक्षाद्या मर्त्यकूलापहा

नि ५

भी०
२८४

शिरांसि कायाद्दृतसंकीर्णापमराप्तुविवर्द्धनी ३६ तानंदी क्षत्रियाः शूरा रथनागहयप्लवैः प्रतेरुर्बहवो राजन्भयं त्यक्त्वा महारथाः ३७ अयो
गाहरणे भीरून्कश्मलेनाभिसंवृतान् पृष्ठावेतरणी प्रेतान्प्रेतराजपुरं प्रति ३८ प्राक्रोशन्क्षत्रियास्तत्र दृष्ट्वा तद्वैशसं महत् ते दुर्योधनापराधेन
गच्छन्ति क्षत्रियाः क्षयं ३९ गुणवत्सु कथं द्वेषं धृतराष्ट्रो जनेश्वरः कृतवान्पाण्डुपुत्रेषु पापात्मा लोभमोहितः ४० एवं बहुविधा वाचः श्रूयन्ते स्म प
रस्परं पाण्डवस्तवसंयुक्ताः पुत्राणां ते सुदारुणाः ४१ तां निशम्य ततो वाचः सर्वयोधैरुदाहृताः आगस्कृत्सर्वलोकस्य पुत्रो दुर्योधनस्तव ४२
भीष्मं द्रोणं कृपं चैव शल्यं चोवाच भारत युध्यध्वमनहंकाराः किं चिरं कुरुतेति च ४३ ततः प्रववृते युद्धं कुरूणां पाण्डवैः सह अक्षद्यूतकृतं राजन्सु
रवैशसं तदा ४४ यमुनैनिगरहृत्तासिवार्यमाणो महात्मभिः वैचित्रवीर्य तस्येदं फलं पश्य सुदारुणं ४५ नहि पाण्डुसुता राजन्ससैन्याः सपदानुगाः
रक्षन्ति समरे प्राणान्कौरवा वापि संयुगे ४६ एतस्मात्कारणाद्घोरो वर्त्तते स्वजनक्षयः दैवाद्वा पुरुषव्याघ्र तव चापनयान्नृप ४७ इति श्री भी
पर्वणि संजय ३० अर्जुनस्त्वाग्रसुशर्मानुचरान्नृपान् अनयत्प्रेतराजस्य सदनं सायकैः शितैः १ सुशर्मापि ततो बाणैः पार्थं
विद्ध्वा संयुगे वासुदेवं च सप्तभिः पार्थं नवभिः पुनः २ तान्निवार्य शरौघेण शक्रसूनुर्महारथः सुशर्मणो रणे योधान्प्राहिणोद्यमसा
दनं ३ ते वध्यमानाः पार्थेन कालेनेव युगक्षये व्यद्रवन्त रणे राजन्भये जाते महारथाः ४ उत्सृज्य तुरगान्केचिद्रथान्केचिच्च मारिष गजा
नन्ये समुत्सृज्य प्राद्रवन्त दिशो दश ५ अपरे तु नरा राजन्वाजिनागरथाद्रणे त्वरया परया युक्ताः प्राद्रवन्त विशांपते ६ पादाताश्चापि श
स्त्राणि समुत्सृज्य महारणे निरपेक्षा व्यधावन्त तेन तेन स्म भारत ७ वार्यमाणाः स्म बहुशस्त्रैगर्त्तेन सुशर्मणा तथान्यैः पार्थिवश्रेष्ठैर्न
व्यतिष्ठन्त संयुगे ८ तद्बलं प्रद्रुतं दृष्ट्वा पुत्रो दुर्योधनस्तव पुरस्कृत्य रणे भीष्मं सर्वसैन्यपुरस्कृतः ९ सर्वोद्योगेन महता धनंजयमुपाद्रवत् त्रिगर्त्ता

भी०
२८४

७५ २५२

क्षिपतेर्यर्ज्जीवितस्य विशांपते १० स एकः समरे तस्थौ किरन्बहुविधाञ्छरान् आत्ताभिः सहितः सर्वैश्शोभाहिसङ्कुता नराः ११ तथैव पाण्डवा राजन्स
र्वे योगेन रक्षिताः प्रययुः फाल्गुनार्थे पयत्र भीष्मो व्यतिष्ठत १२ त्रायमाना रणे वीर्यं गाण्डीवधन्वनः हाहाकारकृतोत्साहा भीष्मं जग्मुः
समन्ततः १३ ततस्तालध्वजः शूरः पाण्डवानामनीकिनीं छादयामास समरे शरैः सन्नतपर्वभिः १४ एकीभूतास्ततः सर्वे कुरवः सह पाण्डवैः अ
युध्यन्त महाराज मध्यं प्राप्ते दिवाकरे १५ सात्यकिः कृतवर्माणं विध्वा पञ्चभिराशुगैः अतिष्ठदाहवे शूरः किरन्बाणान्सहस्रशः १६ तथैव द्रु
पदो राजा द्रोणं विध्वा शितैः शरैः पुनर्विव्याध सप्तत्या सारथिं चास्य पञ्चभिः १७ भीमसेनस्तु राजानं बाह्लीकं प्रपितामहं विध्वानदन्महाना
दं शार्दूल इव कानने १८ आर्जुनिश्चित्रसेनेन विद्धो बहुभिराशुगैः चित्रसेनं त्रिभिर्बाणैर्विव्याध समरे भृशं १९ समागतौ तौ तु रणे म
हामात्रौ व्यरोचतां यथा दिवि महाघोरौ राजन्बुधशनैश्चरौ २० तस्याश्वांश्चतुरो हत्वा सूतं च नवभिः शरैः ननाद बलवान्नादं सौभद्रः प
रवीरहा २१ हताश्वात्तु रथात्तूर्णं सोऽवप्लुत्य महारथः आरुरोह रथं तूर्णं दुर्मुखस्य विशांपते २२ द्रोणश्च द्रुपदं भित्वा शरैः सन्नतपर्वभिः सा
रथिं चास्य विव्याध त्वरमाणः पराक्रमी २३ पीड्यमानस्ततो राजा द्रुपदो वाहिनीमुखे अपायाज्जवनैरश्वैः पूर्ववैरमनुस्मरन् २४ भीम
सेनस्तु राजानं मुहूर्तादिव बाह्लिकं व्यश्वसूतरथं चक्रे सर्वसैन्यस्य पश्यतः २५ ससंभ्रमो महाराज संशयं परमं गतः अवप्लुत्य ततो वाहा
द्बाह्लीकः पुरुषोत्तमः २६ आरुरोह रथं तूर्णं लक्ष्मणस्य महारणे सात्यकिः कृतवर्माणं वारयित्वा महारणे २७ शरैर्बहुविधै राजन्नास
साद पितामहं स विध्वा भारतं षष्ट्या निशितैर्लोमवाहिभिः २८ ननर्तेव रथोपस्थे विधुन्वानो महद्धनुः तस्यायसीं महाशक्तिं चिक्षेपाथ
पितामहः २९ हेमचित्रां महावेगां नागकन्योपमां शुभां तामापतन्तीं सहसा मृत्युकल्पां सुदुर्जयां ३० व्यंसयामास वार्ष्णेयो लाघवेन महा

पशाः अनासाषत्तु वार्ष्णेयं शक्तिः परमदारुणा ३१ मपतन्द्रुरणी दृष्टे महोल्केव महाप्रभा वार्ष्णेयस्य ततो राजन्स्वां शक्तिं कनकप्रभां
३२ वेगवद्भुत्स्य चिच्छेद पितामहः रथं प्रति वार्ष्णेयभुजवेगेन प्रगृह्णा सा महाहवे ३३ अभिद्रुत्य वेगेन कालरात्रिर्यथा नरं तमापतन्तीं
सह सा द्विधा चिच्छेद भारत ३४ क्षुरप्राभ्यां सुतीक्ष्णाभ्यां सा व्यशीर्यत मेदिनी छित्वा शक्तिं तु गांगेयः सात्यकिं नवभिः शरैः ३५ आ
जघानोरसि संक्रुद्धः प्रहसञ्छत्रुकर्शनः ततः सरथनागाश्वाः पाण्डवाः पाण्डुपूर्वज ३६ परिवव्रू रणे भीष्मं माधवत्राणकारणात् ततः प्रववृ
ते युद्धं तुमुलं रोमहर्षणं ३७ पाण्डवानां कुरूणां च समरे विजयैषिणां इति भीष्मपर्वणि संजय ८० दृष्ट्वा भीष्मं रणे क्रुद्धं पाण्डवैरभिसं
वृतं यथा मेघैर्महाराज तपान्ते दिवि भास्करं १ दुर्योधनो महाराज दुःशासनमभाषत एष शूरो महेष्वासो भीष्मः शूरनिषूदनः २
छादितः पाण्डवैः शूरैः समन्ताद्भरतर्षभ तस्य कार्यं त्वया वीर रक्षणं सुमहात्मनः ३ रक्ष्यमाणो हि समरे भीष्मोस्माकं पितामहः
निहन्यात्समरे यत्तो पाञ्चालान्पाण्डवैः सह ४ तत्र कार्यं तमं मन्ये भीष्मस्यैवाभिरक्षणं गोप्ता ह्येष महेष्वासो भीष्मोस्माकं महा
व्रतः ५ स भवान्सर्वसैन्येन परिवार्य पितामहं समरे कर्म कुर्वाणं दुष्करं परिरक्षतु ६ स एवमुक्तः समरे पुत्रो दुःशासनस्तव परि
वार्य स्थितः भीष्मं सैन्येन महता वृतः ७ ततः शतसहस्राणां हयानां सुबलात्मजः विमलप्रासहस्तानां ऋष्टितोमरधारिणां ८
दर्पितानां सुवेषाणां बलस्थानां पताकिनां शिक्षितैर्युद्धकुशलैरुपेतानां नरोत्तमैः ९ नकुलं सहदेवं च धर्मराजं च पाण्डवं न्यवार
यन्नरश्रेष्ठान्परिवार्य समन्ततः १० ततो दुर्योधनो राजा शूराणां हयसादिनां अयुतं प्रेषयामास पाण्डवानां निवारणे ११ तैः प्रविष्टैर्म

सु१

हावेगैर्गहित्माहरिवाहवे खुरैर्हत्वा तवाराजंश्रक्रैपेचनन्नाश्च १२ खुरशब्दश्च सुमहान्वाजिनां शुश्रुवे तदा महान्वै शब्दस्य वर्त्तमानस्य पृत
ते १३ उत्पतद्भिश्च तैस्तत्र समुद्धूतं महद्रजः दिवाकरपथं प्राप्य छादयामास भास्करं १४ वेगवद्भिर्हयैस्तैस्तु सोभिता पांडवीचमूः निपतद्भि
र्महावेगैर्हंसैरिव महत्सरः १५ हेषतां चैव शब्देन न प्रज्ञायत किंचन ततो युधिष्ठिरो राजा माद्रीपुत्रौ च पांडवौ १६ प्रत्यगृह्णन् रसा वेगं समरे
हयसादिनां उद्धृतस्य महाराज प्रावृट्काले तिपूर्यतः १७ पौर्णमास्यामंबुवेगं यथा वेला महोदधेः ततस्ते रथिनो राजंश्छरैः सन्नतपर्वभिः
१८ न्यकृंतन्नुत्तमांगानि शरीरात् हयसादिनां ते निपेतुर्महाराज निहता दृढधन्विभिः १९ नागैरिव महानागा यथा वा गिरिगह्वरे तेपि प्रासैः
सुनिशितैः शरैः सन्नतपर्वभिः २० न्यकृंतन्नुत्तमांगानि विचरंतो दिशो दिश अभ्याहता हया राजन्नृष्टिभिर्भरतर्षभ २१ अत्यजन्नुत्तमांगा
नि फलानीव महाद्रुमाः ससादिनो हया राजंस्तत्र तत्र निसूदिताः २२ पातिताः पात्यमानाश्च प्रत्यदृश्यन्त सर्वशः वध्यमाना हयाश्चै
व प्राद्रवंत भयार्दिताः २३ यथा सिंहं समासाद्य मृगाः प्राणपरायणाः पांडवांश्च महाराज सिंहवच्चः एष पांडुसुतो ज्येष्ठो प मामभ्यार
हितो रणे २६ पश्यतो वो महाबाहो भीमेनाद्रवपाति प्रभो तं वारय महाबाहो वेलेव मकरालयं २७ सं हि संक्षयसेनार्थं मनस्तबलविक्रमः
पुत्रस्य तव तद्वाक्यं श्रुत्वा शल्यः प्रतापवान् २८ सययौ रथवंशेन यत्र राजा युधिष्ठिरः तदापतद्वै सहसा शल्यस्य सुमहद्बलं २९
महौघवेगं समरे वारयामास पांडवः मद्रराजं च समरे धर्मराजो महारथः ३० दशभिः सायकैस्तूर्णमाजघान स्तनांतरे नकुलः सहदे
वश्च तं सप्तभिर्जिह्मगैः ३१ मद्रराजोऽपि तान्सर्वानाजघान त्रिभिस्त्रिभिः युधिष्ठिरं पुनः षष्ट्या विव्याध निशितैः शरैः ३२ माद्रीपुत्रौ च संभ्रांतौ
द्वाभ्यां द्वाभ्यामताडयत ततो भीमो महाबाहुर्दृष्ट्वा राजानमाहवे ३३ मद्रराजरथं प्राप्तं मृत्योरास्यगतं यथा अभिपद्यत संग्रामे युधिष्ठि

त्रिभिः२

श्च महाराज [illegible] जित्वा शत्रून्महामृधे दध्मुः शंखांश्च भेरीश्च ताडयामासुराहवे ततो दुर्योधनो दीनो दृष्ट्वा सैन्यं पराजितम् अब्रवीद्भारत ६

भी०
२८६

पृ१

रममित्रजित ३४ ततो युद्धं महाघोरं प्रावर्त्तत सुदारुणं अपरांहि शमास्थ्यायं तमाने दिवाकरे ३५ इति श्रीभीष्मपर्व्वणि सेनयुद्धवार्त्ता ततः पि
तामहः क्रुद्धो निशितैः सायकोत्तमैः अर्जुनं च रणे पार्थान् सहसेनान् समंततः १ भीमं द्वादशभिर्विद्ध्वा सात्यकिं नवभिः शरैः नकुलं च त्रिभिर्विद्ध्वा
सहदेवं च सप्तभिः २ युधिष्ठिरं द्वादशभिर्बाह्वोरुरसि चार्पयत् धृष्टद्युम्नं ततो विद्ध्वा ननाद सुमहाबलः ३ तं द्वादशाक्षैर्नकुलो माधवश्च त्रि
भिः शरैः धृष्टद्युम्नश्च सप्तत्या भीमसेनश्च सप्तभिः ४ युधिष्ठिरो द्वादशभिः प्रत्यविध्यत्पितामहं द्रोणस्तु सात्यकिं विद्ध्वा भीमसेनमविध्यत
५ एकैकं पंचभिर्वीरो यमदंडोपमैः शितैः तौ च तं प्रतिविध्येतां त्रिभिस्त्रिभिरजिह्मगैः ६ सौवीराः कित
वाः प्राच्याः प्रतीच्योदीच्यमालवाः ७ अभीषाहाः शूरसेनाः शिबयोथ वसातयः संग्रामे नाजहुर्भीष्मं वध्यमानाः शितैः शरैः ८ तथैवान्ये म
हीपाला नानादेशसमागताः पांडवानभ्यवर्त्तंत विविधायुधपाणयः ९ तथैव पांडवा राजन्परिवव्रुः पितामहं समंतात्परिवत्तो रथौ
घैरपराजितः १० गहनेग्निरिवोत्सृष्टः प्रजज्वाल दहन्परान् रथाग्न्यगारश्चापार्चिरसिशक्तिगदेंधनः ११ शरस्फुलिंगो भीष्माग्निर्ददाह क्ष
त्रियर्षभान् सुवर्णपुंखैरिषुभिर्गार्ध्रपक्षैः सुतेजनैः १२ कर्णिनालीकनाराचैश्छादयामास तद्बलं अपातयद्ध्वजांश्चैव रथिनश्चापि शि
तैः शरैः १३ मुंडतालवनानीव चकार स रथव्रजान् निर्मनुष्यान्रथान्राजन्गजानश्वांश्च संयुगे १४ अकरोत्स महाबाहुः सर्वशस्त्रभृ
तां वरः तस्य ज्यातलनिर्घोषं विस्फूर्जितमिवाशनेः १५ निशम्य सर्वभूतानि समकंपंत भारत अमोघा ह्यपतन्बाणाः पितुस्ते भरतर्षभ
१६ नासज्जंत तनुत्रेषु भीष्मचापच्युताः शराः हतवीरान्रथान्राजन्संयुक्ताञ्जवनैर्हयैः १७ अपश्याम महाराज ह्रियमाणान्रणा
जिरे चेदिकाशिकरूषाणां सहस्राणि चतुर्दश १८ महारथाः समाख्याताः कुलपुत्रास्तनुत्यजः अपरावर्त्तिनः सर्वे सुवर्णविकृतध्व

त्रिभिः ५

एम०
२८६

न४

नाः १९ संग्रामे भीष्ममासाद्य व्यादितास्यमिवांतकं निमग्नाः परलोकाय समाजिरथकुंजराः २० भग्नाक्षोपस्करान्कोश्चिद्रथवक्रांश्च भारत
अपश्याम महाराज शतशोथ सहस्रशः २१ सवरूथै रथैर्भग्नैरथिभिश्च निपातितैः शरैः सुकवचैश्छिन्नैः पट्टिशैश्च विशांपते २२ गदाभिर्भिंडिपालै
श्च निशितैश्च शिलीमुखैः अनुकर्षैरुपासंगैश्चक्रैर्भग्नैश्च मारिष २३ बाहुभिः कार्मुकैः खड्गैः शिरोभिश्च सकुंडलैः तलत्रैरंगुलित्रैश्च ध्वजैश्च विनिपा
तितैः २४ चापैश्च बहुधाछिन्नैः समास्तीर्यत मेदिनी हतारोहा गजा राजन्हयाश्च हतसादिनः २५ न्यपतंत गतप्राणाः शतशोथ सहस्रशः
यतमानापि ते वीरा द्रवमाणान्महारथान् २६ नाशक्नुवन्वारयितुं भीष्मबाणप्रपीडितान् महेंद्रसमवीर्येण वध्यमाना महाचमूः २७
अभज्यत महाराज न च द्वौ सह धावतः आविद्धरथनागाश्वं पतितध्वजसंकुलं २८ अनीकं पांडुपुत्राणां हाहाभूतमचेतनं जघाना
त्र पिता पुत्रं पुत्रश्च पितरं तथा २९ प्रियं सखायं चाक्रंदे सखा दैवबलात्कृतः विमुच्य कवचानन्ये पांडुपुत्रस्य सैनिकाः ३० प्रकीर्य के
शान्धावतः प्रत्यदृश्यंत सर्वशः तद्गोकुलमिवोद्भ्रांतमुद्भ्रांतरथकूबरं ३१ ददृशे पांडुपुत्रस्य सैन्यमार्तस्वरं तदा प्रभज्यमानं सैन्यं तु दृष्ट्वा या
दवनंदनः ३२ उवाच पार्थं बीभत्सुं निगृह्य रथमुत्तमं अयं स कालः संप्राप्तः पार्थ यः कांक्षितस्तव ३३ प्रहरास्मै नरव्याघ्र न चेन्मोहाद्विमु
ह्यसे यत्पुरा कथितं वीर त्वया राज्ञां समागमे ३४ विराटनगरे तात संजयस्य समीपतः भीष्मद्रोणमुखान्सर्वान्धार्तराष्ट्रस्य सैनिकान्
३५ सानुबंधान्हनिष्यामि ये मां योत्स्यंति संगरे इति तत्कुरु कौंतेय सत्यं वाक्यमरिंदम ३६ क्षत्रधर्ममनुस्मृत्य युध्यस्व विगतज्वरः इत्युक्तो
वासुदेवेन तिर्यग्दृष्टिरधोमुखः ३७ अकाम इव बीभत्सुरिदं वचनमब्रवीत् अवध्यानां वधं कृत्वा राज्यं वा नरकोत्तरं ३८ दुःखानि वन
वासे वा किं नु मे सुकृतं भवेत् चोदयाश्वान्यतो भीष्मः करिष्ये वचनं तव ३९ पातयिष्यामि दुर्द्धर्षं वृद्धं कुरुपितामहं स चाश्वान्रजत

मा १ हर ४

प्रत्यांश्वासयामासमाधवः ४० यतोभीष्मःततोराजन्नुःप्रेत्सोरश्मिवानिव ततस्तसुनराकर्तुंयुधिष्ठिरबलंमहत् ४१ दृष्ट्वायार्थंमहाबाहुंभीष्मायो
द्यतमाहवे ततोभीष्मःकुलश्रेष्ठःसिंहवद्विनदन्मुहुः ४२ धनंजयरथंशीघ्रंशरवर्षैरवाकिरत् क्षणेनसरथस्तस्मिन्सहयःसहसारथिः ४३ शरव
र्षेणमहतानप्राज्ञायतभारत वासुदेवस्त्वसंभ्रांतोधैर्यमास्थायसत्वरः ४४ चोदयामासतानश्वान्वितुन्नान्भीष्मसायकैः ततःपार्थोधनुर्गृह्यदिव्यंज
लदनिस्वनं ४५ पातयामासभीष्मस्यधनुश्छित्वाशितैःशरैः सछिन्नधन्वाकौरव्यपुनरन्यन्महद्धनुः ४६ निमेषांतरमात्रेणसज्यंचक्रेपितातव
चकर्षचततोदोर्भ्यांधनुर्जलदनिस्वनं ४७ अथास्यतदपिक्रुद्धश्चिच्छेदधनुरर्जुनः तस्यतत्पूजयामासलाघवंशांतनोःसुतः ४८ साधुसाधुम
हाबाहोसाधुकुंतीसुतेतिच समाभाष्यैवमपरंप्रगृह्यरुचिरंधनुः ४९ मुमोचसमरेभीष्मःशरान्पार्थरथंप्रति अदर्शयद्वासुदेवोहययाने परंबलं ५०
मोघोकुर्वंछरांस्तस्यमंडलानिनिदर्शयन् तथाभातेनरव्याघ्रौभीष्मशरविक्षतौ ५१ गोवृषाविवसंरब्धौविषाणोल्लिखितांकितौ वासुदेवस्तुसं
प्रेक्ष्यपार्थस्यमृदुयुद्धतां ५२ भीष्मंचशरवर्षाणिसृजंतमनिशंयुधि प्रतपंतमिवादित्यंमध्यमासाद्यसेनयोः ५३ वरान्वरान्विनिघ्नंतंपांडुपुत्रस्य
सैनिकान् युगांतमिवकुर्वाणंभीष्मंयौधिष्ठिरेबले ५४ नामृष्यतमहाबाहुर्माधवःपरवीरहा उत्सृज्यरजतप्रख्यान्हयान्पार्थस्यमारिष ५५ वासु
देवस्ततोयोगीप्रचस्कन्दमहारथात् अभिदुद्रावभीष्मंसभुजप्रहरणोबली ५६ प्रतोदपाणिस्तेजस्वीसिंहवद्विनदन्मुहुः दारयन्निवपद्भ्यांसज
गतींजगदीश्वरः ५७ क्रोधताम्रेक्षणःकृष्णोजिघांसुरमितद्युतिः ग्रसन्निवचचेतांसितावकानांमहाहवे ५८ दृष्ट्वामाधवमाक्रंदेभीष्मायो
द्यतमंतिके हतोभीष्मोहतोभीष्मस्तत्रतत्रस्वनोमहान् ५९ अश्रूयतमहाराजवासुदेवभयान्नरा पीतकौशेयसंवीतोमणिश्यामोजनार्द
नः ६० शुशुभेविद्रवन्भीष्मंविद्युन्मालीयथांबुदः ससिंहइवमातंगंयूथर्षभइवर्षभं ६१ अभिदुद्राववेगेनविनदन्यादवर्षभः तमापतंतंसंप्रे

पु ष्टि ५ ध ६

सपुंडरीकाक्षमाहवे ६२ असंभ्रमं रणे भीष्मो विचकर्ष महद्धनुः उवाच चैव गोविंदं असंभ्रांतेन चेतसा ६३ एह्येहि पुंडरीकाक्ष देवदेव नमोस्तु
ते मामद्य सात्वतश्रेष्ठ पातयस्व महाहवे ६४ त्वया हि देव संग्रामे हतस्यापि ममानघ श्रेय एव परं कृष्ण लोके भवति सर्वतः ६५ संभावितोस्मि
गोविंद त्रैलोक्येनाद्य संयुगे अन्वगेव ततः पार्थः समभिद्रुत्य केशवं ६६ निजग्राह महाबाहुर्बाहुभ्यां परिगृह्य वै निगृह्यमाणः पार्थेन कृ
ष्णो राजीवलोचनः ६७ जगामैवैनमादाय वेगेन पुरुषोत्तमः पार्थस्तु विष्टभ्य बलाच्चरणौ परवीरहा ६८ निजग्राह हृषीकेशं कथंचिद्
दशमे पदे तत एवमुवाचार्तः क्रोधपर्याकुलेक्षणं ६९ निश्वसंतं यथा नागं अर्जुनः प्रणयात्सखा निवर्तस्व महाबाहो नानृतं कर्तुमर्हसि ७०
यत्त्वया कथितं पूर्वं न योत्स्यामीति केशव मिथ्यावादीति लोकस्त्वां कथयिष्यति माधव ७१ ममैष भारः सर्वो हि हनिष्यामि पितामहं शपे के
शव शस्त्रेण सत्येन सुकृतेन च ७२ अंतं यथा गमिष्यामि शत्रूणां शत्रुसूदन अद्यैव पश्य दुर्द्धर्षं पात्यमानं महारथं ७३ नाणपतिमि
वापूर्णं मेनकालेयदृच्छया माधव एतद्वचः श्रुत्वा फाल्गुनस्य महात्मनः ७४ अकिंचिदुक्त्वा सक्रोध आरुरोह रथं पुनः तौ रथस्थौ नरव्याघ्रौ भी
ष्मः शांतनवः पुनः ७५ ववर्ष शरवर्षेण मेघो वृष्ट्या यथाचलौ प्राणानादत्त योधानां पिता देवव्रतस्तव ७६ गभस्तिभिरिवादित्यस्तेजां
सि शिशिरात्यये यथा कुरूणां सैन्यानि बभंजुर्युधि पांडवाः ७७ तथा पांडवसैन्यानि बभंज युधि ते पिता हतविद्रुतसैन्यास्तु निरुत्सा
हा विचेतसः ७८ निरीक्षितुं न शेकुस्ते भीष्ममप्रतिमं रणे मध्यंगतमिवादित्यं प्रतपंतं स्वतेजसा ७९ ते वध्यमाना भीष्मे

रणशतशोऽथ सहस्रशः वीक्षांचक्रुर्महाराज पांडवा भयपीडिताः ८० तथा पांडवसैन्यानि द्रवमाणानि भारत त्रातारं नाध्यगच्छंत गावः पंक
गता इव ८१ पिपीलिका इव क्षुण्णा दुर्बला बलिना रणे महारथं भारत दुःप्रकंपं शरौघिणः प्रतपंतं नरेंद्रान् ८२ भीष्मं न शेकुः
प्रतिवीक्षितुं ते शरार्चिषं सूर्यमिवातपंतं विमृद्नतस्तस्य तु पांडुसेनामस्तंजगामाथ सहस्ररश्मिः ८३ ततो बलानां श्रमकर्शितानां मनो
ऽवहारं प्रति संबभूव इति भीष्मपर्वणि नवमदिवसयुद्धं समाप्तं शुभमस्तु संजय उवाच युध्यतामेव तेषां तु भास्करेऽस्तमुपागते
संध्या समभवद्घोरा नापश्याम ततो रणं १ ततो युधिष्ठिरो राजा संध्यां संदृश्य भारत वध्यमानं च भीष्मेण त्यक्तास्त्रं भयविह्वलं २ स्वसै
न्यं च पराभग्नं पलायनपरायणं भीष्मं च युधि संरब्धं पीडयंतं महारथं ३ सोमकांश्च जितान्दृष्ट्वा निरुत्साहान्महारथान् चिंतयित्वा ततो
राजा ऽवहारमरोचयत् ४ ततोऽवहारं सैन्यानां चक्रे राजा युधिष्ठिरः तथैव तव सैन्यानामवहारो ह्यभूत्तदा ५ ततोऽवहारं सैन्यानां कृ
त्वा तत्र महारथाः न्यविशंत कुरुश्रेष्ठ संग्रामे क्षतविक्षताः ६ भीष्मस्य समरे कर्म चिंतयाना स्म पांडवाः नालभंत तदा शांतिं भी
ष्मबाणप्रपीडिताः ७ भीष्मोऽपि समरे जित्वा पांडवान्सह सृंजयान् पूज्यमानस्तव सुतैर्वंद्यमानश्च भारत ८ न्यविशत्कुरुभिः
सार्द्धं हृष्टरूपैः समंततः ततो रात्रिः समभवत्सर्वभूतप्रमोहिनी ९ तस्मिन्रात्रिमुखे घोरे पांडवा वृष्णिभिः सह सृंजयाश्च

दुराधर्षां मंत्रायस्तमुपाविशन् १० आत्मनिःश्रेयसे सर्वे शान्तकालं महाबलाः मंत्रयामासुरव्यया मंत्रनिश्चयकोविदाः ११ ततो युधिष्ठि
रो राजा मंत्रयित्वा चिरं नृप वासुदेवं समुद्दीश्य वचनं चेदमाददे १२ कृष्ण पश्य महात्मानं भीष्मं भीमपराक्रमं गजं नलवनानीव समृद्धं तं ब
लं मम १३ नचैवैनं महात्मानः मुत्सहामो निरीक्षितुं लेलीह्यमानं सैन्येषु प्रवृद्धमिव पावकं १४ यथा घोरो महानागस्तक्षको
वै विषोल्बणः तथा भीष्मः शरैः क्रुद्धस्तीक्ष्णशस्त्रः प्रतापवान् १५ गृहीतचापः समरे प्रमुंचन्निशितांश्छरान् शक्यो जेतुं यमः क्रु
द्धो वज्रपाणिश्च देवराट् १६ वरुणः पाशभृच्चापि सगदो वा धनेश्वरः नतु भीष्मः सुसंक्रुद्धः शक्यो जेतुं महाहवे १७ सोह
मेवं गते कृष्ण विमग्नः शोकसागरे आत्मनो बुद्धिदौर्बल्याद्भीष्ममासाद्य संयुगे १८ वनं यास्यामि दुर्धर्ष श्रेयो वै तत्र मे गतं न युद्धं
रोचते कृष्ण हंति भीष्मो हि नः सदा १९ यथा प्रज्वलितं वह्निं पतंगः समभिद्रवन् एकतो मृत्युमभ्येति तथाहं भीष्ममीयिवान् २०
क्षयं नीतोस्मि वार्ष्णेय राज्यहेतोः पराक्रमी भ्रातरश्चैव मे शूराः सायकैर्भृशपीडिताः २१ मत्कृते भ्रातृसौहार्दाद्राज्यभ्रष्टा वनं गताः
परिक्लिष्टा तथा कृष्णा मत्कृते मधुसूदन २२ जीवितं बहु मन्येहं जीवितं ह्यद्य दुर्लभं जीवितस्याद्य शेषेण चरिष्ये धर्ममुत्तमं २३
यदि तेहमनुग्राह्यो भ्रातृभिः सह केशव स्वधर्मस्याविरोधेन हितं आहर केशव २४ एवं श्रुत्वा वचस्तस्य कारुण्याद्बहुविस्तरं प्र
त्युवाच ततः कृष्णः सांत्वयानो युधिष्ठिरं २५ धर्मपुत्र विषादं त्वं मा कृथाः सत्यसंगर यस्य ते भ्रातरः शूरा दुर्जयाः शत्रु

भीष्म०
२८९

चै

म

सूदनः २६ अर्जुनोभीमसेनश्चवाप्यग्निसमतेजसौ माद्रीपुत्रौचविक्रांतौत्रिदशानामिवेश्वरौ २७ मांवानियुंक्ष्वसौहार्द्दाद्यो
त्स्येभीष्मेणपांडव त्वत्प्रयुक्तोमहाराजकिंनकुर्यांमहाहवे २८ हनिष्यामिरणेभीष्ममाहूयभरतर्षभं पश्यतांधार्तराष्ट्रा
णांयदिनेच्छतिफाल्गुनः २९ यदिभीष्मेहतेवीरेजयंपश्यसिपांडव हंतास्म्येकरथेनाद्यकुरुवृद्धंपितामहं ३० पश्य
मेविक्रमंराजन्महेंद्रस्येवसंयुगे विमुंचंतंमहास्त्राणिपातयिष्यामितंरथात् ३१ यःशत्रुःपांडुपुत्राणांमच्छत्रुःसनसंशयः
मदर्थाभवदीयायेयेमदीयास्तवैवते ३२ तवभ्राताममसखासंबंधीशिष्यएवच मांसान्युत्कृत्यदास्यामिफाल्गुनार्थेमहीपते ३३
एषचापिनरव्याघ्रोमत्कृतेजीवितंत्यजेत् एषनःसमयस्ताततारयेमपरस्परं ३४ समांनियुंक्ष्वराजेंद्रयथायोद्धाभवाम्यहं
प्रतिश्रुतमुपप्लव्येयत्पार्थेनपूर्वतः ३५ घातयिष्यामिगांगेयमितिलोकस्यसन्निधौ परिरक्ष्यमिदंतावद्वचःपार्थस्यधीमतः
३६ अनुज्ञातंतुपार्थेनमयाकार्यंनसंशयः अथवाफाल्गुनस्यैषभारःपरिमितोरणे ३७ सहनिष्यतिसंग्रामेभीष्मंपरपु
रंजयं अशक्यमपिकुर्याद्धिरणेपार्थःसमुद्यतः ३८ त्रिदशान्वासमुद्युक्तान्सहितान्दैत्यदानवैः निहन्यादर्जुनःसंख्ये कि
मुभीष्मंनराधिप ३९ विपरीतोमहावीर्योगतसत्वोल्पजीवनः भीष्मःशांतनवोनूनंकर्तव्यंनावबुध्यते ४० युधिष्ठिर
उवाच एवमेतन्महाबाहोयथावदसिमाधव सर्वेप्येतेनपर्याप्तास्तववेगविधारणे ४१ नियतंसमवाप्स्यामिसर्वमेतद्य

का

भी०
२८९

येप्सितं यस्मे पुत्रप्याप्रभवान्क्षेमवस्थित: ४२ संग्रामेपिपरोदेवाञ्जयेयंजयतांवर त्वयानाथेनगोविंदकिमुभीष्मंमहारथं ४३
नतुत्वामनृतंकर्तुमुत्सहेस्वात्मगौरवात् अयुध्यमान: साहाय्यंयथोक्तंकुरुमाधव ४४ समयस्तुकृत:कश्चिन्ममभीष्मेणसंयुगे
मंत्रयिष्येतवार्थायनतुयोत्स्येकथंचन ४५ दुर्योधनार्थेयोत्स्यामिसत्यमेतदितिप्रभो सहिराज्यस्यमेदातामंत्रस्यैवचमाधव ४६
तस्माद्देवव्रतंभूयोवधोपायार्थमात्मन: भवतासहिता:सर्वेपृच्छाममधुसूदन ४७ तद्वयंसहितागत्वाभीष्ममाशुनरोत्तमं न
चिरात्सर्वेवार्ष्णेयमंत्रंपृच्छामकौरवं ४८ सवक्ष्यतिहितंवाक्यंसत्यमस्माञ्जनार्दन यथाचवक्ष्यतेकृष्णतथाकर्तास्मिसंयुगे ४९
सनोजयस्यदाताचमंत्रस्यचधृतव्रत: बाला:पित्राविहीनाश्चतेनसंवर्द्धितावयं ५० तंचेत्पितामहंवृद्धंहंतुमिच्छामिमाधव
पितु:पितरमिष्टंवैधिगस्तुक्षत्रजीविकां ५१ संजयउवाच ततोब्रवीन्महाराजवार्ष्णेय:कुरुनंदनं रोचतेमेमहाप्राज्ञराजेंद्रत
वभाषितं ५२ देवव्रत:कृतीभीष्म:प्रेक्षितेनापिनिर्दहेत् गम्यतांसवधोपायंप्रष्टुंसागरगासुत: ५३ वक्तुमर्हतिसत्यंसत्व
याष्टष्टोविशेषत: तेवयंतत्रगच्छामप्रष्टुंकुरुपितामहं ५४ गत्वाशांतनवंवृद्धंमंत्रंपृच्छामभारत सनोदास्यतिमंत्रंयंतेनयो
त्स्यामहेपरान् ५५ एवमामंत्र्यतेवीरा:पांडवा:पांडुपूर्वज जग्मुस्तेसहिता:सर्वेवासुदेवश्चवीर्यवान् ५६ विमुक्तशस्त्रक
वचाभीष्मसदनंप्रति प्रविश्यचतदाभीष्मंशिरोभि:प्रतिपेदिरे ५७ पूजयंतोमहाराजपांडवाभरतर्षभं प्रणम्यशिरसाचै

६५

नंभीष्मंशरणंगामप्रभुः ५८ तानुवाचमहाबाहुर्भीष्मःकुरुपितामहः स्वागतंतववार्ष्णेयस्वागतंतेधनंजय ५९ स्वागतंधर्मपु
त्रायभीमाययमयोस्तथा किंवाकार्यंकरोम्यद्ययुष्माकंप्रीतिवर्द्धनं ६० सर्वात्मनापिकर्तास्मियद्यपिस्यात्सुदुष्करं तथाब्रुवा
णंगांगेयंप्रीतियुक्तंपुनःपुनः ६१ उवाचराजादीनात्माप्रीतियुक्तमिदंवचः कथंजयेमसर्वज्ञकथंराज्यंलभेमहि ६२ प्र
जानांसंशयोनस्यात्कथंतन्मेवदप्रभो भवान्हिनोवधोपायंब्रवीतुस्वयमात्मनः ६३ भवंतंसमरेवीरविषहेमकथंवयं न
हितेसूक्ष्ममप्यस्तिरंध्रंकुरुपितामह ६४ मंडलेनैवधनुषादृश्यसेसंयुगेसदा आददानंसंदधानंविकर्षंतंधनुर्नच ६५ पश्यामस्त्वांमहाबा
होरथेसूर्यमिवापरं रथाश्वनरनागानांहंतारंपरवीरहन् ६६ कोयत्नोत्सहतेजेतुंत्वांपुमान्भरतर्षभ वर्षताशरवर्षाणिसंयुगेवैशसंकृतं
६७ क्षपितंनोबलंहित्वंनानासंयुगेमहतोमम यथायुधिजयेमत्वांयथाराज्यंभवेन्मम ६८ ममसैन्यस्यक्षेमंचतन्मेब्रूहिपितामह
ततोऽब्रवीच्छांतनवःपांडवान्पांडुपूर्वज ६९ नकथंचनकौंतेयमयिजीवतिसंयुगे जयोभवतिसर्वज्ञसत्यमेतद्ब्रवीमिते ७०
निर्जितेमयियुद्धेनरणेजेष्यथपांडवाः क्षिप्रंमयिप्रहरध्वंयदीच्छथरणेजयं ७१ अनुजानामिवःपार्थाःप्रहरध्वंयथासुखं ए
वंहिसुकृतंमन्येभवतांविदितोह्यहं ७२ हतेमयिहतंसर्वंतस्माद्देवंविधीयतां युधिष्ठिरउवाच ब्रूहितस्मादुपायंनोयथायुद्धे
जयेमहि ७३ भवंतंसमरेक्रुद्धंदंडहस्तमिवांतकं शक्रोवज्रधरोऽप्येतंनचवरुणोयमस्तथा ७४ नभवान्समरेशक्यःसेंद्रै

रपि सुरासुरैः भीष्म उवाच सत्यमेतन्महाबाहो यथा वदसि पांडव ७५ नाहं जेतुं रणे शक्यः सेन्द्रैरपि सुरासुरैः आत्तशस्त्रो रणे यत्तो
गृहीतवरकार्मुकः ७६ ततो मां न्यस्तशस्त्रं तु एते हन्तुं महारथाः निक्षिप्तशस्त्रं पतितं विमुक्तकवचध्वजं ७७ द्रवमाणं च भी
तं च तवास्मीति च वादिनं स्त्रियं स्त्रीनामधेयं च विकलं चैकपुत्रिणं ७८ अप्रशस्तं नरं चैव न युद्धं रोचते मम इमं मे शृणु रा
जेन्द्र संकल्पं पूर्वचिंतितं ७९ अमंगलध्वजं दृष्ट्वा न युध्येयं कदाचन य एष द्रौपदो राजंस्तव सैन्ये महारथः ८० शिखंडी सम
रामर्षी शूरश्च समितिंजयः यथाभवच्च स्त्री पूर्वं पश्चात्पुंस्त्वं समागतः ८१ जानंति च भवंतोपि सर्वमेतद्यथातथं अर्जुनः स
मरे शूरः पुरस्कृत्य शिखंडिनं ८२ मामेव विशिखैस्तीक्ष्णैरभिद्रवतु दंशितः अमंगलध्वजे तस्मिं स्त्रीपूर्वे च विशेषतः ८३
न प्रहर्तुमभीप्सामि गृहीतेषु कथंचन तदंतरं समासाद्य पांडवो मां धनंजयः ८४ शरैर्घातयतु क्षिप्रं समंताद्भरतर्षभ न तं प
श्यामि लोकेषु मां हन्याद्यः समुद्यतं ८५ ऋते कृष्णान्महाभागात्पांडवाद्वा धनंजयात् एष तस्मात्पुरोधाय किंचिदन्यं ममाय
नः ८६ आत्तशस्त्रो रणे यत्तो गृहीतवरकार्मुकः मां पातयतु बीभत्सुरेवं ते विजयो ध्रुवं ८७ एतत्कुरुष्व कौंतेय यथोक्तं मम
सुव्रत संग्रामे धार्तराष्ट्रांश्च हन्याः सर्वान्समागतान् ८८ संजय उवाच तेनुज्ञातास्ततः पार्था जग्मुः स्वशिबिरं प्रति अ

भिवाद्यमहात्मानंभीष्मंकुरुपितामहं ८९ तथोक्तवतिगांगेयेपरलोकायदीक्षिते अर्जुनोदुःखसंतप्तःसव्रीडमिदमब्रवीत् ९०
गुरुणांकुलवृद्धेनकृतप्रज्ञेनधीमता पितामहेनसंग्रामेकथंयोत्स्यामिमाधव ९१ क्रीडताहिमयाबाल्येवासुदेवमहात्मना यो
सुहृषितगात्रेणमहात्मापांसुरीकृतः ९२ यथाहमधिरुह्यांकंबालःकिलगदाग्रजः तातेत्यवोचंपितरंपितुःपाण्डोर्महात्मनः ९३
नाहंतातस्तवपितुस्तातोस्मितवभारत इतिमामब्रवीद्बाल्येयःसवध्यःकथंमया ९४ कामंवध्यतुमेसैन्यंनाहंयोत्स्येमहात्मना
जयोवास्तुवधोवामेकथंवाकृष्णमन्यसे ९५ वासुदेवउवाच प्रतिज्ञायवधंजिष्णोपुराभीष्मस्यसंयुगे क्षत्रधर्मेस्थितःपार्थक
थंनैनंहनिष्यसि ९६ पातयैनंरथात्पार्थक्षत्रियंयुद्धदुर्मदं नाहत्वायुधिगांगेयंविजयस्तेभविष्यति ९७ दृष्टमेतत्पुरादेवैर्ग
मिष्यति यमक्षयं यद्दृष्टंहिपुरापार्थतत्तथाननदन्यथा ९८ नहिभीष्मंदुराधर्षंव्यात्ताननमिवांतकं त्वदन्यःशक्नुयाद्यो
द्धुमपिवज्रधरःस्वयं ९९ जहिभीष्मंस्थिरोभूत्वाशृणुचेदंवचोममयथोवाचपुराशक्रंमहाबुद्धिर्बृहस्पतिः १०० ज्या
यांसमपिचेद्वृद्धंगुणैःरपिसमन्वितं आततायिनमायांतंहन्याद्घातकमात्मनः १०१ शाश्वतोयंस्थितोधर्मःक्षत्रि
याणांधनंजय योद्धव्यंरक्षितव्यंचयष्टव्यंचानसूयुभिः १०२ अर्जुनउवाच शिखंडीनिधनंकृष्णभीष्मस्यभविता

म ७

ध्रुवं दृष्ट्वैव संहितशरो भीष्मः पांचाल्यं विनिवर्तते १०३ तेनैवं प्रमुखेनत्त्सु पुरस्कृत्य शिखंडिनं गांगेयं पातयिष्याम उपायेनेति मे मतिः
१०४ अहं त्वान्यान्महेष्वासान्वारयिष्यामि सायकैः शिखंडी अपि युधां श्रेष्ठं भीष्ममेवाभियोधयत् १०५ श्रुतं हि कुरुमुख्यस्य नाहं हं
न्यां शिखंडिनं कन्या ह्येषा पुरा भूत्वा पुरुषः समपद्यत १०६ इत्येवं निश्चयं कृत्वा पांडवाः सहमाधवाः अनुमान्य महा
त्मानं प्रययुर्हृष्टमानसाः १०७ इति भीष्मपर्वणि धृतराष्ट्र उवाच कथं शिखंडी गांगेयमभ्यवर्तत संयुगे पांडवाश्च कथं भी
ष्मं तन्ममाचक्ष्व संजय १ संजय उवाच ततस्ते पांडवाः सर्वे सूर्यस्योदयनं प्रति ताड्यमानासु भेरीषु मृदंगेष्वानकेषु च २ ध्मा
यत्सु दधिवर्णेषु जलजेषु समंततः शिखंडिनं पुरस्कृत्य निर्याताः पांडवा युधि ३ कृत्वा व्यूहं महाराज सर्वशत्रुनिबर्हणं शि
खंडी सर्वसैन्यानामग्र आसीद्विशांपते ४ चक्ररक्षौ ततस्तस्य भीमसेनधनंजयौ पृष्ठतो द्रौपदेयाश्च सौभद्रश्चैव वीर्यवान् ५
सात्यकिश्चेकितानश्च तेषां गोप्ता महारथः धृष्टद्युम्नः ततः पश्चात्पांचालैरभिरक्षितः ६ ततो युधिष्ठिरो राजा यमाभ्यां स
हितः प्रभुः प्रययौ सिंहनादेन नादयन्भरतर्षभ ७ विराटस्तु ततः पश्चात्स्वेन सैन्येन संवृतः उपप्रयान्महाबाहो ततः
पश्चाद्द्रुपदोऽभ्यवर्तत ८ कैकेया भ्रातरः पंच धृष्टकेतुश्च वीर्यवान् जघनं पालयामासुः पांडुसैन्यस्य भारत ९ ए

भि०
२९२

व्यूह्यमहासैन्यंपांडवास्तववाहिनीं अभ्यद्रवंतसंग्रामेत्यक्त्वाजीवितमात्मनः १० तथैवकुरवोराजन्भीष्मंकृत्वामहारथं अग्र
तः सर्वसैन्यानांप्रययुः पांडवान्प्रति ११ पुत्रैस्तवदुराधर्षैरक्षितःसुमहाबलैः ततोद्रोणोमहेष्वासःस्ततश्शल्योमहाबलः
१२ भगदत्तस्ततः पश्चाद्गजानीकेनसंवृतः कृपश्चकृतवर्माचभगदत्तमनुव्रतौ १३ कांबोजराजोबलवांस्ततः पश्चा
त्सुदक्षिणः मागधश्चजयत्सेनः सौबलश्चबृहद्बलः १४ तथैवान्येमहेष्वासाः सुशर्मप्रमुखानृपाः जघनंपाल
यामासुस्तवसैन्यस्यभारत १५ दिवसेदिवसेप्राप्तेभीष्मःशांतनवोयुधि आसुरानकरोद्व्यूहान्पैशाचानथराक्षसान्
१६ ततः प्रववृतेयुद्धंतवतेषांचभारत अन्योन्यंनिघ्नतांराजन्यमराष्ट्रविवर्द्धनम् १७ अर्जुनप्रमुखाः पार्थाः पुरस्कृ
त्यशिखंडिनं भीष्मंयुद्धेभ्यवर्त्तंतकिरंतोविविधाञ्छरान् १८ तत्रभारतभीमेनताडिताः तावकाः शरैः रुधिरौघपरि
क्लिन्नाः परलोकंययुस्तदा १९ नकुलः सहदेवश्चसात्यकिश्चमहारथः तवसैन्यंसमासाद्यपीडयामासुरोजसा २०
तेवध्यमानाः समरेतावकाभरतर्षभ नाशक्नुवन्वारयितुंपांडवानांमहद्बलं २१ ततस्तत्तावकंसैन्यंवध्यमानंसमंततः
संप्राद्रवद्दशदिशः कालयमानंमहारथैः २२ त्रातारंनाध्यगच्छंततावकाभरतर्षभ वध्यमानाः शितैर्बाणैः

गम०
२९२

रा२

पांडवैःसहसृंजयैः २३ धृतराष्ट्रउवाच पीड्यमानंबलंदृष्ट्वापार्थैर्भीष्मःपराक्रमी २४ यदकार्षीद्रणेक्रुद्धस्तन्ममाचक्ष्वसंजय कथंवापांडवान्युद्धे
प्रत्युद्यातःपरंतपः २५ विनिघ्नन्सोमकान्वीरस्तदाचक्ष्वममानघ संजयउ० आचक्षेतेमहाराजयदकार्षीत्पितातव २६ पीडितेतवपुत्रस्यसैन्ये
पांडवसृंजयैः प्रहृष्टमनसःशूराःपांडवाःपांडुपूर्वज २७ अभ्यवर्तन्तनिघ्नन्तस्तवपुत्रस्यवाहिनीं तंविनाशंमनुष्येंद्रनरवारणवाजिनां २८
नामृष्यततदाभीष्मःसैन्यघातंरणेपरैः सपांडवान्महेष्वासान्पांचालांश्चससृंजयान् २९ नाराचैर्वत्सदंतैश्चशितैरंजलिकैस्तथा अभ्यव
र्षतदुर्द्धर्षस्त्यक्त्वाजीवितमात्मनः ३० सपांडवानांप्रवरान्पंचराजन्महारथान् आत्तशस्त्रान्रणेयत्तान्वारयामाससायकैः ३१ नानाशस्त्रा
स्त्रवर्षैस्तान्वीर्यामर्षप्रचोदितैः निजघ्नेसमरेक्रुद्धोहस्त्यश्वंचामितंबहु ३२ रथिनोऽपातयद्राजन्रथेभ्यःपुरुषर्षभ सादिनश्चाश्वपृष्ठेभ्यः
पादातांश्चसमागतान् ३३ गजारोहान्गजेभ्यश्चपरेषांजयकारिणः तमेकंसमरेभीष्मंत्वरमाणंमहारथं ३४ पांडवाःसमवर्तन्तवज्रह
स्तमिवासुराः शक्राशनिसमस्पर्शान्विमुंचन्विशिखाञ्छरान् ३५ दिक्ष्वदृश्यतसर्वासुघोरंसंधारयन्वपुः मंडलीभूतमेवास्यनित्यंधनुरदृश्य
त ३६ संग्रामेयुध्यमानस्यशक्रचापोपमंमहत् तदृष्ट्वासमरेकर्मपुत्रास्तवविशांपते ३७ विस्मयंपरमंगत्वापितामहमपूजयन् पार्था
विमनसोभूत्वाप्रैक्षन्तपितरंतव ३८ युध्यमानंरणेशूरंविप्रचित्तिमिवामराः नचैनंवारयामासुर्व्यात्ताननमिवांतकं ३९ दशमेऽहनिसंप्रा
प्तेरथानीकंशिखंडिनः अदहन्निशितैर्बाणैःकृष्णवर्त्मेवकाननं ४० तंशिखंडीत्रिभिर्बाणैरभ्यविध्यत्स्तनांतरे आशीविषमिव

कुद्धंकालमसृष्टमिवांतकं ४१ अभिद्रुद्रावकुद्धः प्रहसन्निदमब्रवीत् काममममममांबालेनत्वांपोस्मिकथंचन ४२ येवहितंकृत्वाधात्रासेव
हितंशिखंडिनो तस्यतद्वचनंश्रुत्वाशिखंडीक्रोधमूर्छितः ४३ उवाचेनंतथाभीष्मंसृक्कणीपरिसंलिहन् जानामित्वांमहाबाहोक्षत्रियाणां
भयंकरं ४४ मयाश्रुतंचतेयुद्धंजामदग्न्येनवैसह दिव्यश्चतेप्रभावोयंमयाचबहुशः श्रुतः ४५ जानन्नपिप्रभावंतेयोत्स्येद्याहंत्वयासह पांडवा
नांप्रियंकुर्वन्नात्मनश्चनरोत्तम ४६ अद्यत्वांयोधयिष्यामिरणेपुरुषसत्तम ध्रुवंचत्वांहनिष्यामिशपेसत्येनतेऽग्रतः ४७ एतच्छ्रुत्वाचमद्वा
क्यंयत्कृत्यंतत्समाचर काममम्यसमावानमेजीवन्मोक्ष्यसे ४८ सुदृष्टः क्रियतांभीष्मलोकोयंसमितिंजय संजयउवाच एवमुक्तस्ततो
भीष्मंपंचभिर्नतपर्वभिः ४९ अविध्यत्रणेभीष्मंसत्रुद्धंवाक्सायकैः तस्यतद्वचनंश्रुत्वासव्यसाचीमहारथः ५० कालोयमितिसंचिंत्यशि
खंडिनमचोदयत् अहंत्वामनुयास्यामिपरान्विद्रावयंछरैः ५१ अभिद्रवसुसंरब्धोभीष्मंभीमपराक्रमं नहितेसंयुगेपीडांशक्तः कर्तुंमहाबलः
५२ तस्मादद्यमहाबाहोयत्नाद्भीष्ममभिद्रव अहत्वासमरेभीष्मंयदियास्यसिमारिष ५३ अवहास्योस्यलोकस्यभविष्यसिमयासह नाव
हास्यथावीरभवेमपरमाहवे ५४ तथाकुरुरणेयत्नंसाधयस्वपितामहं अहंतेरक्षणंयुद्धेकरिष्यामिमहाबल ५५ वारयन्रथिनः सर्वान्सा
धयस्वपितामहं द्रोणंचद्रोणपुत्रंचकृपंचाथसुयोधनं ५६ चित्रसेनंविकर्णंचसैंधवंचजयद्रथं विंदानुविंदावावंत्यौकांबोजंचसुदक्षिणं ५७
भगदत्तंतथाशूरंमागधंचमहाबलं सोमदत्तिंतथाशूरमार्ष्यशृंगिंचराक्षसं ५८ त्रिगर्तराजंचरणेसहसर्वैर्महारथैः अहमावारयि

ध्यामि वेलेव मकरालयं ५९ कुरून् समहितान् सर्वान् युध्यमानान् महाबलान् निवारयिष्यामि रणे साधयस्व पितामहं ६० इति भी
ष्मपर्वणि धृतराष्ट्र उवाच कथं शिखंडी गांगेयम् अभ्यधावत् पितामहं पांचाल्यः समरे क्रुद्धो धर्मात्मानं यतव्रतं १ के रक्षन् पांडवानी
के शिखंडिनम् उद्यतायुधाः त्वरमाणास् त्वराकाले जिगीषंतो महारथाः २ कथं शांतनवो भीष्मः स तस्मिन् दशमेहनि अयुध्यत महावीर्यः
पांडवैः सह सृंजयैः ३ न मृष्यामि रणे भीष्मं प्रत्युद्यातं शिखंडिना कच्चिन्न रथभंगोस्य धनुर्वाशीर्यतास्यतः ४ संजय उवाच नाशी
र्यत धनुस् तस्य रथभंगो न चाप्यभूत् युध्यमानस्य संग्रामे भीष्मस्य भरतर्षभ ५ निघ्नतः समरे शत्रून् शरैः सन्नतपर्वभिः अनेकश
तसाहस्रास् तावकानां महारथाः ६ तथा दंतिगणा राजन् हयाश्चैव सुसज्जिताः अभ्यवर्तंत युद्धाय पुरस्कृत्य पितामहं ७ यथा
प्रतिज्ञं कौरव्य स चापि समितिंजयः पार्थानाम् अकरोद् भीष्मः सततं समितिक्षयं ८ युध्यमानं महेष्वासं विनिघ्नंतं परान् शरैः पांचालाः पां
डवैः सार्धं सर्वे ते नाभ्यधारयन् ९ दशमेहनि संप्राप्ते ततां तां रिपुवाहिनीं कीर्यमाणां शितैर्बाणैः शतशोथ सहस्रशः १० न हि
भीष्मं महेष्वासं पांडवाः पांडुपूर्वज अशक्नुवन् रणे जेतुं पाशहस्तम् इवांतकं ११ अथोपायान् महाराज सव्यसाची धनंजयः त्रासयन्
रथिनः सर्वान् बीभत्सुर् अपराजितः १२ सिंहवद् विनदन्न् उच्चैर् धनुर्ज्यां विक्षिपन् मुहुः शरौघान् विसृजन् पार्थो व्यचरत् कालवद् रणे १३
तस्य शब्देन वित्रस्तास् तावका भरतर्षभ सिंहस्येव मृगा राजन् व्यद्रवंत महाभयात् १४ जयंतं पांडवं दृष्ट्वा त्वत्सैन्यं चाभिपी

भि०
२९४

डितं दुर्योधनोत्ततोभीष्ममब्रवीद्दुःखपीडितः १५ एषपांडुसुतस्तातम्बेनाम्बःकृष्णसारथिः दहतेमामकान्सर्वान्कृष्णवर्त्मेवकाननं
१६ पश्यत्वेमानिगांगेयद्रवमाणानिसर्वशः पांडवेनयुधांश्रेष्ठकालमानानिसंयुगे १७ यथापशुगणान्पालः संकालयतिका
नने नयेदंमामकंसैन्यंकालयतेशत्रुतापन १८ धनंजयशरैर्भग्नंद्रवमाणंततस्ततः भीमोप्येवंदुराधर्षोविद्रावयतिमेबलं १९
सात्यकिश्चेकितानश्चमाद्रीपुत्रौचपांडवौ अभिमन्युःसविक्रांतोवाहिनींद्रवतेमम २० धृष्टद्युम्नस्तथाशूरोराक्षसश्चघटोत्कचः
व्यद्रावयेतांसहसासैन्यंममहारणे २१ वध्यमानस्यसैन्यस्यसर्वैरेतैर्महारथैः नान्यांगतिंप्रपश्यामिस्थानेयुद्धेचभारत २२ ऋ
तेत्वांपुरुषव्याघ्रदेवतुल्यपराक्रमं पर्याप्तस्तुभवान्क्षिप्रंपीडितानांगतिर्भव २३ एवमुक्तोमहाराजपितादेवव्रतस्तव चिंतयि
त्वामुहूर्तंतुकृत्वानिश्चयमात्मनः २४ तवसंधारयन्पुत्रमब्रवीच्छांतनोःसुतः दुर्योधनविजानीहिस्थिरोभूत्वाविशांपते २५
पूर्वकालंतवमयाप्रतिज्ञातंमहाबलं हत्वादशसहस्राणिक्षत्रियाणांमहात्मनां २६ संग्रामाद्व्यपयातव्यमेतत्कर्मममाह्नि
कं इतितत्कृतवांश्चाहंयथोक्तंभरतर्षभ २७ अद्यचापिमहत्कर्मप्रकरिष्येमहाबलः अहंवानिहतःशेष्येहनिष्येवाद्यपां
डवान् २८ अद्यतेपुरुषव्याघ्रप्रतिमोक्ष्येऋणंतवभर्तृपिंडकृतंराजन्निहतःपृतनामुखे २९ इत्युक्त्वाभरतश्रेष्ठःक्षत्रि
यान्प्रवपञ्छरैः आससाददुराधर्षःपांडवानामनीकिनीं ३० अनीकमध्येतिष्ठंतंगांगेयंभरतर्षभ आशीविषमिवक्रुद्धंपां

राप०
२९४

ङ्वाःपर्यवारयन् ३१ दशमेहनिभीष्मस्तुदर्शयंछक्तिमात्मनः राजंछतसहस्राणिसोवधीत्कुरुनंदन ३२ पांचालानांचयेश्रेष्ठाराजपु

त्रामहारथाः तेषामादत्ततेजांसिजलंसूर्यइवांशुभिः ३३ हत्वादशसहस्राणिकुंजराणांतरस्विनां सारोहाणांमहाराजहया

नांचायुतंतथा ३४ पूर्णेशतसहस्रेद्वेपादातानांनरोत्तम प्रजज्वालरणेभीष्मोविधूमइवपावकः ३५ नचैनंपाण्डवे

यानांकेचिच्छेकुर्निरीक्षितुं उत्तरंमार्गमास्थायतपंतमिवभास्करं ३६ तेपांडवेयाःसंरब्धामहेष्वासेनपीडिताः व

धायाभ्यद्रवन्भीष्मंसृंजयाश्चमहारथाः ३७ संयुध्यमानोबहुभिर्भीष्मःशांतनवस्तदा अवकीर्णोमहामेरुःशैलोमे

घैरिवावृतः ३८ पुत्रास्तुतवगांगेयंसमंतात्पर्यवारयन् महत्यासेनयासार्द्धंततोयुद्धमवर्त्तत ३९ इतिभीष्मपर्वणि

संजयउवाच अर्जुनस्तुरणेराजन्दृष्ट्वाभीष्मस्यविक्रमं शिखंडिनमथोवाचसमभ्येहिपितामहं १ नचापिभीस्त्वयाका

र्याभीष्मादद्यकथंचन अहमेनंशरैस्तीक्ष्णैःपातयिष्येरथोत्तमात् २ एवमुक्तस्तुपार्थेनशिखंडीभरतर्षभ अभ्यद्रव

तगांगेयंश्रुत्वापार्थस्यभाषितं ३ धृष्टद्युम्नस्तथाराजन्सौभद्रश्चमहारथः हृष्टावाद्रवतांभीष्मंश्रुत्वापार्थस्यभाषितं ४

विराटद्रुपदौवृद्धौकुंतिभोजश्चदंशितः अभ्यद्रवंतगांगेयंपुत्रस्यतवपश्यतः ५ नकुलःसहदेवश्चधर्मराजश्च

वीर्यवान् तथेतराणिसैन्यानिसर्वाण्येवविशांपते ६ समाद्रवंतगांगेयंपुत्रस्यतवपश्यतः नकुलःसहदे

भी० २९५

वक्रुश्चसमेतान्तां १

वचश्रुत्वापार्थस्यभाषितं ८ यतुयत्तान्महारथान् यथाशक्तियथोत्साहंतन्मेनिगदतःश्रृणु ९ चित्रसेनोमहाराजचेकिता
नंसमभ्ययात् भीष्मप्रेप्सुंरणेयांतंवृषंआकांक्षिशुर्यथा ९ धृष्टद्युम्नंमहाराजभीष्मांतिकमुपागतं त्वरमाणोरणेयत्तंकृतवर्मा
न्यवारयत् १० भीमसेनंतुसंक्रुद्धंगांगेयस्यवधैषिणं त्वरमाणोमहाराजसौमदत्तिर्न्यवारयत् ११ तथैवनकुलंशूरंकिरंतं
सायकान्बहून् विकर्णोवारयामासइच्छन्भीष्मस्यजीवितं १२ सहदेवंतथाराजन्यांतंभीष्मरथंप्रति वारयामाससंक्रुद्धःकृ
पःशारद्वतोयुधि १३ राक्षसंक्रूरकर्माणंभैमसेनिंमहाबलं भीष्मस्यनिधनप्रेप्सुंदुर्मुखोभ्यद्रवद्बली १४ सात्यकिंस
मरेयांततवपुत्रोन्यवारयत् अभिमन्युंमहाराजयांतंभीष्मरथंप्रति १५ सुदक्षिणोमहाराजकांबोजःप्रत्यवारयत् वि
राटद्रुपदौवृद्धौसमेतावरिमर्दनौ १६ अश्वत्थामाततःक्रुद्धोवारयामासभारत तथापांडुसुतंज्येष्ठंभीष्मस्यवधकांक्षि
णं १७ भारद्वाजोरणेयत्तोधर्मपुत्रमवारयत् अर्जुनंरभसंयुद्धेपुरस्कृत्यशिखंडिनं १८ भीष्मप्रेप्सुंमहाराजभासयंतंदि
शोदश दुःशासनोमहेष्वासोवारयिष्यामसंयुगे १९ अन्येचतावकायोधाःपांडवानांमहारथान् भीष्मस्याभिमु
खान्यातान्वारयामासुराहवे २० धृष्टद्युम्नस्तुसैन्यानिप्राक्रोशत्पुनःपुनः अभिद्रवतसंरब्धाभीष्ममेकंमहारथाः २१
एषोर्जुनोरणेभीष्मंप्रयातिकुरुनंदनः अभिद्रवतमाभैष्टभीष्मोहिप्राप्स्यतेनवः २२ अर्जुनंसमरेयोद्धुंनोत्स

भी० २९५

हितापिवास्य: किमुभीष्मोरणेवीर: गतसत्वोऽल्पजीवित: २३ इतिसेनापते: श्रुत्वापांडवानांमहारथा: अभ्यद्रवंतसंहृष्टागां
गेयस्यरथंप्रति २४ आगच्छमानानमरैर्वीर्योघानसवलानिव अवारयंतसंहृष्टास्तावकाः पुरुषर्षभा: २५ दु:शासनोमहारा
जभयंत्यक्त्वामहारथ: भीष्मस्यजीविताकांक्षीधनंजयमुपाद्रवत् २६ तथैवपांडवा: शूरागांगेयस्यरथंप्रति अभ्यद्रवंतसंग्रा
मेतवपुत्रान्महारथा: २७ तत्राद्भुतमपश्यामचित्ररूपंविशांपते दु:शासनरथंप्राप्यपतपार्थोनातिवर्तत २८ यथावेलांसमासाद्य
वेलांसुब्धतोयेमहार्णवं तथैवपांडवंक्रुद्धंतवपुत्रोन्यवारयत् २९ उभौतौरथिनांश्रेष्टावुभौभारतदुर्जयौ उभौचंद्रार्कसदृशौ
कांत्यादीप्त्याचभारत ३० तथातौजातसंरंभावन्योन्यंवधकांक्षिणौ समीयतुर्महासंख्येमयशक्रौयथापुरा ३१ दु:शासनो
महाराजपांडवंविशिखैस्त्रिभि: वासुदेवंचविंशत्याताडयामाससंयुगे ३२ ततोर्जुनोजातमन्युर्वार्ष्णेयंवीक्ष्यपीडितं दु:शास
नंशतेनाजौनाराचानांसमार्पयत् ३३ तेतस्यकवचंभित्त्वापपु: शोणितमाहवे दु:शासनस्त्रिभि: क्रुद्ध: पार्थंविव्याधपत्रि
भि: ३४ ललाटेभरतश्रेष्ठ: शरै: सन्नतपर्वभि: ललाटस्थैस्ततैर्बाणै: शुशुभेपांडवोरणे ३५ यथामेरुर्महाराजशृंगैरत्यर्थ
मुच्छ्रितै: सोतिविद्धोमहेष्वास: पुत्रेणतवधन्विना ३६ अराजतरणेपार्थ: किंशुक: पुष्पवानिव दु:शासनंतत: क्रु
द्ध: पीडयामासपांडव: ३७ पर्वणीवसुसंक्रुद्धोराहु: शूर्णंनिशाकरं पीड्यमानोवलवतापुत्रस्तवविशांपते ३८ विव्या

धसमरेपार्थंकंकपत्रैःशिलाशितैः तस्यपार्थोधनुश्छित्वारथंवास्त्रिभिःशरैः ३९ आजघानततःपश्चात्तत्वंतैर्निशितैःशरैः
सोन्यत्कार्मुकमादायभीष्मस्यप्रमुखेस्थितः ४० अर्जुनंपंचविंशत्यावाह्वोरुरसिचार्पयत् तस्यक्रुद्धोमहाराजपांडवःशत्रुतापनः
४१ व्यसृजद्विशिखान्घोरान्समदंडोपमान्बहून् अप्राप्तानेवतान्बाणांश्चिच्छेदतनयस्तव ४२ यतमानस्यपार्थस्यतदद्भुतमिवा
भवत् पार्थंचनिशितैर्बाणैरविध्यत्तनयस्तव ४३ ततःक्रुद्धोरणेपार्थःशरान्संधायकार्मुके प्रेषयामाससमरेस्वर्णपुंखाञ्छिला
शितान् ४४ न्यमज्जंस्तेमहाराजतस्यकायेमहात्मनः यथाहंसामहाराजतडागंप्राप्यभारत ४५ पीडितश्चैवपुत्रस्तेपांडवेनम
हात्मना हित्वापार्थंरणेतूर्णंभीष्मस्यरथमाव्रजत् ४६ अगाधेमज्जतस्तस्यद्वीपोभीष्मोऽभवत्तदा प्रतिलभ्यततःसंज्ञांपुत्रस्तव
विशांपते ४७ अवारयत्ततःशूरोभूयएवपराक्रमी शरैःसुनिशितैःपार्थंयथावृत्रंपुरंदरः ४८ निर्बिभेदमहाकायोविव्यथे
नैवचार्जुनः इतिभीष्मपर्वणि संजयउवाच सात्यकिंदंशितंयुद्धेभीष्मायाभ्युद्यतंरणे आर्ष्यशृंगिर्महेष्वासोवारयामाससंयुगे १
माधवस्तुसुसंक्रुद्धोराक्षसंनवभिःशरैः आजघानरणेराजन्प्रहसन्निवभारत २ तथैवराक्षसोराजन्माधवंनवभिःशरैः अ
र्दयामासराजेंद्रसंक्रुद्धःशिनिपुंगवं ३ शैनेयःशरसंघंतुप्रेषयामाससंयुगे राक्षसायसुसंक्रुद्धोमाधवंपरवीरहा ४
ततोरक्षोमहाबाहुःसात्यकिंसत्यविक्रमं विव्याधविशिखैस्तीक्ष्णैःसिंहनादंननादच ५ माधवस्तुभृशंविद्धोराक्षसेनरणेत

रा वार्यमाणास्तु ते नैव जहुस्तं तव नारद ६ भगदत्तस्ततः क्रुद्धो माधवं निशितैः शरैः ताडयामास समरे तोत्रैरिव महागजं ७ विहायसा
क्षत्रंपुंद्रैरनेयो रथिनां वरः प्राप्नोति पार्थ विक्षेप शरान्सन्नतपर्वणः ८ तस्य प्राग्ज्योतिषो राजा माधवस्य महद्धनुः चिच्छेद शतधारेण भल्ले
न कृतहस्तवत् ९ अथान्यद्धनुरादाय वेगवत्सर्ववीरहा भगदत्तं रणे क्रुद्धं विव्याध निशितैः शरैः १० सोतिविद्धो महेष्वासः सृक्कणी प
रिसंलिहन् शक्तिं कनकवैडूर्यमायसीं भूषितां दृढां ११ यमदण्डोपमां घोरां चिक्षेप परमाहवे तामापतंतीं सहसा तस्य बाहुबलेरितां
१२ सात्यकिः समरे राजन्द्विधा चिच्छेद सायकैः ततः पपात सहसा महोल्केव हतप्रभा १३ शक्तिं विनिहतां दृष्ट्वा पुत्रस्तव विशां
पते महता रथवंशेन वारयामास माधवं १४ तथा परिवृतं दृष्ट्वा वार्ष्णेयानां महारथं दुर्योधनो भृशं क्रुद्धो भ्रातॄन्सर्वानुवाच ह १५
तथा कुरुत कौरव्या यथा वः सात्यको युधि न जीवन्प्रतिनिर्याति महतोस्माद्रथव्रजात् १६ तस्मिन्हते हतं मन्ये पाण्डवानां महद्ब
लं तथेति च वचस्तस्य परिगृह्य महारथाः १७ शैनेयं योधयामासुर्भीष्मस्याभ्युद्यतं रणे कांबोजराजो बलवान्वारयामास संयुगे
१८ आर्जुनिं नृपतिर्विद्ध्वा शरैः सन्नतपर्वभिः पुनरेव चतुःषष्ट्या राजन्विव्याध तं नृप १९ सुदक्षिणात्क समरे पुनर्विव्याध पं
चभिः सारथिं चास्य नवभिरिच्छन्भीष्मस्य जीवितं २० तद्युद्धमासीत्सुमहत्तयोस्तत्र समागमे यदभ्यधावद्गांगेयं शिखंडी शत्रुकर्शनः

भि०
२९७

२१ विराटद्रुपदौ वृद्धौ वारयंतौ महाचमूं भीष्मं च युधि संरब्धौ विद्रवंतौ महारथौ २२ अश्वत्थामा रणे क्रुद्धः समियाद्रथसत्तम ततः श्वेतहयेनयुद्धं
नपालस्यभारत २३ विराटो दशभिर्भल्लैराजघान परंतप यतमानं महेष्वासं रौणमाहवशोभिनं २४ द्रुपदश्च त्रिभिर्बाणैर्विव्याध नि
शितैस्तदा गुरुपुत्रं समासाद्य प्रहरंतौ महाबलौ २५ अश्वत्थामा ततस्तौ तु विव्याध बहुभिः शरैः विराटद्रुपदौ वीरौ भीष्मं प्रति समुद्यतौ
२६ तत्राद्भुतमपश्याम वृद्धयोश्चरितं महत् यद्द्रौणिसायकान्घोरान्प्रत्यवारयतां युधि २७ सहदेवं तथायांतं कृपः शारद्वतोऽभ्ययात्
यथा नागो वने नागं मत्तो मत्तमुपाद्रवत् २८ कृपश्च समरे शूरो माद्रीपुत्रं महारथं आजघान शरैस्तूर्णं सप्तत्या रुक्मभूषणैः २९ त
स्य माद्रीसुतस्तस्य धनुर्द्विधा चिच्छेद सायकैः अथैनं छिन्नधन्वानं विव्याध नवभिः शरैः ३० सोन्यत्कार्मुकमादाय समरे भारसाधनं माद्री
पुत्रं सुसंहृष्टो दशभिर्निशितैः शरैः ३१ आजघानोरसि क्रुद्ध इच्छन्भीष्मस्य जीवितं तथैव पांडवो राजंश्छारद्वतममर्षणं ३२ आजघा
नोरसि क्रुद्धो भीष्मस्य वधकांक्षया तयोर्युद्धं समभवद्घोररूपं भयावहं ३३ नकुलं तु रणे क्रुद्धो विकर्णः शत्रुतापनः विव्याध सायकैः षष्ट्या रक्षन्
भीष्मं महाबलं ३४ नकुलोपि भृशं विद्धस्तव पुत्रेण धीमता विकर्णं सप्तसप्तत्या निर्बिभेद शिलीमुखैः ३५ तत्र तौ नरशार्दूलौ भीष्महेतोः परं
तौ अन्योन्यं जघ्नतुर्वीरौ गोष्ठे गोवृषभाविव ३६ घटोत्कचं रणे यांतं निघ्नंतं तव वाहिनीं दुर्मुखः समरे प्रायाद्भीष्महेतोः पराक्रमी ३७ है
डिंबस्तु रणे राजन्दुर्मुखं शत्रुतापनं आजघानोरसि क्रुद्धः शरेणानतपर्वणा ३८ भीमसेनसुतं चापि दुर्मुखः सुमुखैः शरैः षष्ट्या वी

राम०
२९७

ऽनद्न्हेलेविद्याधरगणमहेषि ३९ धृष्टद्युम्नंतथायांतंभीष्मस्यवधकांक्षिणं हार्दिक्योवारयामासरथेनैवमहारथः ४० हार्दिक्यं
पार्षतस्त्वापिविध्वापंचभिरायसैः पुनः पंचाशताशरैस्तिष्ठतिष्ठेतिचाब्रवीत् ४१ अजघ्नानमहाबाहुः पार्षतंतंमहारथं तंचैवपा
र्षतोराजन्हार्दिक्यंनवभिः शरैः ४२ विव्याधनिशितैःस्तीक्ष्णैः कंकपत्रैरजिह्मगैः तयोःसमभवद्युद्धंभीष्महेतोर्महाहवे ४३
अन्योन्यातिशयेयुक्तंयथावृत्रमहेन्द्रयोः भीमसेनंतथायांतंभीष्मप्रतिमहारथं ४४ भूरिश्रवाभ्ययात्तूर्णंतिष्ठतिष्ठेतिचाब्रवीत्
सौमदत्तिरथोभीममाजघानस्तनान्तरे ४५ नाराचेनसुतीक्ष्णेनरुक्मपुंखेनसंयुगे उरस्थेनबभौतेनभीमसेनः प्रतापवान् ४६
स्कंदशक्त्यायथाक्रौंचः पुरानृपतिसत्तम तौशरान्सूर्यसंकाशान्कर्मारपरिमार्जितान् ४७ अन्योन्यस्यरणेक्रुद्धौचिक्षिपाते
नरर्षभौ भीमोभीष्मवधाकांक्षीसौमदत्तिंमहारथं ४८ तथाभीष्मजयेगृध्नुःसौमदत्तिश्चपांडवं कृतप्रतिकृतेयत्तौयोधयामा
सतूरणे ४९ युधिष्ठिरंतुकौंतेयंमहत्यासेनयावृतं भीष्माभिमुखमायांतंभारद्वाजोन्यवारयत् ५० द्रोणस्यरथनिर्घोषंपर्ज
न्यनिनदोपमं श्रुत्वाप्रभद्रकाराजन्समकंपंतमारिष ५१ सासेनामहतीराजन्पांडुपुत्रस्यसंयुगे द्रोणेनवारितायत्तानचचाल
पदात्पदं ५२ चेकितानंरणेयत्तंभीष्मंप्रतिजनेश्वरं चित्रसेनस्तवसुतः क्रुद्धरूपमवारयत् ५३ भीष्महेतोः पराक्रांतश्चित्र
सेनः पराक्रमीचेकितानंपरंशक्त्यायोधयामासभारत ५४ तथैवचेकितानोपिचित्रसेनमवारयत् तद्युद्धमासीत्सुमहत्तयोस्त
त्रसमागमे ५५ अर्जुनोवार्यमाणस्तुबहुशस्तवभारत विमुखीकृत्यपुत्रंतेसेनांतवममर्दह ५६ दुःशासनोपिपरयाशक्त्या

पार्थमवारयत् कथं भीष्मेनेनो हन्याद् इति निश्चित्य भारत १७ सा वध्यमाना समरे पुत्रस्य तव वाहिनी लोड्यते रथिभिः श्रेष्ठैस्तत्र तत्रैव भारत १८ इति भीष्मपर्वणि संजय उवाच अथ वीरो महेष्वासो मत्तवारणविक्रमः समादाय महच्चापं मत्तवारणवारणं १
विधुन्वानो नरश्रेष्ठो द्रावयाणो वरूथिनीं पृतनां पाण्डवेयानां गाहमानो महाबलः २ निमित्तानि निमित्तज्ञः सर्वतो वीक्ष्य वीर्यवान्
प्रतपन्तमनीकानि द्रोणः पुत्रमभाषत ३ अयं हि दिवसस्तात यत्र पार्थो महाबलः जिघांसुः समरे भीष्मं परं यत्नं करिष्यति ४
उत्पतन्ति हि मे बाणा धनुः प्रस्फुरतीव च योगमस्त्राणि नेच्छन्ति क्रूरं मे वर्तते मतिः ५ दिक्ष्वशान्तानि घोराणि व्याहरन्ति मृगद्विजाः
नीचैर्गृध्रा निलीयन्ते भारतानां चमूं प्रति ६ नष्टप्रभ इवादित्यः सर्वतो लोहिता दिशः रसते व्यथते भूमिः कम्पतीव च सर्वशः
७ कङ्काः गृध्रा बलाकाश्च व्याहरन्ति मुहुर्मुहुः शिवाश्चैवाशिवा घोरा वेदयन्त्यो महद्भयम् ८ पपात महती चोल्का मध्येनादित्यमण्डलात् सकबन्धश्च परिघो भानुमावृत्य तिष्ठति ९ परिवेषस्तथा घोरश्चन्द्रभास्करयोरभूत् वेदयानो भयं घोरं राज्ञां देहावकर्तनं १० देवतायतनस्थाश्च कौरवेन्द्रस्य देवताः कम्पन्ते च हसन्ते च नृत्यन्ति च रुदन्ति च ११ अपसव्यं ग्रहाश्चक्रुरलक्षणं दिवाकरं अवाक्शिराश्च भगवानुपातिष्ठत चन्द्रमाः १२ वपूंषि च नरेन्द्राणां विगतानीव लक्षये धार्तराष्ट्रस्य सैन्येषु न च भ्राजन्ति दंशिताः १३ सेनयोरुभयोश्चापि समन्ताच्छ्रूयते महान् पाञ्चजन्यस्य निर्घोषो गाण्डीवस्य च निःस्वनः १४ ध्रुवमास्थाय बीभत्सुरुत्तमास्त्राणि संयुगे अपास्यान्यान् रणे योधानभ्येष्यति पितामहं १५ हृष्यन्ति रोमकूपाणि सीदतीव च मे मनः चिन्तयित्वा

महाबाहो भीष्मार्जुनसमागमं १६ तं चेद्धनिकृतप्रज्ञं पांचाल्यः पापचेतसं पुरस्कृत्य रणे पार्थो भीष्मस्यायोधनं गतः १७
अब्रवीच्च पुरा भीष्मो नाहं हन्यां शिखंडिनं स्त्री ह्येषा विहिता धात्रा दैवाच्च स पुनः पुमान् १८ अमंगल्यध्वजश्चैव याज्ञसेनि
महाबलः न चामंगलिके तस्मिन्प्रहरेयं आपगासुतः १९ एतद्धि चिंतयानस्य प्रज्ञा सीदति मे भृशं अभ्युद्यतो रणे क्रुद्धः कुरुवृ
द्धस्तु पाण्डवान् २० युधिष्ठिरस्य च क्रोधो भीष्मस्यार्जुनसंगतः मम चात्र समारंभः प्रजानामशिवं ध्रुवं २१ मनस्वी बलवाञ्छूरः कृ
तास्त्रो लघुविक्रमः हरत्यतीव दृढेषुश्च निमित्तज्ञश्च पाण्डवः २२ अजेयः समरे चापि देवैरपि सवासवैः बलवान्बुद्धिमांश्चैव
जितक्लेशो युधांवरः २३ विजयी च रणे नित्यं भैरवास्त्रश्च पाण्डवः तस्य मार्गं परिहरन्द्रुतं गच्छ यतव्रत २४ पश्यैतत्त्वं महाघो
रं संयुगे वैशसं महत् हेमचित्राणि शूराणां महान्ति च शुभानि च २५ कवचान्यवदीर्यन्ते शरैः सन्नतपर्वभिः छिद्यन्ते च ध्व
जाग्राणि तोमराणश्च धनूंषि च २६ प्रासाश्च विमलास्तीक्ष्णाः शक्त्यश्च कनकोज्ज्वलाः वैजयन्त्यश्च नागानां संक्रुद्धेन किरीटि
ना २७ नायं संरक्षितुं कालः प्राणान्पुत्रोपजीविभिः याहि स्वर्गं पुरस्कृत्य यशसे विजयाय च २८ रथनागहयावर्तां महा
घोरां सुदुर्गमां रथेन संग्रामनदीं तरत्येष कपिध्वजः २९ ब्रह्मण्यता दमो दानं तपश्च चरितं महत् इहैव दृश्यते [illegible] भ्राता
यस्य धनंजयः ३० भीमसेनश्च बलवान्माद्रीपुत्रौ च पाण्डवौ वासुदेवश्च वार्ष्णेयो यस्य नाथो व्यवस्थितः ३१ तस्यैष
मन्युप्रभवो धार्तराष्ट्रस्य दुर्मतेः तपोदग्धशरीरस्य कोपो दहति भारतीं ३२ एष संदृश्यते पार्थो वासुदेवव्यपाश्रयः दारय

पार्थे

स्सर्वसैन्यानिधार्तराष्ट्राणिसर्वशः ३३ एतद्दृष्ट्वाकृतेसैन्यंक्षोभ्यमाणंकिरीटिना महोर्मिनद्धंसुमहत्तिमिनेवसमाकुलं
३४ हाहाकिलकिलाशब्दाः श्रूयन्तेचचमूमुखे याहिपाञ्चालदायादमहेष्वासेयुधिष्ठिरे ३५ दुर्गमेतत्तरंराज्ञोव्यूहस्यामि
तौजसः समुद्रकुक्षिप्रतिमंसर्वतोतिरथैः स्थितैः ३६ सात्यकिश्चाभिमन्युश्चधृष्टकेतुर्महावृकोदरो पर्यरक्षन्तराजानं
यमौचमनुजेश्वरं ३७ उपेन्द्रसदृशःश्यामोमहाशालइवोद्गतः एवंगच्छत्वनीकाग्रेद्वितीयइवफाल्गुनः ३८ उत्तमास्त्रा
णिचाधत्स्वगृहीत्वाचमहद्धनुः पार्षतंयाहिराजानंयुष्मस्चवृकोदरं ३९ कोहिनेच्छतियंपुत्रंजीवितंशाश्वतीः समाः
क्षत्रधर्मंतुसंप्रेक्ष्यततस्त्वांनियुनज्म्यहं ४० एवंचातिरथोभीष्माद्दह्यतेवैमहाचमूं युद्धेषुसदृशस्तातयमस्यवरुणस्य
च ४१ इतिभीष्मपर्वणि संजयउवाच भगदत्तः कृपः शल्यः कृतवर्मातथैव च विन्दानुविन्दावावंत्यौसैंधवश्चजयद्रथः
१ चित्रसेनोविकर्णश्चतथादुर्मर्षणादयः दशैतेतावकायोधाभीमसेनमयोधयन् २ महत्यासेनयायुक्तानानादेशस
मुत्थया भीष्मस्यसमरेराजन्प्रार्थयानामहद्यशः ३ शल्यस्तुनवभिर्बाणैर्भीमसेनमताडयत् कृतवर्मात्रिभिर्बाणैर्भी
मसेनमताडयत् ४ कृतवर्मात्रिभिर्बाणैः कृपश्चनवभिः शरैः चित्रसेनोविकर्णश्चभगदत्तश्चमारिष ५ दशभिर्दशभिर्बा
णैर्भीमसेनमताडयत् सैंधवश्चत्रिभिर्बाणैर्भीमसेनमताडयत् ६ विन्दानुविन्दावावंत्यौपंचभिः पंचभिःशरैः दुर्मर्षणस्तुविं
शत्यापाण्डवंनिशितैः शरैः ७ सतान्सर्वान्महाराजराजमानान्पृथक्पृथक् प्रवीरान्सर्वलोकस्यधार्तराष्ट्रान्महारथान् ८
जघानसमरेवीरः पाण्डवः परवीरहा ॥ ॥

ना२

च १

हा सप्तभिः शल्यमाविध्यत्कृतवर्माणमष्टभिः ९ कृपस्य सशरं चापं मध्ये चिच्छेद भारत अथैनं छिन्नधन्वानं पुनर्विव्याध सप्तभिः ११
विकर्णं दशभिर्बाणैः पंचभिश्च जयद्रथं विद्धाभीमानदहृष्टः सैंधवं पुनरंतरात्रिभिः १२ अथान्यद्धनुरादाय गौतमो रथिनां वरः भीमं विव्याध संरब्धो
दशभिर्निशितैः शरैः १३ सविद्धो दशभिर्बाणैस्तोत्रैरिव महाद्विपः ततः क्रुद्धो महाराज भीमसेनः प्रतापवान् १४ गौतमं ताडयामास शरै
र्बहुभिराहवे सैंधवस्य तथाश्वांश्च सारथिं च त्रिभिः शरैः १५ प्राहिणोन्मृत्युलोकाय कालांतकसमद्युतिः हताश्वात्तु रथात्तूर्णमवप्लु
त्य महारथः १६ शरांश्चिक्षेप निशितान्भीमसेनस्य संयुगे तस्य भीमो धनुर्मध्ये द्वाभ्यां चिच्छेद मारिष १७ भल्लाभ्यां भरतश्रेष्ठ सैंधव
स्य महात्मनः सच्छिन्नधन्वा विरथो हताश्वो हतसारथिः १८ चित्रसेनरथं राजन्नारुरोह त्वरान्वितः अत्यद्भुतं रणे कर्म कृतवां
स्तत्र पाण्डवः १९ महारथाञ्छरैर्विद्ध्वा वारयित्वा च मारिष विरथं सैंधवं चक्रे सर्वलोकस्य पश्यतः २० तदा न ममृषे शल्यो भीम
सेनस्य विक्रमं स संधाय शरांस्तीक्ष्णान्कर्मारपरिमार्ज्जितान् २१ भीमं विव्याध समरे तिष्ठ तिष्ठेति चाब्रवीत् कृपश्च कृतवर्मा च
भगदत्तश्च वीर्यवान् २२ विंदानुविंदावावंत्यौ चित्रसेनश्च संयुगे दुर्मर्षणो विकर्णश्च सिंधुराजश्च वीर्यवान् २३ भीमं ते विव्य
धुस्तूर्णं शल्यहेतोररिंदमाः स च तान्प्रतिविव्याध पंचभिः पंचभिः शरैः २४ शल्यं विव्याध सप्तत्या पुनश्च दशभिः शरैः तं शल्यो नवभि
र्भित्वा पुनर्विव्याध पंचभिः २५ सारथिं चास्य भल्लेन गाढं विव्याध मर्मणि विशोकं प्रेक्ष्य निर्भिन्नं भीमसेनः प्रतापवान् २६ मद्रा

भी ४

मि०
३००

जंत्रिभिर्वीरोर्वीद्धोरुरसि चार्पयत तं यतमानं महेष्वासास्त्रिभिस्त्रिभिरजिह्मगैः २७ ताडयामासुः समरे सिंहवद्विननादच ते हि यत्ता महेष्वासाः पांडवं युद्धकोविदं २८ त्रिभिस्त्रिभिरकुंठाग्रैर्भृशं मर्मस्वताडयन् सोतिविद्धो महेष्वासो भीमसेनो न विव्यथे २९ पर्वतो वारिधाराभिर्वर्षमाणैरिवांबुदैः स तु क्रोधसमाविष्टः पांडवानां महारथः ३० महेष्वासं त्रिभिर्वाणैर्भृशं विव्याध महायशाः प्राग्ज्योतिषं शतैराजौ राजन् विव्याध सायकैः ३१ ततस्तु सशरं चापं सात्वतस्य महात्मनः क्षुरप्रेण सुतीक्ष्णेन चिछेद कृतहस्तवत् ३२ तथान्यद्धनुरादाय कृतवर्मा वृकोदरं आजघान भ्रुवोर्मध्ये नाराचेन परंतपः ३३ भीमस्तु समरे विद्ध्वा शल्यं नवभिरायसैः भगदत्तं त्रिभिश्चैव कृतवर्माणमष्टभिः ३४ द्वाभ्यां द्वाभ्यां तु विव्याध गौतमप्रभृतीन् रथान् तेपि तं समरे राजन् विव्यधुर्निशितैः शरैः ३५ स तथा पीड्यमानोपि सर्वशस्त्रैर्महारथैः मत्वा तृणेन तांस्तुल्यान् विचचार गतव्यथः ३६ ते चापि रथिनां श्रेष्ठा भीमाय निशितान् शरान् प्रेषयामासुरव्यग्राः शतशोथ सहस्रशः ३७ तस्य शक्तिं महावेगां भगदत्तो महासुरः चिक्षेप समरे वीरः स्वर्णदंडां महामते ३८ तोमरं सैंधवो राजा पट्टिशं च महाभुजः शतघ्नीं च कृपो राजन् शरं शल्यश्च संयुगे ३९ अथेतरे महेष्वासाः पंच पंच शिलीमुखान् भीमसेनं समुद्दिश्य प्रेषयामासुरोजसा ४० तोमरं च द्विधा चक्रे क्षुरप्रेणानिलात्मजः पट्टिशं च त्रिभिर्वाणैश्चिछेद तिलकांडवत् ४१ स बिभेद शतघ्नीं च नवभिः कंकपत्रिभिः मद्रराजप्रयुक्तं च शरं छित्वा महारथः ४२ शक्तिं चिछेद

म मद्रेश्वरं ३

राम०
३००

भि

सहसा भगदत्तेरितां रणे तथेतरां छादयन्घोरां छौः सन्नतपर्वभिः ४३ भीमसेनो रणश्लाघी त्रिधैकैकं समाछिनत तांश्च
सर्वान्महेष्वासांस्त्रिभिस्त्रिभिरताडयत ततो धनंजयस्तत्र वर्तमाने महारणे आजगाम रथेनाजौ भीमं दृष्ट्वा महारथं
४४ निघ्नंतं समरे शत्रून्योधयानं च सायकैः तौ तु तत्र महात्मानौ समेतौ वीक्ष्य पांडवौ ४५ नाशशंसुर्जयं तत्र तावकाः
पुरुषर्षभाः अथार्जुनो रणे भीमं योधयंतं महारथान ४६ भीष्मस्य निधनाकांक्षी पुरस्कृत्य शिखंडिनं आस
सादरणे वीरांस्तावकान्दश भारत ४७ ये स्म भीमं रणे राजन्योधयंतो व्यवस्थिताः बीभत्सुस्तानथाविध्यद्भीमस्य
प्रियकाम्यया ४८ ततो दुर्योधनो राजा सुशर्माणमचोदयत अर्जुनस्य वधार्थाय भीमसेनस्य चाभयोः ४९
सुशर्मन्गच्छ शीघ्रं त्वं बलौघैः परिवारितः जहि पांडुसुतावेतौ धनंजयवृकोदरौ ५० तच्छ्रुत्वा वचनं तस्य त्रैगर्त्तः
प्रस्थलाधिपः अभिद्रुत्य रणे भीममर्जुनं चैव धन्विनौ ५१ रथैरनेकसाहस्रैः समंतात्पर्यवारयत ततः प्रववृते
युद्धमर्जुनस्य परैः सह ५२ इति महाभारते भीष्मपर्वणि संजय उवाच अर्जुनस्तु रणे शल्यं यतमानं महारथं
छादयामास समरे शरैः सन्नतपर्वभिः १ सुशर्माणं कृपं चैव त्रिभिस्त्रिभिरविध्यत प्राग्ज्योतिषं च समरे सैंध
वं च जयद्रथं २ चित्रसेनं विकर्णं च कृतवर्माणमेव च दुर्मर्षणं च राजेंद्र आवंत्यौ च महारथौ ३ एकैकं त्रि
भिरानर्छत्कंकबर्हिणवाजितैः शरैरतिरथो युद्धे पीडयान्वाहिनीं तव ४ जयद्रथो रणे पार्थं विध्वा भरत सायकैः

भीमंविव्याधतरसाचित्रसेनरथेस्थितः ५ शल्यश्चसमरेजिष्णुंकृपश्चरथिनांवरः विव्याधतेमहाराजबहुधाममर्म
भेदिभिः ६ चित्रसेनादयश्चैवपुत्रास्तवविशांपते पंचभिःपंचभिस्तूर्णंसंयुगेनिशितैःशरैः ७ आजघ्नुरर्जुनंसंख्येभी
मसेनंचमारिष तौतत्ररथिनांश्रेष्ठौकौंतेयौभरतर्षभौ ८ अपीडयेतांसमरेत्रिगर्त्तानांमहद्बलं सुशर्मापिरणेपा
र्थंशरैर्नवभिराशुगैः ९ ननादबलवान्नादंत्रासयानोमहद्बलं अन्येचरथिनःशूराभीमसेनधनंजयौ १० विव्य
धुर्निशितैर्बाणैरुक्मपुंखैरजिह्मगैः तेषांचरथिनांमध्येकौंतेयौभरतर्षभौ ११ क्रीडमानौरथोदारौचित्ररूपौव्य
दृश्यतां आमिषेप्सूगवांमध्येसिंहाविवमदोत्कटौ १२ छित्वाधनूंषिशूराणांशरांश्चबहुधारणे पातयामासतुर्वी
रौशिरांसिशतशोभृशं १३ रथाश्चबहवोभग्नाहयाश्चशतशोहताः गजाश्चसगजारोहाःपेतुरुर्व्यांमहाहवे १४
रथिनःसादिनश्चापितत्रतत्रनिसूदिताः दृश्यंतेबहवोराजन्वेपमानाःसमंततः १५ हतैर्गजपदात्योघैर्वाजिभि
श्चनिसूदितैः रथैश्चबहुधाभग्नैःसमास्तीर्यतमेदिनी १६ छत्रैश्चबहुधाछिन्नैर्ध्वजैश्चविनिपातितैः अंकुशै
रपविद्धैश्चपरिस्तोमैश्चभारत १७ केयूरैरंगदैर्हारैरांकवैर्मृदितैस्तथा उष्णीषैश्चर्ष्टिभिश्चैवचामरव्यजनैरपि १८
तत्रतत्रापविद्धैश्चबाहुभिश्चंदनोक्षितैः ऊरुभिश्चनरेंद्राणांसमास्तीर्यतमेदिनी १९ तत्राद्भुतमपश्यामरणेपा
र्थस्यविक्रमं शरैःसंवार्यतान्वीरान्जघानमहाबलः २० पुत्रस्तुतवतंदृष्ट्वाभीमार्जुनपराक्रमं गांगेयस्यर

पार्थ्या समुपजग्मे महाबलः २१ कृपश्च कृतवर्मा च सैंधवश्च जयद्रथः विंदानुविंदावावंत्यौ राजा हि संयुगं तदा २२ ततो भी
मो महेष्वासः फाल्गुनश्च महारथः कौरवाणां चमूं घोरां भृशं द्रुद्रुवतू रणे २३ ततो बर्हिणवाजीनामयुतान्यर्बुदानि च धनंजयर
थं तूर्णं पातयंति स्म भूमिपाः २४ ततस्तान्शरजालेन संनिवार्य महारथान् पार्थः समंतात्समरे प्रेषयामास मृत्यवे २५ श
ल्यस्तु समरे जिष्णुं क्रीडन्निव महारथः आजघानोरसि क्रुद्धो भल्लैः सन्नतपर्वभिः २६ तस्य पार्थो धनुश्छित्त्वा हस्तावापं
च पंचभिः अथ पत्रैः सायकैस्तीक्ष्णैर्भृशं विव्याध मर्मणि २७ अथान्यद्धनुरादाय समरे भारसाधनं मद्रेश्वरो रणे जिष्णुं ता
डयामास रोषितः २८ त्रिभिः शरैर्महाराज वासुदेवं च पंचभिः भीमसेनं च नवभिर्बाह्वोरुरसि चार्पयत् २९ ततो द्रोणो म
हाराज मागधश्च महारथः दुर्योधनसमादिष्टौ तं देशमुपजग्मतुः ३० यत्र पार्थो महाराज भीमसेनश्च पांडवः कौरव्यस्य महासेनां जघ्
नतुः सुमहारथौ ३१ जयत्सेनस्तु समरे भीमं भीमायुधं युधि विव्याध निशितैर्बाणैरष्टाभिर्भरतर्षभ ३२ तं भीमो दशभिर्विध्वा पुनर्विव्याध
पंचभिः सारथिं चास्य भल्लेन रथनीडादपातयत् ३३ उद्भ्रांतैस्तुरगैः सोऽपद्रवमाणः समंततः मागधापक्रमो राजा सर्वसैन्यस्य प
श्यतः ३४ द्रोणश्च विवरं दृष्ट्वा भीमसेनं शिलीमुखैः विव्याध बाणैर्निशितैः पंचषष्टिभिरायसैः ३५ तं भीमः समरश्लाघी गु
रुं पितृसमं रणे विव्याध पंचभिर्भल्लैस्तथा षष्ट्या च भारत ३६ अर्जुनस्तु सुशर्माणं विध्वा बहुभिरायसैः व्यधमत्तस्य तत्सैन्यं महा
भ्राणि यथानिलः ३७ ततो भीष्मश्च राजा च कौशल्यश्च बृहद्बलः समवर्तंत संक्रुद्धा भीमसेनधनंजयौ ३८ तथैव पां

तथैव हस्तावापन

उवाःसराजेंद्रधृष्टद्युम्नश्चपार्षतः अभिद्रवत्तगांगेयंभीष्मंयादितानुमिवांतकं ३९ शिखंडीतुसमासाद्यभारतानांपितामहं अभि
द्रवतसंहृष्टोभयंत्यक्त्वामहारथात ४० युधिष्ठिरमुखाःपार्थाःपुरस्कृत्यशिखंडिनं अयोधयंत्रणेभीष्मंसहिताःसर्वसृंज
यैः ४१ तथैवतावकाःसर्वेपुरस्कृत्ययतव्रतम शिखंडिप्रमुखान्पार्थान्योधयंतिस्मसंयुगे ४२ ततःप्रववृतेयुद्धंकौरवा
णांभयावहं तत्रपांडुसुतैःसार्द्धंभीष्मस्यविजयंप्रति ४३ तावकानांजयेभीष्मोग्लहआसीद्विशांपते तत्रहिद्यूतमासी
त्कविजयायेतरायवा ४३ धृष्टद्युम्नस्तुराजेंद्रसर्वसैन्यान्यचोदयत अभिद्रवतगांगेयंमाभैष्टरथसत्तमाः ४४ से
नापतिवचःश्रुत्वापांडवानांवरूथिनी भीष्मंसमभ्ययात्तूर्णंप्राणांस्त्यक्त्वामहाहवे ४५ भीष्मोपिरथिनांश्रेष्ठः
प्रतिजग्राहतांचमूं आपतंतींमहाराजवेलामिवमहोदधिः ४६ इतिश्रीमहाभारतेभीष्मपर्वणि धृतराष्ट्रउवाच क
थंशांतनवोभीष्मोदशमेहनिसंजय अयुध्यतमहावीर्यैःपांडवैःसहसृंजयैः १ कुरवश्चकथंयुद्धेपांडवान्प्रत्यवारयन
आचक्ष्वमेमहायुद्धंभीष्मस्याहवशोभिनः २ संजयउवाच कुरवःपांडवैःसार्द्धंयथायुध्यंतभारत यथाचतदभूद्युद्धंतत्तु
वक्ष्यामिसांप्रतं ३ गमिताःपरलोकायपरमास्त्रैःकिरीटिनः अहन्यहनिसंक्रुद्धास्तावकानांमहारथाः ४ यथा
प्रतिज्ञंकौरव्यःसचापिसमितिंजयः पार्थानामकरोद्भीष्मःसततंसमितिक्षयं ५ कुरुभिःसहितंभीष्मंयुध्यमानंपरंतप
अर्जुनंचसपांचाल्यंसंशयोविजयेभवत ६ दशमेहनितस्मिंस्तुभीष्मार्जुनसमागमे अवर्त्तत ॥ ॥ ॥

कुल्लानि २

महारौद्रः सततं समितिक्षयः ७ तस्मिन्नयुतशो राजन्नक्षयशस्त्रपरंतपः भीष्मः शांतनवो योधान्ह्याघानपरमास्त्रवि
त् ८ येषामज्ञातकल्पानि नामगोत्राणि पार्थिव ते हतास्तत्र भीष्मेण शूराः सर्वे निवर्त्तिनः ९ दशाहानि ततस्त
प्त्वा भीष्मः पांडववाहिनीं निरविद्यत धर्मात्मा जीवितेन परंतप १० स क्षिप्रं वधमन्विच्छन्नात्मनोभिमुखो रणे
न हन्यां मानवश्रेष्ठान्संग्रामे सुबहूनिति ११ चिंतयित्वा महाबाहुः पिता देवव्रतस्तव अभ्यासस्थं महाराज
पांडवं वाक्यमब्रवीत् १२ युधिष्ठिर महाप्राज्ञ सर्वशास्त्रविशारद शृणुष्व वचनं तात ध[illegible]
र्म्यं स्वर्ग्यं च जल्पतः १३ निर्विण्णोस्मि भृशं तात देहेनानेन भारत घ्नतश्च मे गतः कालः सुबहून्प्राणिनो रणे
१४ तस्मात्पार्थं पुरोधाय पांचालान्सृंजयांस्तथा मद्वधे क्रियतां यत्नो मम चेदिच्छसि प्रियं १५ तस्य तन्मतमाज्ञा
य पांडवः सत्यदर्शनः भीष्मं प्रतिययौ राजा संग्रामे सृंजयैः सह १६ धृष्टद्युम्नस्ततो राजन्पांडवश्च युधिष्ठिरः
श्रुत्वा भीष्मस्य तां वाचं चोदयामासतुर्बलं १७ अभिद्रवध्वं युध्यध्वं भीष्मं जयत संयुगे रक्षिताः सत्यसंधेन जि
ष्णुना रिपुजिष्णुना १८ अयं चापि महेष्वासः पार्षतो वाहिनीपतिः भीमसेनश्च समरे पालयिष्यति वो ध्रुवं १९
न वो भीष्माद्भयं किंचिदस्त्यद्य युधि सृंजयाः ध्रुवं भीष्मं विजेष्यामः पुरस्कृत्य शिखंडिनं २० ते तथा समयं कृत्वा द
शमेहनि पांडवाः ब्रह्मलोकपरा भूत्वा संजग्मुः क्रोधमूर्छिताः २१ शिखंडिनं पुरस्कृत्य पांडवं च धनंजयं भीष्म

सपातनेयत्तेपरमंतेसमास्थिताः २१ ततस्तवसुतादिष्टानानाजनपदेश्वराः द्रोणेनसहपुत्रेणसहसेनोमहा
बलः २३ दुःशासनस्त्वबलवान्सहसर्वैःसहोदरैः भीष्मंसमरमध्यस्थंपालयांचक्रिरेतदा २४ ततस्तेतावकाः
शूराः पुरस्कृत्यमहाव्रतं शिखंडिप्रमुखान्पार्थान्योधयंतिस्मसंयुगे २५ चेदिभिस्तुसपांचालैःसहितोवानरध्वजः य
योशांतनवंभीष्मंपुरस्कृत्यशिखंडिनं २६ द्रोणपुत्रंशिनेर्नप्ताधृष्टकेतुस्तुकौरवं अभिमन्युःसहामात्योदुर्य्योधनम
योधयत् २७ विराटस्तुमहानीकःसहसेनोजयद्रथं वार्द्धक्षत्रिंततःकदायादमाससादपरंतप २८ मद्रराजंमहेष्वा
संसहसैन्यंयुधिष्ठिरः भीमसेनोभिगुप्तस्तुनागानीकमुपाद्रवत् २९ अप्रधृष्यमनावीर्य्यंसर्वशस्त्रभृतांवरं
द्रोणिंप्रतिययौमत्तःपांचाल्यःसहसोदरैः ३० कर्णिकारध्वजंचैवसिंहकेतुररिंदमः प्रत्युज्जगामसौभद्रंराज
पुत्रोबृहद्बलः ३१ शिखंडिनंपुरस्तात्तुपांडवंचधनंजयं राजभिःसमरेपार्थमभिपेतुर्जिघांसवः ३२ त
स्मिन्नतिमहाभीमसेनयोर्वैपराक्रमे संप्रधावत्स्वनीकेषुमेदिनीसमकंपत ३३ तान्यनीकान्यनीकेषुसमस
ज्जंतभारत तावकानांपरेषांचदृष्ट्वाशांतनवंरणे ३४ ततस्तेषांप्रयततामन्योन्यमभिधावतां प्रादुरासीन्महाश
ब्दोदिक्षुसर्वासुभारत ३५ शंखदुंदुभिघोषैश्चवारणानांचबृंहितैः सिंहनादैश्चसैन्यानांदारुणःसमपद्यत ३६
साचसर्वनरेंद्राणांचंद्रार्कसदृशीप्रभा वीरांगदकिरीटेषुनिःप्रभासमपद्यत ३७ रजोमेघाःसमुत्तस्थुःशस्त्रविद्यु
न्दिराहताः धनुषांचापिनिर्घोषोदारुणःसमपद्यत ३८ वाणशंखप्रणादाश्चभेरीणांचमहास्वनाः रथघोषश्च

संजज्ञेसेनयोरुभयोरपि ३९ पाशशक्त्यृष्टिसंघैश्च वाणौघैश्च समाकुलं निःप्रकाशमिवाकाशं सेनयोः समपद्यत ॥
४० अन्योन्यं स्पर्धिनः पूर्वं विजिगीषूणां महाहवे कुंजराः कुंजरा राजन्पदाताश्च पदातयः ४१ तत्रासीत्सुमहद्युद्धं कुरूणां पां
डवैः सह भीष्महेतोर्नरव्याघ्र श्येनयोरामिषेयथा ४२ तयोः समागमो घोरो बभूव युधि संगतः अन्योन्यस्य वधार्थाय
जिगीषूणां महाहवे ४३ इति भीष्मपर्वणि संजय उवाच अभिमन्युर्महाराज तव पुत्रमयोधयत् महत्या सेनया युक्तो
भीष्महेतोः पराक्रमी १ दुर्योधनो रणे कार्ष्णिं नवभिर्नतपर्वभिः आजघानोरसि क्रुद्धः पुनश्चैनं त्रिभिः शरैः २ तस्य
शक्तिं रणे कार्ष्णिर्मृत्योर्घोरां स्वसामिव प्रेषयामास संक्रुद्धो दुर्योधनरथं प्रति ३ तामापतन्तीं सहसा घोररूपां विशांप
ते द्विधा चिच्छेद ते पुत्रः क्षुरप्रेण महारथः ४ तां शक्तिं पतितां दृष्ट्वा कार्ष्णिः परमकोपनः दुर्योधनं त्रिभिर्बाणैर्बाह्वो
रुरसि चार्पयत् ५ पुनश्चैनं शरैर्घोरैराजघान स्तनान्तरे दशभिर्भरतश्रेष्ठ भरतानां महारथः ६ तद्युद्धमभवद्घोरं चित्ररूपं
च भारत ईक्षितृप्रीतिजननं सर्वपार्थिवपूजितं ७ भीष्मस्य निधनार्थाय पार्थस्य विजयाय च युयुधाते रणे वीरौ सौभद्रकुरु
पुंगवौ ८ सात्यकिं रभसं युद्धे द्रौणिर्ब्राह्मणपुंगवः आजघानोरसि क्रुद्धो नाराचेन परंतपः ९ शैनेयोपि गुरोः पुत्रं सर्व
मर्मसु भारत अताडयदमेयात्मा नवभिः कंकवाजितैः १० अश्वत्थामा तु समरे सात्यकिं नवभिः शरैः त्रिंशता च पुनस्तूर्णं
बाह्वोरुरसि चार्पयत् ११ वहुधा दारपांचक्रे महेष्वासं महारथः तं पैवपौरवं युद्धे धृष्टकेतुर्महारथः १२ त्रिंशतानि

शितैर्बाणैर्विव्याधाशुमहाभुजः पौरवस्तु धनुश्छित्वा धृष्टकेतोर्महारथः १३ ननादबलवन्नादंविव्याधचशितैःश
रैः सोन्यत्कार्मुकमादायपौरवंनिशितैःशरैः १४ आजघानमहाराजत्रिसप्तत्याशिलीमुखैः तौतुतत्रमहेष्वासौम
हामात्रौमहारथौ १५ महताशरवर्षेणपरस्परमविध्यतां अन्योन्यस्यधनुश्छित्वाहयान्हत्वाचभारत १६ विर
थावसियुद्धायसमीयतुरमर्षणौ आर्षभेचर्मणीचित्रेशतचंद्रपरिष्कृते १७ तारकाशतचित्रेचनिस्त्रिं
शौसुमहाप्रभौ प्रगृह्यविमलौराजंस्तावन्योन्यमभिद्रुतौ १८ वासितासंगमेयत्तौसिंहाविवमहावने मण्डला
निविचित्राणिगतप्रत्यागतानिच १९ चेरतुर्दर्शयन्तौचप्रार्थयन्तौपरस्परं पौरवोधृष्टकेतुंतुशंखदेशेमहासिना
२० ताडयामाससंक्रुद्धस्तिष्ठतिष्ठेतिचाब्रवीत चेदिराजोपिसमरेपौरवंपुरुषर्षभं २१ आजघानशिताग्रेण
जत्रुदेशेमहासिना तावन्योन्यंमहाराजसमासाद्यमहाहवे २२ अन्योन्यवेगाभिहतौनिपेततुररिंदमौ ततःस्वर
थमारोप्यपौरवंतनयस्तव २३ जयत्सेनोरथेनाजावपोवाहरणाजिरात धृष्टकेतुंतुसमरेमाद्रीपुत्रःप्रतापवान
२४ अपोवाहरणेक्रुद्धः सहदेवःपराक्रमी चित्रसेनःसुशर्माणंविध्वाबहुभिरायसैः २५ पुनर्विव्याधतंषष्ट्या
पुनश्चनवभिः शरैःसुशर्मातुरणेक्रुद्धस्तवपुत्रंविशांपते २६ दशभिर्दशभिश्चैवविव्याधनिशितैःशरैः चित्रसे
नश्चतंराजंस्त्रिंशतानतपर्वभिः २७ आजघानरणेक्रुद्धःसचतंप्रत्यविध्यत भीष्मस्यसमरेराजन्यशोमानंच

वर्षयत २८ सौभद्रोराजपुत्रंतुबृहद्बलमयोधयत् पार्थहेतोःपराक्रांतोभीष्मस्यायोधनंप्रति २९ आर्जुनिंको
शलेंद्रस्तुविध्वापंचभिरायसैः पुनर्विव्याधविंशत्याशरैःसन्नतपर्वभिः ३० सौभद्रःकौशलेंद्रंतुविव्याधाष्टभिरायसैः ना
कंपयतसंग्रामेविव्याधचपुनःशरैः ३१ कौशल्यस्यधनुश्चापिपुनश्चिच्छेदफाल्गुनिः आजघ्नानशरैश्चापित्रिंशताकं
कपत्रिभिः ३२ सोन्यत्कार्मुकमादायराजपुत्रोबृहद्बलः फाल्गुनिंसमरेक्रुद्धोविव्याधबहुभिःशरैः ३३ तयोर्युद्धंस
मभवद्भीष्महेतोःपरंतप संरब्धयोर्महाराजसमरेचित्रयोधिनोः ३४ यथादेवासुरेयुद्धेबलिवासवयोरभूत् भी
मसेनोरथानीकंयोधयन्बहुशोभत ३५ यथाशक्रोवज्रपाणिर्दारयन्पर्वतोत्तमान् तेवध्यमानाभीमेनमातंगागि
रिसन्निभाः ३६ निपेतुरुर्व्यांसहितानादयंतोवसुंधरां गिरिमात्राहितेनागाभिन्नांजनचयोपमाः ३७ विरेजुर्वसुधां
प्राप्ताविकीर्णाइवपर्वताः युधिष्ठिरोमहेष्वासोमद्रराजानमाहवे ३८ महत्यासेनयागुप्तंपीडयामाससंगते मद्रे
श्वरश्चसमरेधर्मपुत्रंमहारथं ३९ पीडयामाससंरब्धोभीष्महेतोःपराक्रमी विराटंसैंधवोराजाविद्ध्वासन्नतपर्वभिः ४०
नवभिःसायकैस्तीक्ष्णैस्त्रिंशतापुनरार्पयत् विराटश्चमहाराजसैंधवंवाहिनीपतिः ४१ त्रिंशद्भिर्निशितैर्वाणैराज
घानस्तनांतरे चित्रकार्मुकनिस्त्रिंशौचित्रवर्मायुधध्वजौ ४२ रेजतुश्चित्ररूपौतौसंग्रामेमत्स्यसैंधवौ द्रोणःपंचा
लपुत्रेणसमागम्यमहारणे ४३ महासमुदयंचक्रेशरैःसन्नतपर्वभिः ततोद्रोणोमहाराजपार्षतस्यमहद्धनुः ४४
छित्वापंचाशतेषूणांपार्षतंसमविध्यत सोन्यत्कार्मुकमादायपार्षतःपरवीरहा ४५ द्रोणस्यमिषतोयुद्धेप्रेषया

मासमायकान् तांछरांछरघातेनचिछेदसमहायशः ४६ द्रोणोद्रुपदपुत्रायप्राहिणोत्सं चसायकान् ततःक्रुद्धोमहारा
जपार्षतःपरवीरहा ४७ द्रोणायाचिक्षेपगदांयमदंडोपमांरणे तामापतंतींसहसाहेमपट्टविभूषितां ४८ शरैःपंचाश
ताद्रोणोवारयामाससंयुगे साछिन्नाबहुधाराजन्द्रोणचापच्युतैःशरैः ४९ चूर्णीकृताविशीर्यंतीपपातवसुधातले
गदांविनिहतांदृष्ट्वापार्षतःशत्रुतापनः ५० द्रोणायशक्तिंचिक्षेपसर्वपारशवींशुभां तांद्रोणोनवभिर्बाणैश्चिछेदयुधि
भारत ५१ पार्षतंचमहेष्वासंपीडयामाससंयुगे एवमेतन्महायुद्धंद्रोणपार्षतयोरभूत् ५२ भीष्मंप्रतिमहाराजघोर
रूपंभयानकं अर्जुनःप्राप्यगांगेयंपीडयन्निशितैःशरैः ५३ अभ्यद्रवतसंमत्तोवनेमत्तमिवद्विपं प्रत्युद्ययौचतंरा
जाभगदत्तःप्रतापवान् ५४ त्रिधाभिन्नेननागेनमदांधेनमहाबलः तमापतंतंसहसामहेंद्रगजसन्निभं ५५ परंयत्नं
समास्थायबीभत्सुःप्रत्यपद्यत ततोगजगतोराजाभगदत्तःप्रतापवान् ५६ अर्जुनंशरवर्षेणवारयामाससंयुगे अ
र्जुनस्तुततोनागमायांतंरजतोपमैः ५७ विमलैरायसैस्तीक्ष्णैरविध्यतमहारणे शिखंडिनंचकौंतेययाहियाही
त्यचोदयत् ५८ भीष्मंप्रतिमहाराजजह्येनमितिचाब्रवीत् प्राग्ज्योतिषस्ततोहित्वापांडवंपांडुपूर्वज ५९ प्रययौ
त्वरितोराजन्द्रुपदस्यरथंप्रति ततोर्जुनोमहाराजभीष्ममभ्यद्रवद्द्रुतं ६० शिखंडिनंपुरस्कृत्यततोयुद्धमवर्तत ततस्ते
तावकाःशूराःपांडवंरभसंयुधि ६१ समभ्यधावन्क्रोशंतस्तदद्भुतमिवाभवत् नानाविधान्यनीकानिपुत्राणांतेजना
धिप ६२ अर्जुनोव्यधमत्कालेदिवीवाभ्राणिमारुतः शिखंडीतुसमासाद्यभरतानांपितामहं ६३ इषुभिस्तूर्णमव्य

ग्रोवहुभिःसममाचिनोत् रथाग्न्यगारश्चापार्चिरसिशक्तिगदेंधनः ६४ शरसंघमहाज्वलः क्षत्रियान्समरेदहत् यथाग्निः॥
सुमहानिद्धः कक्षेचरतिसानिलः ६५ तथाजज्वालभीष्मोपिदिव्यान्यस्त्राण्युदीरयन् सोमकांश्चरणेभीष्मोजघ्नेपार्थपदानुगान्
६६ न्यवारयतततस्तैन्यंपांडवस्यमहारथः सुवर्णपुंखैरिषुभिःशितैःसन्नतपर्वभिः ६७ नादयन्सदिशोभीष्मः प्रदिशश्चमहा
हवे पातयन्रथिनोराजन्हयांश्चसहसादिभिः ६८ मुंडतालवनानीवचकारसरथव्रजान् निर्मनुष्यान्रथान्राजन्गग
जान्वाजिनश्चसंयुगे ६९ चकारसमरेभीष्मः सर्वशस्त्रभृतांवरः तस्यज्यातलनिर्घोषंविस्फूर्ज्जितमिवाशनेः ७० निशम्य
सर्वतोराजन्समकंपंतसैनिकाः अमोघान्यपतन्बाणाः पितुस्तेमनुजेश्वर ७१ नासज्जंतशरीरेषुभीष्मचापच्युताःशराः निर्मनुष्या
न्रथान्राजन्सुयुक्ताञ्जवनैर्हयैः ७२ वातायमानानद्राक्षंह्रियमाणान्विशांपते चेदिकाशिकरूषाणांसहस्राणिचतुर्दश ७३
महारथाःसमाख्याताः कुलपुत्रास्तनुत्यजः अपरावर्त्तिनःशूराःसुवर्णविकृतध्वजाः ७४ संग्रामेभीष्ममासाद्यसवाजिरथकुं
जराः जग्मुस्तेपरलोकायव्यादितास्यमिवांतकं ७५ नतत्रासीद्रणेराजन्सोमकानांमहारथः यःसंप्राप्यरणेभीष्मंजीविते
स्ममनोदधे ७६ तांश्चसर्वान्रणेयोधान्प्रेतराजपुरंप्रति नीतानमन्यंतजनादृष्ट्वाभीष्मस्यविक्रमं ७७ नकश्चिदेनंसमरेप्रत्युद्या
तिमहारथः ऋतेपांडुसुतंवीरंश्वेताश्वंकृष्णसारथिं ७८ शिखंडिनंचसमरेपांचाल्यममितौजसं इतिभीष्मपर्वणि॥ ॥संज
यउवाच शिखंडीतुरणेभीष्ममासाद्यपुरुषर्षभं दशभिर्निशितैर्भल्लैराजघानस्तनांतरे १ शिखंडिनंतुगांगेयः क्रोधदीप्तेन

चक्षुषा संप्रेक्ष्य तं क्रोधान्निर्दहन्निव भारत २ स्मीत्वं तस्य समरे राजन्सर्वलोकस्य पश्यतः नाजघान रणे भीष्मः स च तेनावबु
द्धवान् ३ अर्जुनस्तु महाराज शिखंडिनमभाषत अभिद्रवस्व त्वरितं जहि चैनं पितामहं ४ किं ते विवक्षया वीर जहि भीष्मं पि
तामहं न ह्यन्यमनुपश्यामि कंचिद्यो धिष्ठिरे बले ५ यः शक्तः समरे भीष्मं प्रतियोद्धुमिहाहवे स ते तं पुरुषव्याघ्र सत्यमेतद् ब्रवी
मि ते ६ एवमुक्तस्तु पार्थेन शिखंडी भरतर्षभ शरैर्नानाविधैस्तूर्णं पितामहमवाकिरत ७ अचिंतयित्वा तान्बाणान्पिता देवव्र
तस्तव अर्जुनं समरे क्रुद्धं वारयामास सायकैः ८ तथैव च चमूं सर्वां पांडवानां महारथः अप्रैषीत्स शरैस्तीक्ष्णैः परलोका
य मारिष ९ तथैव पांडवा राजन्सैन्येन महता वृताः भीष्मं संछादयामासुर्मेघा इव दिवाकरं १० स समंतात्परिवृ
तो भारत भरतर्षभ निर्ददाह रणे शूरान्वनं वह्निरिव ज्वलन् ११ तत्राद्भुतमपश्याम तव पुत्रस्य पौरुषं अयोधयच्च
यत्पार्थं जुगोप च पितामहं १२ कर्मणा तेन समरे तव पुत्रस्य धन्विनः दुःशासनस्य तुतुषुः सर्वलोका महात्मनः १३
यदेकः समरे पार्थान्सार्जुनान्समयोधयत् न चैनं पांडवा युद्धे वारयामासुरुल्बणं १४ दुःशासनेन समरे रथिनो विर
थीकृताः सादिनश्च महेष्वासा हस्तिनश्च महाबलाः १५ विनिर्भिन्नाः शरैस्तीक्ष्णैर्निपेतुर्वसुधातले शरातुरास्तथैवा
न्ये दंतिनो विद्रुता दिशः १६ यथाग्निरिंधनं प्राप्य ज्वलेद्दीप्तार्चिरुल्बणः तथा जज्वाल पुत्रस्ते पांडुसेनां विनिर्दहन् १७
तं भारत महामात्रं पांडवानां महारथः जेतुं नोत्सहते कश्चिन्नाप्युद्यातुं कथंचन १८ ऋते महेंद्रतनयाच्छ्वेताश्वात्कृष्णसार

ये: सहितंसमरेराजन्निर्जितस्त्वविजयोर्ज्जुनः १९ भीष्ममेवाभिदुद्रावसर्वसैन्यस्यपश्यतः विजितस्तवपुत्रोपिभीष्म
बाहुव्यपाश्रयः २० पुनःपुनःसमाश्वस्यप्रायुध्यतमदोत्कटः अर्ज्जुनस्तुरणेराजन्योधयन्सर्वराजत २१ शिखंडी
तुरणेराजन्विव्याधैवपितामहं शरैरशनिसंस्पर्शैस्तथासर्पविषोपमैः २२ नचस्मतेरुजंचक्रुःपितुस्तवजनेश्वर
स्मयमानस्तुगांगेयस्तान्वाणान्जगृहेतदा २३ उष्मार्त्तोहिनरोयद्वज्जलधाराःप्रतीछतितथाजग्राहगांगेयः
शरधाराःशिखंडिनः २४ तंक्षत्रियामहाराजदहृशुर्घोरमाहवे भीष्मंदहंतंसैन्यानिपांडवानांमहात्मनां २५
ततोब्रवीत्तवसुतःसर्वसैन्यानिमारिष अभिद्रवतसंग्रामेफाल्गुनंसर्वतोरणे २६ भीष्मोवःसमरेसर्वान्पाल
यिष्यतिधर्मवित् तेभयंसुमहत्त्यक्त्वापांडवान्प्रतियुध्यत २७ हेमतालेनमहताभीष्मस्तिष्ठतिपालयन् सर्वेषांधा
र्त्तराष्ट्राणांसमरेशर्म्मवर्म्मच २८ त्रिदशापिसमुद्युक्तानालंभीष्मंसमासितुं किमुपार्थोमहात्मानंमर्त्यभूतामहाब
लाः २९ तस्माद्द्रवतहेयोधाःफाल्गुनंप्राप्यसंयुगे अहमद्यरणेयत्तोयोधयिष्यामिपांडवं ३० सहिताःसर्वतो
यत्तैर्भवद्भिर्वसुधाधिपैः तच्छ्रुत्वातुवचोराजंस्तवपुत्रस्यधन्विनः ३१ सर्वेयोधाःसुसंरब्धाबलवंतोमहाबलाः
तेविदेहाःकलिंगाश्चदासेरकगणाश्चह ३२ अभिपेतुर्न्निषादाश्चसौवीराश्चमहारणे वाह्लीकादरदाश्चैवप्रतीच्यो
दीच्यमालवाः ३३ अभिषाहाःशूरसेनाःशिवयोथवसातयः शाल्वाःशकास्त्रिगर्त्ताश्चअंबष्ठाः [illegible] कैकेये

मि०
३०७

३४

सह अभिपेतूरणे पार्थं पतंगाइवपावकं शल्यमाइवराजेंद्रपार्थमप्रतिमंरणे ३५ सतान्सर्वान्महानीकान्महाराजमहारथान् दि
व्यान्यस्त्राणिसंचिंत्यप्रसंधायधनंजयः ३६ सैतेरस्त्रैर्महावेगैर्ददाहासुमहावलः शरप्रतापैर्वीभत्सुःपतंगानिवपावकः ३७
तस्यबाणसहस्राणिसृजतोदृढधन्विनः दीप्यमानमिवाकाशेगांडिवंसमदृश्यत ३८ तेशरार्त्तामहाराजविप्रकीर्णम
हाध्वजाः नाभ्यवर्त्तंतराजानःसहितावानरध्वजं ३९ सध्वजारथिनःपेतुर्हयारोहाहयैः सह सगजाश्चगजारोहाःकिरीटि
शरताडिताः ४० ततोर्जुनभुजोत्सृष्टैराहृतासीद्वसुंधरा विद्रवद्भिश्चबलैराज्ञांसमंततः ४१ अथपार्थोमहारा
जद्रावयित्वावरूथिनीं दुःशासनायसुबहून्प्रेषयामाससायकान् ४२ तेतुभित्वातवसुतंदुःशासनमयोमुखाः धरणीं
विविशुःसर्वेवल्मीकमिवपन्नगाः ४३ हयांश्चास्याततोजघ्नेसारथिंचन्यपातयत् विविंशतिंचविंशत्याविरथंकृतवा
न्प्रभुः ४४ अजघानभृशंचैवपंचभिर्नतपर्वभिः रूपंविकर्णंशल्यंचविद्धावहुभिरायसैः ४५ चकारविरथांश्चैवकौंते
यःश्वेतवाहनः एवंतेविरथाःसर्वेकृपःशल्यश्चमारिष ४६ दुःशासनोविकर्णश्चतथैवचविविंशतिः संप्राद्रवंतसम
रेनिर्जिताःसव्यसाचिना ४७ पूर्वाह्णेभरतश्रेष्ठापराजित्यमहारथान् प्रजज्वालरणेपार्थोविधूमइवपावकः ४८ तथै
वशरवर्षेणभास्करोरश्मिवानिव अन्यानपिमहाराजतापयामासपार्थिवान् ४९ पराङ्मुखीकृत्यतथाशरवर्षैर्महारथा
न् प्रावर्त्तयत संग्रामेशोणितोदांमहानदीं ५० मध्येनकुरुसैन्यानांपांडवानांचभारत गजाश्वरथसंघाश्चबहुधारथि
भिर्हताः ५१ रथाश्चनिहितानागैर्हयाश्चैवपदातिभिः अंतराछिद्यमानानिशरीराणिशिरांसिच ५२ निपेतुर्दिक्षुसर्वा

राम०
३०७

सुगजाश्वरथयोधिनांछन्नमायोधनंराजन्कुंडलांगदधारिभिः ५३ पतितैःपात्यमानैश्चराजपुत्रैर्महारथैः रथनेमिनिकृत्तैश्च
गजैश्चैवावपोथितैः ५४ पादातास्त्वाप्यधावंतसाश्वाश्चहययोधिनः गजाश्चरथयोधाश्चपरिपेतुःसमंततः ५५ विकीर्णा
श्चरथाभूमौभग्नचक्रयुगध्वजाः तद्गजाश्वरथौघानांरुधिरेणसमुक्षितं ५६ छन्नमायोधनंरेजेरक्ताभ्रमिवशारदं श्वानः
काकाश्चगृध्राश्चवृकागोमायुभिःसह ५७ प्रणेदुर्भक्ष्यमासाद्यविकृताश्चमृगद्विजाः ववुर्बहुविधाश्चैवदिक्षुसर्वासुमा
रुताः ५८ दृश्यमानेषुरक्षःसुभूतेषुविनदत्सुच कांचनानिचदामानिपताकाश्चमहाधनाः धूयमानाव्यदृश्यंतसहसामा
रुतेरिताः श्वेतच्छत्रसहस्राणिसध्वजाश्चमहारथाः ६० विकीर्णाःसमदृश्यंतशतशोथसहस्रशः सपताकाश्चमातं
गादिशोजग्मुःशरातुराः ६१ क्षत्रियाश्चमनुष्येंद्रगदाशक्तिधनुर्द्धराः समंततस्त्वदृश्यंतपतिताधरणीतले ६२ ततो
भीष्मोमहाराजदिव्यमस्त्रमुदीरयन् अभ्यधावतकौंतेयंमिषतांसर्वधन्विनां ६३ तंशिखंडीरणेयांतमभ्यद्रवतदंशि
तः ततःसमाहरद्भीष्मस्तदस्त्रंपावकोपमं ६४ त्वरितंपांडवोराजन्मध्यमःश्वेतवाहनः निजघ्नेतावकंसैन्यंमोहयित्वा
पितामहं ६५ इतिभीष्मपर्व्वणि संजयउवाच समंव्यूढेष्वनीकेषुभूयिष्ठेष्वनिवर्त्तिनः ब्रह्मलोकपराःसर्वेसमपद्यंत
भारत १ नह्यनीकमनीकेनसमसज्जतसंकुले रथिनोरथिभिःसार्द्धंपादाताश्चपदातिभिः २ अश्वाश्चाश्वैरयुध्यंतगा
जाश्चगजयोधिभिः उन्मत्तवन्महाराजयुध्यंतेतत्रभारते ३ महान्व्यतिकरोरौद्रःसेनयोःसमपद्यत नरनागगणेष्वेवंव्य

वकीर्णेषुसर्व्वशः ४ ऽस्मिंस्तस्मिन्महारौद्रेनिर्विशेषमजायत ततः शल्यः कृपश्चैवचित्रसेनश्चभारत ५ दुःशासनोविकर्ण
श्चरथानास्थायभास्वरान् पांडवानांरणेशूराध्वजिनींसमकंपयन् ६ सावध्यमानासमरेपांडुसेनामहात्मभिः भ्राम्य
तेबहुधाराजन्मारुतेनेवनौर्जले ७ यथाहिशैशिरःकालोगवांमर्माणिकृंतति तथापांडुसुतानांवैभीष्मोमर्माणिकृंतति
८ अतीवतवसैन्यस्यपार्थेनचमहात्मना नवमेघप्रतीकाशाःपातिताबहुधागजाः ९ मृद्यमानाश्चदृश्यंतेपार्थेननन
रयूथपाः इषुभिस्ताड्यमानाश्चनाराचैश्चसहस्रशः १० पेतुरार्त्तस्वरंघोरंकृत्वातत्रमहागजाः आनद्धाभरणैःकायैर्नि
हतानांमहात्मनां ११ छन्नमायोधनंरेजेशिरोभिश्चसकुंडलैः तस्मिन्नेवमहाराजमहावीरवरक्षये १२ भीष्मेचयुधि
विक्रांतेपांडवेचधनंजये तेपराक्रांतमालोक्यराजन्युधिपितामहं १३ अभ्यवर्त्तंततेपुत्राःसर्वसैन्यपुरस्कृताः इच्छंतो
निधनंयुद्धेस्वर्गंकृत्वापरायणं १४ पांडवानभ्यवर्त्तंततस्मिन्वीरवरक्षये पांडवापिमहाराजस्मरंतोविविधान्बहून्
१५ क्लेशान्कृतान्सपुत्रेणत्वयापूर्वंनराधिप भयंत्यक्त्वारणेशूराब्रह्मलोकायतत्पराः १६ तावकांस्तवपुत्रांश्चयो
धयेतिप्रहृष्टवत्सेनापतिस्तुसमरेप्राहसेनांमहारथः १७ अभिद्रवतगांगेयंसोमकाःसृंजयैःसह सेनापतिवचः
श्रुत्वासोमकाःसृंजयाश्चते १८ अभ्यद्रवंतगांगेयंशस्त्रवृष्ट्यासमाहताः वध्यमानस्ततोराजन्पिताशांतनवस्तव १९
अमर्षवशमापन्नोयोधयामाससृंजयान् तस्यकीर्त्तिमतस्तातपुरारामेणधीमता २० संप्रदत्तास्त्रशिक्षावैपरानीक

विनाशनी मतां शिक्षांमधिष्ठाय कुर्वन्परबलक्षयं २१ अहन्यहनि पार्थानां वृद्धः कुरुपितामहः भीष्मो दश सहस्राणि ज
घान परवीरहा २२ तस्मिंस्तु दशमे प्राप्ते दिवसे भरतर्षभ भीष्मेणैकेन मत्स्येषु पांचालेषु च संयुगे २३ गजाश्वमयुतं ह
त्वा हताः सप्त महारथाः हत्वा पंच सहस्राणि रथानां प्रपितामहः २४ नराणां च महायुद्धे सहस्राणि चतुर्दश दंतिनां
च सहस्राणि हयानामयुतं पुनः २५ शिक्षाबलेन निहतं पित्रा तव विशांपते ततः सर्वमहीपानां क्षपयित्वा वरू
थिनी २६ विराटस्य प्रियो भ्राता शतानीको निपातितः शतानीकं च समरे हत्वा भीष्मः प्रतापवान २७ सहस्राणि
महाराज राज्ञो भल्लैरपातयत ये च के च न पार्थानामभियाता धनंजयं २८ राजानो भीष्ममासाद्य गतास्ते यमसा
दनं एवं दश दिशो भीष्मः शरजालैः समंततः २९ अतीत्य सेनां पार्थानामवतस्थे चमूमुखे स कृत्वा सुमहत्कर्म
तस्मिन्वै दशमेहनि ३० सेनयोरंतरे तिष्ठन प्रगृहीतशरासनः न चैनं पार्थिवाः केचिच्छक्ता निरीक्षितुं रणे ३१ म
ध्ये प्राप्तं यथा भीष्मं तपंतं भास्करं दिवि यथा दैत्यचमूं शक्रस्तापयामास संयुगे ३२ तथा भीष्मः पांडवेयांस्ता
पयामास भारत तथा चैनं पराक्रांतमालोक्य मधुसूदनः ३३ उवाच देवकीपुत्रः प्रीयमाणो धनंजयं एष शां
तनवो भीष्मः सैन्ययोरंतरे स्थितः ३४ संनिहत्य बलादेनं विजयस्ते भविष्यति बलात्संस्तंभयस्वैनं यत्रैषा भिद्यते च

न१

न्तः ३५ नहिभीष्मशरानन्यः सोढुमुत्सहतेविभो ततस्तस्मिन्क्षणेराजंश्चोदितोवानरध्वजः ३६ सध्वजंसरथंसाश्वंभी
ष्ममंतर्दधेशरैः सचापिकुरुमुख्यानामृषभःपांडवेरितान् ३७ शरव्रातैःशरव्रातान्बहुधाविदुधाववतान् ततःपां
चालराजश्चधृष्टकेतुश्चवीर्यवान् ३८ पांडवोभीमसेनश्चधृष्टद्युम्नश्चपार्षतः यमौचचेकितानश्चकेकयाः
पंचचैवह ३९ सात्यकिश्चमहाबाहुःसौभद्रोथघटोत्कचः सौभद्र्याःशिखंडीचकुंतिभोजश्चवीर्यवान् ४०
सुशर्माचविराटश्चपांडवेयाःमहाबलाः एतेचान्येचबहवःपीडिताभीष्मसायकैः ४१ समुद्धृताःफा
ल्गुनेननिमग्नाःशोकसागरे ततःशिखंडीवेगेनप्रगृह्यपरमायुधं ४२ भीष्ममेवाभिदुद्राववरक्ष्यमाणः
किरीटिना ततोस्यानुचरान्हत्वासर्वान्रणविभागवित् ४३ भीष्ममेवाभिदुद्राववीभत्सुरपराजितः सात्यकिश्चे
कितानश्चधृष्टद्युम्नश्चपार्षतः ४४ विराटोद्रुपदश्चैवमाद्रीपुत्रौचपांडवौ दुद्रुवुर्भीष्ममेवाजौरक्षितादृढधन्वि
ना ४५ अभिमन्युश्चसमरेद्रौपद्याःपंचचात्मजाः दुद्रुवुःसमरेभीष्मंसमुद्यतमहायुधाः ४६ तेसर्वेदृढधन्वानः
संयुगेष्वपलायिनः बहुधाभीष्ममानर्छुर्मार्गणैःक्षतमार्गणैः ४७ विधूयतान्बाणगणान्येमुक्ताःपार्थि
वोत्तमैः पांडवानामदीनात्माव्यगाहतवरूथिनी ४८ चक्रेशरविघातंचक्रीडन्निवपितामहः नाभिसंधत्त
पांचाल्येस्मयमानोमुहुर्मुहुः ४९ स्त्रीत्वंतस्यानुसंस्मृत्यभीष्मोबाणांशिखंडिने ॥ ॥ ॥

घ्नामद्रुपदानीकिरथान्सप्तमहारथः ५० ततः किलकिलाशब्दः क्षणेनसमभूत्तदा मत्स्यपांचालचेदीनांतमेकमभिधावतां ५१
तेनराश्वरथव्रातैर्मार्गणैश्चपरंतप तमेकंछादयामासुर्मेघाइवदिवाकरं ५२ भीष्मंभागीरथीपुत्रंप्रतपंतंरणेरिपून ततस्तस्य
चतैर्घोरयुद्धेदेवासुरोपमे ५३ किरीटीभीष्ममानर्छत्पुरस्कृत्यशिखंडिनं इतिभीष्मपर्वणि संजयउवाच एवंतेपांडवाःस
र्वेपुरस्कृत्यशिखंडिनं विव्यधुः समरेभीष्मंपरिवार्यसमंततः १ शतघ्नीभिः सुघोराभिः परिघैश्चपरश्वधैः मुद्गरैर्मुसलैःप्रासैः
क्षेपणीयैश्चसर्वशः २ शरैःकनकपुंखैश्चशक्तितोमरकंपनैः नाराचैर्वत्सदंतैश्चभुशुंडीभिश्चसर्वशः ३ अताडयन्रणे
भीष्मंसहिताः सर्वसृंजयाः सविशीर्णतनुत्राणः पीडितोबहुभिस्तदा ४ नविव्यथेतदाभीष्मोभिद्यमानेषुमर्मसु सदी
प्तशरचापाग्निरस्त्रप्रसृतमारुतः ५ नेमिनिर्ह्रादसंतापोमहास्त्रोदयपावकः चित्रचापमहाज्वालोवीरक्षयमहेंधनः
६ युगांताग्निसमप्रख्यः परेषांसमपद्यत विवृत्यरथसंघानामंतरेणविनिःसृतः ७ दृश्यतेस्मनरेंद्राणांपुनर्मध्यग
तश्चरन् ततःपंचालराजंचधृष्टकेतुमतीत्यच ८ पांडवानीकिनीमध्यमाससादविशांपते ततःसात्यकिंभीमंचपां
डवंचधनंजयं ९ द्रुपदंचविराटंचधृष्टद्युम्नंचपार्षतं भीमघोषैर्महावेगैर्मर्मावरणभेदिभिः १० षडेतान्निशितै
र्भीष्मः प्रविव्याधोत्तमैः शरैः तस्यतेनिशितान्बाणान्संनिवार्यमहारथाः ११ दशभिर्दशभिर्भीष्ममर्दयामासुरोज
सा शिखंडीतुमहाबाणान्यान्मुमोचमहारथः १२ तेभीष्मंविविशुस्तूर्णंस्वर्णपुंखाः शिलाशिताः ततः किरी

दीप्तं रक्षो भीष्ममेवाभ्यधावत् १३ शिखंडिनं पुरस्कृत्य धनुश्चास्य समाच्छिनत् भीष्मस्य धनुषश्छेदं नामृष्यंत महारथाः १४
द्रोणश्च कृतवर्मा च सैंधवश्च जयद्रथः भूरिश्रवाः शलः शल्यो भगदत्तस्तथैव च १५ सप्तैते परमक्रुद्धाः किरीटिनमभिद्रु
ताः तत्र शस्त्राणि दिव्यानि दर्शयंतो महारथाः १६ अभिपेतुर्भृशं क्रुद्धाश्छादयंतश्च पांडवं तेषामापततां शब्दः शुश्रु
वे फाल्गुनं प्रति १७ उद्धूतानां यथा शब्दः समुद्राणां युगक्षये हतानयत गृह्णीत विध्यध्वमवकृंतत १८ इत्यासीत्तु
मुलः शब्दः फाल्गुनस्य रथं प्रति तं शब्दं तुमुलं श्रुत्वा पांडवानां महारथाः १९ अभ्यधावन्परीप्संतः फाल्गुनं भरतर्ष
भ सात्यकिर्भीमसेनश्च धृष्टद्युम्नश्च पार्षतः २० विराटद्रुपदौ चोभौ राक्षसश्च घटोत्कचः अभिमन्युश्च संक्रुद्धः सप्तैते क्रो
धमूर्छिताः २१ समभ्यधावंस्त्वरिताश्चित्रकार्मुकधारिणः तेषां समभवद्युद्धं तुमुलं लोमहर्षणं २२ संग्रामे भरतश्रे
ष्ठ देवानां दानवैरिव शिखंडी तु रथश्रेष्ठो रक्ष्यमाणः किरीटिना २३ अविध्यद्दशभिर्भीष्मं छिन्नधन्वानमाहवे
सारथिं दशभिश्चास्य ध्वजं चैकेन चिच्छिदे २४ सोन्यत्कार्मुकमादाय गांगेयो वेगवत्तरं तदप्यस्य शितैर्बाणैस्त्रिभिश्चि
च्छेद फाल्गुनः २५ एवं स पांडवः क्रुद्ध आत्तमात्तं पुनः पुनः धनुश्चिच्छेद भीष्मस्य सव्यसाची परंतपः २६ स छिन्न
धन्वा संक्रुद्धः सृक्किणी परिसंलिहन् शक्तिं जग्राह तरसा गिरीणामपि दारणीं २७ तां च चिक्षेप संक्रुद्धः फाल्गुनस्य
रथं प्रति तामापतंतीं संप्रेक्ष्य ज्वलंतीमशनीमिव २८ समादत्त शितान्भल्लान्पंच पांडवनंदनः तस्य चिच्छेद तांश

किंपंचधापंचभिंशरैः २९ संक्रुद्धो भरतश्रेष्ठ भीष्मबाहुप्रवेरितां सापपातरथाछिन्ना संक्रुद्धेनकिरीटिना ३० मेघवृंदप
रिभ्रष्टाविछिन्नेवशतह्रदा छिन्नांतांशक्तिमालोक्यभीष्मः क्रोधसमन्वितः ३१ अचिंतयद्रणेवीरोबुद्ध्यापरपुरंजयः श
क्तोहंधनुषैकेननिहंतुंसर्वपांडवान् ३२ यद्येषांनभवेद्गोप्ताविष्वक्सेनोमहाबलः कारणमहद्वास्थायनाहंयोत्स्यामिपां
डवान् ३३ अवध्यत्वाच्चपांडूनांस्त्रीभावाच्चशिखंडिनः पित्रातुष्टेनमेपूर्वंयदाकालीमुदावहम् ३४ स्वछंदमरणंदत्तम
वध्यत्वंरणेतथा तस्मान्मृत्युमहंमन्येप्राप्तकालमिवात्मनः ३५ एवंज्ञात्वाव्यवसितंभीष्मस्यामिततेजसः ऋषयोवसवश्चै
ववियत्स्थाभीष्ममब्रुवन् ३६ यत्तेव्यवसितंताततदस्माकमपिप्रियं तत्कुरुष्वमहाराजयुद्धेमानुनिवर्त्तय ३७ अस्यवा
क्यस्यनिधनेप्रादुरासीच्छिवोनिलः अनुलोमः सुगंधीचपृषतैश्चसमन्वितः ३८ देवदुंदुभयश्चैवसंप्रणेदुर्महात्मनः पपा
तपुष्पवृष्टिश्चभीष्मस्योपरिमारिष ३९ नचतच्छुश्रुवेकश्चित्तेषांसंवदतांनृप ऋतेभीष्मंमहाबाहुंमांचापिमुनितेजसा
४० संभ्रमश्चमहानासीत्त्रिदशानांविशांपते पतिष्यतिरथाद्भीष्मेसर्वलोकप्रियेतदा ४१ इतिदेवगणानांचवाक्यं
श्रुत्वामहातपाः ततः शांतनवोभीष्मोबीभत्सुंनाभ्यवर्त्तत ४२ भिद्यमानः शितैर्बाणैः सर्वावरणभेदिभिः शिखंडी
तुमहाराजभरतानांपितामहं ४३ आजघानोरसिक्रुद्धोनवभिर्निशितैःशरैः सतेनाभिहतः संख्येभीष्मः कुरुपिता
महः ४४ नाकंपतमहाराजक्षितिकंपेयथाचलः ततः प्रहस्यबीभत्सुर्व्याक्षिपन्गांडिवंधनुः ४५ गांगेयंपंचविंशत्या

रुद्रकाणांसमर्प्पयत पुनःपुनः शरैरेनंत्वरमाणोधनंजयः ४६ सर्वगात्रेषुसंक्रुद्धः सर्वमर्मस्वताडयत एवमन्यैरपि
भृशंविध्यमानः सहस्रशः ४७ तानप्याशुशरैर्भीष्मः प्रविव्याधमहारथः तैश्चमुक्ताञ्छरान्भीष्मोयुधिसत्यपराक्रमः ४८
निवारयामासशरैः समंसन्नतपर्वभिः शिखंडीतुरणेबाणान्यान्मुमोचमहारथः ४९ नचक्रुस्तेरुजंतस्यरुक्मपुंखाः शिला
शिताः ततः किरीटीसंक्रुद्धोभीष्ममेवाभ्यवर्त्तत ५० शिखंडिनंपुरस्कृत्यधनुश्चास्यसमाच्छिनत सारथिंविशिखैश्चास्यद
शभिः समकंपयत ५१ सोन्यत्कार्मुकमादायगांगेयोबलवत्तरं पार्थस्तुनिशितैर्भल्लैस्त्रिधात्रिभिरघातयत ५२ निमेषार्द्धेनकौं
तेयश्चात्तमात्तंमहारणे एवमस्यधनूंष्याजौचिच्छेदसुबहून्युत ५३ ततः शांतनवोभीष्मोबीभत्सुंनात्यवर्त्तत अथैनंपंच
विंशत्याक्षुद्रकाणांसमर्प्पयत ५४ सोतिविद्धोमहेष्वासोदुःशासनमभाषत एषपार्थोरणेक्रुद्धः पांडवानांमहारथः
५५ शरैरनेकसाहस्रैर्मामेवाभ्यहनद्रणे नचैषसमरेशक्योजेतुंवज्रभृताअपि ५६ नचापिसहितावीरादेवदानवराक्ष
साः मांचापिशक्तानिर्जेतुंकिमुमर्त्त्यामहारथाः ५७ एवंतयोः संवदतोः फाल्गुनोनिशितैः शरैः शिखंडिनंपुरस्कृत्यभी
ष्मंविव्याधसंयुगे ५८ ततोदुःशासनंभूयः स्मयमानइवाब्रवीत अतिविद्धः शितैर्बाणैर्भृशंगांडीवधन्वना ५९ वज्राश
निसमस्पर्शाअर्जुनेनशरायुधि मुक्ताः सर्वेत्वविच्छिन्नानेमेबाणाः शिखंडिनः ६० निकृंतमानामर्माणिदृढावरणभेदि
नः मुसलाइवमेघ्नंतिनेमेबाणाः शिखंडिनः ६१ ब्रह्मदंडसमस्पर्शावज्रवेगदुरासदाः ममप्राणानारुजंतिनेमेबाणाः

शिखंडिनः ६२ नाशयंतीवमेप्राणान्यमदूताइवाहिताः गदापरिघसंस्पर्शानेमेवाणाः शिखंडिनः ६३ भुजगाइ
वसंक्रुद्धालेलिहानाविषोल्बणाः समाविशंतिममेर्माणिनेमेबाणाः शिखंडिनः ६४ अर्जुनस्यइमेवाणा नेमेवाणा
: शिखंडिनः कृंतंतिममगात्राणिमाघमासेगवाइव ६५ सर्वेह्यपिनमेदुःखं कुर्युरन्येनराधिपाः वीरंगांडीवधन्वान
मृतेजिष्णुंकपिध्वजं ६६ इतिब्रुवंछांतनवोदिधक्षुरिवपांडवान् शक्तिंभीष्मःसपार्थायपातयामासभारत ६७ तामस्य
विशिखैश्छित्वात्रिधात्रिभिरपातयत् पश्यतांकुरुवीराणांसर्वेषांतवभारत ६८ चर्माथाददेगांगेयोजातरूपपरिष्कृतं
खड्गंचान्यतरंप्रेप्सुर्मृत्योरग्रेजयायवा ६९ तस्यतच्छतधाचर्मव्यधमत्सायकैस्तथा रथादनवरूढस्यतदद्भुतमिवाभवत्
७० ततोयुधिष्ठिरोराजास्वान्यनीकान्यचोदयत् अभिद्रवतगांगेयंमावोस्तुभयमण्वपि ७१ अथतेतोमरैःप्रासै
र्बाणौघैश्चसमंततः पट्टिशैश्चसुनिस्त्रिंशैर्नाराचैश्चतथाशितैः ७२ वत्सदंतैश्चभल्लैश्चतमेकमभिदुद्रुवुः सिंहनादस्त
तोघोरःपांडवानामभूत्तदा ७३ तथैवतवपुत्राश्चराजन्भीष्मजयैषिणः तमेकंपर्यरक्षंतसिंहनादांश्चचक्रिरे ७४
तत्रासीत्तुमुलंयुद्धंतावकानांपरैःसह दशमेहनिराजेंद्रभीष्मार्जुनसमागमे ७५ आसीद्गांगइवावर्त्तोमुहूर्त्तमुदधे
रिव सैन्यानांयुध्यमानानांनिघ्नतामितरेतरं ७६ असौम्यरूपापृथिवीशोणिताक्ताभवत्तदा समंचविषमंचैवनप्रा
ज्ञायतकिंचन ७७ योधानामयुतंहत्वातस्मिन्सदशमेहनि अतिष्ठदाहवेभीष्मोभिद्यमानेषुमर्मसु ७८ ततःसेनामु

५४

खेतस्मिन्नस्थितः पार्थोधनुर्द्धरः मध्येनकुरुसेनानांद्रावयामासवाहिनीं ७९ वयंश्वेतहयात्भीताः कुंतीपुत्राद्धनंजयात् पी
ड्यमानाः शितैः शल्यैः प्राद्रवामरणेतदा ८० सौवीराः कितवाः प्राच्याः प्रतीच्योदीच्यमालवाः अभिषाहाः शूरसेनाः शि
वयोथवशातयः ८१ शाल्वाश्रयास्त्रिगर्ताश्चअंबष्टाः केकयैः सह सर्व्वएतेमहात्मानः शरार्त्ताव्रणपीडिताः ८२ संग्रा
मेनजहुर्भीष्मंयुध्यमानंकिरीटिना ततस्तमेकंबहवः परिवार्य्यसमंततः ८३ परिकाल्यकुरून्सर्वान्शरवर्षैरवाकिरन् निपा
तयतगृह्णीतयुध्यध्वमनुकृंतत ८४ इत्यासीत्तुमुलः शब्दोराजन्भीष्मरथंप्रति निहत्यसमरेराजन्शतशोथसहस्रशः ८५
नतस्यासीदनिर्भिन्नंगात्रेद्व्यंगुलमंतरं एवंभूतस्तवपिताशरैर्विशकलीकृतः ८६ शिताग्रैः फाल्गुनेनाजौप्राक्शिराः प्राप
तद्रथात् किंचिच्छेषेदिनकरेपुत्राणांतवपश्यतां ८७ हाहेतिदिविदेवानांपार्थिवानांचभारत पतमानेरथाद्भीष्मे बभू
वसुमहास्वनः ८८ संपतंतमभिप्रेक्ष्यमहात्मानंपितामहं सहभीष्मेणसर्वेषांप्रापतन्हृदयानिनः ८९ सपपातम
हाबाहुर्वसुधामनुकंपयन् इंद्रध्वजइवोत्सृष्टः केतुः सर्वधनुष्मतां ९० धरणींनसपस्पर्शशरसंघैः समावृतः शरतल्पे
महेष्वासंशयानंपुरुषर्षभं ९१ रथात्प्रपतितंचैनंदिव्योभावः समाविशत् अभ्यवर्षच्चपर्जन्यः प्राकंपतचमेदिनी ९२
पतन्सदृष्टश्चापिदक्षिणेनदिवाकरं संज्ञांचोपालभद्वीरः कालंसंचिंत्यभारत ९३ अंतरिक्षेचशुश्रावदिव्यावाचः समं
ततः कथंमहात्मागांगेयः सर्वशस्त्रभृतांवरः ९४ कालंकर्त्तानरव्याघ्रः संप्राप्तेदक्षिणायनेस्थितोस्मीतिचगांगेय

त्तच्छ्रुत्वावाक्यमब्रवीत् ९५ धारयामासचप्राणान्पतितोपिमहीतले उत्तरायणमन्विच्छन्भीष्मः कुरुपितामहः ९६ तस्य
तन्मतमाज्ञायगंगाहिमवतःसुता महर्षीन्हंसरूपेणप्रेषयामासतत्रवै ९७ ततः संपातिनोहंसाः त्वरितामानसौकसः आ
जग्मुःसहितादृष्टुंभीष्मंकुरुपितामहं ९८ यत्रशेतेनरश्रेष्ठः शरतल्पेपितामहः तेतुभीष्मंसमासाद्यऋषयोहंसरूपिणः ९९
अपश्यंछरतल्पस्थंभीष्मंकुरुकुलोद्वहं तेतंदृष्ट्वामहात्मानंकृत्वाचापिप्रदक्षिणं १०० गांगेयंभरतश्रेष्ठंदक्षिणे [illegible]
नचभास्करे इतरेतरमामंत्र्यप्राहुस्तत्रमनीषिणः १०१ भीष्मःकथंमहात्मासन्संस्थातादक्षिणायने इत्युक्त्वाप्रस्थिताहंसादक्षिणा
मभितोदिशं १०२ संप्रेक्ष्यवैमहाबुद्धिश्चिंतयित्वाचभारत तानब्रवीच्छांतनवोनाहंगंताकथंचन १०३ दक्षिणावर्त्तआदित्येएतन्
मेमनसिस्थितं गमिष्यामिस्वकंस्थानमासीद्यन्मेपुरातनं १०४ उदगायनआदित्येहंसाःसत्यंब्रवीमिवः धारयिष्याम्यहंप्राणा
नुत्तरायणकांक्षया १०५ ऐश्वर्यभूतःप्राणानामुत्सर्गेहिपतेमम तस्मात्प्राणान्धारयिष्येमुमूर्षुरुदगायने ६ यश्चद
त्तोवरोमह्यंपित्रातेनमहात्मना छंदतोमृत्युरित्येवंतस्यचास्तुवरस्तथा ७ धारयिष्येततःप्राणानुत्सर्गेनियतेसति इत्युक्त्वा
तांस्तदाहंसान्सशेतेशरतल्पगः ८ एवंकुरूणांपतितेशृंगेभीष्मेमहौजसि पांडवाःसृंजयाश्चैवसिंहनादंप्रचक्रिरे ९
तस्मिन्हतेमहासत्त्वेभरतानांपितामहे नकिंचित्प्रत्यपद्यंतपुत्रास्तेभरतर्षभ १० संमोहश्चैवतुमुलःकुरूणामभवत्तदा कृ
पदुर्योधनमुखानिःश्वस्यरुरुदुस्ततः ११ विषादाच्चचिरंकालमतिष्ठन्विगतेंद्रियाः दध्युश्चैवमहाराजनयुद्धेदधिरेमनः १२

ऊरुग्राहगृहीतांश्च नाभ्यधावंत पांडवान् स्थवधे शांतनोः पुत्रे हते भीष्मे महौजसि १३ अभावः सहसा राजन्कुरुराजस्य तर्कितः ह
तप्रवीरास्तावयं निकृत्ताश्च शितैः शरैः १४ कर्त्तव्यं नाभिजानीमो निर्जिताः सव्यसाचिना पांडवाश्च जयं लब्ध्वा परत्र च परां गतिं १५
सर्वे दध्मुर्महाशंखान् शूराः परिघबाहवः सोमकाश्च सपांचालाः प्राहृष्यंत जनेश्वर १६ ततस्तूर्यसहस्रेषु नदत्सु सुमहाबलः
आस्फोटयामास भृशं भीमसेनो ननाद च १७ सेनयोरुभयोश्चापि गांगेये निहते विभो संन्यस्य वीराः शस्त्राणि प्राध्यायंत समं
ततः १८ प्राक्रोशन्प्राद्रवंश्चान्ये जग्मुर्मोहं तथापरे क्षत्रं चान्ये भ्यनिंदंत भीष्मं चाभ्यपूजयन् १९ ऋषयः पितरश्चैव प्रशशंसु
सुर्महाव्रतं भारतानां च ये पूर्वे ते चैनं प्रशशंसिरे २० महोपनिषदं चैव योगमास्थाय वीर्यवान् जपञ्शांतनवो धीमान्का
लाकांक्षी स्थितोभवत् २१ इति भीष्मपर्वणि ॥ धृतराष्ट्र उवाच कथमासंस्तदा योधा हीना भीष्मेण संजय बलिना देवकल्पे
न गुर्वर्थे ब्रह्मचारिणा १ तदैव निहतान्मन्ये कुरूनन्यांश्च पांडवैः न प्राहरद्यदा भीष्मो घृणित्वाद्द्रुपदात्मजे २ ततो दुःखत
तरं मन्ये किमन्यत्प्रभविष्यति अद्याहं पितरं श्रुत्वा निहतं स्म सुदुर्मतिः ३ अश्मसारमयं नूनं हृदयं मम संजय श्रुत्वा वि
निहतं भीष्मं शतधा यन्न दीर्यते ४ यदन्यन्निहते तस्मिन्गांगेये जयमिच्छता चेष्टितं कुरुसिंहेन तन्मे कथय सुव्रत ५

पुनः पुनर्नमृष्यामि हतं देवव्रतं रणे नहतो जामदग्न्येन दिव्यैरस्त्रैः सयं पुरा ६ सहतो द्रौपदेयेन पांचाल्येन शिखंडिना संजय उवाच
सायाह्ने निहतो भूमौ धार्त्तराष्ट्रान्विषादयन् ७ पांचालानां ददौ हर्षं भीष्मः कुरुपितामहः सशेते शरतल्पस्थो मेदिनीमस्पृशंस्त
दा ८ भीष्मे रथात्प्रपतिते प्रच्युते धरणीतले हाहेति तुमुलः शब्दो भूतानां समपद्यत ९ सीमावृक्षे निपतिते कुरूणां समितिंजये
सेनयोरुभयो राजन्क्षत्रियान्भयमाविशत् १० भीष्मं शान्तनवं दृष्ट्वा विशीर्णकवचध्वजं कुरवः पर्य्यवर्त्तन्त पाण्डवाश्च विशां
पते ११ खं तमः संवृतमभूदासीद्भानुर्गतप्रभः ररास पृथिवी चैव भीष्मे शान्तनवे हते १२ अयं ब्रह्मविदां श्रेष्ठो ऽयं ब्रह्मविदां व
रः इत्यभाषन्त भूतानि शयानं पुरुषर्षभं १३ अयं पितरमाज्ञाय कामार्त्तं शान्तनुं पुरा ऊर्द्ध्वरेतसमात्मानं चकार पुरुषर्षभः १४
इति स्म शरतल्पस्थं भरतानां महत्तमं ऋषयः स्वभ्यभाषन्त सहिताः सिद्धचारणैः १५ हते शान्तनवे भीष्मे भरतानां पितामहे न
किंचित्प्रत्यपद्यन्त पुत्रास्तव हि मारिष १६ विषण्णवदनाश्चासन्हतश्रीकाश्च भारत अतिष्ठन्व्रीडिताश्चैव ह्रिया युक्ता ह्यधोमुखाः
१७ पाण्डवाश्च जयं लब्ध्वा संग्रामशिरसि स्थिताः सर्वे दध्मुर्महाशंखान्हेमजालपरिष्कृतान् १८ हर्षात्तूर्यसहस्रेषु वाद्यमानेषु
चानघ अपश्याम महाराज भीमसेनं महाबलं १९ विक्रीडमानं कौन्तेयं हर्षेण महतायुतं निहत्य तरसा शत्रुं सुमहाबलसमन्वि
तं २० संमोहश्चापि तुमुलः कुरूणामभवत्ततः कर्णदुर्योधनौ चापि निश्वसेतां मुहुर्मुहुः २१ तथा निपतिते भीष्मे कौरवाणामपि

भि०
३१४

तस्मिन्हते हाहाभूतमभूत्सर्वं निर्मर्यादमवर्तत २२ दृष्ट्वा च पतितं भीष्मं पुत्रो दुःशासनस्तव उत्तमं जवमास्थाय द्रोणानीकमुपाद्रव
त २३ भ्रात्रा प्रस्थापितो वीरः स्वेनानीकेन दंशितः प्रययौ पुरुषव्याघ्रः स्वसैन्यं सविषादयन् २४ तमायान्तमभिप्रेक्ष्य कुरवः प
र्यवारयन् दुःशासनं महाराज किमयं वक्ष्यतीति च २५ ततो द्रोणाय निहतं भीष्ममाचष्ट कौरवः द्रोणस्तत्राप्रियं श्रुत्वा मुमोह भर
तर्षभ २६ स संज्ञामुपलभ्याशु भारद्वाजः प्रतापवान् निवारयामास तदा स्वान्यनीकानि मारिष २७ विनिवृत्तान्कुरून्दृष्ट्वा पा
ण्डवापि स्वसैनिकान् दूतैः शीघ्राश्वसंयुक्तैः समन्तात्पर्यवारयन् २८ निवृत्तेषु च सैन्येषु पारंपर्येण सर्वशः निर्मुक्तकवचाः सर्वे
भीष्ममीयुर्नराधिपाः २९ व्युपरम्य ततो युद्धाद्योधाः शतसहस्रशः उपतस्थुर्महात्मानं प्रजापतिमिवामराः ३० ते तु भीष्मं
समासाद्य शयानं भरतर्षभ अभिवाद्यावतिष्ठन्त पाण्डवाः कुरुभिः सह ३१ अथ पाण्डून्कुरूंश्चैव प्रणिपत्याग्रतः स्थितान् अ
भ्यभाषत धर्मात्मा भीष्मः शान्तनवस्तदा ३२ स्वागतं वो महाभागाः स्वागतं वो महारथाः तुष्यामि दर्शनाद्वोऽहं युष्माकममरो
पमाः ३३ अभिमंत्र्याथ तानेवं शिरसा लंबताब्रवीत् शिरो मे लंबतेऽत्यर्थमुपधानं प्रदीयतां ३४ ततो नृपाः समाजह्रुस्त
नूनि च मृदूनि च उपधानानि मुख्यानि नैच्छत्तानि पितामहः ३५ अथाब्रवीन्नरव्याघ्रः प्रहसन्निव तान्नृपान् नैतानि वीर
शय्यासु युक्तानि पार्थिवाः ३६ ततो वीक्ष्य नरश्रेष्ठमभ्यभाषत पाण्डवं धनंजयं दीर्घबाहुं सर्वलोकमहारथं ३७ धनं

राम०
३१४

जयमहाबाहोशिरोमेतातलंबते शेयतामुपधानंवैयद्युक्तमिहमन्यसे ३८ संजयउवाच समारोप्यमहच्चापमभिवाद्यपितामहं
नेत्राभ्यामश्रुपूर्णाभ्यामिदंवचनमब्रवीत् ३९ आज्ञापयकुरुश्रेष्ठसर्वशस्त्रभृतांवर प्रेष्योहंतवदुर्धर्षक्रियतांकिंपितामह ४०
तमब्रवीच्छांतनवः शिरोमेतातलंबते उपधानंकुरुश्रेष्ठफाल्गुनोपदधत्स्वमे ४१ शयनस्यानुरूपंवैशीघ्रंवीरप्रयच्छमेत्वंहिपार्थस
मर्थोवैश्रेष्ठःसर्वधनुष्मतां ४२ क्षत्रधर्मस्यवेत्ताचबुद्धिसत्वगुणान्वितः फाल्गुनोपितथेत्युक्त्वाव्यवसायमरोचयत ४२ गृहीत्वा
नुमंत्र्यगांडीवंशरान्सन्नतपर्वणः अनुमान्यमहात्मानंभरतानांमहारथं ४३ त्रिभिस्तीक्ष्णैर्महावेगैरन्वगृह्णाच्छिरःशरैः अभिप्रा
येतुविदितेधर्मात्मासव्यसाचिना ४३ अतुष्यद्भरतश्रेष्ठोभीष्मोधर्मार्थतत्ववित् उपधानेनदत्तेनप्रत्यनंदद्धनंजयं ४४ प्राहस
र्वान्समुद्वीक्ष्यभरतान्भारतंप्रति कुंतीपुत्रंयुधांश्रेष्ठंसुहृदांप्रीतिवर्द्धनं ४५ शयनस्यानुरूपंमेपांडवोपहितंत्वया यद्यन्यथा
प्रपद्येथाः शपेयंत्वामहंरुषा ४६ एवमेवमहाबाहोधर्मेषुपरितिष्ठता स्वप्तव्यंक्षत्रियेणाजौशरतल्पगतेनवै ४७ एवमु
क्त्वातुबीभत्सुंसर्वांस्तानब्रवीद्वचः राज्ञश्चराजपुत्रांश्चसंगतान्भिमस्थितान् ४८ पश्यध्वमुपधानंमेपांडवेनाभिसंधितं
शेष्येहमस्यांशय्यायांयावदावर्तनंरवेः ४९ येतदामांगमिष्यंतितेचप्रेक्ष्यंतिमांनृपाः दिशंवैश्रवणाक्रांतांयदागंतादिवाकरः
५० नूनंसप्ताश्वयुक्तेनरथेनोत्तमतेजसा विमोक्ष्येहंतदाप्राणान्सुहृदःसुप्रियाणिच ५१ परिखाःखन्यतामत्रममावसदने

भि०
३१५

नृपाः उपाशिष्येविवर्स्वतमेवंशरशतानितः ५१ उपारमध्वंसंग्रामोद्देस्मुत्तत्पार्थिवाः संजयउवाच उपातिष्ठन्नथोवैद्याः
शल्योद्धरणकोविदाः ५२ सर्वोपकरणैर्युक्ताः कुशलैः साधुशिक्षिताः तान्दृष्ट्वाजाह्नवीपुत्रः प्रोवाचतनयंतव ५३ दानंदत्वा
विसर्ज्यंतांपूजयित्वाचिकित्सकाः एवंगतेमयेदानींवैद्यैः कार्यमिहास्तिकिं ५४ क्षत्रधर्मप्रशस्तांहिप्राप्तोस्मिपरमांगतिं नैष
धर्मोमहीपालाः शरतल्पगतस्यमे ५५ एभिरेवशरैश्चाहंदग्धव्योस्मिनराधिपाः तच्छ्रुत्वावचनंतस्यपुत्रोदुर्योधनस्तव ५६ वैद्या
न्विसर्जयामासपूजयित्वायथार्हतः ततस्तेविस्मयंजग्मुर्नानाजनपदेश्वराः ५७ स्थितिंधर्मेपरांदृष्ट्वाभीष्मस्यामिततेजसः उप
धानंततोदत्वापितुस्तेमनुजेश्वराः ५८ सहितापांडवाः सर्वेकुरवश्चमहारथाः उपगम्यमहात्मानंशयानंशयनेशुभे ५९ ते
भिवाद्यततोभीष्मंकृत्वाचत्रिःप्रदक्षिणं विधायरक्षांभीष्मस्यसर्वएवसमंततः ६० वीराः स्वशिबिराण्येवध्यायंतः परमातु
राः निवेशायाभ्युपागच्छन्सायाह्नेरुधिरोक्षिताः ६१ निविष्टान्पांडवांश्चैवप्रीयमाणान्महारथान् भीष्मस्यपतनेहृष्टानुपग
म्यमहाबलः ६२ उवाचमाधवः कालेधर्मपुत्रंयुधिष्ठिरं दिष्ट्याजयसिकौरव्यदिष्ट्याभीष्मोनिपातितः ६३ अवध्योमानुषै
रेषसत्यसंधोमहारथः अथवादैवतैः सार्द्धंसर्वशास्त्रस्यपारगः ६४ त्वांतुचक्षुर्हणंप्राप्यदग्धोघोरेणचक्षुषा एवमुक्तोध
र्मराजः प्रत्युवाचजनार्दनं ६५ तवप्रसादाद्विजयः क्रोधात्तवपराजयः त्वंहिनः शरणंकृष्णभक्तानामभयंकरं ६६ अनाश्चर्योजयस्ते
षांयेषां

राम०
३१५

त्वमसि केशव रक्षिता समरे नित्यमितिस्य चापि हिते रतः ६७ सर्वथा तां समासाद्य नास्म्यप्यमिति मे मतिः एवमुक्तः प्रभुर्वाचस्म
यमानो जनार्द्दनः ६८ नैवैवेतद्युक्तं नृपवचनं पार्थिवोत्तम इति भीष्मपर्वणि संजय उवाच व्युष्टायां तु महाराज शर्व्वर्यां स
र्वपार्थिवाः पांडवा धार्तराष्ट्राश्च उपातिष्ठन्पितामहं १ ते वीरशयने वीरं शयानं कुरुसत्तम अभिवाद्योपतस्थुर्वै क्षत्रि
याः क्षत्रियर्षभं २ कन्याश्चंदनचूर्णैश्च लाजैर्माल्यैश्च सर्वशः अवाकिरंश्छांतनवं तत्र गत्वा सहस्रशः ३ स्त्रियो वृद्धास्त
था बालाः प्रेक्षकाश्च पृथग्जनाः समभ्ययुः शांतनवं भूतानीव तमोनुदं ४ तूर्याणि समसंख्यानि तथैव नटनर्त्तकाः शि
ल्पिनश्च तथाजग्मुः कुरुवृद्धं पितामहं ५ उपारम्य च युद्धेभ्यः सन्नाहान्विप्रमुच्य ते आयुधानि निक्षिप्य सहिताः कुरुपांडवाः ६
अन्वासत दुराधर्षं देवव्रतमरिंदमं अन्योन्यं प्रीतिमंतस्ते यथापूर्वं यथावयः ७ सा पार्थिवशताकीर्णा समितिर्भीष्मशो
भिता शुशुभे भारती दीप्ता दिवीवादित्यमंडले ८ विबभौ च नृपाणां सा गंगासुतमुपासतां देवानामिव देवेशं पितामहमु
पासतां ९ भीष्मस्तु वेदनां धैर्यान्निगृह्य भरतर्षभ अभितप्तः शरैश्चैव निश्वसन्नुरगो यथा १० शराभितप्तकायोपि श
स्त्रसंपातमूर्छितः पानीयमिति संप्रेक्ष्य राज्ञस्तान्प्रत्यभाषत ११ ततस्ते क्षत्रिया राजन्समाजह्रुः समंततः भक्ष्यानुच्चा
वचान्राजन्वारिकुंभांश्च शीतलान् १२ उपानीतं तु पानीयं दृष्ट्वा शांतनवोब्रवीत् नाद्य तात मया शक्या भोगाः केचन मा
नुषाः १३ अपक्रांतो मनुष्येभ्यः शरशय्यागतो ह्यहं प्रतीक्षमाणस्तिष्ठामि निवृत्तिं शशिसूर्ययोः १४ ॥

पनिः ६

एवमुक्त्वाशान्तनवोविनिर्गत्याकेनपार्थिवान् अर्जुनंद्रष्टुमिच्छामिइत्यभाषतभारत १५ अथोपेत्यमहाबाहुरभिवाद्यपितामहं अतिष्ठत्प्राञ्जलिःप्रह्वःकिंकरोमीतिचाब्रवीत् १६ तंदृष्ट्वापाण्डवंराजन्नभिवाद्याग्रतःस्थितं अभ्यभाषतधर्मात्माभीष्मःप्रीतोधनंजयं १७ दह्यतीवशरीरंमेसंवृतस्यतवेषुभिः मर्माणिपरिदूयन्तेमुखंचपरिशुष्यति १८ वेदनार्त्तशरीरस्यप्रयच्छापोममार्जुन त्वंहिशक्तोमहेष्वासदातुमापोयथाविधि १९ अर्जुनस्तुतथेत्युक्त्वारथमारुह्यवीर्यवान् अधिज्यंबलवत्कृत्वागाण्डीवंव्याक्षिपद्धनुः २० तस्यज्यातलनिर्घोषंविस्फूर्जितमिवाशनेः वित्रेसुःसर्वभूतानिसर्वेश्रुत्वाचपार्थिवाः २१ ततःप्रदक्षिणंकृत्वारथेनरथिनांवरः शयानंभरतश्रेष्ठंसर्वशस्त्रभृतांवरं २२ संधायचशरंदीप्तमभिमन्त्र्यसपाण्डवः पर्जन्यास्त्रेणसंयोज्यसर्वलोकस्यपश्यतः २३ अविध्यत्पृथिवींपार्थःपार्श्वेभीष्मस्यदक्षिणे उत्पपाततत्तोधारावारिणोविमलाशुभा २४ शीतस्यामृतकल्पस्यदिव्यगन्धरसस्यच अतर्पयत्ततःपार्थःशीतयाजलधारया २५ भीष्मंकुरूणामृषभंदिव्यकर्मपराक्रमं [illegible] कर्मणातेनपार्थस्यशक्रस्येवविकुर्वतः २६ विस्मयंपरमंजग्मुस्ततस्तेवसुधाधिपाः तत्कर्मप्रेक्ष्यबीभत्सोरतिमानुषविक्रमं २७ संप्रावेपन्तकुरवोगावःशीतार्दिताइव विस्मयाच्चोत्तरीयाणिव्याविध्यन्सर्वतोनृपाः २८ शङ्खदुन्दुभिनिर्घोषस्तुमुलःसर्वतोऽभवत् ततःशान्तनवस्तृप्तोराजन्बीभत्सुमब्रवीत् २९ सर्वपार्थिववीराणांसन्निधौपूजयन्निव नैतच्चित्रंमहाबाहोत्वयिकौरवनन्दन ३० कथितोनारदेनासि

पूर्वापरमिमंयुधे वासुदेवसहायस्त्वंमहत्कर्मकरिष्यसि ३१ यंचात्महन्तिदेवेन्द्रः सहदेवैरपिध्रुवं विदुस्त्वांनिधनंपार्थसर्वक्षत्रस्यतद्विदः
३२ धनुर्धराणामेकस्त्वंपृथिव्यांप्रवरोनघ मनुष्याजगतिश्रेष्ठाः पक्षिणांपतगेश्वरः ३३ सरितांसागरश्रेष्ठः श्रेष्ठस्त्वमसिधन्विनां
नैवश्रुतंत्वधार्त्तराष्ट्रणवाक्यंमयाश्रमानेविदुरस्यचैव ३४ द्रोणानरामेणजनार्द्दनेनमुक्तः संजयेनापिवाक्यं प्रीतबुद्धिर्हिविमन्त्रक
स्वोदुर्योधनेनानचतच्छ्रद्दधाति ३५ संशप्यतेचैनिहतन्क्षिरायशाख्यातिगोभीमबलाभिभूतः एतत्कृतान्तहवः कौरवेन्द्रोदुर्योधनोदी
नमनाबभूव ३६ तमब्रवीद्धातनवेक्षिवोक्ष्यनिबोधराजन्नभवदीनमन्युः दृष्टंदुर्योधनेनैतत्त्रयथापार्थेनधीमता ३७ जलसुधा
राजनिताशीतस्यामृतगंधिनः एतस्यकर्त्तालोकेस्मिन्नान्यः कश्चनविद्यते ३८ आग्नेयंवारुणंसौम्यंवायव्यमथवैष्णवं ऐन्द्रंपाशु
पतंब्राह्मंपरमेष्ठिप्रजापतेः ३९ धातुस्त्वष्टुश्चसवितुर्वैवस्वतमथापिच सर्वस्मिन्मानुषेलोकेवेत्सैकोहिधनंजयः ४० कृष्णोवादेवकी
पुत्रोनान्योवेदहकश्चन अशक्यः पाण्डवस्तातयुद्धेजेतुंकथंचन ४१ अमानुषाणिकर्माणियस्यैतानिमहात्मनः तेनसत्त्ववतासं
ख्येशूरेणाहवशोभिना ४२ कृतिनासमरेराजन्संधिर्भवतुमाचिरं यावत्कृष्णोमहाबाहुः स्वाधीनः कुरुसत्तम ४३ तावत्पार्थेनसं
ग्रामंधिस्त्वतातयुज्यतां यावन्नतेचमूः सर्वाः शरैः सन्नतपर्वभिः ४४ नाशयत्यर्जुनस्तावत्संधिस्तेतातयुज्यतां यावत्तिष्ठन्ति
समरेहतशेषाः सहोदराः ४५ नृपाश्चबहवोराजंस्तावत्संधिः प्रयुज्यतां नानिर्दहतितेयावत्क्रोधदीप्तेक्षणश्चमूं ४६ युधिष्ठिरो

भी०
३१७

रोतावत्संधिस्तिनात्तयुज्यतां नकुलः सहदेवश्च भीमसेनश्च पांडवः ४७ यावच्चमूं महाराज नाशयंति न सर्वशः तावत्ते पांडवैर्वीरैः
सौहार्दं मम रोचते ४८ युद्धं मदंतमेवास्तु तात संसाम्य पांडवैः एतत्ते रोचतां वाक्यं यदुक्तोसि मयानघ ४९ एतत्क्षमं मदं मन्ये तव वै चै
व कुलस्य च त्यक्त्वा मन्युमुपशाम्यस्व पार्थैः पर्याप्तमेतद्धत्तं तत्फाल्गुनेन ५० भीष्मस्यांतादस्तु वः सौहृदं च जीवंतु शेषाः
साधु राजन्प्रसीद राज्यस्यार्द्धं दीयतां पांडवानामिंद्रप्रस्थं धर्मराजोभिपातु ५१ मामित्रध्रुक्पार्थिवानां जघन्यः पापां कीर्त्तिं प्रा
प्स्यसे कौरवेंद्र ममावसानाच्छांतिरस्तु प्रजानां संगच्छंतां पार्थिवाः प्रीतिमंतः ५२ पिता पुत्रं मातुलं भागिनेयो भ्राता चैव भ्रातरं मैतु
राजन् नचेदेवं प्राप्तकालं वचो मे मोहाविष्टः प्रतिपत्स्यसे बुध्या ५३ तप्स्यसे त्वं तदंताः स्थ सर्वे समामेतां भारतीमीरयन् मिथ
तद्वाक्यं सोत्सृज्य दायादोयं मध्ये राज्ञां भारतोप्येव पित्वा ५४ तूष्णीमासीदुत्सृष्य संतमर्माण्यात्मानं वेदनां संनियम्य संजय उवाच
धर्मार्थसहितं वाक्यं श्रुत्वा हितमनामयं ५५ नारोचयत पुत्रस्ते मुमूर्षुरिव भेषजं इति भीष्मपर्वणि ॥ संजय उवाच ततस्ते पार्थि
वाः सर्वे जग्मुः स्वान्यालयान्पुनः तूष्णींभूते महाराज भीष्मे शांतनुनंदने १ श्रुत्वा तु निहतं भीष्मं राधेयः पुरुषर्षभः ईषदागत
संत्रासः सत्वरः सोपजगाम ह २ स ददर्श महात्मानं शरतल्पगतं तदा जन्मशय्यागतं वीरं कार्तिकेयमिव प्रभुं ३ निमीलिताक्षं तं
वीरं साश्रुकंठस्तदा वृषः भीष्म भीष्म महाबाहो इत्युवाच महाद्युतिः ४ राधेयोहं कुरुश्रेष्ठ नित्यमक्षिगतस्तव द्वेष्योहं ते

राम०
३१७

वसस्वेत्शितिचैनमुवाचह ५ ततःकृत्वाकुरुवृद्धोहिबलिसन्नतलोचनः शनैरुद्वीक्ष्यसस्नेहमिदंवचनमब्रवीत् ६ एहितेविस्मा
लोकास्समुत्सार्यचरक्षिणः पितेवपुत्रंगांगेयः परिरभ्यैकपाणिना ७ एह्येहिमेविप्रतीपस्पर्द्धसेत्वंमयासह यदिमांनाधिग
छेथानतेश्रेयोध्रुवंभवेत् ८ कौंतेयस्त्वंनराधेयोनतवाधिरथःपिता कृतस्त्वंहिमहाबाहोविदितोनारदान्मया ९ कृष्णद्वैपा
यनाच्चैवतच्चसत्यंनसंशयः नचद्वेषोस्तिमेतातत्वयिसत्यंब्रवीमिते १० तेजोवधनिमित्तंतुपरुषंत्वाहमब्रुवं अकस्मात्पां
डवान्सर्वानावंक्षिपसिसुव्रत ११ येनासिबहुशोराजंश्चोदितःसूतनंदन जातोसिधर्मलोपेनततस्तेबुद्धिरीदृशी १२ नी
चाश्रयान्मत्सरात्द्वेषिणीगुणिनामपि तेनासिबहुशोरूक्षंश्रावितःकुरुसंसदि १३ जानामिसमरेवीर्यंशत्रुभिर्दुःसहंभुवि
ब्रह्मण्यतांचशौर्यंचदानेचपरमांस्थितिं १४ नत्वयासदृशःकश्चित्पुरुषेष्वमरोपमः कुलभेदभयाच्चाहंसदापरुषमुक्तवा
न् १५ इष्वस्त्रेचास्त्रसंधानेलाघवेस्त्रबलेतथा सदृशःफाल्गुनेनासिकृष्णेनचमहात्मना १६ कर्णकाशिपुरंगत्वात्वयैके
नधनुष्मता कन्यार्थेकुरुराजस्यराजानोमर्दितायुधि १७ तथाचबलवान्राजाजरासंधोदुरासदः समरेसमरश्लाघीत्वया
सदृशोभवत् १८ ब्रह्मण्यःसत्ययोधीचतेजसाचबलेनच देवगर्भसमःसंख्येमनुष्यैरधिकोयुधि १९ व्यपनीतोद्यमन्युर्मे
यस्त्वांप्रतिपुराकृतः दैवंपुरुषकारेणनशक्यमतिवर्तितुं २० सोदर्याःपांडवावीराभ्रातरस्तेरिसूदन संगच्छतैर्महाबाहो
ममचेदिच्छसिप्रियं २१ मयाभवतुनिर्वृत्तंवैरमादित्यनंदन पृथिव्यांसर्वराजानोभवंत्वद्यनिरामयाः २२ कर्णउवाच

जानाम्येवमहाबाहोसर्वमेतन्नसंशयः यथावदसिमेभीष्मकौंतेयोहंनसत्तमः २३ अवकीर्णोस्त्वहंकुंत्यास्तेनचविवर्द्धि-
तः सुस्कादुर्योधनैश्वर्येननमिथ्याकर्त्तुमुत्सहे २४ वसुदेवसुतोयद्वत्पांडवायदृढव्रतः वसुचैवशरीरंचपुत्रदारंतथायशः
२५ सर्वेदुर्योधनस्यार्थेत्यक्तंमेभूरिदक्षिण मांचैनव्याधिमरणंक्षत्रस्यादितिकौरव २६ कोपिताःपांडवाःनित्यंसमा-
श्रित्यसुयोधनं अवश्यंभावीह्यर्थोयंयोनशक्योनिवर्त्तितुं २७ दैवंपुरुषकारेणकोनिवर्त्तितुमुत्सहेत् पृथिवीक्षय-
शंसीनिनिमित्तानिपितामह २८ भवद्भिरुपलब्धानिकथितानिचसंसदि पांडवावासुदेवश्चविदितामममसंशयः २९
कौंतेयाः पुरुषैरन्यैरितितांश्चोत्सहामहे विजेष्यथरणेपांडूनितिमेनिश्चितंमनः ३० नेच्छकमवस्त्यहंवैरमेतत्सुदारुणं
धनंजयेनयोत्स्येहंस्वधर्मप्रीतमानसः ३१ अनुजानीष्वमांतातयुद्धायकृतनिश्चयं अनुज्ञातस्त्वयावीरयुद्ध्येयमितिमेमतिः
३२ दुरुक्तंविप्रतीपंवारभसाचापलात्तथा यन्मयेहकृतंकिंचित्तन्मेत्वंक्षंतुमर्हसि ३३ भीष्मउवाच नेच्छकमवस्त्य-
हुंवैरमेतत्सुदारुणं अनुजानामिकर्णत्वांयुध्यस्वस्वर्गकाम्यया ३४ विमन्युर्गतसंरंभः कृतकर्मारणेस्मह यथाशक्तिय-
थोत्साहंसतांवृत्तेषुवृत्तवान् ३५ अहंत्वामनुजानामियदिच्छसितदाप्नुहि क्षत्रधर्मजितांलोकानवाप्स्यसिधनंजयात् ३६
युध्यस्वनिरहंकारोवलवीर्यव्यपाश्रयः धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते ३७ प्रशमेहिकृतोयत्नः सुमहान्सुचि-
रंमया नचैवशकितः कर्तुंकर्णसत्यंब्रवीमिते ३८ संजयउवाच इत्युक्तवतिगांगेयेअभिवाद्यमहारथः राधेयोरथमा-

भी०

३१९

हृद्यप्रायान्नवसुंतंप्रति ३९ इतिश्रीमहाभारतेशतसहस्रांसंहितायांवैय्यासिक्यांभीष्मपर्वणिभीष्मपर्वसमाप्तं

शुभमस्तु ॥ ॥ संवत १८ ३० मीतिवैशाषसुदि ६ वासरे भौमपुस्तकिसमाप्तः लिषतंचीमनलालकायथ

८८

एम०

३१९

